SHETH GOKULBHAI MULCHA



शेठ गोकुळभाई मुळचंद.

प्रस्तावना ।

—:०:—

अवनतान् विधातुः समुन्नतान् समुन्नतिपद्धति प्रापयितुश्चावनतान् समयस्य वैचित्र्यं, वैलक्षण्यं, दुरतिक्रमत्वं च सुप्रतीतमेव । एकस्मिन् समयेऽर्हद्धर्मोऽहर्मणिः प्राप्नुवन् समुदयम्, संहरन्नितरदर्शनतेजांसि, प्रतिघ्नन् नास्तिकोलूकेषु हर्षप्रकर्षम्, विनाशयन् जनिष्मतां निविडतराणि तमांसि, प्रकाशयंश्च परितः स्याद्वादमहामुद्राव्यवस्थितं यथावस्थितं समस्तवस्तुनिकुरम्बम्, प्रमाणप्रकरकरनिकरैर्विश्वस्मिन्नपि विश्वे प्रचुरं प्रासरीसरीत् । एतद्दर्शनानुयायिनो निष्प्रतिमप्रतिभाभरमाबिभ्राणाश्चाचार्यवर्या अपि सम्यक् समधिगम्य सकलशास्त्रपारावारपारदृश्वताम्, अक्षुण्णं लक्ष्यीकृत्य दुष्पथप्रवेशनिषेधनेन सत्पथनिवेदनरूपां परोपकारैककर्त्तव्यताम्, युक्तियुक्तमुपपाद्य च तटस्थीभूतभूपभूयिष्ठगोष्ठीषु एकान्तवादापवादपूर्वकं दुस्तर्कसहस्रैरपि दुर्धर्षस्याऽनेकान्तकान्तसिद्धान्तस्यैव निसर्गरमणीयतया सर्वथोपादेयत्वम्, बहुशो परास्यन्त मिथ्यात्वभ्रान्ताध्मातस्वान्ता एकान्तवादिनः कुतीर्थ्यान् । उद्घोषयामासुश्च लब्धजयश्रियः प्रतिपक्षसाक्षिणां समक्षमर्हच्छासनस्य न्यायप्राप्तं सर्वत्र विजयडिण्डिमम् । किं बहुना ? तत्प्रौढताप्रतापेनैवैकान्तदर्शनानुयायिभिरपि प्रतिपक्षोपप्रक्षिप्ताक्षुण्णविकल्पानल्पदोषप्रतिक्षिप्यमाणैरनिरीक्षमाणैश्चोपायान्तरसद्भावं अक्षरान्तरैर्वा, भङ्ग्यन्तरैर्वा, रीत्यन्तरैर्वा शरणीकृत एवाऽसत्परमसिद्धान्तो भगवान् स्याद्वादवादः । अत्र च निःसंशयं संवदत्सु नैकेषु स्वपराम्नातिष्वनिम्नेष्वाम्नायेषु नास्ति कथंकथिकतायाः कथं कथमपि प्रवेशलेशावकाश इति जानतेतिहासप्रतिभासानां पटुतर्कीतर्कपरिकर्कशसंपर्काणां चेदानींतनानामपि प्राज्ञानां प्रकटमेव प्रज्ञामार्गमवगाहते ।

एवं च चातुर्वेदमहोदधिभिर्जैनाचार्यवर्यैः संसाधयद्भि सम्यग्

निजं लक्ष्यम्, अवगणयद्भिर्दुष्टकष्टदाऽरिष्टपटलम्, प्रकाशयद्भिः सर्वत्र जिनेन्द्रोपदिष्टानि शुद्धतत्त्वानि, सुदूरमुत्सारयद्भिश्च दुष्कर्मकर्दमसंगसंगतं मिथ्यात्वसंसर्गम्, वहु वहूपकृतं तात्कालिकेष्वस्तोकलोकेष्विति अत्र केन किं वक्तव्यम्? । भविष्यन्त्यपि जनसंहतिर्मा भूदनेन सत्सिद्धान्तपीयूपरसेन वञ्चितेति सद्भावनाभावितान्तःकरणैश्च तैर्महीयांसं समयव्ययमपि गरीयांसं च प्रयासमपि विना संकोचेन विनिर्मायाऽगण्यानि तत्तद्विपयसुविवेचकानि शास्त्राण्यपि निरमायिपत ।

किन्तु कालवैपम्येण दुर्भाग्यलसितेन वा दूरे तान्याचार्यरत्नानि, तिष्ठतु संपूर्णानां ग्रन्थानां दर्शनदुराशा, नामान्यपि तेपां दुर्ज्ञानानि समजायन्त । तत्तत्समयसमुद्भूतभूपापसदोपद्रवैः, अन्यैश्चापि परस्परद्वेपेर्ष्याव्यामोहादिसमुत्थैः कारणैस्तेपां ग्रन्थरत्नानां महानंशः प्रणाशं समशिश्रियत् । महाभाग्यवशेनाऽवशिष्टोऽल्पीयानप्यंशस्तादर्शीं दुर्दशां मा लब्ध, भाण्डागारेष्वेव पतितश्च कृमिभोज्यतां मा प्रापदिति तदर्थो यदि शीघ्रमेव सुयोग्यः प्रयत्नः स्यात्, सर्वोऽपि च जनसमूहस्तल्लाभं सुखं गृह्णीयात्, किमन्यत् कर्तव्यं शिष्टतामाश्रयेत्? । परंतु यत्र केचिज्जैननामधेयधारिणोऽपि सारासारादिविचाररहितत्वेन ग्रन्थोद्धारं वा तत्प्रकाशोद्भूतामुन्नतिं वाऽनिच्छवोऽसहिष्णवो द्विपन्तश्च तदुन्नतिं कुर्वाणैरपि सज्जनैर्विघ्नसंघातं संघटयन्ति । यत्र च केचन ग्रन्थोन्नतिमनिन्दन्तोऽपि, इच्छन्तोऽपि वाऽऽदर्शपुस्तकादिसाहाय्ये शक्तिमन्तोऽपि कर्मदोपवशीभूतत्वेन स्वशक्त्यामपि सहायतां विधातुं वहु संकुचन्ति । यत्र पुनः कतिपये श्राद्धास्तदुन्नतौ दत्तावधाना महता द्रव्यव्ययेन नातिशुद्धतया पुस्तकप्रकाशं प्रकुर्वन्तोऽपि महामोहापहतात्मानोऽमूल्यमवितीर्य मूल्येनापि चाऽविक्रीय मुद्रितान्यपि पुस्तकानि कपाटसंपुट एव कीटभोज्यतां नयन्तस्तद्विपये गजस्नानमेवाऽनुकुर्वन्ति । तत्र को नाम ग्रन्थोद्धारः?, का नाम शास्त्रसमुन्नतिः?, किं नाम शुभपरिणामित्वम्?, मल्लियृन्देष्विव यथा तथा पेट्टमानेपु तेपु हतैव शास्त्रोन्नवावस्था, व्यर्थैव पुण्योदर्कसंभा-

चना, विनष्टप्रायैव च शासनोदयशुभाशैलवसीयते ।

कतिचित्तूद्वहन्तोऽपि ग्रन्थसंशोधनसाहसम्, अदधतस्तद्योग्यज्ञानसद्भावम्, कुर्वन्तोऽशुद्धतया पुस्तकसंपादनम्, प्रकटयन्तस्तत्तस्थलेषु ग्रन्थानामसन्त्यपि दूषणानि, अधिक्षिपन्तश्च तद्द्वारा निर्दोषानपि तत्कर्तृन् महाचार्यान्, ज्ञानमात्रागर्विता इव सत्यापलापेनाऽसत्यप्रकाशेन च भ्रान्तिं नयन्ति जनसमाजम् । संवदति चैतत् श्रीपरिशिष्टपर्वाऽपि । तथाहि–अयं ग्रन्थः कलिकालसर्वज्ञश्रीहेमचन्द्रप्रभुभिः प्रणीतः, येषां व्याकरण–न्याय–साहित्य–काव्य–योग–नीति–स्तुति–च्छन्द.–कोशादिसर्वविषयकस्वतन्त्रशास्त्रविनिर्मातृणां वैयाकरणमुख्यत्वेन, तार्किकसिंहत्वेन, सैद्धान्तिकशिरोरत्नत्वेन, कविचक्रचक्रवर्तित्वेन च परितो विश्रुता सुकीर्तिः समस्तमपि जगत् संव्याप्याऽद्यापि संस्थिता । अधिकृतमत्र श्रीमहावीरदेवानन्तरजातानां श्रीजम्बूस्वामिप्रभृतीनां यथाजातमितिवृत्तम् । प्रकाशितश्चायं कलिकातास्थेन एसियाटिक्समाजेन । संपादकश्चास्य H Jacobi पण्डितः । स च तत्प्रस्तावनायां कर्तृविशिष्टप्रशंसानन्तरमेवमुल्लिखति–

" To the fact that Hemachandra has used Prâkrit originals, must be ascribed his occasional use of Prâkriticisms, e g, अवत्[1], XII, 320 used in the sense of उतत्[2], and I, 67, 136, XIII, 104 उतत्, for अवत् just as in Prâkrit ओयरइ and उत्तरइ are interchangeable The word पदानुसारिन् in XII, 137 is probably a wrong translation of Prâkrit पयाणुसारी which means पदानुस्मारिन्, *compare* जाईसर = जातिस्मर The name वीरमती in II, 82 is a Prākriticism for वीरवती Unusual, if not against grammar, are the forms मातरपितराभ्या in III, 130, the adjectives चिकीर्ष् in VII, 9 and प्रतिचिकीर्ष् in VIII 453 instead of चिकीर्षु and प्रतिचिकीर्षु, the use of the simplex व्यतिइ instead of the causative Another proof of Hemachandra's careless and hasty composition is his rather too frequent use of mean-

१ अवतृ स्यात् । २ उततृ युक्तम् ।

ingless words to fill up an otherwise too short verse His verses frequently bear the marks of rapid versification like those of the Latin poet who

IN HORA SAEPE DUCENTOS,
UT MAGNUM, VERSUS DICTABAT STANS PEDE IN UNO

Some verses contain metrical faults in श्रेष्ठिन्दृपभदत्तस्य, I, 264, किं बहुनार्थपरासु II, 329, तौ मत्ता प्रीणयितु VI, 49 सम्यगुपलक्षयेह, XI 38, कादविकानयादिशत्, XI, 110, मालवकैशिकासुल्य०, XIII, 59 the second and third syllables of the *pada* are short, though this is expressly forbidden by writers on metrics In I, 288, II 251, 484, III, 9, VIII, 370, XIII, 73 an enclitical monosyllabic word stands after the caesura against the rule The third *pada* in III, 214 ललिताङ्गवत्तथाचास्ति consists of nine syllables, such *padas* of nine syllables are not unfrequent in epical poetry, but classical poets avoid them There are some nicer rules on the Vipulā form of the 'sloka which though not laid down in native works on metrics are always observed by Mahākavis Hemachadra's verses set these rules aside nearly as often as they conform to them, e g, in III, 145 the first *pada* is correct but the third is bad "

यद्यप्ययं लेखः सर्वथा प्रमाणाऽस्पर्शित्वेन विद्वत्सदस्सु कथञ्चिदप्यादरं नैवावहति इत्युपेक्षाक्षेत्रमेव प्रेक्षाणाम्, तथाऽप्यभ्युपगमवादेनापि तस्याऽसत्यता सप्रमाणं प्रदर्श्यमाना सन्दिग्धानां विदग्धानां संशयापोहकत्वेनाऽनद्यमुपकर्त्री, इति प्रतिपाद्यते–

पूर्वं तावदत्र ग्रन्थे प्रयुक्तानां केषाञ्चिच्छब्दानां प्राकृतप्रयोगसादृश्यदर्शनेन प्राकृतमूलत्वसंस्थापनमेव विचारासहम्, अतिप्रसङ्गात् । अतिप्रसङ्गश्च संस्कृतप्राकृतभाषयोः कार्यकारणभावेन बहुषु स्थलेष्वैक्यतया तत्सादृश्यवतां शब्दानां कुत्रापि संस्कृतग्रन्थेऽनिवार्यत्वेन सर्वेष्वपि संस्कृतपुस्तकेषु प्राकृतमूलत्वापत्तेः । किं खलु सत्यानाम प्राकृतेऽपि देवादिशब्दानां समानत्वेन संस्कृते तत्प्रयोगं निषेधति ?, तत्प्र-

योक्तार च प्राकृतशब्दव्यवहारित्वेन दूषयति ?, दूषयन् वा कथमपहास्यता न याति ? ।

प्रकृतौ भव, प्रकृतेरागत वा प्राकृतम्, प्रकृतिश्चैतस्य सस्कृतमिति सर्वानुमतसिद्धान्तेन प्राकृतस्याऽपि मूल सस्कृतमेवेतिन्याय्यम्, तथा चाऽसति प्रतिबन्धके (विशेषनियमे) सस्कृतानुसारिण्येव प्राकृतेऽपि शब्दार्थव्यवस्था, इत्युत्पूर्वकस्यावपूर्वकस्य च तृधातोर्विशेषनियम विनापि प्राकृते एकार्थतामङ्गीकुर्वन्, तदन्यथानुपपद्यमानत्वेन सस्कृतेऽपि तत्तत्पूर्वकस्य तृधातोर्न्यायप्राप्ताया समानार्थताया प्रयोग कुर्वन्त कर्तार च दूषयन् प्रस्तावक किञ्चित् पौर्वापर्यमपि न पर्यालोचयतीति चित्रम् । किञ्च, हेमचन्द्राचार्यस्यैव स्वतन्त्रमहाव्याकरणप्रणेतृत्वेन, अनेकाप्रतिमकोशकर्तृत्वेन च सर्वैरप्यङ्गीकृतप्रामाण्यतया तत्प्रयुक्तप्रयोगाणा स्वत सिद्धैव प्रमाणता, इति नात्राऽन्यानि प्रमाणान्यपेक्ष्यन्ते, तथापि 'तुष्यतु दुर्जन ' इति न्यायेनाऽनेकै सुविश्रुतकविवरैर्हेमचन्द्राचार्येणेव बहुश प्रयुक्तयोरेतयोर्विवादास्पदीभूतयो प्रयोगयो कानिचिदुदाहरणानि प्रदर्श्यन्त—

"वनान्तपर्यन्तमुपेत्य सस्पृह क्रमण तस्मिन्नवतीर्णदृक्पथे " ।

नैष-१-७५

" स्वर्गिवर्ग इव नाकिविमाना–दुत्ततार भुवि हीरकुमार "

हारसौ-५-९

" विमानैर्व्योमतस्तूर्णमुत्तीर्णा वर्णिनीवृता " वासु १-६५३

" खिन्ना इवोत्तेरुरमी भ्रमिभ्रमाच्चन्द्रार्यमस्यन्दनगा नभस्तलात् "

विजय-१० २०

यदपि 'प्राकृतस्य पयाणुसरीति शब्दस्य पदानुसारीति यत् कर्त्राऽनूदितम्, तदसत्यमेव, किन्तु पदानुस्मारी इत्यव स्यात्, यथा जाईसरऽजातिस्मर' इति प्रोक्तम्, तदपि एतस्य प्राकृतानुवादरूपत्वेनाऽस्वीकारादेव निरस्तम् । तदङ्गीकारेऽपि वा नेतत् कथमपि कर्तुर्दूषणमाधातुमलम्, सस्कृतस्य पदानुसारिशब्दस्याऽपि प्राकृते पया-

णुसारीतिरूपनिष्पादनात्; अर्थतोऽपि पादानुसारीति कर्त्रा प्रयुक्तस्यैवाऽत्र संगतत्वात्; अन्यत्राऽपि–

"खीसेइव जस्स ताराणुसारिणिग्गयकलङ्कवलएण।"[2]

"गूढोयरतामरसाणुसारिणी भमरमालव्व।"[3]

इत्यादिषु बहुश: कविवरै: प्रयुक्तेषूपलभ्यमानस्य अणुसारिशब्दस्य संस्कृते प्रस्तुतानुसारमनुसारिरूपेणैवाऽनुवादस्य दर्शनाच्च। यथा 'अणुसरेइ=अनुसरति, अहिसारण=अभिसारण' इत्यादीनि। न हि संस्कृतस्याऽनुसरतिरूपस्यैव, अभिसारणशब्दस्यैव च प्राकृते 'अणुसरेइ, अहिसारणेति भवितुमर्हति, किन्तु प्रस्तावकानभिमतं अनुसरति, अभिसारणेत्याद्यपि। तथा च प्राकृतद्व्याश्रयमहाकाव्ये–

"किस्सा तिस्सा जिस्सा सो जुवईए अणुसरेइ।"[4] ४–७४.

गौडवधेऽपि–

"अँहिसारणम्मि तं रिउसिरीए णिसियासिघडियपडिबिम्बो।"[5] ७१२.

न चात्र कथमपि अनुसरति अभिसारणं चेति प्रस्तावकानुमतं घटामाटीकते, प्रस्तुतासङ्गतत्वात्, तट्टीकाकाराभ्यामपि अनादृतत्वेन तिरस्कृतत्वाच्च। एतेनात्र प्रस्तावकप्रयुक्तं जाईसरेत्येकदेशीयमुदाहरणमप्यकिञ्चित्करत्वेन सुतरां प्रत्युक्तम्। इत्यमुमतीव सुज्ञानं विषयमजानन्, निर्दोषेऽपि दूषणं प्रदर्शयन् प्रस्तावक: कियत् साहसं प्रकटयतीति विदुषामेव विचारगोचर:।

यदपि 'वीरवतीति प्रयोज्ये प्राकृतानुसारेण वीरमतीत्यशुद्धरूपं

---

१ "नो ण" (हेम-प्रा-१।२२८) इति नस्य णत्वे "कगचज" (१।१७७) इति दस्य लुकि "अवर्ण-" (१।१८०) इत्यनेनाकारस्य यत्वे साति।
२ गौडवधे १०६४, "क्षिप्यत इव कम्प्यत इव यस्य तारानुसारिनिर्गतकलङ्कवलयेन" इति तट्टीका। ३ गौडवधे १८, "गूढोदरतामरसानुसारिणी भ्रमरमालेव" इति टीकायाम्। ४ "कस्याः यस्याः तस्या युवतिमनुसरति ' पृष्ठानुयायी भवतीति भाव " इति टीका।
५ "अभिसारणेऽभिसरणकाले त्वं रिपुश्रिया निशितासिघटितप्रतिबिम्ब " इति टीकायाम्।

कर्त्रा प्रयुक्तम्' इत्युक्तम्, तदपि भ्रान्तिमूलमेव, ऊर्म्यादिपाठेन वीरशब्दस्य मतोर्मकारस्य वत्वनिषेधेन तस्य (वीरमतीत्यस्य) सूपपद्यमानत्वात्, गणपाठस्य चेष्टविषयत्वेन संज्ञायामेव तेन वत्वनिषेधात् "ह्रिणीयते वीरवती न भूमिः" इत्यादौ वत्वस्याऽपि निष्पत्त्या वाधाभावाच्च ।

यदर्थं भिन्नमेव व्याकरणसूत्रम्, न ते महाकविभिरप्रयोज्यतां कदाप्यर्हन्ति, यथाऽमावास्यादि, भिन्नमेव चैतत्सिद्ध्यर्थं "मातरपितरं वा" (३।२।४७) इति सिद्धहेमव्याकरणस्य "मातरपितरमुदीचाम्" (६।३।३२) इति पाणिनीयस्य च सूत्रम्; इति मातरपितरस्य काव्यप्रयोगयोग्यत्वे निर्दोषं निष्पन्नेऽपि,

"पितरौ मातापितरौ मातरपितरौ पिता च माता च"

"मातापितरौ पितरौ मातरपितराविति प्रसूतातौ"

"मातापितरौ पितरौ मातरपितरौ प्रसूजनयितारौ"

इत्यादिषु च बहुषु कोशेष्वपि तत्प्रामाण्यं संवदत्सु मातरपितरशब्दस्य कर्त्रा प्रयुक्तस्य प्रयोगानर्हतां प्रजल्पन् प्रस्तावकः कथमिव प्रमाणतामङ्गीकुर्यात्?, कथं च तस्याऽप्यभिमतानां बहुशो दृश्यमानानां धवलार्जुनादिशब्दानामपि प्रयोगानर्हतां वदतो वदावदस्य वर्क्म वक्रीकुर्यात्?। एतेन चिकीर्षति प्रतिचिकीर्षतीति कर्त्रर्थे क्विपि सुष्ठु निष्पद्यमानयोः,"हास्यास्पदं काव्यचिकीः कवीनाम्" इत्यादिषु चोपलभ्यमानयोश्चिकीर्ष्–प्रतिचिकीर्ष्शब्दयोरप्यप्रयोज्यतादूषणं नितरां निराकारि ।

'व्यतिपूर्वकस्य इधातोः प्रयोक्तृरूपे व्यवहर्तव्ये णिवर्जितमेव तत् कर्त्रा व्यापारि, लब्ध्यामेव च वचनरचनायां कर्तव्यायां गुर्वी साऽकारि' इति निर्भयमुल्लिखंस्तत्स्थलमपि चाऽनिवेदयन् प्रस्तावकः

---

१ भट्टिकाव्ये द्वितीये सर्गे–३८ । २ अभिधानचिन्तामणौ मर्त्यकाण्डे २२४ । ३ वैजयन्त्यां पृ० १७६ पं० ९४ । ४ अमरकोशे मनुष्यवर्गे– ३७ । ५ सम्यक्त्वसंभवमहाकाव्ये १–१४ ।

साहसिक इव निरूपमेवाऽऽचरन् कथ प्रतिवचनीय ? । न हि तत्स्थलमात्रस्याऽप्यनिर्णीतो निर्मूलमेव साधनवचनं वा दूषणाभिधान वा भूषणाय भवति । यदि चेदानीमपि प्रस्तावकस्तत्स्थाननिर्देशपूर्वक स्वमतमभिधास्यते, तद्धस्मृदेयमस्मल्लेखिनी सयुक्तिकोक्तिक्रमेण सुस्पष्टमेव योग्योत्तराय प्रयतिष्यते, इत्यास्ता तावत् ।

छन्द शास्त्रसंबन्धे वदता प्रस्तावकेन कर्त्रा प्रयुक्तानि यानि च्छन्दासि दुष्टत्वेनाऽभिहितानि, तानि निःशेषाण्यप्यत्र श्रीमतो हेमचन्द्राचार्यस्याऽपि स्वय छन्दोऽनुशासनविनिर्मातुरन्यस्येव स्वतन्त्रप्रमाणत्वेनाऽवश्यादरणीयतया दूषणान्येव न भवन्ति, किमङ्ग ! तद्विवेकप्रयत्नेन ? । तथापि "येन केन प्रकारेण सतोष जनयेत् सुधी" इत्युक्तिं समाश्रित्य प्रस्तावकतोषपोषायाऽन्यैरपि च्छन्द - शास्त्रैस्तत्सत्यता प्रकटीक्रियते–पूर्वं तावद् "श्रेष्ठिऋषभदत्तस्य" इत्यादिपद्के द्वितीयतृतीयाक्षरलघुत्वेन "न प्रथमात् स्नौ" (पि०सू०५।१०) इति नियममालम्ब्य यद् दूषणमुपन्यस्तम्, तच्छन्द शास्त्रानवगाहफलमेव, यतोऽय नियमोऽनुष्टुब्भेदविशेषे वक्त्रनामन्येव समस्ति, न त्वन्यत्र, "पादस्यानुष्टुब् वक्त्रम्" (पि०सू० ५।९) इत्येतदुत्तरमस्य नियमस्य प्रतिपादनेन तस्यैव तत्रानुवृत्ते । तथा च तट्टीकाकार "न प्रथमात् स्नौ" (पि०सू० ५।१०) इत्यस्यैव वृत्तौ– "अत्र वक्त्रजातौ पादस्य प्रथमाद् वर्णादूर्ध्वं सगणनगणौ न कर्तव्यौ" इति । न च कर्त्रा सर्वत्र वक्त्रच्छन्दास्येव व्यवहृतानि, किन्तु तन्नियमरहितान्यन्यान्यपि, महाकाव्यत्वेनाऽपरापरच्छन्दसामुपनिबन्धस्य समुचितत्वात्; इति क्व नाम दूषणदुस्थता ? । न चानुष्टुबिति पदस्येव वक्त्रमिति पदस्यापि "श्रौ न्तौ च" (पि० सू० ५।१९) इति सूत्र यावदनुवृत्ते, तदनन्तर चाष्टाक्षरजातेरभावेन वक्त्र एवाष्टाक्षरजाते पर्यवसिततया श्रीहेमचन्द्रव्यवहृतानामप्यष्टाक्षरवृत्ताना नितरा वक्त्रत्वापत्ति, तथा च सिद्धमेव तद्दूषणसिद्धिरूप समीहितमिति वक्तु शक्यम्, तदुत्तरञ्च तदभावेऽपि तत्पूर्वत्र "ग्लिति समानी" (पि० सू० ५।६) इत्यादिसूत्रविनिर्दिष्टानामष्टाक्षरवृत्ताना भूयसा

सद्भावात् "वितानमन्यत्" (पिं० सू० ५।८) इति सूत्रोक्ते च्छन्दसि सुतरां तत्समावेशेनोक्तदूषणस्य दूरोत्सारितत्वात्। अत एव तत्र (पिङ्गलशास्त्रे) "वितानमन्यत्" इति सूत्रवृत्तौ प्रदर्शितम्–

"अन्यदतो हि वितानं श्वेतपटेन यदुक्तम्।
चित्रपदापि च भौ गौ तेन गतार्थमिवैतत्" ॥१॥

इत्युदाहरणमपि संगच्छते, अन्यथाऽत्राऽपि द्वितीयतृतीयाक्षरलघुत्वेनाऽनिवार्यो दूषणप्रसङ्गः, अनिष्टं चैतत् प्रस्तावकस्याऽपि, नियामकाभावेन संपूर्णेऽपि शास्त्रे दुष्टत्वस्य प्रसक्तेः। न चैतेन यत्रैव वृत्ते भगणद्वयं गुरुद्वयं च क्रमेणोपलभ्यते, तत्रैव तद्दूषणाभावः, न त्वन्यत्र, इत्यपि वचनं चारुतामञ्चति। "वितानमन्यत्" (पिं० सू० ५।८) इत्यत्र अन्यदिति व्यापकनिर्देशेन समानीप्रमाण्यौ व्यतिरिच्य सर्वस्याऽप्यष्टाक्षरच्छन्दसो ग्रहणात्, इतरथा "वितानं भौ गौ" इत्येव सूत्रं कुर्यात्। न चेदमास्माकमेवाऽऽम्नातम्, तट्टीकाकारेणाऽप्येवमेव प्रतिपादनात्, तथाहि–" किं च 'वितानमन्यत्' इति ब्रुवन् सूत्रकारो वितानस्यानेकप्रकारतां दर्शयति, अन्यथा 'वितानं भौ गौ' इत्येव विदध्यात्" इति। नन्वेवमप्येकस्मिन्नेव सर्गे क्वचन वक्त्रवृत्तम्, कुत्रचिद् विपुलाच्छन्दः, क्वचिच्च वितानमिति भिन्नभिन्नवृत्ताङ्गीकारेऽस्य महाकाव्यत्वक्षतिः, "पद्यं प्रायः-"[1] इति महाकाव्यलक्षणे सर्गान्त्यवृत्तसादृश्यप्रतिषेधेन तदतिरिक्तानां सर्गान्तःपातिना वृत्तानां समानतायाः सामर्थ्याल्लाभात्, विशेषनिषेधस्य शेषाभ्यनुज्ञानान्तरीयकत्वात्, इति चेद्। मैवम्, वक्त्रविपुलयोरिव वितानस्याऽप्यनुष्टुबन्तर्भावेन तेषां सर्वेषामप्यनुष्टुप्तया समानत्वेन महाकाव्यलक्षणसंसिद्धेः; अन्येष्वपि सर्वेषु महाकाव्येष्वनुष्टुप्सर्गे व्यवहृतवक्त्राद्यनेकभेदे एवमेव लक्षणसमन्वयात्। अनुष्टुप्त्वं च वितानस्य "पादस्यानुष्टुब् वक्त्रम्" (पिं० सू० ५।९) इत्यतः सूत्रात् सिंहावलोकितन्यायेनाऽनुष्टुबधिकारात्, इतरथा "ग्लिति समानी" (पिं० सू० ५।६)

१ श्रीहेमचन्द्रप्रणीतकाव्यानुशासनेऽष्टमाध्याये पृ० ३३०।

इत्यस्मिंस्ततोऽपि पूर्वसूत्रेऽष्टाक्षरनियमाभावेन व्यवस्थाहानिप्रसङ्गात्, तट्टीकायामप्यस्याशयस्योपलभ्यमानत्वाच्च ।

यच्च ततोऽनन्तर काव्यपद्के चादे. पादादित्व क्वचन पादान्त्यत्व च दूषणमभ्यधित प्रस्तावक, तदप्ययुक्तम्, पादादौ चाद्यप्रयोगनियमस्य प्रायिकत्वात् । प्रायिकत्व च तस्य "पादादौ न च वक्तव्याश्चादय प्रायशो बुधै" इत्यादितन्नियमप्रतिपादक एव सूत्रे प्रायश शब्दस्य साक्षाल्लक्ष्यमाणत्वात् । तथापि तन्नियमस्य सार्वत्रिकत्वाङ्गीकारे

"रे रौक्षसा !कथयत क्व स रावणो यो रत्न रवीन्दुकुलयोरपहृत्य नष्ट."
"आ !सर्वत कैरवमापिबन्ति ज्योत्स्ना कषायमधुरा मधुना चकोरा"
मुँद्राऽर्पितैकाङ्गुलिसञ्ज्ञयैव मा चापलायेति गणान् व्यनैषीत्"
"क्रियासु युक्तैर्नृपचारचक्षुषो न वञ्चनीया प्रभवोऽनुजीविभि"
"नै क्षोणीभङ्गभीरु कलयति च शिर कम्पन तन्न विद्म"
"चरणगतसखीवचोऽनुरोधात् किल कथमप्यनुकूलता चकार"

इत्यादावपि दूषणप्रसङ्गात्, तत्प्रसङ्गसङ्गमस्य च प्रस्तावकस्याऽप्यनिष्टत्वात् । किञ्च, "चादय प्रायशो बुधै" इति पादादावेव चादिनिर्देश कुर्वन्नालङ्कारिकशिरोमणि. स्वय ज्ञापयति–चतुर्थपादादौ स्वरादिपदसहिताश्चादयो नैव दोषायेति सहृदयहृदयसवेद्यमर्थम्, इतरथाऽत्रापि पादादावेव चादिनिर्देशेन दूषणप्रसञ्जनस्य निवारयितुमशक्यतया "प्रायशश्चादयो बुधै" इत्येव वक्तव्यस्योचितत्वात् । इति सूक्ष्मेक्षिकयाऽपि कुतस्तत्र दूषणावकाश ? । पादान्ते प्रयुक्तस्य तु चादेर्दूषणत्व पूर्वोक्ततन्नियमादौ नैवोपलभ्यत इत्यस्वीकारादेव तिरस्कृतम् । तद्धुररीकरणेऽपि वा

---

१ तथाहि– पादस्यानुष्टुब् वक्त्रम्' (पि० सू० ५।९) इत्यत सूत्रात् सिंहावलोकितन्यायेनाऽनुष्टुब्ग्रहणमनुवर्तते । तेनाऽष्टाक्षर पादो यावद्धि" इत्यादि । २ वाग्भटालङ्कारे १ १७ । ३ वाग्भटालङ्कारे तस्यैव श्लोकस्य सिंहदेवगणिर चिताया टीकाया प्रायश शब्दस्यैव चारितार्थ्ये निदर्शनम् । ४ कु० स० ३–४१। ५ कि० १–४ । ६ नैष० १२ ३९। ७ शिशु० ७–११ ।

" स्वयं तदङ्गेषु गतेषु चारुतां परस्परेणैव विभूषितेषु च "

" हरिराकुमारमखिलाभिधानवित् स्वजनस्य वार्तमयमन्वयुङ्क्त च "

"त्वमेव हव्यं होता च भोज्यं भोक्ता च शाश्वतः " ।

"मनसः शिखराणां च सदृशी ते समुन्नतिः "

इत्यादौ प्रायः सर्वत्राऽपि महाकविसूक्तेषु तद्दूषणप्रसक्तेः केनाऽप्यपहस्तयितुमशक्यत्वात्, इत्युभयतोऽपि पाशारज्जुः प्रस्तावकस्य।

यत्पुनः " ललिताङ्गवत् तथा चाऽऽस्ति " इत्यत्रैकस्मिन्नेव पादे नवाक्षरत्वेन तच्छन्दसो दुष्टत्वमभिहितम्, तदप्यनर्हम्, एवंजातीयस्याऽपि च्छन्दसः सद्भावेनैतस्य नियमभङ्गाप्रसक्तत्वात्। स्पष्टं चैतद् गणरत्नमहोदधौ। तथा च तत्रोक्तिः—"अयमप्यस्ति वृत्तप्रभेदो यत्रैकः पादो नवाक्षरोऽन्येऽष्टाक्षराः " इति । अन्यैरप्येतानि बहुशो व्यवहृतानि यथा—

" परिपद्बलाद् महाब्रह्मैराट नैकटिकाश्रमान् "

"प्रधाने कर्मण्यभिधेये लादीनाहुर्द्विकर्मणाम् ।

अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणः " ॥ १ ॥

न चैतच्छन्दोविशेषस्य बहुप्रसिद्धत्वाभावेन व्यवहर्तुर्दोषाय इति वक्तुं योग्यम्, महाकाव्यत्वेन विशिष्टशब्दप्रयोगस्येव विशिष्टच्छन्दोग्रहणस्याऽपि दोषास्पदत्वाभावात्, प्रत्युत शोभावहत्वेन गुणरूपत्वात्।

यदपि "*मा साहसमिति मुहुः*" इत्यत्र *नविपुलायां* चतुर्थाक्षरस्य लघुत्वेन स्खलितविलसितमिति व्याहृतम्, तदप्यविचारितरमणीयम्, विपुलायां चतुर्थाक्षरेण गुरुणैव भवितव्यमिति निश्चयस्य कुत्रचन च्छन्दःशास्त्रेऽनुपलम्भात् । आम्नायस्य तु तादृशस्य च्छन्दोविद्भिरपि प्रायिकत्वेनैव कक्षीकारात्। तथा च पिङ्गलस्यैव टीकाकारः— " सर्वासां विपुलानां चतुर्थो वर्णः प्रायेण गुरुर्भवतीत्याम्नायः " इति । अत एव

" शूरः शौरिरशिशिरैराशाशैराशु राशिगः " (माघ० १९–१०८)

१ नैष० १५-४८ । २ शिशु० १३-६८ । ३ कु० २-१५ । ४ कु० ६-६६ ।

इत्यादयो महाकविव्यवहारा सङ्गच्छन्ते। अन्यथाऽत्रापि सत्यपि चित्रगुणे छन्दसस्तु दुष्टुत्वप्रसङ्ग कथं सङ्गतिं नेयात्? । स्पष्टरूपेणैव निष्टङ्कितं चैतत् पिङ्गलस्यैव "भ्रौ न्तौ" (५।११) इति विपुलाप्रतिपादके सूत्रे तविपुलाप्रसङ्गे तट्टीकाकारेण

" वन्दे देवं सोमेश्वरं जटामुकुटमण्डितम्।
खट्वाङ्गधरं चन्द्रमं शिरोमणिविभूषितम् " ॥ १ ॥

इत्येतच्चतुर्थाक्षरलघुरूपं निदर्शनमुपन्यस्यता हलायुधेन। इत्यल्पमतिपल्लवितेन।

एवं च तत्सर्वमपि प्रयोगजातं छन्दोजालं च निर्बाधं स्वपरानेकप्रमाणससिद्धं भवत् तत्प्रणेतॄणां वाऽसत्यप्रयाजकता सूचयति, निर्दूषणं भूषणमय च दूषयता प्रस्तावकस्य वा उपालम्भयोग्यतां ख्यापयतीति स्वयं विदाकुर्वन्तु विद्वांस ।

प्रभूत चात्र विषये वक्तव्यम्, तच्चोक्तमेव प्रस्तावकेन सह पूर्वं जाते एतद्विषयके एव पत्रव्यवहारे। प्रकटीभविष्यति चाय स्तोकेनैव कालेन, इति विशेषमभिलाषुकैस्तत्रैव द्रष्टव्यम्। इह तु तत्सर्वमुच्यमानं विस्तराय भवद् न समीचीनतां भजेदिति नाभिधीयते।

तदेवं स्पष्टमेव निजेऽज्ञाने प्रकटीकृतेऽप्येतावताऽसतुष्यन्नधिकाधिक तदुद्घोषयितुमिव स एव H Jacobi महाशय श्रेयस्करमण्डलप्रकाशितस्य श्रीप्रद्युम्नसूरिविरचितसमरादित्यसंक्षेपस्याऽपि प्रस्तावनायामेवमेव तत्कर्तारमाक्षिपति। तथाहि–

* Still his work is not free from faults even against grammar, the worst of which, a Prakriticism इमै instead of एभि occurs VIII 520

वाढमास्माकीनो विश्वास, यदयं प्रस्तावकमहाशय प्रागेवाऽत्र

---

* तथापि तथा प्रद्युम्नसूरीणामय ग्रन्थो व्याकरणसंबन्धिदूषणै रहितो नास्ति, येषु सर्वतोऽप्यपकृष्ट ' एभि " इत्यस्य स्थाने ' इमै " इति प्रयोगकरणम्, इदं च रूप प्राकृतानुसारि इत्यर्थ ।

विषये स्तोकमपि विचारं निरमास्यत, न हि कदाप्येतादृशीं समालोचनां विधातुं प्रावर्तिष्यत, विभक्त्यन्तप्रतिरूपकाव्ययत्वेन इमैरिति प्रयोगस्य "विभक्तिथमन्ततसाद्याभाः" (सि० है० १।१।३३) इति व्याकरणसूत्रेणैव संसिद्धेर्व्याकरणातिविरुद्धत्वकथनस्य कथमप्यनिष्पत्तेः, ते मे इत्यादिवत्, कथमन्यथा "न मे श्रुता नापि च दृष्टपूर्वा" इत्यस्याऽपि निष्पत्तिः ? कर्तृत्वेन षष्ठ्या अघटनात्। यथा तत्र विभक्तिप्रतिरूपकाव्ययत्वमेव शरणम्, तथा प्रकृतेऽप्यस्तु, समानत्वाद् *न्यायस्य।*

"इयन्त इति संख्यानं निपातानां न विद्यते।
प्रयोजनवशादेते निपात्यन्ते पदे पदे" ॥ १ ॥

इत्यनेनापि दत्तहस्तावलम्बनेन तस्य सुदृढीकृतत्वाच्च। किञ्च, इदंशब्दव्यतिरिक्तोऽकारान्तोऽपि इमशब्दोऽस्ति, तस्यैव तृतीयाबहुवचने निर्बाधं 'इमैः' इति प्रयोगस्य संसिद्धिः। न चाऽकारान्त इमशब्दः कुत्रापि नोपलभ्यत एवेति वाच्यम्, पाणिनिव्याकरणस्यैव "प्रत्नपूर्वविश्व-इमात्-" (५।३।१११) इति सूत्रे तन्निर्देशस्य व्यक्तं वीक्ष्यमाणत्वात्। नाप्ययं छान्दस एव शब्दः, तेन सूत्रेण थाल्प्रत्ययस्यैव च्छन्दसि विधानेन इमथा इति प्रयोगस्यैव च्छान्दसत्वात्, प्रकृतेस्तु इमशब्दरूपायाः प्रत्नादिशब्दवच्छुद्धसंस्कृतस्वरूपत्वात्। न चैवमपि तत्रार्थासङ्गतत्वप्रसङ्गः, इमशब्दस्याऽपि इदंशब्दसमानार्थकत्वेन तदर्थस्य तत्र सुघटत्वात्, तत्सूत्रस्यैव वृत्तिं कुर्वता हरदत्तमिश्रेणाऽपि पदमञ्जर्यामिममेवाभिप्रेतत्वात्; तथा च तत्पाठः "इमशब्दः इदमा समानार्थः प्रकृत्यन्तरम्" इति। न चेदं रूपमर्थतोऽप्येतत्सदृशमन्यत्र महाकाव्ये कविभिर्नैव व्यापारीत्यपि वक्तुमुचितम्,

"स्वार्थं तद् वितनोम्यहं किमधुना व्यर्थैर्विकल्पैरिमैः" (१६-२९५)

इत्यत्राऽपि तद्व्यवहारदर्शनात्। एतेन तस्याऽङ्गतत्वप्रतिपादनमपि नितरां निराकृतम्।

---

१ श्रीशान्तिनाथमहाकाव्येऽपि।

एवं व्याकरणेन निःशङ्कं निष्पन्नमन्यकविभिरप्यादृतं च 'इमैः' इति प्रयोगं कुर्वाणं सूरिवर्यं 'व्याकरणापेक्षयाऽतिविरुद्धत्वेनेदं महद् दूषणम्' इति नितान्तमिथ्योल्लेखेनाऽऽक्षिप्यतोऽस्य पाश्चात्यविदुषो लेखिनी कथमिव किञ्चिदपि सङ्कोचं नाकार्षीत् ?, कथं वा स्वयं निजे पादे कुठारं प्रक्षिपन्तमनुकुर्वता, वस्तुतः स्वस्य जैनाऽज्ञानप्रसारकत्वमेव निर्धारयता, एतत्पुस्तकं प्रकाशयता श्रीजैनज्ञानप्रसारकमण्डलेन सा (आक्षेपकलेखिनी) समुत्तेजिता ?, इति नैव विज्ञातुं शक्यते ।

यत्पुनः प्रस्तावकमहाशयेन तस्यैव प्रस्तावनायामाक्षेपविवर्जितं तत्तदाचार्येतिहासादिस्वरूपं निरूपितम्, तदप्यनालोचितमेव, स्थलाभावेनाऽधिकृताऽसङ्गतत्वेन त्वत्र तदुपेक्ष्य यथावकाशमन्यत्रैव विस्तरेण समालोचयिष्यते, प्रसङ्गवशेनाऽत्रापि किञ्चित् पुरतः प्रतिपादयिष्यते चेति ।

इत्थं चेतस्ततश्चक्षुःक्षेपेण साक्षाल्लक्ष्यमाणां मिथ्याक्षेपतत्परैः कैश्चित् पाश्चात्यैः, बाह्याडम्बरविडम्बितैश्च स्वयं जैनैरपि विधीयमानां केनाऽप्यप्रतिविधीयमानां च परितः शासनावनतिमवलोक्य कः सत्याग्रही सहृदयः स्वहृदये दुःखं नोपलभेत ?, कश्च शासनहितैषी तामुन्नतिरूपेणाऽङ्गीकृत्य संतोषमुद्भावयेत ?, को वा विचारचारुचेतास्तन्निराकरणायोचितं प्रयत्नमावश्यकं नावबुध्येत ? । इति तत्तद्विषयान् ग्रन्थान् यथातथं प्रकाशयितुं सुविहितसुगृहीतनामधेयैः परोपकारैककर्तव्यनिरतैरस्मद्गुरुभिः शास्त्रविशारदजैनाचार्यपदवीमलंकुर्वद्भिः श्रीविजयधर्मसूरिभिर्महता परिश्रमेणेयं श्रीयशोविजयजैनग्रन्थमालोदपाद्यत । यस्यामद्यावधि व्याकरण-न्याय-काव्येतिहासादिविविधविषयाणामेकोनविंशतिर्ग्रन्थरत्नानि प्राकाश्यमधिश्रितानि । अथैतच्छ्रीशान्तिनाथचरित्रं नाम महाकाव्यरूपं विंशं ग्रन्थरत्नमपि प्रकटीक्रियते, यद् महाकाव्यपरत्वेऽस्यां प्रथमत्वमेवाऽश्नुते ।

विनिर्मातारश्चास्य श्रीतपागच्छगगनाङ्गणगगनाध्वगाः श्रीपेरो-

१ प्रशस्तौ श्लो—९.

जराजेन्द्रसभासमासादितसंमानना महाकवयः श्रीमुनिभद्रसूरयोऽभूवन्। तैर्ग्रन्थस्याऽस्य प्रणयनं विक्रमार्काद् १४१० संवत्सरे व्यधायि, इत्येतत्प्रशस्तिप्रान्तप्राप्तेन

"अन्तरिक्षरजनीहृदीश्वरब्रह्मवक्त्रशशिसंख्यवत्सरे।
वैक्रमे शुचि तपोजयातिथौ शान्तिनाथचरितं व्यरच्यत" ॥१७॥

अनेन पद्येन समवगम्यते। विनिर्णीयते चैतेन चतुर्दशशताब्द्यन्तरूपः पञ्चदशशताब्द्यादिभूतश्चैतेषां ग्रन्थग्रन्थकानां स्फुटमेव सत्तासमयः।

अधिकृतं चात्र समूलमुन्मूल्य शाश्वतशर्ममर्मभित्कर्ममहामहीरुहसमूहम्, तूर्णमुत्तीर्य विशालासारसंसारापारपारावारम्, सम्यक् संप्राप्याऽपरप्राणिदुष्प्रापां परां काष्ठामधिष्ठितां परमेष्ठिताम्, ऐकान्तिकाऽऽत्यन्तिकैकसौख्यसौधमध्यमध्यासीनानां धर्मचक्रवर्तिनां श्रीशान्तिनाथभगवतां सम्यक्त्वाप्तिभवतः प्रारभ्य निर्वाणावधि विविधरसाधायि पवित्रताकरं चरित्रम्। उपनिबद्धानि चान्यान्यपि प्रासङ्गिकानि चेतोऽमन्दानन्दविधायीनि सरसमुपवर्णितानि कथान्तराणि।

एभिश्च ग्रन्थकर्तृभिर्मुखप्रतिमुखादिसन्धिसौन्दर्यं परिपुष्णद्भिः, विचित्रां वचनरचनां प्रपञ्चयद्भिः, दुष्करयमकालङ्कारमयं सर्गमप्युपन्यस्यद्भिः, ऋतुनगरारामविहारपर्वतार्णवादि यथोचितं परिवर्णयद्भिः, रसस्वरूपानुरूपसंदर्भं च वितन्वद्भिः कविपुरन्दरायमाणैः सर्वत्रापि रससुधाधाराऽविघातिन्या सहृदयहृदयहृदयङ्गमया सुसंबद्धपद्धत्या निर्वर्तितो ग्रन्थोऽयं महाकाव्यपङ्क्तावुत्तमं स्थानमुपलम्भितः, आपादितश्चान्येषु महाकाव्येषु भूयो लब्धप्रसरमप्रस्तुतवस्तुविस्तराभिधानं दूषणं दूरमुत्सारयद्भिस्ततोऽपि शोभातिरेकम्।

यद्यप्येतेषां सूरिवराणामेतदतिरिक्तग्रन्थविरचितौ साधकं वा बाधकं वा किञ्चिदपि क्वचिदप्यद्यावधि प्रमाणं नोपलब्धम्, तथापीदमेकमपि सुमनोमनोहरं महाकाव्यं स्वान्यथानुपपत्त्या कर्तॄणां निसर्गप्रतिभाप्रकर्षं, अन्यान्यशास्त्रसुनिष्णातत्वं च निर्बाधमनुमापयति।

स्पष्टयन्ति चैतन् तदानींतना: श्रीदेवेन्द्रसूरयोऽपि स्वकृतप्रश्नोत्तररत्नमालाया: संशोधकत्वेनैतानेव पूज्याचार्यवर्यान् निर्दिशन्तस्तत्प्रशस्तौ–

"तस्यानुजेन देवेन्द्रसूरिणा विक्रमार्कत: ।
नन्दयुग्मपयोराशिशशाङ्कप्रमवत्सरे ॥ १७ ॥
प्रश्नोत्तररत्नमाला विवृत्तिर्विदधे मुदा ।
शोधिता च लसद्भद्रैः श्रीमुनिभद्रसूरिभि: " ॥ १८ ॥

एतस्य श्रीमुनिभद्रसूरिविरचितस्य श्रीशान्तिनाथमहाकाव्यस्य मुद्रणावसरे श्रीभावनगरसंघभाण्डागारसंबन्धि प्राचीनं शुद्धतरं चादर्शपुस्तकमेकं प्रापयितुमेहामहिम्नस्तस्य श्रीसंघस्य महोपकार: स्वीक्रियते ।

अन्यान्यपि यान्यपरापराचार्यवर्यविरचितानां श्रीशान्तिनाथचरित्राणां पुस्तकान्यत्रोपयुक्तानि तानि, सदर्पयितॄणां महाशयानां धन्यवादपुरस्सरं नामानि च प्रकटीक्रियन्ते–

१ श्रीशान्तिनाथचरित्रम्, प्राकृतम्, श्रीहेमचन्द्राचार्यगुरुभि: श्रीदेवचन्द्रसूरिभि: प्रणीतम् । श्रेष्ठिवर्यहालाभाईतनुजभोगीलालद्वारा श्रीअणहिल्लपुरपत्तन(पाटन)स्थस्य 'फोफलीयावाडा' आगलीशेरी' इत्यस्य भाण्डागारस्य ।

२ ,, संस्कृतम् (त्रिषष्टिशलाकापुरुषचरित्रान्तर्गतम्) श्रीहेम-

१ यच्छ्रीत्रिषष्टिशलाकापुरुषचरित्रप्रशस्तौ श्रीहेमचन्द्राचार्या एवं—

" शिष्यस्तस्य च तीर्थमेकमवने पावित्र्यकृज्जङ्गमं
स्याद्वादत्रिदशापगाहिमगिरिर्विश्वप्रबोधार्यमा ।
कृत्वा स्थानकवृत्तिशान्तिचरिते प्राप्त: प्रसिद्धिं परां
सूरिर्भूरितप:प्रभाववसतिः श्रीदेवचन्द्रोऽभवत् ॥ १४ ॥
आचार्यो हेमचन्द्रोऽभूत् तत्पादाम्भोजषट्पद: ।
तत्प्रसादादाधिगत—ज्ञानसंपन्महोदय:" ॥ १५ ॥

एतेन श्रीहेमचन्द्रप्रभूणां समय एवैतेषामपीति सुनिश्चितम् । प्रभुसमयश्च विक्रमार्काद् द्वादशशताब्दीरूप: सुप्रसिद्ध एव ।

चन्द्राचार्यैर्विरचितम् । भावनगरश्रीजैनधर्मप्रसारकसभया मुद्रितम् ।

३ ,, ,, राजगच्छीयश्रीमाणिक्यचन्द्रसूरिरचितम् । पादलिप्त(पालीताणा)नगरस्थवीरबाईपाठशालाभाण्डागारस्य ।

४ ,, ,, श्रीपूर्णिमागच्छीय–अजितप्रभसूरिप्रथितम् । प्रारम्भत एवास्यां ग्रन्थमालायां सर्वथा साहाय्यं वितरीतृभिर्विद्वद्वर्यैर्मुनिराजश्री–इन्द्रविजयमहात्मभिः संपादितम् । कलिकाताया एसियाटिक्समाजेन प्रकाशितम् ।

५ ,, ,, श्रीमुनिदेवसूरिविनिर्मितम् । अस्मद्गुरुवर्यश्रीशास्त्रविशारदजैनाचार्यविजयधर्मसूरीणाम् ।

---

१ एभिरेव काव्यप्रकाशस्य विद्वत्तापूर्णा सुविख्याता संकेतनाम्नी टीकाऽकारि । एतेषा समयश्च त्रयोदशशताब्द्यात्मक इति तैरेव विहितस्य श्रीपार्श्वनाथमहाकाव्यस्य प्रशस्तिगतेन

"रसर्षिरविसंख्याया समाया दीपपर्वणि ।
समर्थितमिदं वेला—कूले श्रीदेवकूपके" ॥ १ ॥

इति पद्येन व्यक्तं विनिश्चीयते ।

२ एतन्निर्माणसमयस्तु—

"त्रयोदशस्वब्दशतेष्वतिक्रान्तेषु विक्रमात् ।
वर्षे सप्तोत्तरे वैशाखस्य पक्षे च निर्मले" ॥ १ ॥

इति तत्प्रशस्तावेव निर्णीतो ग्रन्थकर्तृभि ।

३ यत्तु प्रद्युम्नसूरिविरचितस्य समरादित्यसक्षेपस्य प्रस्तावनाया H Jacobi पण्डित "Devasuri his Upamitibhavaprapanchakathasaroddhara (in Samvat 1298) and his Santinathacharita,"–इत्यादिना देवसूरिकृत उपमितिभवप्रपञ्चकथासारोद्धारं श्रीशान्तिनाथचरित्रं च प्रद्युम्नसूरिर्व्यशोधयत् इति ज्ञापयति, प्रमाणयति चैतेन श्लोकेन—

"यो वादीश्वरदेवसूरिसुगुरोर्मूर्त्याश्रमे सूरिणा
चक्रे श्रीमदनेन्दुना निजपदे तेनाप्रवृत्तश्रिता ।
काव्ये श्रीमुनिदेवसूरिकविना श्रीशान्तिवृत्ते कृते
श्रीप्रद्युम्नमुनीन्दुधीरविशुचि सर्गोऽगमत् सप्तम " ॥ १ ॥

तच्चिन्त्यम् । प्रद्युम्नसूरिसशोधितस्य शान्तिनाथचरित्रस्य श्रीमुनिदेवसूरि-

६ ,, ,, गद्यात्मकम्, श्रीभावचन्द्रसूरिगुम्फितम्, पंन्यासश्रीकमलविजयानाम्।

७ ,, गूर्जरभाषानिबद्धं पद्यात्मकम्, पण्डितरामविजयमुनिविहितम्। श्रा०-भीमसिंह-माणेकेन मुद्रितम्।

तदेवमनेकग्रन्थाधारेण संशोध्य विषमस्थले टिप्पनादिना विशदीकृत्य च महता परिश्रमेण संपादितेऽस्मिंश्चित्ताह्लादके पुस्तकेऽङ्गीकुर्वन्तु नयनार्पणप्रयासं विद्वांसः, व्यवस्यन्तु सततमभ्यासाय व्युत्पत्तिमिच्छवः, संसृजन्तु भृशमादरं भगवद्गुणैकपक्षपाताः, सफलयन्त्वेवमस्मत्परिश्रमम्, विशोधयन्तु च दृष्टिदोषनिबन्धनानि वा, अज्ञानसहभावीनि वा, अक्षरयोजकसंभवीनि वा यत्र कुत्रचन स्थितानि स्खलनानि सौहार्दावदातहृदया इति

प्रार्थयेते—

हरगोविन्द-बेचरदासौ।



भिरेव विनिर्मितत्वात्, न तु देवसूरिभिः; अनेन श्लोकेनापि श्रीमुनिदेवसूरीणामेव तत्कर्तृत्वस्य प्रतिपादनात्,

"पूज्यश्रीमुनिदेवसूरिरचितश्रीशान्तितीर्थेश्वर-" (पृ--३५४)

इत्येवमत्रापि तत्संवादस्य समासादनाच्च। श्रीदेवसूरेस्तु ग्रन्थकर्तॄणां मुनिदेवसूरीणां प्रगुरुत्वात्, तेनैव श्लोकेन तदर्थस्याप्युपलभ्यमानत्वात्। एवं यदुपमितिभवप्रपञ्चकथासारोद्धारस्यापि कर्तृत्वेन देवसूरेः प्रतिपादनम्, तदपि विचारणीयमेव, श्रीदेवेन्द्रसूरीणां तत्प्रणेतृत्वात् (see 6th Report by Peterson page X)

१ "संवत् सत्तर पंचासीआ वर्षे वैशाख मास वहाया।

शुदि सप्तमी गुरु पुष्य संयोगे पूरण कलश चडाया" ॥ १ ॥

इत्यन्तिमपद्येन तन्निर्माणसमयो विक्रमाब्दः १७८५ इति निर्णीयते।

अर्हम्

श्रीविजयधर्मसूरिभ्यो नमः ।

श्रीमुनिभद्रसूरिरचितम्—

श्रीशान्तिनाथचरितम् ।

प्रभाकरो यः परमः कलानिधिर्य एव यस्मादपरो न पावकः ।
विभाति यद्भाभिरिदं चराचरं जिनाय तस्मै परमात्मने नमः ॥ १ ॥
गणान्वितश्चन्द्रकलां बिभर्ति यः समाश्रितश्चक्रिवरेण भोगिना ।
शिवाश्रयो भूरिविभूतिरेष वः श्रियं स पुष्याद्वृषभध्वजप्रभुः ॥ २ ॥
समासदद् यत्पदपर्युपासनात् कलानिधेर्मण्डलमध्यवर्तिताम् ।
मृगस्तिरश्चां प्रथमोऽपि सन्ततं स शान्तिनाथः शिवतातिरस्तु वः ॥ ३ ॥
पिता भवेत्पुत्र इति श्रुतिश्रुतं यथार्थमर्थं रचयन्निवाजनि ।
समुद्रजातोऽपि समुद्र एव यः स्वलक्ष्मशङ्खाश्रयणात् सलक्षणः ॥ ४ ॥
शिवाङ्गसङ्गात्कलयन्नपि स्फुटं कुमारतां यश्च जितान्तराहितः ।
चकार चित्रं किल तारकोदयं नमोऽस्तु तस्मै जगदीशनेमये ॥ ५ ॥
(युग्मम्)
उपास्यते भोगिभिरेव चक्रिभिः समन्ततश्चन्दनवत्सदैव यः ।
भवाधितापव्यपरोपणक्षमः स पार्श्वनाथस्तनुतां सुखानि वः ॥ ६ ॥
न वेद सिद्धार्थभवोऽपि यः स्वयं चकार सिद्धार्थभवत्वमात्मनः ।
सुसंवरः संवरवैरिनिर्जयात् स संमदं वीरजिनस्तनोतु वः ॥ ७ ॥
सुधाशनाध्यासनजातकीर्तयः स्फुरद्वृपालम्बनचा (तु) रुमूर्तयः ।
मनःसमीहापरिपूर्तये भृशं समेऽपि वः सन्तु परे जिनेश्वराः ॥ ८ ॥
स्वयं समस्ता अपि लब्धयो वरं समेत्य रत्नाकरमापगा इव ।
परस्परस्पर्धितयेव यं श्रिताः स गौतमः संचिनुतां शुभानि वः ॥ ९ ॥
जगत्रिपद्या परितोऽनवद्यया कयाऽपि यः श्रीपतिवद्व्यगाहत ।
अनन्तधामा गणभृद्विशेषकः प्रसत्तये मे भवतात्स गौतमः ॥ १० ॥
चतुर्विधं सङ्घमशेषभावुकप्रसारवल्लीवनसारिणीनिभाः ।

इमा गणाधीशसुधर्मदेशनागिरश्चिरं पान्तु निपातितांहसः ॥ ११ ॥
यदीयपारं सुगमं विपाश्चितां न पुण्यपोतं प्रविहाय केवलम् ।
जिनेन्द्रचन्द्राभ्युदये कथं न स श्रुताम्बुधिर्वृद्धिमुपैतु नित्यशः ? ॥ १२ ॥
अतिप्तिपन्निर्वृतिमङ्गनाजने विजित्य ये दिक्पटमागमोक्तिभिः ।
विवादविद्याविदुरं वदावदा जयन्ति तेऽमी प्रभुदेवसूरयः ॥ १३ ॥
सिताम्बराणामपि यैश्च दर्शनं स्थिरं कृतं गूर्जरभूमिमण्डले ।
चलाचलं दिक्पटवादवात्यया मनोमुदे ते मम देवसूरयः ॥ १४ ॥
प्रवादविद्याजितदेवसूरये चरित्रविद्योतितदेवसूरये ।
स्वदेशनारञ्जितदेवसूरये नमोनमः श्रीगुणभद्रसूरये ॥१५॥
क्षमाधरेभ्यः कमलोत्तमाश्रया समुच्चगोत्रेभ्य इवोल्लसद्रसा ।
बभार येभ्योऽभ्युदयं सरस्वती महाशया ग्रन्थकृतो जयन्ति ते ॥ १६ ॥
निसर्गकारुण्यनिवासभूमयः परार्थनिर्माणनिवद्धचेतसः ।
असंस्तुतस्यापि रता गुणस्तुतौ चिराय ते केऽपि जयन्ति साधवः॥ १७ ॥
पुरस्सरा धार्मिकलोकसंहतेः परं न ये कुत्रचनापि हिंसकाः ।
सुपर्वपक्षाश्रयिणोऽपि निश्चितं नमोऽस्तु सद्भ्यो भुवि तेभ्य एव मे ॥ १८ ॥
परस्य सन्तापमपाकरोति यः स्वजीवनेनापि नभस्यमेघवत् ।
करोति यो वा सुमनोऽभिवर्द्धनं न सज्जनः कस्य मुदं तनोति सः ? ॥ १९ ॥
न पूर्णचन्द्रेण सतो विनिर्मितिर्जगत्त्रयाह्लादकृतोऽपि शङ्क्यते ।
कलङ्किता हेतुगता तथा सति प्रवर्तमाना कथमत्र वार्यताम् ? ॥ २० ॥
सतोऽन्यसन्तापहृतोऽपि तर्क्यते न चन्दनेनापि विधानकल्पना ।
यतो न काठिन्यमवेक्ष्यतेतरां नचात्र हृद्ग्रन्थिरवाप्तघर्षणः ॥ २१ ॥
महीयसामाश्रयसन्निधानतो भवेल्लघीयानपि गौरवास्पदम् ।
गजाननं पूजयता जनेन किं न पूज्यते यानममुष्य मूषकः ? ॥ २२ ॥
जडोऽपि निर्व्याजमहत्त्वभाजनं जनः क्षणादेव गरिष्ठसंश्रयात् ।
निधीयते मूर्द्धसु कैर्न वा जलं सुरापगाया अपि कश्मलाविलम् ? ॥ २३ ॥
न सज्जनस्य स्तवनीयताविधौ स्पृशत्ययं सज्जन एव योग्यताम् ।
यतः स्वभावादपि तौ परस्परं गुणान् ग्रहीतुं स्वत एव सोद्यमौ ॥ २४ ॥
ततः प्रशस्यः परमत्र दुर्जनः परोपकारप्रवणः स्वभावतः ।
महारसमादाय निबद्धदूषणं समुज्ज्वलं यः कुरुतेतरां परम् ॥ २५ ॥

गुणानगृह्णन् यदि निन्द्यते खलः कथं न मातापितरौ तथास्थितौ ? ।
अथापरस्तेति विशेषणादिदं न वाच्यमालिङ्गति तर्हि तुल्यता ॥ २६ ॥
विमुच्य यः स्नेहमेवञ्चनास्थितं दधाति मूर्ति सहसा मलाविलाम् ।
निजक्षये पोषणमाचरन् गवां खलः कथङ्कारमयं न वर्ण्यताम् ? ॥ २७ ॥
न च क्षमायामपि मूलमुन्नतं यदीयमिष्टं सुमनःफलं न, सा ।
प्रवर्द्धमाना खलता निरर्गलं सचेतसः कस्य न विस्मयावहा ? ॥ २८ ॥
यथास्थितं दोषमुदीरयन्नयं न साधुभावं भजतां कथं खलः ? ।
यथार्थवादेन वदन्ति साधुतां विधूतमात्सर्यभरा हि धीधनाः ॥ २९ ॥
ममापि शान्तेश्चरितं मनोहरं प्रकुर्वतः षोडशधर्मचक्रिणः ।
प्रपञ्चतः पञ्चमचक्रवर्तिनः प्रसीदतां सज्जनदुर्जनाविमौ ॥ ३० ॥
मनस्यवस्थाप्यमहो मनीषिभिः कचित्प्रकाश्यं न रहस्यमादरात् ।
प्रकाश्यते यन्मयका कथञ्चन प्रभोः प्रभावः स तु तस्य केवलम् ॥ ३१ ॥
स कोऽपि नैवास्ति गुणाद्भुतः कचिद् यकोऽपि विश्वस्य भवेत्प्रियङ्करः । -
सुधाकरोऽप्यभ्युदितः प्रमोदयेत् चकोरचक्रं न च चक्रमण्डलम् ॥ ३२ ॥
भवन्ति पापानि नृणां न साम्प्रतं चिरन्तनानि प्रलयं व्रजन्त्यपि ।
पराणि विन्दन्त्युदयं न भावतश्चरित्रमात्रश्रवणादिहार्हताम् ॥ ३३ ॥
अतो मयाऽपि प्रयतेन कीर्त्यते जिनेशशान्तेश्चरितं यथामति ।
जडत्वजम्बालनिरासनामृतं कुकर्महालाहलनाशनामृतम् ॥ ३४ ॥
तथाहि जम्बूपपदं विशालतां दधानमारामवदुन्नताचलम् ।
समस्ति सद्वीपमनूनवृत्ततासमाश्रयं मानसवन्मनस्विनाम् ॥ ३५ ॥
जिनेन्द्रवद्योजनलक्षमानतां दधत्क्षमाभृद्भिरितस्ततः श्रितम् ।
समृद्धवर्णानुगतं पयोदवत्समुद्रवद् द्वीपवतीभिरञ्चितम् ॥ ३६ ॥
(युग्मम्)
तदन्तरस्त्यर्द्धशशाङ्कसन्निभं सदादिमं क्षेत्रमकृत्रिमाकृति ।
अभिख्यया तद्भरतं प्रथामगादभिख्ययैव प्रथमस्य चक्रिणः ॥ ३७ ॥
प्रभाढ्यवैताढ्यमहीभृता द्विधा कृतं च पूर्वापरसिन्धुगामिना ।
जिनेन्द्रचैत्याश्रयणादिवोद्यतां प्रविभ्रता दक्षिणमुत्तरं च तत् ॥ ३८ ॥
दलेऽस्ति याम्ये किल तस्य विश्रुतं महीमहेलाऽऽस्यतमालपत्रकम् ।

---

१ अपां जलानामञ्चना क्षेपस्तत्र तया वा स्थितो यः स तथा खलपक्षे ।

त्रिविष्टपश्रीप्रतिविम्बभावनाऽनुमापकं रत्नपुरं महापुरम् ॥ ३९ ॥
मरांसि यस्मिन् समवेक्ष्य मन्वते न मानसं हंससमाश्रयं जनाः ।
कदापि लोकायतिका इवायतं प्रभूतशक्त्याऽभ्युपगम्य विग्रहम् ॥ ४० ॥
सदाफलानोकहराजिराजितान्युदस्तसन्तापभराणि देशिकाः ।
विलोक्य यत्रोपवनानि नन्दनं न चाद्रियन्ते धृतकल्पपादपम् ॥ ४१ ॥
न ते द्रुमा यत्र सुमानि येषु नो सुमानि नो तानि फलानि येषु न ।
फलानि नो तानि न येषु सन् रसो रसः स न न्यक्कुरुते मधूनि यः ॥ ४२ ॥
गृहे गृहे यत्र महेश्वरा जनाः शिवाश्रया भूतगणाधिनायकाः ।
न भीमरूपा न कदाऽपि शूलिनो न ये पशुस्वामितया प्रकीर्तिताः ॥ ४३ ॥
धनानि यस्मिन् धनिनां महीयसां पयांसि यस्मिन् सरसां प्रथीयसाम् ।
फलानि यस्मिन् विपुलानि भूरुहां परोपकाराय भवन्ति सन्ततम् ॥ ४४ ॥
न पिण्डमिच्छन्त्यपि चाटुकोटिभिर्न संसजन्ति स्ववशां वशां नये ।
विशिष्टगुर्वङ्कुशशङ्कितान्तरा महर्षयो यत्र मतङ्गजा इव ॥ ४५ ॥
सुवर्णकुम्भा भविकैर्निवेशिता विभान्ति यत्रार्जुनचैत्यसानुषु ।
नभःस्रवन्त्या इव चक्रवाककाः सुवर्णपाथोरुहनिश्चलासनाः ॥ ४६ ॥
रसातलं यस्य गभीरखातिकाप्रसक्तमाजीवनमार्प्पयन्निजम् ।
न किं प्रयच्छन्ति निबद्धमानसा मनस्विनीषु प्रसभं मनस्विनः ? ॥ ४७ ॥
क्रयाणकं भूवलये तदस्ति नो न यद्यदट्टेषु विलोक्यते जनैः ।
भवन्ति तेजांसि विभाकरे न चेन् परः समीक्ष्यः क्व तदा तदाकरः? ॥ ४८ ॥
प्रसारितं रत्नभरं यदापणे निरीक्ष्य कान्तिप्रसरैः परिष्कृतम् ।
स रोहणक्षोणिधरोऽपि संभ्रमाच्छिलाऽवशेषः परिभाव्यते परम् ॥ ४९ ॥
न वैजयन्त्यो मृदुमारुताहता यदीयसौधोपरि वन्धुरा इमाः ।
पुरश्रिया वर्द्धितमानसंपदो दिवं समाह्वातुमिवाधिकोच्छ्रयाः ॥ ५० ॥
निजेश्वरश्रीपातिनामशङ्कया निषेवते यत्किल भोगिनां पतिः ।
सुधीभवन् कुण्डलशायितां दधत्समुज्ज्वलस्फाटिकवप्रदम्भतः ॥ ५१ ॥
अनन्तलक्ष्मीपुरुषोत्तमालये निरीतिभावप्रसरन्महोत्सवे ।
पयोनिधिर्यत्र स खातिकामिषात्स्वपुत्रिकाप्रेमवशम्वदोऽवसत् ॥ ५२ ॥
मतङ्गजानञ्जनपर्वतायतान्सलीलयातानि पथि प्रकुर्वतः ।
निरीक्ष्य यत्रेति विजानते जना न सन्ति नान्यत्र भवन्ति चैतके ॥ ५३ ॥

ध्वजांशुकैः शारदसारकौमुदीसमप्रभैः शर्मविसारिसम्पदा ।
अधिष्ठितं यत्र विमानतायिनां पुरं सुराणां हसतीव संमदात् ॥ ५४ ॥
(षोडशभिः कुलकम्)
बभूव तस्मिन्नरमौलिशेखरः स कोऽपि येणः क्षितिजीवितेश्वरः ।
यदाख्यया श्रीपदमादितः कृतं किमादिभूतं न न भूतमत्र तत् ॥ ५५ ॥
सुदुःसहं धाम न सोढुमीश्वरा विरोधिनो यस्य दरीषु भूभृताम् ।
अवात्सुरुत्सृष्टनिवासभूमयो निलीय घूका इव भानुमालिनः ॥ ५६ ॥
जलेश्वराशालयभावमाश्रयन्नितान्तपूर्वोदय एव भानुमान् ।
हरित्सु सर्वासु विवृद्धिधारिणो न यत्प्रतापस्य समानतां दधौ ॥ ५७ ॥
शरत्सुधांशुभ्रमभारकारिभिर्विनिर्जितो यस्य यशोभिरुज्ज्वलैः ।
भुजङ्गमानामधिपो रसातलं प्रविश्य नूनं त्रपयेव तस्थिवान् ॥ ५८ ॥
चतुष्पयोनिध्यवधिक्षितीश्वरैः प्रणम्यमानस्य सदैव देववत् ।
श्रुतेक्षिता यस्य विभोरजायत क्षमासमासङ्गवशादिव क्षमा ॥ ५९ ॥
अजस्रविश्राणनकर्मणाऽर्थिनां सुवर्णकोट्या विरचय्य योऽर्थिताम् ।
जहार दीनत्वविधानलालसां जनुः कृतार्थं रचयन्निवार्थिताम् ॥ ६० ॥
कृपापरोऽपि श्रुतवानपि क्वचिन्न धर्मविच्छेदकरं ररक्ष यः ।
नृपस्य हि न्यायपथप्रवर्त्तिनो न धर्मविप्लावकपालने मतिः ॥ ६१ ॥
(सप्तभिः कुलकम्)
सधर्मचारिण्यभिनन्दिताऽभिधा महेश्वरस्याजनि सर्वमङ्गला ।
शिवस्य तस्य प्रतिपद्वतो यथा महेश्वरस्याजनि सर्वमङ्गला ॥ ६२ ॥
पराऽपि जज्ञे शिग्रिनन्दिता परा परात्तकामप्रसरस्य तस्य च ।
रसेश्वरस्येव सुरापगा प्रिया रजोऽपहा पुण्यनिदानजीवना ॥ ६३ ॥
सहैव ताभ्यामवनीशितुर्मुदा सदाऽपि भोगानुपभुञ्जतः सतः ।
विशुद्धधर्मार्थनिविष्टसंविदो दिना व्यतीयुर्बहवः क्षणा इव ॥ ६४ ॥
अथान्यदा देव्यभिनन्दिता यथासुखं शयाना शयने निशात्यये ।
सुधांशुभास्वद्युगपन्मुखाम्बुजप्रवेशसंस्वप्नमसौ निरैक्षत ॥ ६५ ॥
अवाप्य सा स्वप्नमनिन्दितं सतां शुभैरवाप्यं परिहृष्टमानसा ।
फलानि पुष्पाणि च पाणिपुष्करे निवेश्य कान्तं समया समापतत् ॥ ६६ ॥
समर्पयन्ती फलपुष्पसञ्चयं स्वपञ्चशाखाग्रजपल्लवेन सा ।

विशालपात्रोपगता महीभुजा व्यभाव्यतारं प्रततीव तत्क्षणम् ॥ ६७ ॥
निषेदुषी काञ्चनविष्टरे स्थिरे नरेश्वरेणात्मकरेण दर्शिते ।
समुद्गिरन्तीव रसं सुधामयं जगाद कल्याणकिरं गिरं च सा ॥ ६८ ॥
अतिम्रदीयस्तमहंसतूलिकासनाथशय्यातलभागभागिनी ।
विभो ! प्रमीलासुखमाश्रयन्त्यहं मनाग्विबुद्धा मुदिता व्यलोकयम् ॥ ६९ ॥
यशःप्रतापाविव ते महीपते ! परस्परं संमिलितावुपागतौ ।
तदैव पीयूषकरप्रभाकरौ निरस्तनिष्पिष्टतमश्चयौ रुचा ॥ ७० ॥
प्रसद्य सद्यस्तदमुष्य मे फलं निवेद्यतां वेद्यविवेदकोविद ! ।
न सुभ्रुवां तत्त्वविवर्त्तवर्तनी प्रवर्तिनी खल्ववलोक्यते मतिः ॥ ७१ ॥
निपीय तस्या वदनेन्दुसंभवं वचोऽमृतं क्ष्मापतिरभ्यधादिति ।
शुभे पुरा सञ्चितपुण्यसञ्चये त्वयोदितस्वप्नफलं निशम्यताम् ॥ ७२ ॥
यशोविनिर्धूतसुधांशुमण्डलौ प्रतापसन्तर्जितसूरमण्डलौ ।
वसुन्धरामण्डलमण्डने श्रिया भविष्यतस्ते तनयौ नयोज्ज्वलौ ॥ ७३ ॥
इतीरितं स्वप्नफलं प्रियेण सा निशम्य सम्यक्परिभूतसंशया ।
ममास्त्विति स्पष्टनिवेदनोन्मदा निजांशुके ग्रन्थिनिबन्धनं व्यधात् ॥७४॥
तदादि गर्भं दधती व्यभादियं सुखेन पीयूषमिवेन्दुमण्डली ।
समग्रगोत्रोज्ज्वलतां प्रकुर्वती समुल्लसन्मौक्तिकतारहारका ॥ ७५ ॥
स्वभावतो राज्यपि मन्दगामिनी विशेषतो मन्थरतामुवाह सा ।
मदानुषङ्गात्करिणीव चाटुभिः प्रपद्यमानाऽशनभोगजं सुखम् ॥ ७६ ॥
दधार यं यं हृदि दौहृदं प्रिया महल्लकानां परिपृच्छतां मुखात् ।
विबुध्य तं तं वसुधासुधाकरः स पूरयामास सलीलमात्मना ॥ ७७ ॥
गतेषु मासेषु नवस्वनुक्षणं दिनेषु चार्द्धाष्टमयुक्षु सत्सु ।
यथा सुमित्रा सुषुवे तथा यमौ शुभे मुहूर्त्ते नृपतिप्रियाऽपि सा ॥ ७८ ॥
स सौविदल्लैर्युगपत्सुतद्वयप्रसूतिवर्द्धापनकेन वर्द्धितः ।
इदं न देयं भवतीति मानतो विवेद न प्रीतितराङ्गितो नृपः ॥ ७९ ॥
महोत्सवेषु प्रथितेषु सर्वतः सरत्सु किञ्चित्समया व्यतिक्रमम् ।
स इन्दुषेणं तनयं पुरैककं परं पुनः प्राह च बिन्दुषेणकम् ॥ ८० ॥
कुशीलवाभ्यामिव मैथिलीपतिर्बुधोशनोभ्यामिव वासरेश्वरः ।
अयं रदाभ्यामिव गन्धसिन्धुरो वृतः सुताभ्यां परभागमाप सः ॥ ८१ ॥

प्रगल्भमानौ तनयौ दिने दिने महीपतेस्तावपि वृद्धिमापतुः ।
भृशं प्रसूलालनकर्मणाऽमुना नदीरयेणेव तटौ रसाप्लुतौ ॥ ८२ ॥
जनैरुपर्यासितुमाहृताऽपि यत्स्थितिरस्तु नीचैरसुधावति स्वयम् ।
जडेन तेनापि न कोऽपि संस्तवं करोति तृष्णापरितापवर्जितः ॥ ८३ ॥
सरस्वतीब्रह्मनिरासनस्थितेर्बकस्य हंसस्य च जीवनाशिनः ।
समैव येषु प्रतिपत्तिरीक्ष्यते जडाशयांस्तानपि कोऽभिवाञ्छति ? ॥८४॥
पुरन्दरस्य त्रिदिवेऽस्ति मानना भुजङ्गलोकेऽपि भुजङ्गमप्रभोः ।
प्रजासु किञ्चिज्जयिनः प्रजापतेर्बुधस्य सर्वत्र च बुद्धिशालिनः ॥ ८५ ॥
भवन्ति वश्या विषया बहिस्तना नृपस्य शस्त्रैरपरे न चान्तराः ।
द्वयेऽपि शास्त्रैस्तदयं विशारदैर्विशेष आकारकृतो विभाव्यताम् ॥ ८६ ॥
हृदा विचार्येति महीभुजाऽपि तौ महाकलाचार्यसमीपमापितौ ।
स शिक्षयामास कलाः कलाशयो गुरुश्च तांस्तौ विनयाद्ररञ्जतुः ॥ ८७ ॥
(पञ्चभिः कुलकम्)
समेत्य विद्याः सकलाः सिषेविरे नृपाङ्गजौ तौ विनयोपशोभितौ ।
स्वतोऽपि मासस्य च पक्षकावुभौ तुषाररश्मेरिव चारुचन्द्रिकाः ॥ ८८ ॥
समग्रविद्याकुशलौ महीभुजे समर्पितौ तौ गुरुणा कलाविदा ।
प्रकुर्वतां प्रश्नमुदारधीमतां दृढं हरन्तौ विषमार्थसंशयम् ॥ ८९ ॥
अदूष्यवैदुष्यमवेक्ष्य चैतयोस्तथा सुवर्णं वितताार पार्थिवः ।
किमप्युपाध्यायवराय रञ्जितो द्विजन्मनां येन सुवर्णताऽजनि ॥ ९० ॥
क्षणं धनुर्वेदविशेषशिक्षया क्षणं कुमारौ विदुषां परीक्षया ।
क्षणं नृपोपासनया खलूरिकाश्रमेण कश्चिद् गमयाम्बभूवतुः ॥ ९१ ॥
इतश्च विप्रो मगधोपवर्तनोत्तमाचलग्रामनिवासविश्रुतः ।
अपारशास्त्राम्बुधिपारदृश्वनां ललामभूतो धरणीजटोऽभवत् ॥ ९२ ॥
महेशमौलौ पदमादधाति यो बुधेन सार्धं विरुणद्धि यः क्षयी ।
किमश्नुते तद्व्यतिरिक्तलक्षणः स येन किञ्चित्समतां द्विजेश्वरः ? ॥ ९३ ॥
तदद्भुतं यन्नृपसौधतोरणे न्यधायि येनैकसुवर्णपत्रकम् ।
चकार रागं हृदि तन्महीभुजां विनैव चूर्णं विदुषां विरागताम् ॥ ९४ ॥
अनाप्नुवन् येन समानतां गुरुर्विवादकाष्ठां कलयन् बृहस्पतिः ।
प्रपद्य तन्नास्तिकभावमात्मनो दिवं समासद्य सजीवतां ललौ ॥ ९५ ॥
(त्रिभिर्विशेषकम्)

अभूद्यशःपूर्वपदा जनी पदाश्रिताऽपि भद्रा किल तस्य धीमती ।
उवास यस्या हृदि नैव मत्सरो भ्रमत्सरोपापरसंस्तवेऽप्यहो ॥ ९६ ॥
विवेकरत्नाभरणेन भूषितं यदीयमन्तःकरणं विदिद्युते ।
अवाप्तबाह्याभरणा शिवाऽपि यत्सरूपतामश्नुति न स्वरूपतः ॥ ९७ ॥
(युग्मम्)

तया समं भोगपरम्परामयं सुखं समास्वादयतो द्विजन्मनः ।
कियाननेहा व्रजति स्म यामवत्क्षणे क्षणे यः सृजति स्म संमदम् ॥ ९८ ॥
तयोरभूतां तनयौ सुलक्षणौ सुयुग्मजाताविव रूपसम्पदा ।
अभिख्ययाऽऽद्यः किल नन्दिभूतिकः परः पुनः श्रीयुतभूतिसंज्ञकः ॥९९॥
पराऽपि तद्वप्तुरभून्निकेतने सनातनश्रीभवदुद्धवकेतने ।
अनेकनानाविधकर्मकर्मठाऽशठाऽपि दासी कपिलाऽभिधानतः ॥१००॥
सुतस्तदीयस्तदभिख्यया जनैरवाचि यत्तत्कपिलोऽत्र विश्रुतः ।
अहार्यमेधाभवनं सकृच्छ्रुतग्रहाग्रही संवरवैरिविग्रहः ॥१०१॥
निजाङ्गजावद्भुतरूपवैभवौ त्रयीमुखोऽध्यापयितुं त्रयीमयम् ।
परिश्रमं यं निरमादनुत्तरं स एष जज्ञे कपिले फलेग्रहिः ॥१०२॥
समीपवर्ती च स पारिचारिकस्तयोरधीतौ समजायताधिकम् ।
प्रमादसंदर्भविमर्दनोद्यताः प्रकुर्वते किं न गुणार्थिनः खलु ? ॥१०३॥
यथा यथा ऋग्गणसारणामिमौ कराङ्गुलीभिः कुरुतः स्म नोदितौ ।
तथा तथा कापिल एष मूकवत्तटास्थितः सर्वमबुद्ध बुद्धिभृत् ॥१०४॥
प्रपाठ्यमानावपि शाठ्यमानितौ हठेन पित्राऽपि मठेऽपि नन्दनौ ।
तथा न वेदार्थविशेषवेदिनावुपेक्षमाणोऽपि यथा स कापिलः ॥१०५॥
अधीत्य शास्त्राण्यभियोगयोगतश्छलेन केनापि गृहात्स निर्गतः ।
निरीक्ष्यमाणः सकलां वसुन्धरां क्रमात्पुरं रत्नपुरं समासदत् ॥१०६॥
प्रकाशयन् ब्राह्मणतां यथास्थितां विनिर्मितैर्द्वादशभिर्विशेषकैः ।
समुद्वहन् श्रावकतां गुरूदितैर्व्रतैरिवोपासक एव कश्चन ॥१०७॥
उभे वसानः स कषायवाससी वनोत्थमाध्याह्निकपुष्पसच्छवी ।
कषायतामाशयमध्यमास्थितां बहिर्विकृष्यैव निदर्शयन्निव ॥१०८॥
अनामिकायां दधदङ्गुलीयकं हिरण्मयं नव्यकुशोपशोभितम् ।
जनाय भक्त्या प्रणतिं प्रकुर्वते चिराय जीवेति शुभाशिषो ददत् ॥१०९॥

वितन्यमानः क्वचनापि वन्दिभिर्विनम्यमानः क्वचनापि बाहुजैः।
वितर्क्यमाणः क्वचनापि वाणिजैः कुतोऽयमागादिति भापणोन्मुखैः ॥११०॥
अवापदध्यापकधुर्यसत्यकेर्मठं पठच्छात्रकुलैः समाकुलम्।
अलब्धमध्यं जलराशिवज्जडैः सरस्वतीसन्ततिशालिभिर्वृतम् ॥१११॥
(पञ्चभिः कुलकम्)

तमापतन्तं समवेक्ष्य सत्यकिर्न्ययुङ्क्त पीठानयने बहूनयम्।
स्वयं पुनः प्रत्युदियाय साधवः क्रमस्य निर्मान्ति नहि व्यतिक्रमम् ॥११२॥
समासने सत्यकिरासयत्स्वयं विधाप्य पाद्यादिकमर्घ्यमादरात्।
किमातिथेयाः समुपागतेऽतिथौ न तथ्यमातिथ्यमहो वितन्वते ?॥११३॥
स यावदध्यापकमौलिशेखरः प्रवर्तते प्रष्टुमिमं द्विजब्रुवम्।
अये! चतुर्वर्गफलोपपादके श्रमः क्व शास्त्रे तव पण्डितेति तम् ? ॥११४॥
स एव 'तावत्पठतामपृच्छतामपि व्यभैत्सीद्वियमार्थसंशयम्।
सरस्वती वा यदि वा हरिप्रिया तिरोहिता तिष्ठति किं मनागपि ?॥११५॥
अपृच्छदध्यापक एव तं चिरान्मनःस्थितान् कांश्चन शास्त्रसंशयान्।
विभेद तान् सोऽपि नदीप्रवाहवत् प्रवद्धमूलानपि मेदिनीरुहान् ॥११६॥
तमभ्यपिञ्चत्स्वपदेऽथ सत्यकिश्चमत्कृतश्चेतसि तस्य संविदा।
न किं सपर्यां रचयन्ति धीमतां महानुभावा हि गुणानुसारतः ?॥११७॥
समुद्य तच्छात्रसमुच्चयं बुधस्तथा कथञ्चित्कपिलोऽध्यजीगपत्।
यथा स दुर्बोधपदार्थबोधनात् पुरातनस्य स्मरति स्म नो कवेः ॥११८॥
स्वरूपसन्तर्जितपुष्पसायकं त्रयीसमस्तार्थविशेषवेदिनम्।
प्रवादविद्यापरिभूतगीष्पतिं सुवृत्तहेतुं कपिलं विलोक्य तम् ॥११९॥
कदाचिदध्यापकजीवितेश्वरा प्रतीतिमाप्ता किल जम्बुकाऽऽख्यया।
रहः पतिं प्राह विचारचातुरी विरिञ्चिकन्याकमनीयकान्तिभृत् ॥१२०॥
(युग्मम्)

अपत्यवत्ता ननु सत्यभामया स्वचारुतानिर्जितसत्यभामया।
तनूजया नौ विजयाङ्गभूतया स्मरस्य सुषेणललामभूतया ॥१२१॥
विवाहयोग्या यदि सा प्रदास्यते वराय कस्मैचन, तत्प्रदीयताम्।
द्विजाय धाम्ने गुणराजिराजिने, सुभर्तृदत्ता हि सुता न दुःखभाक् ॥१२२॥
विचार्य चाध्यापक एव जम्बुकावचो मनोहारि तदाऽऽयतौ हितम्।

व्यवाहयत्तां कपिलेन कन्यकां महोत्सवात् कोविदवर्णनातिगात् ॥१२३॥
निकेतनं च प्रददौ मनोरमं महासरोवत् कमलोपशोभितम् ।
सुधाभिरालीढमनुष्णभानुवद् विशालताऽऽलिङ्गितमन्तरिक्षवत् ॥१२४॥
कलत्रवन्तं स्वममंस्त स द्विजस्तयैव भक्तिप्रतिपत्तिशीलया ।
अरुन्धतीजानिरिवाक्षमालया निशीथिनीनाथ इव त्रियामया ॥१२५॥
अजीगमत्कांश्चन वत्सरानयं तुषारकालोदितवासरानिव ।
समं तया वैषयिकं सुखं भजन् क नानुरूपं कृतपुण्यसम्पदाम् ? ॥१२६॥
तनूभुवां पाठनिमित्तकारणाद् महातिचारादिविबोधनादपि ।
नवीनजामातृतया च सत्यकेरपूजि भक्त्या कपिलो न कैर्जनैः ? ॥१२७॥
स कोऽपि नैवास्ति न येन काञ्चनं व्यतारि तस्मै कपिलाय मानतः ।
जनः समग्रो यदि वा बहिर्मुखः प्रवाहमालम्ब्य बलात्प्रवर्तते ॥१२८॥
अशेषशास्त्रागमतत्त्वदर्शिनां निदर्शनं प्राक्कपिलः स्वतोऽभवत् ।
अनन्तरं सत्यकिनन्दनाश्रितो धनेश्वराणां प्रथमं निदर्शनम् ॥१२९॥
शिखण्डकान् धारयतोऽपि पक्षिणः प्रनर्तयन्ती घनगर्जिवादनात् ।
प्रसह्य हंसानपि या विदेशगान् स्वरूपसन्दर्शनतः प्रकुर्वती ॥१३०॥
समुन्नमत्पीनपयोधरा रसं प्रपुष्णती केतकपत्ररोचना ।
प्रवर्त्तयन्ती सुमनोविकाशनं वधूरिव प्रावृडुपागमत्तदा ॥१३१॥
(युग्मम्)

सुगन्धिताक्तेषु सुवर्णकेतकीसुमेषु लीना भ्रमरावली स्थिरा ।
व्यनक्ति यत्रैव महेभ्यकारितां सुवर्णशालोपहिताश्मगर्भताम् ॥१३२॥
सुखस्थिता यत्र सुवर्णमालतीविकाशिपुष्पेषु षडंह्रिसन्ततिः ।
प्रपाकिजम्बूफलविभ्रमाच्छुकैर्विचुम्ब्य चञ्चूभिरहो व्यमुच्यत ॥१३३॥
नभोमणिर्यत्र धरोपतापनापराधतः क्वापि निलीय तस्थिवान् ।
परैरभेद्ये कमलोत्कराश्रिते नभः समाक्रम्य नवाम्बुदे स्थिते ॥१३४॥
ग्रहाधिपे सागसि विश्वतापनात् कलानिधिर्यत्र करप्रसारणाम् ।
अलं न कर्तुं जलदेऽतिगर्जति, प्रकोपने स्वामिनि का विचारणा ? ॥१३५॥
भवन्ति यस्माद्भुवनानि भूरिशो यतोऽपि दुर्भिक्षमुपैति संक्षयम् ।
धनानि धान्यानि च यत्प्रसादनात् प्रशस्यते नो जलदागमः स किम् ? ॥
(पञ्चभिः कुलकम्)

कदाचन प्रेक्षणकस्य वीक्षणं सुरालये कापिल उत्तमर्द्धिभिः।
समं विनिर्माय स यावदात्मना क्षपामुखे मन्दिरमेतुमैहत ॥१३७॥
घनाघनस्तावदरं प्रवर्षितुं प्रचक्रमे मारुत एव सर्पति।
दिदृक्षुरन्तर्गतमस्य चेष्टितं स्वयं द्विजातेरिव चञ्चलेक्षणैः ॥१३८॥
न सूचिभेद्येषु तमस्सु संसरत्स्ववेक्षिता कश्चन मां प्रयायिणम्।
इति स्वचित्तेन विचिन्त्य वाससी निधाय कक्षान्तरयं गृहं प्रति ॥१३९॥
प्रियावियोगं न विसोढुमीश्वरो वलाहके वर्षति स प्रचेलिवान्।
समुन्नते वारिधरेऽथवा जनः प्रियावियोगं स्ववशः सहेत कः?॥१४०॥
(युग्मम्)

दिगम्बरत्वं स तदा प्रपेदिवान् विवोधभाजं गुरुमन्तरेण यत्।
विगोपना तत्पतितत्वशङ्कया कयाऽपि तेनैव निदर्शनीकृता ॥१४१॥
दिगम्बरत्वं परमेश्वरस्य वा प्रकाशते नैव परस्य कस्यचित्।
न लोकमालम्ब्य विभर्ति यः स्थितिं न यस्य तृष्णा कचिदप्यनारतम्॥१४२॥
अनावृतद्वारकपाटसंपुटं प्रियासमुद्दीपितदीप्रदीपकम्।
गृहं समासाद्य विलम्ब्य च क्षणं द्विजः स वस्त्रे परिधाय चाविशत् ॥१४३॥
प्रियस्य वासांसि घनेन तेमितान्यवश्यमस्य स्युरितीह तत्प्रिया।
प्रविश्य सा वासगृहं पतिव्रता पराणि तान्यानयति स्म भाविनी ॥१४४॥
इमे स्ववस्त्रे विजहीहि वार्युकाम्बुवाहनिर्मुक्तजलौघतेमिते।
मदाहृते शारदचन्द्रसच्छवी गृहाण धीमन्! परिधेहि चायते ॥१४५॥
वयेत्थमासक्तिवशादुदीरितः सविस्मयं सस्मितमाह स स्म ताम्।
प्रिये! न वस्त्रे मम तेमिते स्फुरत्प्रभावमन्त्रेण मयैव रक्षिते ॥१४६॥
न चेत्प्रतीतिस्तदिमे निभालय प्रभाऽऽलयस्वाङ्गजितामराङ्गने!।
इतीरिता संस्पृशती तदंशुके वपुश्च तस्यार्द्रमसावचिन्तयत् ॥१४७॥
यदङ्गमार्द्रीकृतमम्बुबिन्दुभिर्विहाय वासः कथमेतदिष्यते?।
न मन्त्रमाहात्म्यमजागरूककं गुरूक्तमेवं कचनापि गम्यते ॥१४८॥
शरीररक्षाकरणाय कोविदैर्विशिष्य मन्त्रः खलु शिक्ष्यते गुरोः।
विनोदमात्रप्रतिपत्तिहेतवे न धीमतां स्युर्जगति प्रवृत्तयः ॥१४९॥
त्रिवर्गनिर्माणविशिष्टसाधनं वदन्ति साक्षात्स्वशरीररक्षणम्।
क्रमात्परीणामवशेन देहिनां प्रसाधयत्येतदपीह निर्वृतिम् ॥१५०॥

प्रसर्पति ध्वान्तभरे दिगङ्गनामुखाम्बुजाच्छादनजातकौतुके ।
निरंशुकीभूय समीयिवानयं ध्रुवं स्वकक्षानिहितांशुकद्वयः ॥१५१॥
कुलीनतां तत्र परिस्पृशत्ययं विवेचितस्तादृशकर्मनिर्मितेः ।
किमत्र कार्यं, यदि वा परीक्षया कुलानुमानेन विचेष्टते जनः ॥१५२॥
पपाठ वेदानपि कर्णघर्षणैरयं सनिर्बन्धतया शठः कचित् ।
चिरन्तनसंस्कारविवर्द्धिता हि धीर्बहिर्भवं न व्यवसायमीहते ॥१५३॥
अलं तदेतेन ममापि संकथा विधातुमेतेन कुकर्मणाऽमुना ।
कुलाङ्गनानां विपयोपसेवनं कुलीनभर्त्रा हि सह प्रशस्यते ॥१५४॥
अहं पितृभ्यामविमृश्यकारितापरिष्कृताभ्यां परिणायिता पुरा ।
विमोचनीया वचनीयता स्थितेरतः कथङ्कारमुदारसंपदः ? ॥१५५॥
न पौरवार्त्यैरपि मामयं जडः स्मरामयप्लुष्टविवेकविग्रहः ।
कुलाभिमानं स्पृशतीमुदित्वरं वरं परित्यक्ष्यति रक्षितग्रहः ॥१५६॥
न कोऽपि तादृक् सुजनोऽस्ति मामतो विमोक्ष्यते यो वचनैः श्रुतिश्रुतैः ।
न वेदवाक्यव्यवहारलोपिनो विनिर्मिमीते हि जनः सभाजनम् ॥१५७॥

अथ प्रथममिङ्गितैस्तदनुचेष्टितैरप्यहं
करोमि किल दुर्धियः कुलविशेषसंवेदनम् ।
ततो विधृतनिश्चया सपदि मुक्त्युपायं पुरा
भजामि वरमित्यसौ परिविमृश्य चिन्तां जहौ ॥१५८॥

तन्वाना लक्ष्मानव्यतिकरमवनीविस्फुरद्भद्रशाला
स्वान्तर्भूतं समुच्चं विबुधसमुचितं सौमनस्यं दधाना ।
कल्याणस्यैकभूमिर्गिरि-परिदृढतां ख्यापयन्ती तथापि
ज्ञाता नो मन्दरागाऽनुकरणनिपुणा केनचित्सत्प्रभामा ॥१५९॥

आसीत् श्रीगुरुगच्छमौलिमुकुटश्रीमानभद्रप्रभोः
पट्टे श्रीगुणभद्रसूरिसुगुरुर्विद्यावतां सद्गुरुः ।
तच्छिष्येण कृतेऽत्र षोडशजिनाधीशस्य वृत्ते महा-
काव्ये श्रीमुनिभद्रसूरिकविना सर्गोऽयमाद्योऽगमत् ॥१६०॥

॥ इति श्रीशान्तिनाथचरित्रे प्रथमः सर्गः ॥

तत्सन्निधौ यात यथा स दत्ते धनानि युष्मभ्यमृणापहानि ॥ १३ ॥
पथ्यां च तथ्यां च स वाचमस्या निपीय पीयूषरसातिसाराम् ।
सदर्पितं दर्पविविक्ततेजाः पाथेयमादाय चचाल विप्रः ॥ १४ ॥
प्रदक्षिणस्तस्य बभूव चापः प्रदक्षिणत्वं प्रथयन्निवोच्चैः ।
प्रतिष्ठमानस्य सुतं प्रतीष्टप्राविष्टमानस्य ततो द्विजातेः ॥ १५ ॥
तटोद्गतानेकविशालशालच्छायानिषिद्धातपसच्चयानि ।
सम्भावयन् क्वापि सरांसि शीतमुक्ताफलक्षोदसमाम्बुपानात् ॥ १६ ॥
पुराणि साराणि निरीक्षमाणः क्वचिद् गवाश्वादि परीक्षमाणः ।
तीर्थानि कुत्रापि परीयमाणस्त्रिः क्वापि दुर्गाश्च निरीयमाणः ॥ १७ ॥
विश्रम्य विश्रम्य महीरुहाणां छायासु कुत्रापि चलन् श्रमार्तः ।
ध्वजाभिरावेदितसौधराजि प्राप क्रमाद्रत्नपुरं पुरं सः ॥ १८ ॥
(त्रिभिर्विशेषकम्)

यदुन्नतं दुर्गमितोऽपि हर्म्यचक्रं ततोऽपि क्षितिपालसद्म ।
ततोऽपि जैनायतनं च तस्मिन् सतां तदौन्नत्यमयं स मेने ॥ १९ ॥
पदे पदे प्रेक्षणकौतुकानि स प्रेक्षमाणः प्रमदेन तत्र ।
प्रश्नैरनेकैरुपलब्धमेष प्राविक्षदुच्चैः कपिलस्य सौधम् ॥ २० ॥
रत्नाकरस्तं कपिलो द्विजेशं हर्षादसंमानिव सद्रसोत्थात् ।
मर्यादया स्थापितसत्त्वराशिः प्रत्युज्जगामाभ्युदितं ततो द्राक् ॥ २१ ॥
तातक्रमाब्जे अभिवाद्य पार्थ सम्पाद्य सद्यः परिमृज्य भक्त्या ।
तेनैव चात्मानमयं स्वमौलौ निवेशितेनामलमाधर्मस्त ॥ २२ ॥
भद्रासने तं विनिवेश्य सोऽथ प्राणीनमत् तामपि सत्यभामाम् ।
फलानि पुष्पाणि च धारयन्तीं पुरो वधूस्ते नमतीति जल्पन् ॥ २३ ॥
भोज्यानि सम्पादय तातहेतोर्निष्टानमिष्टान्नमपि प्रयुङ्क्ष्व ।
अम्भोजनेत्रे ! लघु भोजयेमं विलोलचेलाञ्चलवीजनेन ॥ २४ ॥
सार्धं शिरोऽर्तिव्ययमानदेहो भोक्ष्ये प्रिये ! तद्विनिवृत्तिमाप्य ।
उत्तिष्ठमाना हि रुजा निवर्त्या प्रवर्द्धमाना खलु दुर्निवारा ॥ २५ ॥
इति प्रियां प्रत्यभिधाय दम्भात् क्षणं स शय्यामधिशय्य शिश्ये ।
निर्माय निर्मायतयैव तत्तदयूयुजत्सा श्वशुरं सुभाक्तिः ॥ २६ ॥
रमागुराणामवसंर्ममेतं वेदान्तविद्याविदुषां गुरुत्यम् ।

अभ्यागतं तं गुरुमाशयित्वा कृतार्थमात्मानममंस्त साऽपि ॥ २७ ॥
विलम्ब्य कञ्चित्समयं विनिद्रः समुत्थितः सोऽपि पुनर्वितन्द्रः ।
ऊचे प्रियामाशय मां समीरभवा शिरोऽर्त्तिर्न्यवृतन्ममापि ॥ २८ ॥
तदैव संसाध्य च साधु भोज्यं सा भोजयामास तमाशु साध्वी ।
कलावतीनां हि कुलाङ्गनानां पाकक्रियायां न भवेद्विलम्बः ॥ २९ ॥
भृशं पृथग्भोजनकर्मतः सा न तत्सुतं तं कलयाञ्चकार ।
चिराद्वयस्यावपि सङ्गतौ यन्न भिन्नपङ्क्त्या भुजिमादधाते ॥ ३० ॥
प्राप्यावकाशं तदहं कथञ्चित्स्वरूपमस्य श्वशुरं यथार्थम् ।
यथार्थवादाकलितोरुकीर्त्ति प्रक्ष्यामि, सङ्ख्याऽमितवाग्विलासा ॥ ३१ ॥
विचिन्त्य चैवं कपिलप्रिया सा स्थिरेव यावत्स्थिरतां जगाहे ।
ताम्बूलमस्मै कपिलः प्रदाय तावत्प्रतस्थे स विमृश्य कृत्यम् ॥ ३२ ॥
सा सत्यभामा श्वशुरस्य तस्य समीपमागत्य निपत्य पादौ ।
संयोज्य हस्तौ कमलप्रशस्तौ वचस्विनी वाचमुवाच धीरा ॥ ३३ ॥
प्रसादमाधाय निवेदयन्तु ममाग्रतः संप्रति पूज्यपादाः ! ।
किमङ्गजो वस्तनयः किमाहोस्विज्जातिजातः परिपालितोऽयम् ?॥ ३४ ॥
अन्यस्य कस्यापि महानुभावैर्दयाऽनुरोधाद्विभृतोऽथ वाऽपि ? ।
कृष्यादिनिष्पत्तिविधानहेतोः क्रीतः किमेष प्रतिपन्न एव ? ॥ ३५ ॥
तथ्यं न चेच्छंसत सद्गुणौघैरशेषसंसत्स्वपि शंसनीयाः ।
तद्ब्रह्महत्यादिककर्मजन्यैर्लिप्यध्व एनोभिरवश्यमेव ॥ ३६ ॥
इतीरितः सोऽपि तयैव वध्वा ब्राह्मण्यचञ्चुः स्फुटमाचचक्षे ।
न यस्य लोकद्वयसाधनेच्छा स एव मिथ्यावचनं ब्रवीति ॥ ३७ ॥
अहं तु वस्त्वर्थनयैव वत्से ! समागमं यद्यपि तत्समीपम् ।
त्वया च पृष्टः शपथैरुदग्रैस्तथापि तथ्यं मयका निगाद्यम् ॥ ३८ ॥
अजाड्यधन्वस्थल एव जातं जानीहि दासेरकमेतमत्र ।
समग्रभारोद्वहने समर्थं परिस्फुटत्कण्टकचर्वणोत्कम् ॥ ३९ ॥
तेनोदितं श्लेषमुखेन वाक्यं सुखेन साऽबुद्ध विबुद्धवर्या ।
यद्वेत्ति विद्वत्परिचारकोऽपि दुर्गं, न किं सत्यकिनन्दना सा ?॥ ४० ॥
निधाय साऽन्तर्मनसं तमर्थं निधिं धरित्रीव विचित्ररूपा ।
पुण्याङ्कुरोत्पत्तिमपेक्षमाणा तस्थौ रमालिङ्गितमध्यदेशा ॥ ४१ ॥

यन्मेऽपि वृत्तान्तमिह प्रवक्ता तातः स्थितस्तेन विसर्जनीयः ।
स्ववृत्तभङ्गे यदि वा महद्भिः प्रमादलेशः परिवर्जनीयः ॥४२॥
चित्ते विचिन्त्येति वितत्य कृत्यं समेत्य पल्यं कपिलो वहि(स्त:) ष्टः ।
पप्रच्छ भार्यां शुचिशीलधुर्यां वप्तुः सपर्याविधये विहस्तः ॥ ४३ ॥
अदर्शयन्ती स्वमनोविकारं सा सत्यभामा दयितं बभाषे ।
प्रदीयतेऽस्मै गृहसारसारं पात्रं गुरुश्चेति महान् हि योगः ॥ ४४ ॥
सोऽयं तदुत्साहविवर्द्धिभावः स्वर्णं च रत्नं च दुकूलवस्त्रम् ।
विश्राण्य योग्यं व्यसृजत् समृद्धौ गुरौ हि को नाम पराङ्मुखः स्यात्?॥४५॥
सुपात्रसम्बन्धमवाप्य लक्ष्मीः कृतार्थतामाश्रयति स्म तस्य ।
जातः कृतार्थः कपिलोऽपि, को वा भक्त्या सतां नो परितोषमेति ? ॥४६॥
निश्चित्य तादृक् कपिलस्वरूपं मनोविरागं च निजानुरूपम् ।
अनन्यनिर्वर्त्त्यतदीयचेतोवृत्तिप्रवृत्तिं च सुवृत्तभावा ॥ ४७ ॥
दौवारिकज्ञापितवित्तवृत्तवृत्तान्तमश्रान्तनयप्रचारम् ।
श्रीषेणभूपालमुपेत्य भर्तृस्वरूपमाख्यत्किल सत्यभामा ॥ ४८ ॥
(युगलम्)

त्वमेव सूरः परतापनत्वाद्गुर्वाश्रयत्वात्किमु नासि सोमः ? ।
त्वं मङ्गलो भूतनयस्त्वमेव बुधः प्रतीतव्यवहारसौम्यः ॥ ४९ ॥
गुरुस्त्वमालम्बनभूतजीव ! प्रभो ! कविस्त्वं श्रुतकाव्यनामा ।
शनैश्चरस्त्वं श्रितमन्दभावस्तमोहिपन्थार्थिवसैंहिकेयः ॥ ५० ॥
चन्द्रावदाताद्भुतवंशकेतुस्त्वन्निग्रहात्मा किमनुग्रहात्मा ? ।
यत्रानुकूलः प्रतिकूलको वा करोषि तं देवविभूतिभाजम् ॥ ५१ ॥
विज्ञप्तिमाकर्णय मे नरेन्द्र ! त्वत्तो वराकः स पुनः सुरेन्द्रः ।
न दृश्यते तज्जयवाहिनी सा न दृश्यतेजःप्रसरप्रचारः ॥ ५२ ॥
यः श्राद्धदेवः समवर्तनो यो यो धर्मराजः शमनः श्रुतो यः ।
तत्किं नराधीश्वर! कर्म वाच्यं तस्माद्विभिन्नं जिनमेव विद्धि ॥ ५३ ॥
पुरातने जन्मनि तस्य वाचः श्रोत्राभिधित्वं मयका न नीताः ।
नीतास्ततः किं यदि नाम नैव चित्ते धृतास्ता विधृतास्ततः किम् ? ॥ ५४ ॥
यथोक्तवृत्त्यैव न यावदेताः सुशिक्षिताः स्युः परिशीलनेन ।
तावत्कथं दुःखपरंपराया विभेदने बिभ्रति लालसत्वम् ? ॥ ५५ ॥

यानि प्रभोऽज्ञानवशादकार्षं तान्येव पापानि दहन्ति किं माम् ?। --
स दारुणो दारुण एव वह्निः सम्भूय किं नोषति दारुभारम् ? ॥ ५६ ॥
संवर्द्धितस्तैर्दुरितैर्ममायं भर्ता कुलीनः समपादि नैव ।
तस्मात्तथा नाथ ! विधेहि मुक्ता तेनैव धर्मं करवै यथाऽहम् ॥ ५७ ॥
आकर्ण्य विज्ञप्तिमिमां स तस्याः पार्श्वस्थदौवारिकमादिदेश ।
स्वयं समाहूय समेहि विप्रं प्राणेश्वरं सत्यकिनन्दनायाः ॥ ५८ ॥
तथेति राज्ञः परिगृह्य वाचं दौवारिकोऽगात्कपिलस्य वेश्म ।
आजूहवद्भृत्यमुखेन चेति भवन्तमाकारयति क्षितीशः ॥ ५९ ॥
उपेत्य तत्संनिधिमात्मनैव प्रदाय तस्याशिषमानतस्य ।
विज्ञाय वृत्तान्तमिमं तदाऽऽस्यादाशङ्कया प्लावितचित्तहर्षः ॥ ६० ॥
ससंभ्रमस्तेन समं स गत्वा व्यभूषयद्राजसभां ससभ्याम् ।
नरेन्द्रसंदर्शितभूमिभागप्राप्तासनः प्रोक्तजयेतिशब्दः ॥ ६१ ॥
(युग्मम्)

वर्णाश्रमाचारविचारचारुस्ततस्तमाचष्ट धराऽधिराजः ।
उदारभावस्य न दारभावं तवाकुलीनस्य तु काङ्क्षतीयम् ॥ ६२ ॥
तस्मादिमां सत्यकिकन्यकां त्वं विरक्तचित्तां विजहीहि भद्र ! ।
नैवानुरागः सुरसहृदये स्याद्विरागताऽऽलम्बिनि निर्मितो हि ॥ ६३ ॥
कर्णातिथीकृत्य नृपस्य वाचः प्रोवाच वाचस्पतिवत् स विप्रः ।
ऐश्वर्यलीलां कलयन् किमीदृक् प्रभुः प्रवक्तुं प्रभुवत्परोऽत्र ? ॥ ६४ ॥
प्रभां विना चेदवतिष्ठतेऽर्कश्चन्द्रः स चेच्चन्द्रिकया विनाऽपि ।
पृथ्वीश ! चेच्चेतनया विनाऽऽत्मा विनैतया स्थातुमलं तदाऽस्मि ॥ ६५ ॥
दृष्टान्तदार्ष्टान्तिकयोर्विरोधं प्रीतेर्विसंवादितयैव तस्याः ।
अप्रेक्षमाणः स पुनः क्षितीशा प्रेक्षावतामग्र्यतमोऽप्यवाचि ॥ ६६ ॥
सांसारिकी प्रीतिरियं द्विनिष्ठा संबन्धवत्किं प्रतिभासते न ?।
सा चैकनिष्ठाऽभ्युपगम्यते चेत्किमेकतालेन न तालिका स्यात् ?॥ ६७ ॥
प्रीतिं परां धारयसि त्वमस्यामेषा ममाकाङ्क्षति नो भवन्तम् ।
दुःस्थः श्रियं ध्यायति पुण्यहीनः सा तं समालिङ्गति नैव यद्वा ॥ ६८ ॥
पश्चादितो नेष्यसि चेदिमां त्वं प्राणानियं त्यक्ष्यति तत्प्रसह्य ।
तस्मादियं तिष्ठतु मे निशान्ते सुतेव धर्मं सितमाचरन्ती ॥ ६९ ॥

अभूतपशुस्वाम्यपि निर्विलम्बं कपर्दभूत्याकलितोऽपि नूनम् ।
ऐश्वर्यधुर्यः समलोकमान्यो धर्मं दधानः स सदाशयेऽपि ॥ ७० ॥
धर्मं समाश्रित्य गुणाः समस्ता महार्घतामाप्य जगत्त्रयेऽपि ।
महत्तमानां श्रवणाऽतिथित्वं जीवाभिधानप्रथिता लभन्ते ॥ ७१ ॥
सभ्यैः प्रमाणीक्रियमाणमेतद्राज्ञो वचस्तत्कपिलोऽन्वमंस्त ।
जिजीविषुः को नृपतेर्निदेशं प्रत्यादिदिक्षाविषयीकरोति ? ॥ ७२ ॥
वितीर्यमाणं वसुधाधवेन स्वपाणिपद्मेन स सूत्रकण्ठः ।
ताम्बूलमादाय करद्वयेन स्वान्तं विनाऽगात्कुपितः स्वगेहम् ॥ ७३ ॥
सा सत्यभामा नृपतेरनुज्ञामासाद्य सद्यः प्रमदं वहन्ती ।
महल्लकैर्भूषितपार्श्वभागा शुद्धान्तभूभागमलञ्चकार ॥ ७४ ॥
दुष्कर्ममर्माणि विदारयन्ती तपांसि शुद्धानि विसारयन्ती ।
साऽन्तःपुराणां मुदमर्पयन्ती तत्र स्थिता स्वान्तमदर्पयन्ती ॥ ७५ ॥
अथाऽस्ति कौशाम्ब्यभिधा प्रसिद्धा पुरी परीता कमलाविलासैः ।
विवर्ण्यते या कविभिः प्रवीणैर्जिनेन्द्रपद्मप्रभजन्मभूमिः ॥ ७६ ॥
तस्यां बलेन प्रबलो बलोऽभूद्भूमीपतिर्भूसगुणौघभूमिः ।
यस्य प्रतिद्वन्द्वितयैव शङ्के शक्रो बलारित्वविशिष्टनामा ॥ ७७ ॥
न श्रीमती तस्य बभूव नाम्नाऽपि श्रीमती किन्तु वधूः स्वधाम्ना ।
यद्रूपसौन्दर्यसखित्ववृत्त्या रतिं भजन्ती रतिरेव जज्ञे ॥ ७८ ॥
तदङ्गजाऽजायत पुण्यतः श्रीकान्ता द्विधाऽपि श्रुतिचत्सदङ्गा ।
विद्या यदभ्यासवशात्प्रवृत्ताः प्रसिद्धिमालम्बिपतानुपायम् ॥ ७९ ॥
सा बालभावेऽपि गुणैरशेषैरेवाश्रिता प्रीतिविधित्सयैव ।
स्वयं समागम्य हि संगतेषु प्रभोरजय्यं न च जीर्यतीह ॥ ८० ॥
सा यौवनोन्मेषविशेषरम्या श्रीषेणभूमीन्द्रतनूभवाय ।
गरीयसे प्रैषि वसुन्धरेशा स्वयम्वराऽमा सुपरिच्छदेन ॥ ८१ ॥
राजाधिराजाङ्गजमिन्दुषेणं स्वयंवरीतुं बलराजपुत्री ।
इयं समेतीति नृपैर्निशम्योपदाभिरापूरि पदव्युदारैः ॥ ८२ ॥
स्वयम्वरार्थं स्वयमेव यान्तीं श्रुत्वा नृपैस्तां द्वितयं व्यबोधि ।
विज्ञानभङ्गी बलराजपुत्र्यां सौभाग्यभङ्गी प्रवरेन्दुषेणे ॥ ८३ ॥
स कोऽपि भूमीपतिरेव नासीत् समाप्रजन्यां बलराजपुत्र्याम् ।

पय्युन्नता रत्नपुरेन्द्रतुष्ट्यै न तोरणश्रेणिरबन्धि येन ॥ ८४ ॥
मुक्ताफलक्षोदसहोदराणि पयांसि भूयांसि भवन्ति यत्र ।
निवेशयामासुरपेतबाधास्तत्रैव गुप्यद्गृहमेतदीयाः ॥ ८५ ॥
वणिग्जनाध्यासितहट्टवीथीलभ्याखिलक्रय्यकदम्बकत्वात् ।
तत्रोपकार्याराचिताधिवासाः स्मरन्ति वेश्मानि न केचन स्म ॥ ८६ ॥
संवाह्यमाना क्वचनापि बाढं श्रमं विनाऽपि प्रयतालिवर्गैः ।
प्रवीज्यमाना कदलीदलौघैः कचिद्भुजिष्याभिरितस्ततोऽपि ॥ ८७ ॥
कर्म प्रकुर्वाणमनात्मनीनं सखीजनं काऽपि निवर्तयन्ती ।
प्रवर्तयन्ती क्वचनापि दासी राशीकृतानेकगुणप्रकारा ॥ ८८ ॥
प्रौढप्रतापाऽनुचरानुयाता निदेशमात्रप्रभवत्प्रयोगा ।
नरेन्द्रकन्या शिबिकाऽधिरूढा प्रापत्क्रमाद्रत्नपुरं पुरं सा ॥ ८९ ॥

(त्रिभिर्विशेषकम्)

तया सहानन्तमतिर्द्धियाऽपि वाराङ्गनाजङ्गमराजधानी ।
अनङ्गराजस्य समाजगाम न्याय्यं सहायं प्रतिरूपयन्ती ॥ ९० ॥
रूपं यदीयं समवेक्ष्य धीरैर्नैवोर्वशी कैश्चिदमानि मान्या ।
अगण्यलावण्यगुणाभिरामं रम्भाऽपि नादृश्यतया विवर्ण्या ॥ ९१ ॥

(युग्मम्)

श्रीषेणभूवासवसम्भवौ तां नेत्रातिथीकृत्य कृतार्थभावम् ।
स्वस्वादधानौ हृदये वितर्कमेतादृशं चक्रतुरेककालम् ॥ ९२ ॥
संजातकोपेन सुराधिपेन प्रदत्तशापेन निपातिता किम् ? ।
कटाक्षविक्षेपलवेन देवान् व्यामोहयन्ती सहसोर्वशीयम् ? ॥ ९३ ॥
प्रपावतीनां कुलवातिकानामस्माकमन्तः किमियं करोति ।
इतीव देवीभिरमानितेयं भ्रष्टा दिवो वा कथमुर्वशी न ? ॥ ९४ ॥
उपेक्ष्य मां चन्द्रभृताऽपि भर्त्रा गङ्गा धृता मूर्द्ध्नि विचिन्त्य चेति ।
अजाततोषा विहिताधिरोषा गौरी किमेषा समुपागताऽत्र ? ॥ ९५ ॥
भागीरथीं यां शिरसा गिरीशोऽप्यत्याक्षुतरतामयमात्तगर्वः ।
पदाऽपि नैव स्पृशतीति रुष्टा लक्ष्मीरियं लक्ष्मविवर्जिता किम् ? ॥९६॥
निमिष्यदक्षस्यविशेषलिङ्गानुपलब्धिमात्रेण विबुध्य नारीम् ।
अन्योन्यसंस्पर्द्धितयेव बाढं तस्यां मनो द्वावपि तौ न्यधत्ताम् ॥ ९७ ॥

लज्जां परित्यज्य परिच्छदस्य सौभ्रात्रसंबन्धमचिन्तयित्वा ।
तस्याः कृते तावपि जातरागौ युद्धप्रतिज्ञां रभसा व्यधत्ताम् ॥ ९८ ॥
स इन्दुषेणः खलु बिन्दुषेणं बभाण हत्वा युधि संप्रहारैः ।
भवन्तमेतां यदि नात्मकान्तां करोमि तन्नाम न तातजातः ॥ ९९ ॥
जगौ कनीयानपि बिन्दुषेणस्तमिन्दुषेणं स्मरविह्वलाङ्गम् ।
सहोदरस्ते न भवामि चेत्त्वां जयामि नाहं रणमादधानः ॥१००॥
अभूतपूर्वं परिभाव्य युद्धं तयोर्भविष्यत्त्वरितं सुभृत्यैः ।
न्यवेदि भूमीपतयेऽथवा के प्रजानते तां दुरुदर्कवार्ताम् ? ॥१०१॥
आकार्य राजाऽपि तदैव सर्वान् रहस्यमात्यान् सुतयोस्तदीदृक् ।
अकार्यमावेद्य निवर्तनायाः समादिदेश प्रतिकारसाध्यान् ॥१०२॥
रसापतेस्तं शिरसा निदेशं निधाय जग्मुः सचिवाः समीपम् ।
कुमारयोः कङ्कटमण्डलाग्रसंयुक्तपरीवारपरीतयोस्ते ॥१०३॥
ज्येष्ठो विवेकीति पुरेन्दुषेणं विनम्य बद्धाञ्जलयोऽथ तेऽपि ।
व्यजिज्ञपन्विज्ञतमाः कुमारं सारं यथा भूमिभुजोपदिष्टम् ॥१०४॥
यत्त्वां कुमार ! प्रतिपादयामस्तदत्र न क्षूणमवेक्षणीयम् ।
हितं स्वतोऽपि प्रवदन्ति भृत्या वाच्यं पुनः स्वामिनिदेशतः किम् ?॥१०५॥
कुमारसारावहितोऽस्मदीयं वाक्यं समाकर्णय तावदेतत् ।
कनीयसा स्वेन सहोदरेण युद्धा समं केन तताऽत्र कीर्तिः ? ॥१०६॥
सतां तु वेश्यास्पृहयालुतायाः कथाऽप्यहो नैव विधातुमिष्टा ।
लाभं समाशङ्कय तदीयमाराद्युयुत्ससे त्वं किमनेन धीर ? ॥१०७॥
कनीयसो यत्र मनः प्रसक्तं सा ते वधूस्तद्दयिताप्रजत्वात् ।
सुता वधूश्चापि समे प्रपन्ने विभो ! कुलाचारविचारविद्भिः ॥१०८॥
उपागमत्त्वां परिणेतुमेषा बलस्य पुत्री स्वजनेन सार्द्धम् ।
भ्रात्रैव युद्धोममवेक्ष्य सा त्वां लज्जिष्यते किं न चमूरुचक्षुः ? ॥१०९॥
तत्त्वं निवर्तस्व गुरोर्निदेशं मन्यस्व संमानय नः स्ववाचा ।
भृत्या हि नान्यं प्रतिवाक्यदानात्स्वामिप्रसादं परमामनन्ति ॥११०॥
श्रुत्वा तदीयं वचनं कुमारः प्रत्युत्तरं सस्मितमाह स स्म ।
युद्धाद्धि वीरव्रतदीक्षितानां कीर्त्तिश्रियः सप्रसरं चरन्ति ॥१११॥
अशिक्षि यस्याः किल कामविद्या भवद्भिरुत्कान्तशिशुत्वयोगैः ।

विगीयते सा यदि वारनारी पूज्यस्तदाध्यापक एव किं वः ? ॥११२॥
युद्धं विधेयं न कनीयसामित्येतन्न सम्यग्गदितं भवद्भिः ।
वयोऽप्यपेक्षाप्रसरेण धीरा गौणं कनीयस्त्वमुदाहरन्ति ॥११३॥
बलं व्यपेक्ष्यैव विशेषविद्भिर्न्यगादि तच्चेत्किमु संशयो न ? ।
न निर्णयः सङ्गरमन्तरेण प्रमाणनीयः प्रतिपद्वताऽपि ॥११४॥
उपायतायापि न तां नताङ्गीमयं च सा तं च न सातलिप्सुः ।
विनैव सम्बन्धमियं वधूस्ते युष्माभिरुक्तं किमिदं प्रशस्तम् ? ॥११५॥
स्वयम्वरार्थं स्वयमागता सा दृष्ट्वा रणं नौ भविता प्रहृष्टा ।
न क्षत्रियाणां वणिजामिवार्जे विहाय कर्मापरमस्ति किञ्चित् ॥११६॥
ततो निवर्ते यदि संपरायादहं परामृश्य कथञ्चनापि ।
आरब्धभङ्गप्रवणप्रतिज्ञा लज्जा समालिङ्गति किं न युष्मान् ? ॥११७॥
दुराग्रहं तस्य विबुध्य चित्ते ततः समुत्थाय च धीसखास्ते ।
श्रीमिन्दुषेणं समुपेत्य नत्वा नृपोदितं विज्ञपयाम्बभूवुः ॥११८॥
उभौ भवन्तौ मिलितौ च कालः प्रध्वस्तमात्सर्यभरौ कुमार ! ।
स्वरूपनिर्भर्त्सितविश्वरूपौ दस्राविव क्षोणितलावतीर्णौ ॥११९॥
द्वयोर्विरोधे भवतोर्निशम्य स्मयोन्मुखानि द्विषतां मुखानि ।
कथं भविष्यन्ति न यद्द्विषां स्यान्मुद्धिप्रलापैर्न च विप्रलापैः ? ॥१२०॥
बलस्य सामर्थ्यमपारयन्तः सोढुं मदं चेतसि धारयन्तः ।
राज्यस्य हेतोर्यदवोऽपि युद्धं कुर्वन्ति सौजन्यममानयन्तः ॥१२१॥
स्त्रियाः कृते सोदरयोर्विरोधं नाश्रौष्म कुत्रापि न दृष्टवन्तः ।
वाराङ्गना या पटहार्दपात्रं तस्याः कृते किं करणीयमेवम् ? ॥१२२॥
ज्यायान्मदोन्मादविसंस्थुलत्वात्स तेऽस्मदुक्तं यदि नो शृणोति ।
उपेक्ष्य तं सन्निधिमागतास्ते कुरुध्व युक्तं प्रतिभाति यत्ते ॥१२३॥
निवर्तमानं समरक्रियायाः स्तोष्यन्ति सर्वेऽपि भवन्तमेकम् ।
विचारमारभ्य विनिर्मिमीते यः कर्म केनापि न निन्द्यते सः ॥१२४॥
अतादृशं यो रणकर्म शृण्वन् भूमीशिता विन्दति नैव शर्म ।
यशोभिरास्फालितयोः स्वसूर्वोः प्रीत्यैव तस्याः पितरौ प्रहृष्टौ ॥१२५॥
नरेन्द्रकन्याः शतशो भवन्तं स्वयं वरीतुं रभसादभीरम् ।
समागमिष्यन्ति यथा समुद्रं नद्यो रसोल्लासविलासमध्याः ॥१२६॥

संग्राममग्राम्यकविस्तवार्ह ! प्रोज्झ्य प्रकामं सुषमां लभस्व ।
त्वयाऽमृतेनेव पिता रसेशो न कालकूटेन स तेन पुत्री ॥१२७॥
अमात्यवाणीरवधार्य तास्ताः स विन्दुषेणः स्फुटमाललाप ।
उक्तं भवद्भिर्यदिदं समस्तं प्रशस्तमेवाश्नुवति योग्यभावम् ॥१२८॥
केनाऽपि सार्द्धं न विरोधमाधामाजन्मसीमं भवतामपीदम् ।
प्रतीतमत्युद्धतशक्तिभाजा भ्रात्राऽधुनाऽमायमुपस्थितो मे ॥१२९॥
स्त्रीमात्रमित्यत्र निमित्तमात्रं जानीत यूयं परमार्थतस्तु ।
दोर्दण्डकण्डूमपनेतुमिच्छुर्युद्धा मयैवायमुदग्रधामा ॥१३०॥
परःसहस्रा भुवि सन्ति शूरा विजित्य तानेप न शर्मणाऽस्ते ।
ततो गतिं यास्यति संवरारेर्विजेतुकामस्य हिमांशुमौलिम् ॥१३१॥
एकान्ततो नैव पणाङ्गनाया विभङ्गुरं प्रेम निरीक्ष्यते वा ।
कुलाङ्गनाया इव रञ्जयन्त्याः स्वकामुकं मोहनमञ्जुभङ्गया ॥१३२॥
प्रतिश्रुतं स्वं यदि न त्यजावः कथञ्चिदावां विदिताभिमानौ ।
तदा कथङ्कारमकारणः सन् हास्योदयः स्याद् द्विपतां मुखेषु ?॥१३३॥
राज्यं न सप्ताङ्गमिदं विधत्ते शर्माणि पुंसां गुणलालसानाम् ।
नवाङ्गसौन्दर्यविधानभूता वधूर्यथा मन्मथरङ्गशाला ॥१३४॥
प्रतिश्रवं यो विजहाति यो वा रणक्रियाया विनिवर्तते तु ।
अप्रेक्षणीयानन एव पुंसां कथं श्रुतेर्गोचर एव स स्यात् ? ॥१३५॥
वीर्योचितं युद्धविधिं प्रकुर्वन् वप्तुर्न साताय कथं सुपुत्रः ? ।
न यत्र संयत्पटुताऽस्ति तस्मिन्न क्षत्रियाः क्षत्रियतां वदन्ति ॥१३६॥
जन्यप्रवृत्तेर्विनिवर्तमानं राजन्यकन्याः कथमेव धन्याः ।
कातर्यचर्योपरिशोच्यवृत्तिं विवोढुमुत्साहमपि प्रकुर्युः ? ॥१३७॥
आयोधनं योधशताकुलं यो विधूय तिष्ठेदपि निर्विशङ्कः ।
न पुत्रिता तेन पितुः स किन्तु ह्रिये भवेत् प्रत्युत पूर्वजानाम् ॥१३८॥
भूपप्रतिच्छायतयैव युष्मानमात्यमुख्याः ! कलयामि किं न ? ।
सहस्रभानोस्तु सहस्रभानोः को वा मयूखान् मनुते विभिन्नान् ॥१३९॥
तस्माद्नरेन्द्राय मम प्रणामं प्रापय्य विज्ञापयत स्वरूपम् ।
याचस्पतिप्रातिभशोभिताङ्गान् भवादृशः शिक्षयितुं प्रभुः कः ? ॥१४०॥
तस्य श्रुत्वा वचनमवनीवासवस्याङ्गजस्य

क्रोधावेशप्रखरदहनोद्भूतधूमप्रकारम् ।
गत्वा सर्वं व्यतिकरमिमं तं यथावृत्तमेते-
ऽमात्या गत्या कलितमखिलं भूमिभर्त्रे शशंसुः ॥१४१॥
दुर्वारं रणसङ्करं स्वसुतयोर्विज्ञाय विज्ञाग्रणीः
सञ्चिन्त्य प्रतिभावताऽपि विषयानेकान्ततो दुर्जयान् ।
किञ्चित् श्रीजिनराजसंमतमताभिज्ञः प्रियाभ्यां समं
पर्यालोच्य विषाधिवासितमयं जघ्रौ पयोजं नृपः ॥१४२॥
दृष्ट्वा भूमिपतेर्वपुर्विरहितं हंसेन संविद्वता
ते राज्यौ प्रियशोकमग्नमनसौ पद्मं समाघ्राय तत् ।
व्यापन्ने जलमन्तरेण नलिनी स्थैर्यं किमालम्बते ?
ज्योत्स्ना चन्द्रमसा विना स्थितिरियं सीमन्तिनीनामिति ॥१४३॥
देवीभ्यां सहितं हितं नरपतिं मत्वा विपन्नं ततो
वीक्षापन्नतमाऽपि सत्यकिसुता सा कामविद्वेषिणी ।
को वा संप्रति रक्षिता कपिलतः कोपेन दुर्वाससः
छायां संस्पृशतोऽनुरागवशतो मां नेष्यमाणां हठात् ॥१४४॥
सञ्चिन्त्य स्वहृदेति तद्गुणगणश्रुत्या प्रसक्तीभव-
च्चेतोवृत्तिभरेण भानुतनयेनेवोपनीतं मुदा ।
तद्वात्सल्यमतुल्यमेव सहसा संदर्शयन्ती नृराद्-
राज्ञीप्रेमवशंवदैव कमलं तज्जिघ्रति स्म स्वयम् ॥१४५॥
(युग्मम्)

चत्वारश्चतुराः समस्थिपत ते प्रेम्णाऽविभिन्नाशया-
जम्बूद्वीपगतोत्तरोत्तरकुरुक्षेत्रे त्रिपल्यायुषः ।
गव्यूतित्रितयोच्छ्रया युगलिनः संजज्ञिरेऽनेकधा
कल्पद्रुमजपूर्यमाणहृदयाकाङ्क्षाप्रशस्तोदयाः ॥ १४६ ॥
तत्र श्रीषेणराजः समजनि पुरुषो ज्यायसी चास्य जाया
सा जाया या कनिष्ठा स्म भवति पुरुषः सा वधूश्चास्य भामा ।
प्राप्यैवं द्वन्द्वभावं विगलितविरहं निष्कषायप्रचारं
व्याधूतव्याधियाधं धनभवनमहाचिन्तया विप्रमुक्तम् ॥१४७॥
भुक्त्वा भोगानपत्यावनविरचनया पूरयित्वा स्वमायु-

दैवत्वं प्राप्य सर्वे प्रथमदिवपदे तेऽपि देवाङ्गनाभिः ।
नित्यं संसेव्यमानाः कृतसुकृतपरीपाकसाध्यानुरूपं
कल्याणोदर्कमेते फलमतुलमलं स्वादयामासुरुच्चैः ॥ १४८ ॥
आसीत् श्रीगुरुगच्छमौलिमुकुटः श्रीमानभद्रप्रभोः
पट्टे श्रीगुणभद्रसूरिसुगुरुर्विद्यावतां सद्गुरुः ।
तच्छिष्येण कृतेऽत्र षोडशजिनाधीशस्य वृत्ते महा-
काव्ये श्रीमुनिभद्रसूरिकविना सर्गो द्वितीयोऽगमत् ॥१४९॥

॥ इति श्रीशान्तिनाथचरिते महाकाव्ये द्वितीयः सर्गः ॥

अर्हम्

अथ तृतीयः सर्गः ।

उत्तप्तकाञ्चनविकस्वरचम्पकस्रक्-
सङ्काशकायरुचिरोचितदिग्विभागः ।
वृन्दारकै रचितपूजन एष देवः
श्रीशान्तिरस्तु भवतां शिवतातिरेव ॥ १ ॥
श्रीषेणभूपतनयावनयाऽनुरक्ता-
वुद्यानमीयतुरथो सुमहारथौ तौ ।
द्वेधाऽपि देवरमणं गुणतोऽभिधान-
वृत्तेश्च शाखिततिरुद्धनभोविभागम् ॥ २ ॥
काऽप्यर्जुनेन विलसद्बुधिपार्थिवेन
यत्पाण्डुभूपरिवृढस्य कुलानुकारि ।
स्फूर्जत्प्रियालपनसारमहाप्रमाणं
विद्वद्भिशान्तमिव कुत्रचनापि यत्र ॥ ३ ॥
(युग्मम्)
यावच्छराशरि भुजाभुजि चात्र युद्धं
तौ चक्रतुः किमपि चक्रधरप्रभावौ ।
आगच्छदेकमवलोकयतः स्म ताव-
द्व्योम्नो विमानममनुनिर्दीपिताभ्रम् ॥ ४ ॥

विद्योतमानमणिसञ्चयसन्निबद्ध-
सोपानराजिरमणीयमवेक्षणीयम् ।
उद्दण्डहेममयदण्डलसत्पताक
शब्दायमानमधुरध्वनिकिङ्किणीकम् ॥ ५ ॥
(युग्मम्)

भो भो ! कुमारतिलकौ ! समर विहाय
वाक्य मदीयमवधारयता भवन्तौ ।
इत्युद्धतस्वरमुवाच विमानवर्त्ती
विद्याधर समभिसृत्य रयेण चैक. ॥ ६ ॥

आस्वादित हरति जीवितमाशु काल-
कूट स्वतन्त्रमयुत मणिमन्त्रतन्त्रै ।
ज्वालाकलापजटिलज्वलनोऽपि देह
स्पृष्ट पर दहति हव्यनिपातवृद्ध ॥ ७ ॥

कोपप्रवर्त्तिसमवर्त्तिकृपाणिकाभा
सर्पा दशन्ति सुतरा विहितापराधम् ।
सेव्या कथ नु विपयास्तु विवेकभाजा
यस्मादिमे तदतिरिक्तविकारकारा ॥ ८ ॥

आपातमात्रमधुरा परिणामवृत्त्या
वैरस्य कारणमनन्तरमाश्रयन्त ।
किंपाकपाकिमफलानुकृत दधाना-
हेया कथ न विपया विदुषामिमे स्यु ॥ ९ ॥

त्याज्या विशिष्य च भवन्ति भवादृशाना
विज्ञानशास्त्रपरमार्थविशारदानाम् ।
यस्मा घृतेऽममरम समरस्य सौम्या-
वातायते भवति मा भवतोस्तु जामि ॥ १० ॥

जामिं कथ कथितवानसि नाथिमा त्व
विद्याधरान्वयनभस्तलतिग्मभानो ! ।
युष्मादृश किमविमृश्य निवेदयन्त्व

सम्भाव्यते कथमपि प्रतिचद्धतापि ॥ ११ ॥

एतन्निशम्य वचनं नृपनन्दनाभ्यां
सम्भाषितं पुनरभाषत खेचरेन्द्रः ।
शुश्रूषुताऽस्ति यदि वां तदिदं विमुच्य
युद्धं युवां च शृणुतं विहितावधानम् ॥ १२ ॥

अस्तीह जम्बुतरुविश्रुतनामधेये
द्वीपेऽन्तरीपसुभगेऽपि महाविदेहे ।
क्षेत्रे सनातनजिनेश्वरधर्मपात्रे
सीतामहासरित उत्तरमुत्तरेण ॥ १३ ॥

सौराज्यराजि विजये खलु पुष्कलाव-
त्याख्ये धराधरशिरोमुकुटायमानः ।
वैताढ्य इत्यभिधया सुधयानुलिप्तः
किं श्वेतिमानमिह यो बिभराम्बभूव ? ॥ १४ ॥

विस्तारमावहति विंशतियोजनानि
पञ्चाधिकानि किल तद्द्विगुणोच्चभावम् ।
यो राजतः स्फटिकभूधरवद् विभाति
कूटैर्विभात्यभिनवैर्नवभिर्विचित्रैः ॥ १५ ॥

तत्र प्रवृद्धनयराजिविराजिनामा-
दित्याभमस्ति पुटभेदनमुत्तरस्याः ।
श्रेणेर्विभूषणमदूषणमेव पञ्च
पञ्चाशता वरपुरैरुपशोभितायाः ॥ १६ ॥

यत्रोन्नतानि जिनराजनिकेतनानि
राजन्ति हेमघटितानि सकेतनानि ।
पूजाविधिं विदधतां जिनपुङ्गवानां
मूर्त्ता प्रतापकमलाविमलाशयानाम् ॥ १७ ॥

प्रज्ञप्तिदेव्युपहृतानुपमप्रसादाः
सम्पादिताखिलमनीषितवस्तुजाताः ।
विद्याधराः प्रमदमेदुरचेतसस्-

द्धर्मक्रियास्वनलसा विलसन्ति यत्र ॥ १८ ॥

कृत्तं निघृष्टमुपतापमपाकरोति
संयोजितं वपुषि यज्जलयोगसत्कम् ।
श्रीखण्डमात्तसदृशान्वयमात्मनैव
यद्वासिभिर्जितमनीदृशवृत्तवृत्तैः ॥ १९ ॥

॥ त्रिभिर्विशेषकम् ॥

लक्ष्मीविलासवसतिः कमनीयकान्ति-
स्तत्राभवत् क्षितिपतिः क्षतशत्रुजातिः ।
यः कुण्डलीतिनिजनामनिवेशनेन
वर्णावलीमपि विभूषयति स्म धीरः ॥ २० ॥

यस्य प्रतापतपनः स तथा कथञ्चि-
दुज्जृम्भते स्म भुवनेषु करैरुदग्रैः ।
प्रत्यर्थिसार्थहृदयाम्बुजकोशदेशा-
भासा मनागपि यथा न विकाशमायुः ॥ २१ ॥

धाराधरे स्फुरति सूरकरापिधान-
निर्माणजाग्रदुदये बत यस्य काले ।
सश्रीकमम्बरमपास्य समग्रराज-
हंसा विदेशमगमन् प्रपलाय्य तूर्णम् ॥ २२ ॥

॥ त्रिभिर्विशेषकम् ॥

तस्याजनि प्रियतमाऽजितसेनिकेति
सेना मनोभवनृपस्य जगज्जिगीषोः ।
लावण्यभूमिरपि या मधुराधरत्वा-
दन्यां प्रियां रसवतीं नृपतिर्न्यषेधत् ॥ २३ ॥

शीलं यदीयममलं समवेक्ष्य शङ्के
नेन्दुर्दिवा प्रकटतां भजते त्रपावान् ।
युक्तं परेण महतां हि पराजितानां
न स्वं प्रकाशयितुमुष्णकरप्रकाशे ॥ २४ ॥

सूनुं तदीयमवधारयतं युवां मा-
मध्यक्षलक्ष्यकृतलक्षणलक्ष्यमूर्तिम् ।
व्युत्क्रान्तशैशवभरं जनकादवाप्त-
संसाधितप्रवरविद्यमनिन्द्यवित्तम् ॥ २५ ॥

अन्येद्युरम्बरविहारविनोदवृत्त्या
श्रीपुण्डरीकिणिपुरीमगमं महेच्छः ।
तीर्थङ्करामितयशःप्रणिनंसयैव
कः श्रेयसे प्रयतते हि न शुद्धबुद्धिः ॥ २६ ॥

दृष्ट्वा ततोऽमितयशोजिनराजमेतं
गीर्वाणनायकनिषेव्यपदारविन्दम् ।
भक्त्या प्रणम्य समुपाविशमन्तिकस्थो-
योग्यं प्रदेशमुपगम्य तदेकतानः ॥ २७ ॥

तां देशनां व्यधित तीर्थकरस्तदानीं
दैतेयनायकनिकायसभाजितांह्रिः ।
यस्यां श्रुतेर्विषयतामुपलम्भितायां
भव्याः समीहितमशेषमवाप्नुवन्ति ॥ २८ ॥

चिन्तामणिः करतलं किल संनिविष्ट-
स्तेषां स कामकलशः खलु सन्निविष्टः ।
सा कामधेनुरपि तद्भवनं प्रविष्टा
यद्बुद्धिरुल्लसति धर्मविधौ प्रकृष्टा ॥ २९ ॥

धर्मात्कुले महति जन्म जगत्प्रसिद्धे
सम्पद्यते विभवशालिनि शीलशाले ।
स्वप्नेऽपि मान्त्रिककुलस्थितिवन्न दोषै-
रस्पर्शि यन्निजविनाशमवेक्ष्यमाणे ॥ ३० ॥

लक्ष्मीः समुद्भवति पुण्यत एव पुंसां
भागीरथीव तुहिनाचलशृङ्गमूलात् ।
या वासुदेवपदमस्पृशदात्मनैव
या चोत्तमाङ्गमभजत्परमेश्वरस्य ॥ ३१ ॥

सौभाग्यमुल्लसति भाग्यमिदं च धर्मा-
स्पुष्पं फलं च मधुरं च रसालशालात्।
यच्छ्रूयते धुरि सदालिसमाश्रयत्वा-
त्सारस्वतः परिणतावुपगीयते यत्॥ ३२॥

राजा भवत्यपि भवत्यपि चक्रवर्ती
प्रत्यर्द्धचक्रधर एव तथार्द्धचक्री।
सीरायुधो जगति तीर्थकरोऽपि जन्तु-
स्तत्किं न सम्भवति यत्किल चात्र धर्मात्?॥३३॥

आयुः प्रवर्द्धयति पुण्यमहो नराणां
बीजाङ्कुरं सलिलवज्जलभृद्विमुक्तम्।
उद्गत्वराणि विविधानि विसृत्वराणि
शस्यानि साधयति कर्मफलानि यच्च॥ ३४॥

वृन्दारकत्वमधिगच्छति जन्तुरेष-
वृन्दारकाधिपतितामपि पुण्ययोगात्।
लोकान्तिकामरविभामहमिन्द्रतां च
सर्वार्थसिद्धिसुखमत्र परत्र चापि॥ ३५॥

दानं सुपात्रविषये प्रतिपादनीयं
शीलं विशिष्य विशदं परिपालनीयम्।
सप्यं तपश्च शुचिभावनया समेतं
धर्मं चतुर्विधमुदाहृतवाञ्जिनेशः॥ ३६॥

सिद्धेर्वशीकरणकर्मणि सन्निदानं
जानन्तु ऋद्धिमहिताः स्वहिताय दानम्।
यन्मन्दिरं त्यजति नैव कदाचनापि
सापीन्दिरा खलु तदाचरतां नराणाम्॥ ३७॥

शीलं कलङ्कपरिवर्जितमेव येन
संसाधितं किमपि तस्य न दुर्लभं स्यात्।
यस्माद्दुरन्तदुरितक्षयहेतुकल-
मेतद्विहाय वहतीह न किञ्चिदेव॥ ३८॥

दीपं निवेश्य निजपाणितले यथैकः
पातालमाविशति सिद्धरसाधिगत्यै ।
सन्तोषमाशयशयालुमिमं विधाय
धन्यस्तपस्यति तथा विधुतव्यपेक्षः ॥ ३९ ॥

दुर्वारसंवरविरोधिमदप्रचार-
निर्वासने प्रथितविक्रमशक्तिवाढम् ।
निश्शेषवाञ्छितविधाननिरस्तचिन्ता-
रत्नं बुधाः कथमिदं न तपो विदध्वम् ॥ ४० ॥

संसारसागरनिपातुकजन्तुजात-
पोतायितां प्रशमशर्मनिधानभूताम् ।
बल्गत्कषायकरिसंहतिसिंहजायां
तां भावनां भजत किं न बुधाः स्वतन्त्राम् ? ॥ ४१ ॥

धर्मं चतुर्विधमपीदृशमेव यो वा
निर्माति निर्ममवरैरुपदिष्टमेतम् ।
जन्तुर्भवेद्गतिचतुष्टयविप्रमुक्तः
ख्यातिं दधज्जगति मङ्गलकुम्भवत्सः ॥ ४२ ॥

संजज्ञिरे प्रथमतीर्थकरस्य तस्य
पुत्राः शतं भरतचक्रिमुखा नरेन्द्राः ।
ज्ञानत्रयावगतविश्वविशेषकृत्यः
सांसारिकव्यवहृतिं समदीदृशद्यः ॥ ४३ ॥

तेषु प्रतापभवनं समजायतैकः
श्रीमानवन्तिरिति विश्रुतनामधेयः ।
पुत्रः पवित्रचरितः पितृदत्तदेश-
स्तस्याख्ययैव विषयः प्रथितोऽस्त्यवन्तिः ॥ ४४ ॥

क्षेत्रेषु यत्र विविधैरपि धान्यजातै-
र्जातैः समस्तधरणीतलपूर्तिकारैः ।
स्वस्यावकाशमधिवस्तुमविन्दमानं
दुर्भिक्षमन्यविषयं रभसाद् बभाज ॥ ४५ ॥

तुङ्गेक्षुदण्डविपिनं मिलिताग्रभागं
पार्श्वद्वयेऽपि सरसं समवेक्षमाणाः ।
नैदाघदापसमयेऽपि पथि प्रवृत्ताः
पान्थाः श्रमं किमपि यत्र न जानते स्म ॥ ४६ ॥

श्यामाककोद्रवकुलित्थकराजमाषा-
कङ्ग्वादिकं कदशनं समवेक्ष्यते न ।
विज्ञायते न खलु यत्र च नालिकेर-
द्वीपाधिवासिपुरुषैरिव जातवेदाः ॥ ४७ ॥

॥ त्रिभिर्विशेषकम् ॥

तत्रास्ति चैत्यरुचिरा नगरी विशाला
शश्वत्समृद्धिसमुदायमहाविशाला ।
अभ्रंकपोच्चकपिशीर्षकशालिशाला
शुभ्रांशुमण्डलसमुज्ज्वलचित्रशाला ॥ ४८ ॥

यस्याः प्रसिद्धममृतं किमु नामृतं त-
न्माधुर्यधुर्यमुपमानविवर्जितं यत् ।
अन्यद्भवेद्यदि कुतः परिदृश्यते न
तस्मात्तदप्यमृतमेव वितर्कयामः ॥ ४९ ॥

एकाग्रमानसतया महतां जिनेन्द्रान्
साधून् गुरून् प्रणमतां ददतां धनानि ।
साधर्मिकानपि च भोजयतां यथेच्छं
यस्यां दिनानि किल पुण्यवतामगच्छन् ॥ ५० ॥

साद्विद्ययैव विनयः कृपयैव धर्मः
स्नेहः प्रकर्षमतुलं कलयन्प्रकृत्या ।
त्यागः श्रिया सह समेत्य कुटुम्बभाव-
मापद्य यत्र वसति स्म नयेशभाजि ॥ ५१ ॥

वाराणसी दिविपदापगया यथैव
पार्थोऽजिनीशसुतया मथुरा यथैव ।
श्रीकोशलापि नगरी च यथा सरय्वा

या शिप्रयैव सरिताऽपि तथा विभाति ॥ ५२ ॥

॥ पञ्चभिः कुलकम् ॥

लोकप्रशासननिमित्तविधौ नृसिंहः
प्रत्यर्थिपार्थिवमहेभविभेदसिंहः ।
आसीन्महीपतिरशेषमहीन्द्रसिंह-
स्तत्राभिधानविदितः स तु वैरिसिंहः ॥ ५३ ॥

एकेन येन सकलार्थिसमीहितानि
सम्पादितानि समवेक्ष्य विलज्जमानाः ।
ते दुर्गमेरुगिरिगह्वरवद्धवासाः
पश्चापि नूनमभवन्सुरशाखिनोऽपि ॥ ५४ ॥

॥ युग्मम् ॥

जायापि तस्य समजायत सोमचन्द्रा
स्वाङ्गोत्थगौरिमपराजितसोमचन्द्रा ।
आस्यप्रभाहसितशारदसोमचन्द्रा
सौजन्यवासपरिवर्द्धितसौम्यचन्द्रा ॥ ५५ ॥

सौभाग्यलक्षणगुणेन विचक्षणा या
कात्यायनीं पशुपतेर्दयितामजैषीत् ।
उल्लासियौवनविलासमनोहराङ्गी
किं शक्तिरप्रतिहता न हि निर्मिमीते ? ॥ ५६ ॥

॥ युग्मम् ॥

श्रेष्ठी वरिष्ठगुणरत्नमहासमुद्र-
स्तत्राजनिष्ट सुमतिर्धनदत्तनामा ।
राजप्रसादसदनं सदनन्तकीर्तिः
सद्मप्रातिगद्रविणनिर्जितराजराजः ॥ ५७ ॥

शङ्कां कदापि न चकार विकारहीनो-
नाकाङ्क्षणं क्वचन यो विचिकित्सनं न ।
मिथ्यादृशां स्तवनसंस्तवने न चापि
सम्यक्त्वमात्ररतिरेव विवेकपात्रम् ॥ ५८ ॥

यो वीतरागपदपूजनमाचचार
यः श्रद्धया गुरुपदप्रणतिं चकार ।
धर्मं दयासमुदितं हृदि यो बभार
रत्नत्रयं परमभूषणमाश्रयद्यः ॥ ५९ ॥

॥ त्रिभिर्विशेषकम् ॥

भार्यापि तस्य समपद्यत सत्यभामा
चन्द्रावदातघनमातगुणाभिरामा ।
पुण्यानुभावपरिपूरितचित्तकामा
शीलश्रियावमतविश्वविवर्तिवामा ॥ ६० ॥

अर्द्धाङ्गदानकपटेन महेश्वरेण
संरक्ष्यमाणनिरवग्रहविभ्रमां यत् ।
गौरीं जहास धनदत्तधनेशपत्नी
व्रीडां वहन्त्यजनि तेन च साऽत्र काली ॥ ६१ ॥

॥ युग्मम् ॥

सार्द्धं तयाप्यनुभवन् विषयोत्थसौख्यं
मासानिवागमयदद्भुतऋद्धिरब्दान् ।
मासान् दिनानिव दिनानिव सोऽपि यामान्
यामान् क्षणानिव विचक्षणमौलिरत्नम् ॥ ६२ ॥

अन्येद्युरात्मसदनं समुपेत्य भूप-
प्रासादतः सुदयया परिवीतमूर्तिः ।
पूजां वितत्य भुवनाधिपतेः प्रदोषे
संभाव्य विभ्रमवचोभिरसौ स्वजायाम् ॥ ६३ ॥

निद्रासुखं समनुभूय निशावसाने
किञ्चिद्विचिन्तयति स स्म परं प्रबुद्धः ।
मुक्ताफलानि यवनालकराशिरन्मे
हर्म्ये बृहत्तुवलिकाफलमानवन्ति ॥ ६४ ॥

॥ युग्मम् ॥

क्षौमाणि सन्ति विविधानि विचित्रभाञ्जि

गौणीपदक्रमगतानि परःशतानि ।
शृङ्गारवद्दमिताः कनकप्रकाम
पाषाणयन्त्रजगगण्डकदम्बकानि ॥ ६५ ॥

याता दिवाकरमहारथवाहवाह-
दर्पापहारपटिमानममी वहन्तः ।
संख्यातिगाः किमिह सन्ति न मन्दुरायां
सामानने मथितनामतया हसन्तः ॥ ६६ ॥

ईशानवाहनमहावृषभानुकारा-
भाद्धारनादजितभाद्रपदाम्बुवाहाः ।
कैलासशैलशिखरोन्नतप्रमाणाः
मद्गोकुलेऽत्र वृषभा बहवोऽपि सन्ति ॥ ६७ ॥

यत्राकरेऽपि न भवन्ति च यानि यत्ना-
न्यत्रैव तानि बहुधा द्युतिमन्ति सन्ति ।
माणिक्यशुद्धमणिसञ्चय एव सर्वः
सर्वात्मनैव गगनं यदियांकुपक्रम् ॥ ६८ ॥

सर्वं तदेतदफलं तनयं विना मे
विद्यास्थितेर्गुणगणो विनयं विनेव ।
स्फाती रसेशितुरनल्पनयं विनेव
चारित्रमुज्ज्वलतरं च शमं विनेव ॥ ६९ ॥

नेपथ्यजातमखिलं तिलकं विनेव
शीलं विनेव विनयं सुभगं कलत्रम् ।
प्रासादसर्जनमिदं कलसं विनेव
काव्यं सुबद्धमपि चारुरसं विनेव ॥ ७० ॥

पुत्रं विना न भवनं सुषमां दधाति
चन्द्रं विनेव गगनं समुदग्रतारम् ।
सिंहं विनेव विपिनं विलसत्प्रतापं
क्षेत्रं स्वरूपकलितं पुरुषं विनेव ॥ ७१ ॥

तत्किं करोमि कमहं शरणं प्रपद्ये ?

कस्माश्रयामि सुगुरोश्चरणाब्जयुग्मम् ।
यस्य प्रसादवशतस्तनयो ममापि
संपद्यते सपदि सम्मदमादधानः ॥ ७२ ॥

इत्थं विचिन्तयत एव विभातकृत्यं
यावन्न तस्य मनसो विषयं बभाज ।
तावत्समेत्य रभसात् सह संभ्रमेण
तत्प्रेयसी प्रियमिदं निजगाद वाक्यम् ॥ ७३ ॥

किं द्रव्यहानिरभवद्भवतां कुतश्चि-
त्किं यानपात्रमुदधौ निममज्ज किञ्चित् ? ।
काचिद्रुजा किमुत बाधत एव देहे
दुःस्वप्नदर्शनमहो किमथापि जज्ञे ॥ ७४ ॥

राज्ञोऽपमानमथवा हृदये दधथ्वे
येषां विशेषसुभगां यदि वापि काञ्चित् ।
चिन्तां यतो वहथ तेन वितर्कयामि
नाकारणं किमपि कार्यमवेक्ष्यते हि ॥ ७५ ॥

मत्तो न चेद्हृदयनायक ! गोप्यमस्ति
सद्यः प्रसद्य तदिदं स्वयमेव वाच्यम् ।
यस्मात्सुरेन्दुवचनामृतमाऽऽप्य पत्युः
स्त्रीणां मनांसि समदं प्रमदं वहन्ति ॥ ७६ ॥

तस्या निशम्य वचनं गिरमुज्जगार
श्रेष्ठी प्रहृष्टहृदयः सदयः स दक्षः ।
कान्ते ! किमेतदनुदीरितपूर्वमीदृ-
मिर्व्याजभक्तिपरया जगदे भवत्या ॥ ७७ ॥

गोप्यं बहिर्विषयतः क्रियतेऽपि धीरै-
स्त्वत्तान्न किञ्चन विवेचनचारुबुद्धे ! ।
मचित्तभित्तिमधिगम्य विरिञ्चिनापि
पाञ्चालिकेव भवती लिखिता न वा किम् ? ॥ ७८ ॥

नैवार्थहानिरुदधौ न च पोतभङ्गो-

रोगो न कोऽपि शयने न च दुर्निरीक्षा ।
क्ष्मावासवस्य मम कोऽपि न चापमान-
श्चित्तं न तापयति काचन पद्मनेत्रा ॥ ७९ ॥

अर्थस्य हानिमुपलभ्य त एव तापं
कुर्वन्ति येऽर्जयितुमर्थमयेऽसमर्थाः ।
अस्मादृशाः पुनरुदारतयाऽर्थहान्या-
जल्पन्त्यमङ्गलमुपागतमाहृतं नः ॥ ८० ॥

ताम्यन्ति केऽत्र जलधावपि पोतभङ्गे
पूजा यतो भवति सा जलदेवतायाः ।
तीर्थङ्करस्य हि वरं प्रतिमाप्रतिष्ठा
कालेऽर्हणाप्यभिमता जलदेवतायाः ॥ ८१ ॥

कश्चिन्न रोगमधिगम्य नरो गतार्थः
सन्तापमाश्रयति विश्रुतबुद्धिधारः ।
यस्मादुपार्जितमवश्यमवेदयित्वा
ज्ञानाश्रयैरपि जिनैर्न च कर्म शक्यम् ॥ ८२ ॥

दुःस्वप्नमापतति भाविविशेषयोगात्
पुंसां सुषुप्तिसमये नियतेर्नियोगात् ।
दुःखं न तत्र विमृशन्ति विवेकभाज-
स्तन्वन्ति शान्तिकविधिं खलु तस्य शान्त्यै ॥ ८३ ॥

भूपोऽपमानमपि सुन्दरि ! यत्तनोति
दोषः समाश्रयति तत्र निदानभावम् ।
नास्थायि शैशवभरस्य विपर्ययेऽपि
दोषाश्रितस्य सविधेऽपि मया कदाचित् ॥ ८४ ॥

नास्पृक्षदन्यवनितामपि मामकीनं
किञ्चिन्मनस्विनि ! मनः सुकृतोपरुद्धम् ।
मिथ्यात्ववृत्तिमिव दुर्गतिपातभीत-
मुच्चैस्तरप्रणयभावनिबद्धकक्षाम् ॥८५॥

किन्तु प्रवर्तयति तापमपारमेष-

त्वत्कुक्षिजाततनयप्रतिपत्त्यभावः ।
यश्चन्दनेन न च चन्द्रमरीचिचक्रैः
शक्यो निवर्त्तयितुमेव न गाङ्गवार्भिः ॥ ८६ ॥

श्रुत्वेति तत्सहचरी वचनं तदस्य
निःश्वस्य गाढमवदद्गदतां वरा सा ।
चिन्तामपास्य कुरु नाथ ! विशिष्य पुण्यं
यस्मात्तदेव सकलाभिमतार्थसिद्धयै ॥ ८७ ॥

प्रासादमारचय तीर्थकृतां नवानि
बिम्बानि तत्र विनिवेशय भावतस्त्वम् ।
पूजां विधापय सुवर्णविचित्रजाति-
मुख्यैः सुमैर्भगवतां घनसारसारैः ॥ ८८ ॥

जैनागमं शुभग ! लेखय पुस्तकेषु
दत्त्वा वसून्यगणितानि च लेखकेभ्यः ।
पक्वान्नखण्डघृतपायसमुख्यभोज्यैः
साधर्मिकानविरतं प्रिय ! भोजय त्वम् ॥ ८९ ॥

साधून् महाव्रतधरान् प्रतिलाभयस्व
वस्त्रान्नपानवरमोदकखादिमाद्यैः ।
साध्वीश्च निर्मितविधापितकल्पितादि-
दोषान निधूय शुचिमानसभक्तिसक्तः ॥ ९० ॥

धर्मं समाचरत एवमचिन्त्यचिन्ता-
रत्नं चिरव्रतकृतदुष्कृतभङ्गहेतुम् ।
भावी तवापि तनयस्त्विहापि रम्यं
नो चेदमुत्र सुकृताचरणं सुखाय ॥ ९१ ॥

शिक्षामिमां तदुदितां विदितां महार्था-
मादाय नैगममहापुरुषस्त्वयेति ।
सर्वं तदाप्रभृति तत्सुगुरूपदेशा-
देशीयमारचयति स्म यथाप्रदेशं ॥ ९२ ॥

आहूय माहिरममी श्रमिणं व्यतार्षी-

दिच्छातिरिक्तमविलम्बपरो महेच्छः ।
पुष्पाणि मे प्रतिदिनं दिवसोदयेऽस्या-
नीयार्पयेरिति पुनर्धनवानुवाच ॥ ९३ ॥

उत्सूरमारचयिता कुसुमावचाय-
मारामिकः स विदधन्निदधत्फलानि ।
ध्यात्वेति धार्मिकशिरोमणिरेष शय्यो-
त्थायं वर्नी स्वयमियाय सलीलगत्या ॥ ९४ ॥

धन्योऽहमस्मि यदुपागमदेष वेष-
संस्कारशोभितसदाकृतिरत्र हर्मी ।
इत्यात्मशंसनपरेण वनावनेन
तस्मै फलानि ददिरे कुसुमानि चापि ॥ ९५ ॥

लात्वा फलानि विपुलानि स मञ्जुलानि
पुष्पाणि गन्धकलितानि धनेश्वरोऽपि ।
हर्म्यं समेत्य सकलं विनिवेश्य पात्रे
स्नात्वा जलैः शुचिरुपाक्रमतार्हदर्चाम् ॥ ९६ ॥

सद्मस्थिताऽऽर्हतमहाप्रतिमासपर्यां
कृत्वा यथावदथ सज्जिनालयेऽगात् ।
नैषेधिकीत्रयपुरस्सरमात्मनैव
दक्षः प्रदक्षिणाविधिं त्रिविधं विधाय ॥ ९७ ॥

पूजां त्रिधापि विरचय्य विचित्रभक्ति-
र्भूमिप्रमार्जनमपि त्रिविधं प्रकुर्वन् ।
तिस्रो वितत्य विनयी प्रणतीर्नयज्ञो-
ऽवस्थात्रयं निजमनो विषयं वितन्वन् ॥ ९८ ॥

आशात्रयेक्षणविवर्जनमादधानो-
विन्यस्तदृष्टियुगलो जिनराजबिम्बे ।
वर्णादिकत्रितयभावनया प्रसक्तो-
मुद्रात्रयं प्रकटयन् प्रतिपत्तिपूर्वम् ॥ ९९ ॥

अत्युत्तमप्रणिहितित्रितयप्रणेता

देवानवन्दत जिनाधिपतीन् सुचेताः ।
कस्यानवद्यतमतां न सतां क्रमोऽयं
संपादयत्यविरतं हि विधीयमानः ॥१००॥
चैत्यालयादथ निरीय सवेगमिभ्यो
वव्राज धामवसतिर्वसतिं गुरूणाम् ।
तत्र प्रणम्य गुरुपादपयोजयुग्मं
साधून् यथाक्रममवन्दत वन्द्यवन्द्यान् ॥१०१॥
व्याख्यां निशम्य समभावविधानधुर्या-
माचार्यवर्यसुगुरोरमृतायमानाम् ।
कार्यः स्फुरत्सुकृतशुद्धिभिरेषणीया-
हारग्रहाय भगवद्भिरनुग्रहो मे ॥१०२॥
दत्त्वा क्षमाश्रमणमित्यवधानपूर्वं
श्रेष्ठी निकेतनमुपेत्य कृतार्हदर्चः ।
साधून् विहार्यपरिहार्यविपर्ययेण
भोक्तुं समारभत स स्वजनैः समेतः ॥१०३॥
॥ युग्मम् ॥
साधर्मिकानमृतसंनिभभोज्यपेयैः
संमानितान्प्रथममभ्यवहार्य मान्यान् ।
यद्भुज्यते स्वरुचिभिः प्रतिलाभ्य साधूं-
स्तद्भोजनं जठरपूरणमन्यदाहुः ॥१०४॥
दौर्विध्यसंकुचितमानसवृत्तिदीना-
नामन्त्र्य भोज्यनिचयैरुपभोज्य सम्यक् ।
वासांसि निश्वसितहार्यतमान्यलानि
दत्त्वा विसर्जयति स स्म निरीश्वरांश्च ॥१०५॥
आहूय मङ्क्षु लिपिकर्मविधानदक्षा-
न्स स्थूललक्षकुललक्षणलक्षणीयः ।
द्रव्यं वितीर्य जिननायकसंप्रणीत-
सिद्धान्तशास्त्रलिखनानि समादिदेश ॥१०६॥

इत्याग्रहेण महता निहतान्तरायं
धर्मं सदा विदधतोऽस्य धनेश्वरस्य ।
तुष्टा कथञ्चिदपि शासनदेवतासौ
पुत्रो भविष्यति तवेति मुदा शशंस ॥१०७॥

देवीश्वरे भवति तुष्टिमुपागतायां
नो दुर्लभं भवति किञ्चन वस्तुवृत्त्या ।
इत्युद्धतस्वरमुदीर्य कृताञ्जलिः स
साधर्मिकप्रणयतः प्रणतिं चकार ॥१०८॥

पत्न्यै न्यवेदयत शासनदेवतायाः
पश्चात्स वाक्यमथ निर्भरतोषितायाः ।
प्रागेव वक्त्रकमलं प्रभवत्प्रसाद-
मानन्दतुन्दिलमिदं प्रकटीचकार ॥१०९॥

गर्भं बभार धनदत्तधनेशभार्या
सा तत्प्रभृत्यपि भृता सुकृतप्रभावैः ।
स्वप्ने च पूर्णकलसं सलिलैः प्रपूर्ण-
माम्रच्छदैरपिहितं कलयाम्बभूव ॥११०॥

स्वप्नोपलब्धिसमनन्तरमेव गन्ध–
पुष्पाणि पाणिकमले विनिवेश्य धन्या ।
प्राणप्रियं मृदुवचोभिरुदारबुद्धि–
रुत्थाप्य सा प्रवदति स्म यथार्थमेवम् ॥१११॥

स्वप्ने निरीक्षिषि विशेषविदां स्वराद्य
कल्याणपूर्णकलसं जलसंभृतं च ।
कीदृक् फलं मम भविष्यति चास्य नाथ !
तत्त्वं निवेदय मदग्रत एव तत्त्वम् ॥११२॥

एतत्तदुक्तमवधार्य विचार्य बुद्ध्या
प्राह स्म विस्मितमनाः प्रमनाः स चादनः ।
जाने ऽस्मि पूर्णकलसप्रविलोकनेन
सूनुस्तवेन्दुमुखि ! संभविताचिरेण ॥११३॥

वाचं प्रियस्य परमार्थत एव सत्यां
मत्वा समुत्थितवती फलसंयुतानि।
सा बिभ्रती प्रियतमप्रतिपादितानि
पुष्पाणि वासवसतिं स्ववशा विवेश ॥११४॥

यान् दोहदान् स्वहृदये बिभराम्बभूव
सा श्रेष्ठिराजदयिता कलिता गुणौघैः।
पृच्छत्पुरन्ध्रिवदनेरितवाक्यभङ्ग्या
तान् वल्लभः सपदि पूरयति स्म तस्याः ॥११५॥

प्रासूत सा तनयमद्भुतरूपसम्प-
त्संतर्जितामरकुमारकुमाररूपम्।
विद्योतयन्तमभितस्तदरिष्टदीप-
तेजांसि केन्द्रपतितोच्चशुभग्रहेषु ॥११६॥

दासीजनैर्द्रुतमुपेत्य सुतप्रभूत्या
श्रेष्ठी प्रहृष्टहृदयैरभिवर्द्धितोऽयम्।
देयं न किञ्चन विवेद न चाप्यदेयं
नाद्यमेव परिपूर्णमनाः प्रमोदैः ॥११७॥

पुत्रा भवन्ति भवने बहवोऽपि यस्य
जाते सुते वितनुतेऽपि महामहं सः।
प्राप्योपयाचितशतैस्तनयं तथा यः
किं नोत्सवं स तनुतां तनुताण्डवेन ?॥११८॥

विज्ञप्य विज्ञतमतावऽमताग्न्यजीवं
सर्वसहाधिपतिमेष महोपदाभिः।
कारामहीक्षितिमतः पुरुषान्समस्ता-
न्सत्कृत्य कृत्यविदरं व्यमुचन्महेच्छः ॥११९॥

अध्यापकैर्मुकुरमण्डलममन्देशे
वंशस्य शास्त्रमतिभिस्त्वरितं निधाय।
छात्रैः समं समुपगम्य पठद्भिरुच्चै-
र्द्वारं समाश्रितममुष्य निकेतनस्य ॥ १२० ॥

भालानि कुङ्कुमविशेषकभूषितानि
तेषां विधाप्य विधिवत्स सुवासिनीभ्यः ।
ताम्बूलमात्मशयतामरसेन दत्त्वा
द्रव्यं प्रदाप्य बहुलं विससर्ज धीमान् ॥ १२१ ॥
स्थालानि काञ्चनमयानि निवेश्य पाणौ
कुन्दोज्ज्वलाक्षतभृतानि समन्ततोऽपि ।
पौरस्त्रियो घुसृणचन्दनपात्रहस्ताः
कर्तुं विशेषकमुपास्थिषताऽस्य पत्न्यम् ॥ १२२ ॥
ताः श्रेष्ठिनं समुपवेश्य चतुष्किकायां
भाले विधाय तिलकं वितताक्षतं च ।
विश्राण्य वानपरिपाकिमनालिकेरं
त्वं जीव नन्द भव पुत्रवतामधीशः ॥ १२३ ॥
इत्याशिषः स हृदये बहुधाभिनन्द्य
प्रोद्यत्प्रमोदनिवहः पुरसुन्दरीणाम् ।
दत्त्वांशुकानि शरदिन्दुमयूखजाल-
व्यूतिभ्रमं विरचयन्ति विसृष्टवांस्ताः ॥ १२४ ॥
द्रव्याणि यानि स धनी विचिकाय षष्ठी-
जागर्यिकामहमवाप्य सुतस्य तस्य ।
नो तानि कश्चिदपि च व्ययसात्करोति
पाणिग्रहेऽपि तनयस्य महर्द्धिकोऽपि ॥ १२५ ॥
जाते महोत्सवभरे सकलेऽपि लोके
सम्मानिते वसनचीनदुकूलदानैः ।
स्वप्नानुसारि तनयस्य ततान नाम
श्रेष्ठी महेन दशमेऽहनि सम्मदेन ॥१२६॥
ज्योतिर्विदोऽपि विनिवार्य सुवासिनीश्च
नैमित्तिकानपि फलाकुशलानशेषान् ।
सन्मङ्गलश्रुति च मङ्गलकुम्भ इत्या-
ब्रह्माण्डमाकलितशारदचन्द्रकीर्तिः ॥ १२७ ॥

॥ युग्मम् ॥

धात्रीभिरुज्ज्वलरसोदयसूलरीभि-
विश्वम्भरारुह इवाचलसारिणीभिः ।
संवर्द्धमानसुभगः परिपाल्यमानो-
जज्ञे जनप्रमददोऽष्टसमः क्रमात्सः ॥ १२८ ॥

दृष्ट्वा प्रयान्तमपरेद्युरुदारचित्तं
तातं वर्णी प्रति स मङ्गलकुम्भ एतत् ।
व्याचष्ट मङ्गलमुखो ननु तातपादाः !
सिद्ध्यै प्रयात मयि सत्यपि किं स्वयं वा ? ॥१२९॥

स्मित्वा जगाद जनकः प्रियपुत्र ! याम्या-
नेतुं सुमानि जगदीश्वरपूजनार्थम् ।
आराममुद्गतफलाभ्युदयाभिराम-
मामोदमाशु जनयन्तमुपागतानाम् ॥ १३० ॥

पित्राभ्युदीरितमिदं विनिशम्य पुत्रः
प्रोवाच वाचमतिमात्रविनीतधुर्यः ।
आज्ञाप्यते यदि भवद्भिरनुग्रहेणा-
रामं तमप्यहमुपैमि समं भवद्भिः ॥ १३१ ॥

अत्यन्तवल्लभतया न निवर्तितुं तं
पुष्यच्छिरीषसुकुमारतया न नेतुम् ।
शक्तोऽभवत्स भुवनाद्भुतभागधेयः
कूलङ्कषारयमिवायनवर्त्तिशैलः ॥ १३२ ॥

तस्यामहं शिशुतयाऽविनिवार्यमार्य-
श्चित्ते विचार्य सममेव समाप तं तम् ।
जाम्बूनदाभरणभूषितपाणिकण्ठं
मञ्जुस्वरावजितकोकिलकण्ठनालम् ॥ १३३ ॥

साक्षात् षडानन इवैष महेश्वरेण
श्रीमाश्चयन्त इव जम्भनिषूदनेन ।
पद्मालयाप्रणयिनेव सुमेषु वीरो-

गच्छन् समं स जनकेन विराजते स्म ॥१३४॥
पृच्छन् क्वचिद्विटपिनां विटपानतानां
नामानि लोकविदितान्यपि न श्रुतानि ।
वल्लीदलानि विपुलानि सविस्मयः सन्
गृह्णन् क्वचिच्छिशुतयाऽतिचलाचलत्वात् ॥१३५॥
उद्यद्दिनाधिपविमण्डलसन्निभानि
कुत्रापि पाककलकोलफलानि चिन्वन् ।
गोपाङ्गनाः क्वचन लोचनगोचरेऽपि
कुर्वन् पयोदधिघटीः शिरसाऽऽदधानाः ॥ १३६ ॥
दूर्वाप्रवालशकलानि सुकोमलानि
भास्वत्तुरङ्गमतनूरुहसोदराणि ।
मत्तं पुरीपरिसरे परितश्चरन्तं
कुत्रापि तर्णककुलं समवेक्षमाणः ॥१३७॥
छायां भजन् क्वचिदपि श्रमघर्मतोयै-
राप्लावितः समुदयत्सुकुमारभावः ।
अभ्रंलिहावनिरुहावलिलक्ष्यमाणां
दूरादवैक्षत वनीमवनः श्रियां सः ॥१३८॥
॥ चतुर्भिः कुलकम् ॥
पुंस्कोकिलान् क्वचन दर्शयता रसाल-
शाखाप्रदेशमवलम्ब्य सुखं निविष्टान् ।
पीयूषपारणविधिं श्रवसां जनाना-
मातन्वतः सुमधुरस्वरगीतभङ्ग्या ॥ १३९ ॥
व्याकोशकिंशुकसुमायतचारुचञ्चून्
लीलाचलच्चरणचङ्क्रमणैकचुञ्चून् ।
क्षीरोदसागरतरङ्गसदृक्षपक्षान्
पद्माङ्कुरादनपरान् क्वचनापि हंसान् ॥ १४० ॥
चक्रीं प्रियां बिशलताशकलार्पणेन
प्रेमप्रकाशमनुरञ्जयतो यथेच्छम् ।

कुत्राप्यगाधसरसीं निकषैव चक्रा-
नाराममासददयं जनकेन साकम् ॥ १४१ ॥
॥ त्रिभिर्विशेषकम् ॥

भास्वत्करप्रसरवारणमाऽऽदधानं
छायाभरेण विततोद्गतभूरुहाणाम् ।
सान्द्रीभवत्किसलयच्छदनाश्चितानां
स श्रेष्ठिसूरुपवनं प्रविवेश तत्र ॥ १४२ ॥

तं बालकं समवलोक्य समाव्रजन्तं
पीयूषवर्षमिव लोचनयोः सृजन्तम् ।
पप्रच्छ मालिकवरो धनदत्तमिभ्यं
कोऽयं नवोऽत्र भवता समुपैति चेति ॥१४३॥

सूनुर्ममायमतिजातकुतूहलः स-
न्नाराममागमदवेक्षितुमेव तेऽद्य ।
इभ्यप्रभूदितमिदं विनिशम्य सम्यग्
जम्बीरदाडिमफलानि ददौ स तस्मै ॥१४४॥

रम्भाफलानि विपुलानि मनोरमाणि
सह्लाह्लकीतनुमहाफलतुम्बियुञ्जि ।
आरामिको व्यतरदाशु निवारितोऽपि
त्यागोद्धतेन किल तज्जनकेन मेति ॥ १४५ ॥

प्रोत्फुल्लचम्पकसुमानि सकेतकानि
जाम्बूनदोपपदजातिसुमानि लात्वा ।
व्यावर्तत स्वभवनं प्रति वाणिजेशः
प्रीतिं परां कलयता तनयेन सार्द्धम् ॥ १४६ ॥

आनन्दमानमनसं जननीं प्रकुर्व-
न्नालिङ्गनेन वचनेन च संमतेन ।
यच्छन् फलानि वनपालसमर्पितानि
तानि स्वयं परिजनाय यथाक्रमेण ॥१४७॥

पश्यन् जिनाधिपतिपूजनमेकतान-

स्तं कश्चन प्रमदमापदयं स्वतोऽपि ।
आराधयद्भिरसमं परमेश्वरं यः
सम्प्राप्यते नियमिभिर्नियतं कथञ्चित् ॥ १४८ ॥

विज्ञाप्य स्वमुखेन तातचरणान् कल्याणरुक्प्रीणितान्
गत्वाऽऽराममुपानयत्स सततं पुष्पाणि मालाकृतः ।
अभ्यस्यत् सकलाः कलाश्च वयसोर्मध्यं जगाहे द्वयोः
कुम्भाख्यो बहुशावभावयुवताप्रख्यातनाम्नोरयम् ॥१४९॥

आसीत् श्रीगुरुगच्छमौलिमुकुटश्रीमानभद्रप्रभोः
पट्टे श्रीगुणभद्रसूरिसुगुरुर्विद्यावतां सद्गुरुः ।
तच्छिष्येण कृतेऽत्र षोडशजिनाधीशस्य वृत्ते महा-
काव्ये श्रीमुनिभद्रसूरिकविना सर्गस्तृतीयोऽगमत् ॥१५०॥

॥ इति श्रीशान्तिनाथचरिते महाकाव्ये तृतीयः सर्गः ॥

अर्हम्

अथ चतुर्थः सर्गः ।

उपास्य यस्याङ्घ्रमनाप्यमन्यैर्विलोचनानामबलाजनानाम् ।
मृगो बभाराप्युपमानभावं शान्तिप्रभुर्वस्तनुतां स शर्म ॥ १ ॥
इतश्च चम्पानगरी प्रसिद्धा कलिङ्गदेशे विषयावतंसे ।
भोगीशितायामवलोक्य रम्यां भोगावतीं स्वाभध एव चक्रे ॥ २ ॥
न्यायक्रियासुन्दर एव तस्यां पृथ्वीपतिः सुन्दरनामधेयः ।
बभूव यस्याग्रत एव लक्ष्म्या पुरन्दरः किङ्कर इत्यमानि ॥ ३ ॥
गुणावली तस्य नृपस्य देवी देवीव सौन्दर्य्यगुणेन याऽऽसीत् ।
त्रैलोक्यसुन्दर्य्यभिधा तदीया त्रैलोक्यसुन्दर्य्यभवत्तनूजा ॥ ४ ॥
उत्सङ्गसंसङ्गिफलोपशोभां स्वप्ने समालोकत वीरुधं यत् ।
तमीतुरीयप्रहरेऽवशिष्टे तस्यां प्रसूर्गर्भमधिश्रयन्त्याम् ॥ ५ ॥

अन्योऽन्यमास्फालयता तदस्या विजृम्भमाणेन कुचद्वयेन ।
कन्दर्पलीलोपवने कृशाङ्ग्या तद्यौवने किं फलितं न चापि? ॥ ६ ॥
तां यौवनोद्भेदविशेषरम्यां माता समालोक्य मुदं बभार ।
विचिन्तयन्तीति सुधा किमेषा मत्कुक्षिरत्नाकरतो विजज्ञे ॥ ७ ॥
अन्येद्युरभ्यज्य सहस्रपाकतैलेन कर्पूरसुगन्धिनैनाम् ।
श्रीखण्डवासैर्मसृणैः समन्तादुद्वर्त्य कोष्णैरभिषेच्य वार्भिः ॥ ८ ॥
सुवर्णरत्नाभरणैर्विचित्रैराचूलमापादनखं विभूष्य ।
दिव्यं दुकूलं परिधाप्य भव्यं शिरीषकोपघ्नदिमाऽपघाति ॥ ९ ॥
गुणावली तां प्रसरत्समग्रगुणावलीमालिजनेन सार्द्धम् ।
आस्थानमास्थाय कृतासनस्य प्रस्थापयामास नृपस्य पार्श्वम् ॥ १० ॥
॥ त्रिभिर्विशेषकम् ॥
भूपालदोःस्तम्भमवाप्य बाला सा शालभञ्जीव परं रराज ।
विलोचनेन्दीवरसन्ततीनां ज्योत्स्नेव यूनां ददती विकाशम् ॥ ११ ॥
विलोक्य बालां सुरसुन्दरस्तां रूपस्वरूपेण जगज्जयन्तीम् ।
गुणैरशेषानपि रञ्जयन्तीं मनोभुवः शासनजैजयन्तीम् ॥ १२ ॥
दध्यौ नृपस्त्वेवमहो! किमस्या वरो विधात्रा प्रवरो न सृष्टः ।
सृष्टो यदि स्यादवलोक्यतेऽत्र श्रोत्रातिथित्वं प्रतिपद्यते वा ॥ १३ ॥
॥ युग्मम् ॥
अतादृशाय प्रतिपाद्यते चेत्सपद्यते तद्वचनीयता मे ।
अस्यां हि सृष्टि सुकृतैरियं तत्सम्पादयिष्यन्ति तमेव तानि ॥ १४ ॥
निश्चित्य चित्ते स्वयमित्यधीशः सभां पुनस्तां सहसा विसृज्य ।
अन्तःपुरं बालिकया तयाऽमा समागमद्वेत्रिनिरुद्धलोकम् ॥ १५ ॥
प्रत्युद्गमाऽथ गुणावली त नृपावलीवन्द्यपदारविन्दम् ।
भद्रासने भद्रतया निविष्टं सा संनिविष्टा तमिदं बभाषे ॥ १६ ॥
विवाहयोग्या भवतोऽस्ति पुत्री यत्नःपवित्रीकृतविश्वविश्व! ।
दिगीश्वरांशाश्रितमूर्त्तिरद्धा सर्वं भवतो वेद महीमहेन्द्रः ॥ १७ ॥
विज्ञापना यत् क्रियते सदस्याऽवधारय त्वं परमार्थमीश! ।
अस्माकमस्यां मनसा प्रवृद्धः प्रेमा समुज्जृम्भत एव कोऽपि ॥ १८ ॥
ततो महाराज! मयि प्रमादं विधाय पुत्रीं प्रतिपादयेमाम् ।

वराय कस्मैचिदिदंपुरीयवास्तव्यचूडामणये महेच्छ ! ॥ १९ ॥
सञ्चच्छतेऽसौ श्वशुरस्य गेहादागत्य चागत्य यथाऽनिशं नः ।
अस्या वियोगं न वयं विसोढुं क्षमाः क्षमाखण्डल ! किञ्चिदेव ॥ २० ॥
राज्ञीभिरन्याभिरियं निजेच्छा राज्ञः पुरो विज्ञपयाम्बभूवे ।
को वा प्रभूणां न मनीषितं स्वं लब्धावकाशः प्रविकाशयेत ? ॥ २१ ॥
विज्ञप्तिमासां हृदये निधाय क्ष्मावासवः संसदमध्युवास ।
पूर्वेव पूर्वाऽचलसानुदेशं सिंहासनं च श्रितवानतन्द्रः ॥ २२ ॥
सुबुद्धिनामानमथो सुबुद्धिं मन्त्रीशमूचे वसुधासुधांशुः ।
सुतां मदीयां स्वसुतेन सार्द्धं विवाहयाऽस्मद्विनियोगतस्त्वम् ॥ २३ ॥
त्वग्दोषदुष्टं तनयं विभाव्य प्रोवाच मन्त्री नृपतिं प्रतीदम् ।
स्वामिन्ननौचित्यविपश्चितं किं वचस्त्वयाऽवाचि विपश्चिताऽपि ? ॥ २४ ॥
क्व स्वर्णकायः क्व च राजिलोऽयं कैरावणः कैडकडिम्भ एषः ।
राजेन्द्र ! संसेव्यपदः क्व देवस्त्वत्पादपद्मप्रणयी क्व चाऽहम् ॥ २५ ॥
वित्तं ययोरेव समं जगत्यां कुलं ययोरेव समं प्रतीतम् ।
मैत्री तयोरेव तयोर्विवाहस्तयोर्विवादश्च निरूपितोऽस्ति ॥ २६ ॥
स एव सम्बन्धविधिर्विधेयः सम्बन्धिता येन भवेत् प्रशस्या ।
निर्बन्धमापाद्य विधीयमानः सम्बन्ध एव प्रकरोति हास्यम् ॥ २७ ॥
ततो महाराज ! मनागपीदं न युक्तमेतद्भवताऽभ्यधायि ।
महीयसामातनुते महत्त्वं युक्त्यानुयुक्तं हि निरूप्यमाणम् ॥ २८ ॥
अपेक्षणीया न भवन्ति जातु क्षोणीश्वराणामपि सेवकास्ते ।
ये लोभमालम्ब्य समुत्सहन्ते कीर्तिं प्रभो ! च्छेत्तुमिह प्रसिद्धाम् ॥ २९ ॥
तदुक्तिमाधाय हृदीति राजा विराजमानः सहजेन धाम्ना ।
जगाद मन्त्रिन् ! कथमस्मदीयं वाक्यं विसम्बन्धमुदाहरस्त्वम् ॥ ३० ॥
स्वस्वामिसम्बन्धमभापताऽयं दाक्षीसुतो व्याकरणं प्रकुर्वन् ।
आबालगोपालमहो ! प्रसिद्धः संस्मर्य्यतेऽमात्य ! स किं त्वया न ? ॥ ३१ ॥
सम्बन्धमुद्द्योतयितुं पटिष्ठा षष्ठीविभक्तिः सुधियां मताऽस्ति ।
त्वं सेवकोऽहं प्रभुरसि तेऽपि प्रतीतमेवं तमुरीकुरुष्व ॥ ३२ ॥
धनं ययोरेव समानमित्याद्यवाचि यत्तन्न विचारचारु ।
सहस्रपादस्य दिनेश्वरस्य किं पङ्गुना काश्यपिना न योगः ? ॥ ३३ ॥

स किं विभिन्नान्वययोर्भवेयुः प्रीतिश्रियः स्फीततमाः सुबुद्धे ! ।
तथा हि रामः प्रमनाः स दत्ते लङ्काधिपत्यं स विभीषणाय ॥ ३४ ॥
श्रीरामलङ्केश्वरयोर्गरीयान् कुले विभिन्नेऽपि रणो बभूव ।
न मन्यते मानधनास्तु यद्वा किञ्चित् परित्यक्तविवेकभावाः ॥ ३५ ॥
प्रीतौ विरोधे च ततश्च पुण्याऽपुण्यप्रवृत्ती प्रथमं निदानम् ।
विचिन्त्य संबन्धविधानतो मे सम्बन्धिनां शेखरतां श्रय त्वम् ॥ ३६ ॥
इत्याग्रहं भूमिपुरन्दरस्य सञ्चिन्त्य चित्ते सचिवः स्वचित्ते ।
समागमन्मन्दिरमिद्धऋद्धिप्रधानमाधानमयं सुखस्य ॥ ३७ ॥
बुद्ध्या न यत्सिद्ध्यति कार्यमीपद्वैपम्यमापन्नमनन्तशोऽपि ।
न पौरुषेणापि न भूरिदानैस्तत्रोचिवार्चा कुलदेवतायाः ॥ ३८ ॥
इत्यन्तरुद्धाव्य विभावितात्मा निकेतनाभ्यन्तर एव देव्याः ।
निकेतने केतनराजिराजि स्नात्वा प्रविश्य प्रयतः स धीरः ॥ ३९ ॥
संस्नाप्य नीरैर्घनसारमिश्रैर्मनोभिरच्छैरिव भावनाढ्यैः ।
कस्तूरिकाकुङ्कुमचन्दनैस्तां विलिप्य मूर्तिं कुलदेवतायाः ॥ ४० ॥
मधुव्रताकर्षणसिद्धविद्यारूपाणि पुष्पाणि मनोहराणि ।
आरोप्य मूर्तिं परितः पुरस्तान्निधाय नैवेद्यमनेकधापि ॥ ४१ ॥
अदभ्रदर्भैर्मृगचर्मविद्यामैरास्तीर्य संस्तारकमस्तदोषम् ।
भवत्प्रसादादचिरेण वाञ्छा भवत्वियं मे सफलेत्युदित्वा ॥ ४२ ॥
स्तुत्वा महार्थैः स्तवनैरुदर्मैर्नानाप्रकारैर्ललितैः सुवृत्तैः ।
अयं जनो देवि ! तव प्रसादे प्राप्ते समुत्थास्यति चेति जल्पन् ॥ ४३॥
स्वदेहसामर्थ्यमचिन्तयित्वा यावद्वरप्राप्तिसमानकालम् ।
आहारभङ्गीपरिहाररूपं कुर्वन्नखर्वं नियमं विगर्वः ॥ ४४ ॥
नवाम्बुदक्षालितशम्भुशैलावदातवासा विकसन्मुखश्रीः ।
सुष्वाप देवीचरणारविन्दद्वयाग्रतः शुद्धमनाः प्रशस्यः ॥ ४५ ॥

(षड्भिः कुलकम्)

अथ प्रभापूरहतान्धकारा तद्ध्यानकाष्ठाचलितामना सा ।
निशावसाने विदितप्रभावा तुष्टा बभाषे कुलदेवता तम् ॥ ४६ ॥
त्वया किमर्थं विहितं मदीयाऽनुध्यानमेतत्सचिवावतंस ! ।
चत्तिष्ठ वत्स ! स्वमनीषितं द्राग्यदमतस्त्वं विनिवेदयस्व ॥ ४७ ॥

इति प्रसादप्रमुखं मुखोक्तं निशम्य वाक्यं सचिवः स देव्याः ।
उत्थाय बद्धाञ्जलिसम्पुटः सन्नानन्दसम्पूर्णमना जगाद ॥ ४८ ॥
मत्पुत्रकायस्थितकुष्ठगन्धस्तव प्रसादाद्घनसारसारात् ।
देवि ! प्रयातु क्षयमिष्टसिद्धिप्रदानसम्पादनसिद्धिरूपे ! ॥ ४९ ॥
तदुक्तमाकर्ण्य सकर्णसेव्या देव्याऽऽह सा स्म स्मितपूर्वमेवम् ।
रोगक्षयं कर्तुमहं न शक्ता शक्ताऽपि पुत्रस्य तवादिभक्त ! ॥ ५० ॥
सुरासुराधीशनतक्रमोऽपि विज्ञानसम्पत्तिविभूषितोऽपि ।
नैवाऽन्यथाकर्तुमलम्भविष्णुर्जिनोऽप्यभुक्त्वा निजकर्मजातम् ॥ ५१ ॥
उपार्जितं येन यदेव कर्म शुभाशुभं तेन तदेव भोग्यम् ।
किं नान्यथा पुत्रसुखेन वप्ता वप्तुः सुखेनैव सुतः सुखी वा ? ॥ ५२ ॥
एतत्परित्यज्य ततोऽपरं त्वं हृदा समालोच्य वरं वृणीष्व ।
नाऽस्वामितां स्वाम्यपि विन्दतेऽत्र प्रसाधयन् साध्यमहो ! स्वसाध्यम् ॥
ऊचे स यद्येव मतं कुमारं मान्ये ! समानीय समर्पयस्व ।
योऽवक्रयेणापि नरेन्द्रकन्यां विवाह्य मह्यं ददते प्रसह्य ॥ ५४ ॥
विज्ञापनं तस्य निवेश्य चित्तेऽभिधीयते देवतया तया स्म ।
त्वन्माननावासितमानसाऽहं सर्वं विधातास्मि तदेतदाशु ॥ ५५ ॥
अस्याः पुरो दूरत एव कोऽपि त्वन्मन्दुरापालतटस्थ एव ।
यो मन्दुरासन्निहितः कुमारः स्वरूपसन्तर्जितमाररूपः ॥ ५६ ॥
अताड्यजाड्यज्वरपीड्यमानः समेत्य सन्तापयते कृशानौ ।
आप्तेन गुप्तं रभसा तमानाय्योद्वाहये राजसुतां यथेच्छम् ॥ ५७ ॥
(युग्मम्)
तमेवमुक्त्वा कुलदेवताऽसौ तिरोदधे नम्रजनानुकम्प्रा ।
विधित्सवः कार्यमिहार्य्यचित्ता भृत्यं हि किं नाम न शिक्षयन्ते? ॥ ५८ ॥
ततः प्रभाते सचिवः प्रहृष्यन् महाशयः पारणकं विधाय ।
आह्वाय्य मौहूर्त्तिकमादरेणान्वयुङ्क्त लग्नं स्वहिते विलग्नः ॥ ५९ ॥
ज्योतिर्विदं दत्तविवाहलग्नं धनानि दत्त्वा वसनानि चापि ।
विसर्जयामास नृपस्य शिष्ट्या विवाहसामग्र्यमपि व्यधत्त ॥ ६० ॥
यः कश्चिदागच्छति वाजिशालापार्श्वे कुमारः सुकुमारगात्रः ।
स्वरूपमारः प्रतिपत्तिसारः स मे समानीय समर्पणीयः ॥ ६१ ॥

प्रकुर्वतेदं भवता मदीयं प्रयोजनं निर्मितमेव सर्वम् ।
एकं समाहूय स वाजिशालाऽध्यक्षं समादिक्षदिति प्रसन्नम् ॥ ६२ ॥
(युग्मम्)

सा देवतापि प्रतिपन्ननिद्रा गन्तोज्झयिन्या सुरराजधान्याम् ।
व्योम्नि स्थिता तद्वनपार्श्वतोऽदः पुरोऽवदन् मङ्गलकुम्भकस्य ॥ ६३ ॥
अवक्रयेणैष कुमार एवोद्विवक्ष्यते राजसुतां स्वरूपाम् ।
इत्यन्तरिक्षे स वचो निशम्य व्यचिन्तयद्विस्मित एव चित्ते ॥ ६४ ॥
देवस्य कस्यापि वचः किमेतद्दैत्यस्य कस्याप्यथवा गभीरम् ।
विद्याधरस्याप्यनवद्यविद्याविद्योतमानाशयकस्य किंवा ? ॥ ६५ ॥
सिद्धस्य कस्यापि किमेतदाहोस्विच्चारणस्यं व्रतचारिणः किम् ? ।
कार्य्यं निरालम्बनमेव न स्यान्नाकारणं किञ्चिदवेक्ष्यते हि ॥ ६६ ॥
परं न युक्तिर्व्यतिरिक्तभावात् स्यान्तं प्रतीतिं दधते ममात्र ।
निवेदयिष्यामि विशेषतोऽदस्तथापि पित्रे सदनं गतः सन् ॥ ६७ ॥
आदाय पुष्पाणि स पाणिना द्राक् समाययौ सद्मनि वाटिकायाः ।
कार्यस्य वैयग्र्यवशादमुष्य स्मृतेर्न तद्गोचरतामयासीत् ॥ ६८ ॥
अन्येद्युरुद्यानमगुष्य यातः श्रुतौ प्रयातं वचनं सदैव ।
अथाप्तसद्मा नियमेन वप्तुः पुरः प्रवक्ष्येऽद्भुतमेतदुग्रम् ॥ ६९ ॥
न यद्वचोवर्त्मनि मानवानां महाकवीनामपि किञ्चनापि ।
चेतःपथे नापि कदापि धाता करोति लीलास्फुरणेन तत्र ॥ ७० ॥
शुभोदयो वाऽप्यशुभोदयो वा स्याद्देहभाजां नियतेर्नियोगात् ।
न कोऽपि शक्नोत्यतिवर्तितुं तं कदाचन च्छायमिव स्वकीयम् ॥ ७१ ॥
अत्रान्तरे प्रादुरभूत्कुतश्चिद्वात्या हरन्ती विततं प्रकाशम् ।
रजोभिरान्ध्यं दिशती जनानां विलोचनान्तःपतनप्रगल्भैः ॥ ७२ ॥
स वात्ययोत्पाट्य तया कुमारः सुमार्थमिद्धं निजवाटिकायाम् ।
चम्पापुरीसंनिहिताटवीभूभागे क्षणाद्रन्ध इव व्यमोचि ॥ ७३ ॥
विशीर्णपर्णं यत्र विनैव लङ्कां पश्यन्ति रामाकलितं जनौघाः ।
हरीश्वरो यत्कपिभिः परीतः क्वचित् क्वचित् खेलति निर्विशङ्कम् ॥७४॥
भीतिं दधाना इव सूरपादा विन्दन्ति यत्र प्रसरं न किञ्चित् ।
अभ्रंकषोर्वीरुहसन्ततीनां छायान्धलब्धानतमःप्रपञ्चात् ॥ ७५ ॥

वस्मिन्नविज्ञातहरिद्विभागो बभ्राम पञ्चाननवत् स वीरः ।
विमार्गयन्मार्गमुपैतुकामो ग्रामं पुरं वा पृथुगोकुलं वा ॥ ७६ ॥
अथ व्यलोकिष्ट स पुण्यसारं कासारमाशाः परिपूरयन्तम् ।
समात्रजत्पान्थपरम्पराणां कर्पूरसारैरिव वारिपूरैः ॥ ७७ ॥
अस्ताघभावं कलयन्तमुच्चैः सतां मनोवद्वितते समन्तात् ।
दैत्यारिवक्षःस्थलवद्दधानं पद्मानुरागं वहुसत्त्वनिष्ठम् ॥ ७८ ॥
चक्राचितं जीवनदानवित्तं राजाधिराजोन्नतपाणिवच्च ।
विष्वग्वृतं चारुविशालशालावल्या महापत्तनवत्सहंसम् ॥ ७९ ॥
॥ त्रिभिर्विशेषकम् ॥
ग्रामीणपौरैः क्रयविक्रयाभ्यां चलद्भिराकीर्णमभीप्सिताभ्याम् ।
ग्रामस्य कस्याप्यथवा पुरस्य पन्थानमन्वेषयितुं प्रतीतम् ॥ ८० ॥
कृत्वा तडागे सवनं श्रमार्त्तः स्वच्छानि शीतानि जलानि पीत्वा ।
आलम्ब्य दोर्भ्यां च वटस्य पादांस्तस्योपरिष्टात्स समारुरोह ॥ ८१ ॥
(युग्मम्)
सूरस्तमालोक्य तदुग्रदुःखं करेष्वनेकेष्वपि सत्सु हर्तुम् ।
अपारयन्नस्तमहीध्रचूलामारुह्य वेगाज्जलधौ ममज्ज ॥ ८२ ॥
न बन्धनं यस्य न कर्मपाशः किञ्चिन्न वा पञ्जरमस्ति यस्य ।
वनूपभोगस्यजनापरस्य स्थिरः स हंसः प्रतिपद्यते किम् ? ॥ ८३ ॥
निमित्तमात्रं पतने गुरुत्वं प्रोक्तं कणादेन मुनीश्वरेण ।
ग्रहेषु सर्वेष्वपि भास्करस्य व्यक्तं न तत्किं पतनं विधत्ताम् ? ॥ ८४ ॥
सरोजिनीनाथदिनाधिनाथप्रभाधिनाथग्रहनाथमुख्यैः ।
विवर्णना यस्य बभूव शब्दैः स हास्तमेति स्थिरमाः! परं किम्? ॥८५॥
इदं कराणां स्फुरतां सहस्रं पुरस्कृतं यन्मयका पुरैव ।
उपेक्षतेऽस्मिन्समयेऽपि तन्मामिति क्रुधाऽऽरुण्यमधत्त योऽर्कः ॥ ८६ ॥
प्रवर्त्तमानेऽभ्युदयेऽसमाने ये स्वामिना केऽपि पुरस्क्रियन्ते ।
तं तेऽनुगच्छन्ति तथा हि यातः प्रभादिनौ भानुमता सहास्तम् ॥ ८७ ॥
सुतो यदीयः स यमः प्रसिद्धः पद्मापतेर्यः स्वयमेव चक्षुः ।
प्रभुर्ग्रहाणामपि यः समेषां हन्तास्तमेतीह स चेत्स्थिरं किम् ? ॥ ८८ ॥
समस्ततो विस्तृतिमाश्रितायामधःस्थितं श्वापदमेव किञ्चित् ।

व्यापादयिष्यत्यचिरेण मामित्यवेत्य सोऽस्यास्तिमितस्तथैव ॥ ८९ ॥
तथा कथञ्चित्प्रसृतं तमोऽपि दृश्यो न हंसोऽपि यथाजनिष्ट ।
भामाभभावो हि तमोऽपि युक्तं प्रोक्तं कणादेन ततः कथञ्चित् ॥९०॥
विलोक्य सोऽथ ज्वलनज्वलन्तं न्यग्रोधभूमीरुहमुत्तरेण ।
हृष्यत्तनुः शीतविकम्पमानोऽवतीर्य तस्मात्तमियाय देशम् ॥ ९१ ॥
स स्थानपालैर्बहु तप्यमानः शीर्षे प्रहारैरभिताडितश्च ।
एकेन तन्मन्त्रिवचो विचिन्त्याऽपसार्य तेभ्यो विजनेऽथ निन्ये ॥९२॥
क्षणं कृशानावकृशाशयस्तं स तापयित्वा सचिवाय मह्यु ।
समर्पयामास कुमाररूपं कुमारमालोक्य मुदेऽदित स्वम् ॥ ९३ ॥
अपूपुषत्तं सचिवोऽप्यजस्रं स्निग्धान्नपानैः स्वकुमारवच्च ।
प्रच्छन्नमाधाय निधानवत् स देयार्थवत्प्राहरिकैररक्षत् ॥ ९४ ॥
स एकदाऽपृच्छदमात्यमेवं वैदेशिकस्यापि विधीयते मे ।
किं गौरवं तात ! पुरी च केयं किं नामधेयस्त्वमिह प्रसिद्धः ? ॥ ९५ ॥
मन्त्र्यप्यभाषिष्ट विशिष्टबुद्धिः स्वार्थं न ते गौरवमादधेऽहम् ।
चम्पापुरीयं प्रथिता जगत्यां तन्नाथमन्त्र्यस्म्यहमत्र वित्तः ॥ ९६ ॥
स्वार्थोऽपि कस्ते सचिवेति पृष्टस्तेन न्यगादीत्पुनरेव मन्त्री ।
निवेदयिष्यामि तवाऽपि मुग्ध ! स्वार्थं कदाचित्स्वमनोऽनुमत्या ॥९७॥
गतेषु घस्रेषु कियत्स्वमात्यं प्रस्तावमासाद्य स पृच्छति स्म ।
स्वार्थं समाख्याहि ममानुपृच्छेत्युक्तः स तेनाभिदधेऽभिसन्धिम् ॥ ९८ ॥
श्रुत्वा तदाकूतमुदारचेताः स निःश्वसन् दिक्करकोऽप्युवाच ।
आ ! युक्तिमुक्तं भवता किमुक्तं वचः कलङ्कं रचयन् कुलस्य ॥ ९९ ॥
को नाम तत्कर्म विनिर्मिमीते भूतं न यत्कापि न भावि यच्च ।
सचेतनः कः परिणीय कन्यां प्रदातुमीहां तनुतां परस्मै ॥१००॥
तद्वाचमन्तर्विनिवेश्य मन्त्री च्छेत्स्यामि मूर्द्धानमिति ब्रुवाणः ।
पाणौ कृपाणं कलयन्स पापात्कृपापरैः प्राहरिकैर्न्यवारि ॥१०१॥
देशे त्वदीये यदि वा कुलेऽस्मिन् प्रवृत्तिरेषा न तथापि मेऽर्हा ।
आमुष्मिकं यदिकर्मोद्यमानः समाचरेत्कः प्रतिषिद्धमर्थम् ? ॥ १०२ ॥
विमुञ्च सन्तापकरं प्रलापं कोशे कृपाणं क्षिप मन्त्रिराज ! ।
भवादृशा यादृशाय स्वर्द्ध किमाददाना न गन्तु प्रपन्ने ? ॥ १०३ ॥

अवोचदज्ञानवशादवद्धं बालः प्रवालच्छविदन्तवासाः ।
विदन् प्रभूणां पुरतः क एवं वदेदितिधत्ते प्रतिपद्धि दोषान् ॥१०४॥
तावत्प्रतीक्षस्व विबोधयामो यावद्वयं बालमबालबुद्धिम् ।
इतीरितस्तैः प्रशशाम मन्त्री सामप्रसाध्या ह्यधिपा भवन्ति ॥१०५॥
रक्षानियुक्तास्तमबूबुधंस्ते तथा यथामंस्त स तद्वचस्तत् ।
ऊचे च तन्मे सुमते ! प्रदेयं प्राप्नोमि यत्पाणिविमोचनेऽहम् ॥१०६॥
आमेति तस्य प्रतिपद्य सारव्याहारसाकारपराद्धर्यमूर्त्तेः ।
वैवाहिकं धीसख एव सर्वं विधापयामास विधिं विधिज्ञः ॥१०७॥
प्रवाद्यमानेषु विचित्रभङ्गया महामृदङ्गेषु कलस्वनेषु ।
मार्दङ्गिकैर्द्रव्यमुपाददानैरुत्तार्यमाणं स्वसुवासिनीभिः ॥१०८॥
योषासु भूपासुमनोहरासु प्रकुर्वतीषु प्रवरासु गीतम् ।
अभ्यज्य तैलेन सुगन्धिना तं हारिद्रचूर्णोपचितेन तेन ॥१०९॥
स्ववृत्तसन्तोषितकान्तपुत्रप्रपूर्य्यमाणानुपमाभिलाषाः ।
अम्भोभिरुष्णैरवदातरूपैरासिस्नपंस्तं प्रवरा रमण्यः ॥११०॥

(युग्मम्)

विलेपनं काञ्चन चक्रुरङ्गे कर्पूरसम्भाजितचन्दनेन ।
ललाम काश्चिच्च ललाटपट्टे गोरोचनारोचितकुङ्कुमेन ॥१११॥
सदा विवाहव्यवहारविज्ञाः काश्चिद्बबन्धुर्वलयं प्रकोष्ठे ।
ताम्बूलमाराद्धनसारमिश्रं व्यश्राणयन् काश्चन भव्यभावाः ॥११२॥
कपोलदेशे मृगनाभिपत्रभङ्गीं व्यधुः काश्चन रागसङ्गात् ।
वासांसि काश्चित्परिधाप्य नव्यान्यदीदृशन्दर्पणमिद्धदर्पाः ॥११३॥
इत्युग्रसौभाग्यपरप्रभावानुमेयभाग्यातिशयस्य तस्य ।
चक्रुः पुरन्ध्र्योऽपि विधिं विवाहे क भाग्यभाजां न भवन्ति भोगाः॥११४॥

॥ चतुर्भिः कलापकम् ॥

आरोपितान् कुङ्कुमपङ्कहस्तान्सीमन्तिनीभिर्दधतं समन्तात् ।
ततः समारक्षदरूक्षकायं स हस्तिनं हस्तिपकात्तहस्तः ॥११५॥
वीणासु भेरीषु च वाद्यमानास्वनन्तरामासु च कुर्वतीषु ।
गीतानि तारस्वरमन्यपुष्टाध्वानिं जयन्तीषु वमान्वितासु ॥११६॥

(युग्मम्)

भट्टेपु काव्यानि पठत्सु सत्सु गीतानि गायत्सु च गायनेपु ।
बर्हातपत्रेण विराजमानः स मण्डपं प्राप निवृत्ततापः ॥११७॥
तन्मण्डपद्वारि मतङ्गजेन्द्रस्कन्धात्समुत्तीर्य्य दिशन् वसूनि ।
कुलाङ्गनाभिः कृतमर्घपात्रैरर्घं गृहीत्वान्तरमाविवेश ॥११८॥
(युग्मम्)

विभूपयामास विभूपणांशुप्रद्योतिताशः स कुमारसिंहः ।
सिंहासनं श्रीसुरसुन्दरेण व्यधायि यत्तत्र सुमेरुतुङ्गम् ॥११९॥
त्रैलोक्यसुन्दर्य्यपि वर्यभूपाविभूपिताङ्गी विहिताभिपेका ।
विलेपनैर्वासितदिक्तन्या दुकूलवासःपिहितान‍नश्रीः ॥१२०॥
सा मातृकासद्मनि मातृकाणां वृद्धाङ्गनास्थापनया स्थितानाम् ।
विधाय पूजां सुमनोऽनुरूपां भद्रासने प्राग्निपसाद भद्रा ॥१२१॥
(युग्मम्)

लग्ने प्रशस्ते पतिमित्रपूर्णदृष्ट्या प्रदृष्टे वलशालमाने ।
षड्वर्गशुद्धे च तयोः पुरोधा अमीलयन्मद्भ्रु करं करेण ॥१२२॥
स मङ्गले प्राचि दुकूलभारान् ददौ द्वितीये वरभूपणानि ।
सुवर्णमाणिक्यभरं तृतीये तुर्य्ये रथाश्वादि धराधिराजः ॥१२३॥
यावत्करं मुञ्चति नैव पुत्र्या धवः स तावत्तमुवाच भूपः ।
जामातरस्यापि विमृग्यते यत्तं देशमादत्स्व विना निदेशम् ॥१२४॥
देशान्निदेशानिव ते निदेशस्थापारभाजः परिपालयन्तु ।
तान्पथ्य पथ्याश्रित ! वल्लभस्य देशस्य वाहान् दिश मे नरेन्द्र ! ॥१२५॥
क्रियत्त्वया याचितमित्युदित्वा स भूपतिः पथ्य ददौ तुरङ्गान् ।
प्रमादमासेदुपि मानसेऽस्मिन्नैवास्त्यदेयं महतां हि किञ्चित् ॥१२६॥
विवाह तां मङ्गलकुम्भ एवं समाश्रयद्धामगृहं स यावत् ।
तावत्कुजिप्याभिरुदीर्य्यमाणाः स्वयं समाकर्णयति स्म वाचः ॥१२७॥
निर्गम्यतां सांप्रतमेप गेहात्प्रयोजनं नः परिपूर्णमेव ।
सख्यः क्षणं तिष्ठतु स प्रतिष्ठः प्रवर्त्तते यावदिदं तमोऽपि ॥१२८॥
तासां गिरः कर्णपथं स नीत्वा विमृश्य चित्तेन निमेपमात्रम् ।
शरीरचिन्तामिपतोऽभिमानी विनिर्ययौ वासगृहात् सवेगम् ॥१२९॥
सुवर्णपात्रे सलिलैः प्रपूर्ण स्वपाणिनादाय नरेन्द्रकन्या ।

तमन्वयासीद्रभसाद्रसोत्का सम्पद्यथैव व्यवसायभाजम् ॥ १३० ॥
वितत्य किञ्चित्किल देहचिन्तामेतं वधूरुन्मनसं समीक्ष्य ।
ब्रूते स्म किं नाथ ! विबाधते त्वामारोग्यसम्पातकरी बुभुक्षा ॥ १३१ ॥
अभाषमाणे दयिते वधूर्दा चेटीं समादिश्य पटीरवासा ।
स्थालं समानाययति स्म चेतःप्रमोदकैर्मोदककैः प्रपूर्णम् ॥ १३२ ॥
ताभ्यामुभाभ्यामपि मोदकास्ते निष्कृत्रिमप्रेमसमन्विताभ्याम् ।
एकत्र पात्रे घनसारसारैरिवाहिता हर्षभरेण भुक्ताः ॥ १३३ ॥
आस्वादमास्वादयतेव तेषामस्या निजस्थानविबोधनाय ।
तेनेन्दुखण्डैरिव निर्मितानां सौन्दर्यमादर्शयतेत्यवादि ॥१३४॥
स्याच्चेद्विशालासलिलं कथञ्चित्तन्मोदका मानसमोदकाः स्युः ।
द्राक्षारसोत्पादितपानकान्तःसितापरिक्षेपनिदर्शनं च ॥१३५॥
तद्भापिताकर्णनतो धरित्रीधवस्य पुत्री परिविस्मिता सा ।
विचिन्तयामास किमार्यपुत्रोऽप्यबद्धमेतन्निजगाद विद्वान् ॥१३६॥
एतस्य जन्मास्पदमेपिका पूरितो विशालानगरी दविष्ठा ।
एतज्जनन्या जनकस्य पत्यं प्रशस्तमास्ते ध्रुवमेव तत्र ॥१३७॥
निर्णीय बुद्ध्येति लवङ्गपूगकर्पूरपूरेण विमिश्रितं सा ।
ताम्बूलमस्मै प्रददे नरेन्द्रकन्या मनोरागमिव स्वकीयम् ॥१३८॥
शरीरचिन्ताकपटेन धीमान् वासालयादेष विनिर्जगाम ।
आदाय पश्चापि तुरङ्गमांस्तान् क्रमात् पुरीमुज्जयिनीं जगाम ॥१३९॥
यत्रान्धकोऽसौ धृतराष्ट्र एव पङ्गुः प्रतीतोऽरुण एव कामम् ।
मनुष्यधर्मा स परं कुबेरः काणः पुनर्भार्गव एक एव ॥१४०॥
(युग्मम्)

समागतं तं पितरौ समीक्ष्य प्रमोदमासेदतुरञ्जसापि ।
गाढं समालिङ्ग्य चुचुम्बतुस्तच्छिरोऽम्बुजं षट्पददम्पतीव ॥१४१॥
महामहं जन्मदिने तदीयं यं चक्रतुस्तौ सुतरां प्रहृष्टौ ।
तस्यागमे तं विहितावशिष्टमिवादधाते स्म ततोऽप्यनल्पम् ॥१४२॥
वृत्तं यथावृत्तमथ स्वकीयं निवेद्य पित्रोः प्रतिपत्तिपूर्वम् ।
अनीनहत्तानपि पञ्चवाहान् हर्म्ये विनिर्माय स वाजिशालाम् ॥१४३॥
विद्याविहीनस्य नरस्य पुंस्त्वं तिर्यक्त्वमेव प्रकटीकरोति ।

इति स्वचित्ते प्रतिपद्य विद्याभ्यासाय यत्नं स दृढीचकार ॥१४४॥
वाग्वैभवं केवलमेव तज्ज्ञाः पुंस्त्वे निदानं परमामनन्ति ।
साध्यस्य सिद्धिं हि विधित्सतादौ तत्साधनं साधनमेव साध्यम् ॥१४५॥
अध्यापकस्याखिलवेदविद्यार्श्वरोदसामीप्यमवाप्य तूर्णम् ।
ततः स पीताब्धिरिव प्रकृत्या विद्यामृतं तच्चुलुकीचकार ॥१४६॥
अथावनीवासवनन्दनी सा त्रैलोक्यसुन्दर्यपि सुप्रबुद्धा ।
पार्श्वे शयानं सचिवस्य पुत्रं विलोक्य वैलक्ष्यविलक्षणाऽऽस्या ॥१४७॥
अपास्य तं दुष्टरुजाभिभूतं भूतार्त्तवद्वासगृहान्निरीय ।
दासीव दासीजनसन्निधाने निशां कथञ्चिद् गमयाम्बभूव ॥१४८॥
(युग्मम्)
सेवागतो मन्त्र्यपि भूमिपालं व्यजिज्ञपद्विक्षतमः प्रभाते ।
तादृक् सुरूपोऽपि सुतोऽभवन्मे त्वदङ्गजासङ्गवशेन रुग्णः ॥१४९॥
तत् कं प्रतीकारमहं प्रकुर्वे कस्याग्रतो वच्म्यसमाधिमेतम् ।
श्रुत्वेति देवीमनुजेश्वराभ्यां निवारिता दृष्टिपथात् क्रुधा सा ॥१५०॥
राजन्यसिंहं निजगाद सिंहं विज्ञापनार्थं जनकस्य राज्ञः ।
क्रुद्धस्य नेतुः पुरतः सुतेन गन्तुं न शक्यं सुतया न चापि ॥१५१॥
सिंहस्य विज्ञापनयैव राज्ञाऽऽहूता सुता व्यज्ञपयत् स्ववाचा ।
पुंवेषमाश्रित्य तवाज्ञयेत्यावन्तीं च जामातरमानयामि ॥१५२॥
आकस्मिकी कुष्ठरुजा शरीरे ज्वरादिवन्नैव भवेन्नराणाम् ।
शापेन कस्यापि मुनेर्यदि स्यात्तथापि पूतिव्रणसंश्रितानाम् ॥१५३॥
दुर्वृत्तमेतत्सचिवस्य सर्वं कियच्चिरं स्थास्यति संवृतं वा ।
अन्तर्दधाने न हि पुण्यपापे सुगन्धदुर्गन्धवदावृते च ॥१५४॥
पुण्यैर्ममायं घटितश्चिरन्नैस्तेषां द्विपत्त्वं सहसा कथं स्यात् ?।
दिगीशवृन्दांशभवः प्रभुर्वा स्वयं विचारं कुरुतां विचारम् ॥१५५॥
नरेन्द्र ! तन्मां विसृज प्रसादं सृज त्वजाकारणकोपमेतम् ।
पश्चादपि क्रोधफलं मयि त्वं प्रभो ! न किं दर्शयितुं प्रभुः स्याः? ॥१५६॥
आज्ञापितस्तत्क्षणमेव राज्ञा प्रदाय शिक्षां द्रविणं चमूं च ।
प्रत्यर्थिदन्तावलभेदसिंहस्तया समं प्रार्थित सोऽपि सिंहः ॥१५७॥
समुत्सुकं तन्मन एव पूर्वं सिंहस्ततः क्षोणिभुजा प्रणुन्नः ।

ततोऽपि कामः प्रगुणीकृतेपुस्ततो वरं सा लभतां न किं स्म ? ॥१५८॥
वीरैरनेकैरनुगम्यमानां प्रशाप्य तां भूमिपतिर्गभीरः ।
कारीपसंछन्नकृशानुवच ·प्रच्छन्नकोपः सचिवाघमेऽस्थात् ॥१५९॥
केनापि नालक्षि पथि प्रयान्ती स्त्रीत्वेन सा नृनपि वार्तयन्ती ।
नृपेण दत्तं खलु धारयन्ती पुंवेपमक्षाण्युपवासयन्ती ॥ १६० ॥
समेति सूनुः सुरसुन्दरस्य त्यागी गुणी क्षोणिपुरन्दरस्य ।
इति श्रुतिग्राहितया जनौघा लात्वोपदां द्रष्टुमुपागमंस्ताम् ॥१६१॥
अवन्तिदेशाधिपतिर्नरेन्द्रः पञ्चालदेशाधिपतेः कुमारम् ।
समाव्रजन्तं विनिशम्य चारैरुपाचरत् संमुखमानदानैः ॥१६२॥
प्रदापिते मालववासवेनावासे नरेन्द्रस्य सुतः स तस्थौ ।
दौर्विध्यविच्छेदकराणि यच्छन् द्विजोत्तमानां द्रविणानि कामम् ॥१६३॥
सरोवरे वारिविसारिपानहेतोः प्रयातः पितृनामवर्णैः ।
अङ्काश्चितान् पश्चतुरङ्गमांस्तान्स एकदाऽपश्यददृश्यदोपान् ॥१६४॥
एते तुरङ्गाः प्रविशन्ति यत्र तत्सद्म सद्मप्रभुनाम मत्वा ।
भूतल्य मह्यं झटिति स्वभृत्यानित्यादिशत् सिंहमुखेन सोऽपि ॥१६५॥
तथाकृते तै. क्षितिपालसूनुर्वितत्य सिंहेन समं विचारम् ।
निमन्त्रयामास समं समग्रैश्छात्रैरुपाध्यायमधीयमानैः ॥१६६॥
समागतं तं समवेक्ष्य सोऽपि च्छात्रेषु सर्वेष्वपि भासमानम् ।
नरेन्द्रपुत्रः परमं प्रमोदं योगीव लेभे प्रतिभासमानम् ॥१६७॥
वणिक्कुमारोऽपि कुमारधामा कुमारमालोक्य विसिष्मिये तम् ।
इयं किमाकल्पविपर्ययेण प्रिया मदीया समुपागता सा ॥१६८॥
भोज्यैर्विचित्रैर्वसनैरनेकैरमानयच्छात्रजनं समस्तम् ।
यं मङ्गलेऽसौ विदधे विशेषं तेनैव जज्ञे स च साभ्यसूयः ॥१६९॥
तांस्तीर्थयात्रोपगतानिवाऽयं संमान्य सर्वानपि भापते स्म ।
आख्यानिकां कोऽपि भवत्सु मेऽग्रे निजानुभूतां सरसां ब्रवीतु ॥१७०॥
विज्ञप्तिमाकर्ण्य नृपाङ्गजस्य गुरुर्जगौ तान् प्रति जल्पतेति ।
ते साभ्यसूया जगदुः स एव वक्ता कथां यत्र कृतो विशेषः ॥१७१॥
अथ स्वयं मङ्गलकुम्भ एतां बुद्ध्या विबुध्यात्मवधूमधूतः ।
विवाहमुख्यं सकलं स्ववृत्तं सिद्धादिकानां पुरतो बभाण ॥१७२॥

गृहीत गृहीत जवेन चैनमित्युद्धतं जल्पति राजपुत्रे ।
छात्रैः समं पण्डित एव नष्टः स काकनाशं कलितात्मभीतिः ॥१७३॥
भद्रासनेऽमुं विनिवेश्य सान्द्रभद्रार्थिनी राजसुताह सा स्म ।
त्वया कथं नाथ ! तदा विमुक्ता मुक्ताऽमहारा ननु मन्दभाग्या ॥१७४॥
विना त्वया नाथ ! यदन्वभूवं दुःखं प्रवक्तुं न तदास्मि शक्ता ।
द्विजिह्वतादोषपरिष्कृतः स प्रवक्तु किं नाम सहस्रजिह्वः ? ॥१७५॥
इति स्वदुःखप्रतिपत्तिपूर्वं स्वाभाविकं वेषमियं प्रपद्य ।
प्रत्यर्प्य सैन्यैः सह तं नृवेषं संमान्य सिंहं व्यसृजद् गृहाय ॥१७६॥
पित्रोः पदद्वन्द्वमनुक्रमेण प्राणीनमत्तामुपदान्वितां सः ।
इयं वधूर्वो नमतीति जल्पन् भक्त्योपगूढः स्वयमप्यनंसीत् ॥१७७॥
वधूं समालोक्य विधूतदोषां श्वश्रूः परं तोषमवाप साऽपि ।
योग्यास्य जाया भवितेति चिन्ता तदैव तस्या हृदयं मुमोच ॥१७८॥
श्वश्रूं समीक्ष्य श्वशुरं च लक्ष्मीं निकेतनं चापि परिच्छदं च ।
कृतार्थयामास वधूः स्वमेषा स्वभाग्यसंरम्भविवर्णनेन ॥१७९॥
सिंहोऽपि गत्वा त्वरितं नृपाय प्रत्यर्पयामास स तं नृवेषम् ।
निशम्य तस्या वरलाभवृत्तं मुदान्वितस्तं प्रशशंस भूपः ॥१८०॥
त्वमेव सिंहारिखिलवैरिसिंहः परोपकारप्रवणस्त्वमेव ।
इति प्रशस्याङ्गविभूषणानि वासांसि चास्मै नृपतिर्व्यतारीत् ॥१८१॥
अवाप्य चम्पाधिपतेर्निदेशं निवेद्य तं मालववासवस्य ।
स मङ्गलश्रम्पकपुष्पगौरश्रम्पां परीवारयुतः समागात् ॥१८२॥
प्रवेशितामुत्सवपूर्वमेतां समं प्रियेणोपगतां स पुत्रीम् ।
निरीक्ष्य राजा सचिवस्य तस्य दुश्चेष्टितं सत्यममंस्त सर्वम् ॥१८३॥
सर्वस्वमादाय नरेश्वरस्तं समादिशद्वध्यमवन्ध्यकोपः ।
कुम्भस्तदाकर्ण्य तदैव गत्वा विज्ञप्य राजानममोचयत्तम् ॥१८४॥
विमोचितस्तेन दयालुनासौ विसर्जितोऽगाद् द्रुतमन्यदेशम् ।
कस्यापि कुत्रापि कदाचनापि कुकर्म निर्माय न शर्मलाभः ॥१८५॥
स यौवराज्ये नृपतेः प्रसत्त्याद्रम्भा सुखं वैषयिकं बभाज ।
तया समं पौरजनोपगीतां विस्तारयन् कीर्तिमिहेन्दुशुभ्राम् ॥१८६॥
अथावनीशं वनपालकोऽपि द्रुतं समागत्य समाजभाजम् ।

व्यजिज्ञपच्चारु मनोरमाख्ये वने यशोभद्रगुरुं समेतम् ॥१८७॥
वितीर्य तस्मै परितुष्टिदानं गुरुं प्रणन्तुं निरगान्नरेन्द्रः ।
तत्त्वोपदेशं विनिशम्य राज्ये जामातरं न्यस्य ललौ स दीक्षाम्॥१८८॥
राज्यं समासाद्य तथा कथञ्चित् स पालयामास नृपः प्रजास्ताः ।
यथा कदाचित् सुरसुन्दरस्य क्ष्मापस्य नास्मार्षुरपेतबाधाः ॥१८९॥
त्रिवर्गमाराधयतो नृपस्य श्रीमङ्गलस्य श्रितमङ्गलस्य ।
नीत्या प्रजा रञ्जयतः प्रभूताः सम्वत्सरा जग्मुरमेयशक्तेः ॥१९०॥
अथान्यदा श्रीजयसिंहसूरिं प्रणम्य विज्ञानिनमन्वयुङ्क्त ।
कृताञ्जलिः प्राग्भवमात्मनोऽपि देव्यास्तथा मङ्गलकुम्भभूपः ॥१९१॥
जगाद सूरिर्द्विजराजनिर्यत्कान्तिप्रतिक्षिप्ततमःप्रचारः ।
अस्ति प्रशस्तं क्षितिसंभृतश्रीप्रतिष्ठितं नाम पुरं गरीयः ॥१९२॥
तत्रर्जुरूपः कुलपुत्रकोक्त्या ख्यातोऽपि नाम्नाऽजनि सोमचन्द्रः ।
कुटुम्बिनी चास्य विशुद्धशीला श्रीदेव्यभिख्या प्रथिता बभूव ॥१९३॥
सुहृत्तदीयो जिनदत्तनामा श्रद्धाधनः श्राद्धकुलावतंसः ।
देशान्तरं यत्स्वधनानि तस्मै समर्पयामास विसर्जनाय ॥१९४॥
तस्मिन्नवाप्ते विषयेऽपरास्मिन् प्रयच्छतः स्वच्छतया धनानि ।
विश्राणनेऽजस्रमहिंस्रवृत्तेः श्रद्धा विशुद्धाऽस्य समुल्ललास ॥१९५॥
तस्य प्रियाया अपि दानधर्मे शर्मैकहेतौ मतिरुज्जजृम्भे ।
प्रियस्य वृत्तानुगुणेन नार्यः प्रवर्तयन्ति व्यवहारमेताः ॥१९६॥
नयार्जितं स्वं कुलपुत्रकेण स्वं पात्रसात्तेन कृतं समग्रम् ।
अखण्डितं सौख्यमपेक्षमाणाः किं किं न कुर्वन्ति महाऽनुभावाः ? ॥
स्वदोषदुष्टं समवेक्ष्य भद्रा सखीपतिं सा कुलपुत्रपत्नी ।
हास्याज्जगौ तां प्रति विप्रियं ते किमङ्ग ! माहात्म्यमिदं सखि ! स्यात् ॥
येनायमीदृक् समभूत्प्रियस्ते समुल्लसत्सूरणकन्दरूपः ।
तस्या वचस्तद्विनिशम्य भद्रा भद्राऽपि सन्तापमधत्त बाढम् ॥१९९॥
तया गिरा तां व्यथितां विभाव्य सौम्येन्दुपत्नी क्षमयाम्बभूव ।
खेदं वृथा त्वं हृदि मा कृथा यत्तनोति जन्तोर्निखिलं स्वकर्म ॥२००॥
अथ स्वमायुः परिपूर्य मृत्वा यातौ युवां तौ क्रमतोऽनुरूपौ ।
अवक्रयेणोपयमस्तवायं परार्थदानेन बभूव भूप ! ॥ २०१ ॥

सख्याश्च दोषप्रतिपादनेन जज्ञे कलङ्को भवतः प्रियायाः ।
ईदृग्वचस्तस्य निशम्य सूरेस्तयोरभूत् प्राग्भवसंस्मृतिश्च ॥२०२॥
स जातजातिस्मृतिरात्मपत्न्या समं समुत्थाय गुरून् विनम्य ।
आह स्म यावत् समुपैमि गत्वा तावद्भवद्भिः स्थितिरत्र कार्या ॥२०३॥
नैव प्रमादं नृपते ! विदध्या इतीरितेऽसौ गुरुभिः ससार ।
निवेश्य राज्ये तनयं विनीतं वैराग्यरङ्गात्त्वरसाऽऽससार ॥२०४॥
पार्श्वे गुरूणां गरिमाचलानां दक्षः स दीक्षां विधिवत् प्रपेदे ।
त्रैलोक्यसुन्दर्यपि कुर्वतीव पतिव्रताभावमियं यथार्थम् ॥२०५॥
क्षमां स्थिरामाश्रयतो नृपस्य तथास्य राज्येन बभूव शर्म ।
चारित्रलक्ष्मीं प्रतिपद्य हृद्यां कषायकालुष्यजयाद्यथैव ॥२०६॥
तपांसि तप्त्वा स सुदुस्तपानि निर्माय कन्दर्पमदर्पकं च ।
विहृत्य पृथ्वीं च मुनिस्तयामा स्वर्लोकलक्ष्मीमुररीचकार ॥२०७॥
इत्थं चरित्रं मुनिमङ्गलस्योपदिश्य वाचं विससर्ज सोऽर्हन् ।
संसारसम्भूतमहाधिदुःखप्रस्थानभम्भानिनदानुकाराम् ॥२०८॥
अथाहमर्हन्तमपृच्छमेतं विद्याधराणां कथमाधिपत्यम् ?।
ममाऽघटिष्ट प्रतिपत्पाटिष्ठ ! प्रकाशयेदं प्रणतानुकम्प्र ! ॥२०९॥
जिनोऽवदत् पश्चिमपुष्करार्द्धे सीतोदिकाऽस्ति प्रतता स्रवन्ती ।
कूलेऽनुकूले सलिलावतीति ख्यातोऽस्ति तस्या विजयः समृद्धः ॥२१०॥
द्वेधापि तस्मिन्नपि वीतशोका पुरी परीता पुरुषोत्तमौघैः ।
निषेवते यां परिचारिकेव लक्ष्मीरनन्ताश्रयवाञ्छयेव ॥२११॥
रत्नध्वजस्तत्र बभूव चक्री यस्य प्रतापेन विनिर्जितोऽसौ ।
वार्द्धौ ववाप्य प्रतिपक्षशङ्कां झम्पां ददौ वाडवजातवेदाः ॥२१२॥
तथा न वक्षः प्रतिपक्षभेत्तुर्व्यभूषि वक्षः कनकश्रियाऽस्य ।
सौभाग्यलक्ष्मीरसराजधान्या राज्या यथा तत्कनकश्रियैव ॥२१३॥
दया यथा मानस एव राज्ञस्तस्य न्यवात्सीन्नयवत्सलस्य ।
तथैव हेमच्छविहेममालिन्याख्याऽद्वितीया महिषी द्वितीया ॥२१४॥
ताभ्यामुभाभ्यामधिकं प्रियाभ्यां विभ्राजमानः स कलाधिनाथः ।
प्रकाशयामासतरां सदाशा ज्योत्स्नाकलाभ्यामिव शीतधामा ॥२१५॥
स्वप्नेऽन्यदोत्सङ्गगतं नृपस्य कान्ता लतायुग्ममवैक्षताद्या ।

अर्हम्

अथ पञ्चमः सर्गः ।

यन्नाममात्रश्रवणान्नराणामेनांसि नाशं झगिति श्रयन्ते ।
संविन्मणीरोहणरोहणाद्रिः श्रीशान्तिनाथः स शुभाय वोऽस्तु ॥ १ ॥
अन्तर्णिपत्येन्दुकराभिरामः क्षेत्रं द्विधा यो भरतं चकार ।
विद्याधराणां भवनानि यस्मिन् वैताढ्यनामा स धराधरोऽस्ति ॥ २ ॥
तस्मिन् पुरं श्रीरथनूपुराद्यास्ते चक्रवालाभिधमुच्चवप्रम् ।
श्रेणेर्विभूयाकृतिदक्षिणस्या वर्ष्मेव माहेश्वरमिद्धभूति ॥ ३ ॥
क्ष्मापो जटी तज्ज्वलनाविताभः प्रत्यर्थिकान्तारतिरोहितश्रीः ।
काष्ठान्तरावेशविगाह्मानो विद्याधरेन्द्रोऽन्वशिषद्बलीयान् ॥ ४ ॥
पत्नी तदीयाजनि वायुवेगा यल्लोचनानां सुषमामवेक्ष्य ।
आसन् कुरङ्गा हरिणाः प्रसिद्धा सा शब्दशास्त्रेष्वधुनापि संज्ञा ॥ ५ ॥
सूनुस्तदीयोऽभवदर्ककीर्त्तिर्द्धाम्नार्करूपः शरदिन्दुकीर्तिः ।
यो यौवराज्यं जनकोपनीतं लीलापरः पालितवानशङ्कः ॥ ६ ॥
श्रीपोतनेशः प्रथमो हरिस्तां शस्तामुदूहेऽवयवैस्त्रिपृष्ठः ।
अस्यानुजासीत् स्वयमादिभूता ख्याता प्रभाख्या रतिरम्यरूपा ॥ ७ ॥
विश्राणयामास स च प्रसादप्रासादचित्तः श्वशुराय तस्मै ।
श्रेण्योर्द्वयोरप्यसमानलक्ष्म्यो राज्यं विरज्यन्निव राजकान्तिः ॥ ८ ॥
श्रीअर्ककीर्त्तिर्दयिताजनिष्ट मालाभिधा मेघवनस्य पुत्री ।
विद्याधरेन्द्रस्य यदीयनाम्नि ज्योतिःपदं पूर्वमभूदपूर्वम् ॥ ९ ॥
पल्यङ्कपर्यङ्कमधिश्रिता सा किञ्चित् प्रबुद्धा वदनारविन्दे ।
आलोकयामास विशन्तमर्कं ध्वान्तप्रचाराच्छिदुरं कदाचित् ॥ १० ॥
स्वप्नं समाकर्ण्य हृदीश्वरेण प्रोक्तं फलं सा प्रतिपद्यमाना ।
श्रीषेणजीवेन भवे चतुर्थे च्युत्वाऽऽद्यकल्पादथ संश्रितारम् ॥ ११ ॥
जातस्य पुत्रस्य शुभे मुहूर्ते जन्मोत्सवं ऋद्ध्युचितं विधाय ।
स्वप्नानुसाराद्विदधे पितृभ्यामाख्या यथार्थाऽमिततेजसेति ॥ १२ ॥
राज्येऽर्ककीर्तिं विनिवेश्य पुत्रं विद्याधरेन्द्रज्वलनो विरक्तः ।

जग्राह दीक्षामभिनन्दनस्य पार्श्वे जगन्नन्दनसंश्रितस्य ॥ १३ ॥
जीवः पुनः सत्यकिकन्यकायाः सौधर्मकल्पाच्च्यवनोपपत्त्या।
विद्याभृतो मेघवनस्य पुत्र्याः पुत्रीत्वमापत्सुकृतानुभावात् ॥ १४ ॥
स्वप्ने सुतारां रजनीं निदध्यौ गर्भे श्रितायां जननी यदस्याम्।
आख्या पितृभ्यां द्युतिभासितायाश्चक्रे सुतारेति ततः सुतायाः ॥ १५ ॥
श्रीषेणपत्न्या अभिनन्दितायाः प्रच्युत्य जीवस्तत एव नाकात्।
जज्ञे त्रिपृष्ठस्य हरेर्महिष्याः सूनुः प्रसूनायुधरूपमूर्तिः ॥ १६ ॥
गर्भस्थितेऽस्मिन्नपि साभिषेका स्वप्नेऽन्वया श्रीः समवेक्षि यच्च।
तेनैष पित्राऽप्यभिधीयते स्म नाम्ना सुतः श्रीविजयः स्वकीयः ॥ १७ ॥
तस्यानुजोऽभूद्विजयादिभद्रो भद्राकृतिर्ध्वस्तसमस्ततन्द्रः।
ज्योतिःप्रभाख्या शिखिनन्दिताया जीवस्तथाजन्यऽनुजा तदीया ॥१८॥
विप्रश्रुवः सोऽपि च सत्यभामापत्नीवियोगात् कपिलस्तदार्तः।
मृत्वा भ्रमित्वा सुचिरं भवौघं चञ्चानगर्यां चमराञ्चितायाम् ॥ १९ ॥
विद्याधरेन्द्रोऽशनिघोषनामा द्वेषिक्ष्मापालमहीन्द्रपक्षान्।
भिन्दन् समग्रानशनीयमानः स्वौजोभिरासीदसमानभावः ॥ २० ॥
(युग्मम्)

भूपार्ककीर्तेस्तनयामुदूहे प्राज्योत्सवैः श्रीविजयः सुताराम्।
श्रीमान्त्रिपृष्ठप्रभवा प्रभाढ्या ज्योतिःप्रभाख्याऽमिततेजसा च ॥ २१ ॥
क्ष्मापार्ककीर्तेर्नगरे कदाचित्तातो व्रती स्वैर्गुरुभिः सहैव।
अभ्यागमद् व्योमविहारकारी संहारकारी जनपातकस्य ॥ २२ ॥
गत्वाऽर्ककीर्तिः प्रणिपत्य भक्त्या सर्वान् विशालाख्यवनस्थितांस्तान्।
सद्देशनां गुर्वभिनन्दनस्य शुश्राव स श्रावकवज्रेन्द्रः ॥ २३ ॥
आलोक्यते शर्म न भूमिलोके नामैव तस्यापि यथा सुधायाः।
तद्वाभमिन्छुर्यदि तर्हि जैनीं दीक्षां समादत्स्व विशेषवेदिन् ! ॥२४॥
वाचंयमानामधिपस्य वाचं तस्यैवमाकर्ण्य स मानवेन्द्रः।
राज्ये निवेश्याऽमिततेजसं तं पुत्रं प्रपेदे पदवीं मुनीनाम् ॥ २५ ॥
शौरिस्त्रिपृष्ठस्य मृतेरितश्च शोकप्लुतान्तःकरणोऽचलोऽपि।
नीलाम्बरः प्रव्रजति स्म राज्ये दर्पोद्धतं श्रीविजयं निवेद्य ॥ २६ ॥
सिंहासनं पित्र्यमधिष्ठितौ तौ विभ्रेजतुर्विक्रमसंभृतांसौ।

पद्माश्रयां पद्मलतां द्वितीया तथा व्यलोकिष्ट निजाङ्कभाजम् ॥२१६॥
स्वप्नानुसारेण च बभ्रतुस्ते गर्भानदभ्रद्युतिपेशलाङ्ग्यौ ।
आद्या प्रसूते स्म सुते क्रमेण सुवर्णपद्मादिलतोत्तराख्ये ॥२१७॥
सा हेममालिन्यपि हेमगौरी पद्माभिधानां तनयामसूत ।
ताः पाल्यमाना अपि लाल्यमानास्तिस्रः पितृभ्यामपि वृद्धिमापुः ॥२१८॥
अधीतशास्त्रार्थविबोधभाजस्तिस्रोऽपि ता गुप्तिवदप्रमत्ताः ।
प्रवर्तिनीं नो मुमुचुः कदाचिन्नमद्रसेनाजितसेनिकाह्वाम् ॥२१९॥
पद्मेव पद्मा सुभगान्यदातिनिर्वेदपात्रीकृतबुद्धिधारा ।
तस्याः समीपे व्रतमादिताऽसौ कदाचन व्यज्ञपयन्मुदा ताम् ॥२२०॥
षष्ठिश्चतुर्थानि भवन्ति यस्मिन् द्वे च त्रिरात्रे तदहं तपोऽद्धा ।
कुर्वेतरां कर्म चतुर्थसंज्ञं सा तन्मता तद्विदधे स्वतुष्ट्या ॥२२१॥
सैवान्यदोद्दिश्य शरीरचिन्तां पथि प्रयान्ती यतिनी पराद्ध्यां ।
द्वौ राजपुत्रौ युधमादधानौ वाराङ्गनानङ्गलतानिमित्तम् ॥२२२॥
उद्गूर्णशस्त्रौ सरसौ समानौ तत्सङ्गसम्प्राप्तिनिदानमेषा ।
समीक्ष्य विश्वाप्रतिरूपरूपौ व्यामोहमूढाऽरचयन्निदानम् ॥२२३॥
(युग्मम्)

प्रान्तेऽथ नालोच्य दुरीहितं तद्बलव्यपायेऽनशनेन मृत्वा ।
सौधर्मकल्पेऽजनि देवतासौ कल्पद्रुसंपूर्ण्यमनोविकल्पा ॥२२४॥

रत्नध्वजस्य महिषी महिता गुणौघै-
धर्मे वितत्य विततं प्रथमा विपन्ना ।
विद्याभृतामधिपतिर्मणिकुण्डली त्वं
जातो भुजाबलविनिर्जितकुण्डलीशः ॥२२५॥
ते चक्रिजे कनकपद्मलते भ्रमित्वा
गर्भाशयप्रभवदुःखचितं भवं च ।
दानादिधर्ममुरुशर्मकरं निषेव्य
श्रीषेणभूपरिवृढस्य सुतावभूताम् ॥ २२६ ॥
आयुः पल्योपमपरिमितं पूरयित्वाद्यकल्पा-
त्पद्मा च्युत्वा सपदि गणिकानन्तमत्याह्वयाऽभूत् ।
श्रीषेणक्ष्मापरिवृढसुतौ साम्प्रतं तन्निमित्तं

युध्येते तौ स्मरपरवशौ विन्दुषेणेन्दुषेणौ ॥२२७॥
पीत्वा तीर्थकराननादिति वचःपीयूषमत्रागमं
प्राच्यप्रेमवशान्निवारयितुमन्यायं युवानौ युवाम् ।
माता पूर्वभवेऽभवं तु भवतोर्वाराङ्गनेयं स्वसा
तद्भद्रौ ! सुकुलीनयोः पशुजनाचारो न वां युज्यते ॥२२८॥
देवः कदाचन कदाचन नारकोऽपि
राजा कदाचन कदाचन रङ्क एषः ।
कीटः कदाचन कदाचन मानुषोऽपि
लक्ष्यो भवी न नटवत्परिवर्तमानः ॥ २२९ ॥
तदुदितमिति सर्वं विन्दुषेणेन्दुषेणौ
श्रवणपथमवाप्य प्रीतिपूर्वं विबुद्धौ ।
प्रणिजगदतुरेवं प्राप्तहर्षप्रकर्षौ
निरुपचरितमावां बोधयेत्त्वां विना कः ? ॥२३०॥
वचनरचना स्नेहाक्ता तेऽविनश्वरदीपिका
हृदयभवनं कर्णद्वारा न नौ प्रविशेद्यदि ।
प्रसृमरमिदं पापध्वान्तं निरस्य तदा कथं
शिवपथमहो ! जानीयाव प्रयत्नशतैरपि ॥ २३१ ॥
विद्याभृन्माणिकुण्डली सविनयं ताभ्यां विसृष्टस्ततः
शस्त्राशस्त्रिकथामपास्य सहसा कल्याणमालावृतौ ।
प्रव्रज्यां प्रतिपद्य तौ नृपसुतैः सार्द्धं सहस्रैश्चतुः–
संख्यैः कर्मबलं विभिद्य तपसा कैवल्यमासेदतुः ॥२३२॥
आसीत्श्रीगुरुगच्छमौलिमुकुटश्रीमानभद्रप्रभोः
पट्टे श्रीगुणभद्रसूरिसुगुरुश्चारित्रभाजां गुरुः ।
तच्छिष्येण कृतेऽत्र षोडशजिनाधीशस्य वृत्ते महा–
काव्ये श्रीमुनिभद्रसूरिकविना सर्गश्चतुर्थोऽगमत् ॥२३३॥

॥ इति श्रीशान्तिनाथचरिते चतुर्थः सर्गः ॥

अर्हम्

अथ पञ्चमः सर्गः ।

यन्नाममात्रश्रवणान्नराणामेनांसि नाशं झगिति श्रयन्ते ।
संविन्मणीरोहणरोहणाद्रिः श्रीशान्तिनाथः स शुभाय वोऽस्तु ॥ १ ॥
अन्तार्णिपत्येन्दुकराभिरामः क्षेत्रं द्विधा यो भरतं चकार ।
विद्याधराणां भवनानि यस्मिन् वैताढ्यनामा स धराधरोऽस्ति ॥ २ ॥
तस्मिन् पुरं श्रीरथनूपुराद्यास्ते चक्रवालाभिधमुच्चवप्रम् ।
श्रेणेर्विभूषाकृतिदक्षिणस्या वर्ष्मेव माहेश्वरमिद्धभूति ॥ ३ ॥
क्ष्मापो जटी तज्ज्वलनाचिताभः प्रत्यर्थिकान्तारतिरोहितश्रीः ।
काष्ठान्तरावेशविगाहमानो विद्याधरेन्द्रोऽन्वशिषद्वलीयान् ॥ ४ ॥
पत्नी तदीयाजनि वायुवेगा यल्लोचनानां सुषमामवेक्ष्य ।
आसन् कुरङ्गा हरिणाः प्रसिद्धा सा शब्दशास्त्रेष्वधुनापि संज्ञा ॥ ५ ॥
सूनुस्तदीयोऽभवदर्ककीर्त्तिर्द्धाम्नार्करूपः शरदिन्दुकीर्तिः ।
यो यौवराज्यं जनकोपनीतं लीलापरः पालितवानशङ्कः ॥ ६ ॥
श्रीपोतनेशः प्रथमो हरिस्तां शस्तामुदूहेऽवयवैस्त्रिपृष्टः ।
अस्यानुजासीत् स्वयमादिभूता ख्याता प्रभाख्या रतिरम्यरूपा ॥ ७ ॥
विश्राणयामास स च प्रसादप्रासादचित्तः श्वशुराय तस्मै ।
श्रेण्योर्द्वयोरप्यसमानलक्ष्म्यो राज्यं विरज्यन्निव राजकान्तिः ॥ ८ ॥
श्रीअर्ककीर्त्तिर्दयिताजनिष्ट मालाभिधा मेघवनस्य पुत्री ।
विद्याधरेन्द्रस्य यदीयनाम्नि ज्योतिःपदं पूर्वमभूदपूर्वम् ॥ ९ ॥
पल्यङ्कपर्यङ्कमधिश्रिता सा किञ्चित् प्रबुद्धा वदनारविन्दे ।
आलोकयामास विशन्तमर्कं ध्वान्तप्रचारच्छिदुरं कदाचित् ॥ १० ॥
स्वप्नं समाकर्ण्य हृदीश्वरेण प्रोक्तं फलं सा प्रतिपद्यमाना ।
श्रीषेणजीवेन भवे चतुर्थे च्युत्वाऽऽद्यकल्पादथ संश्रितारम् ॥ ११ ॥
जातस्य पुत्रस्य शुभे मुहूर्ते जन्मोत्सवं ऋद्ध्युचितं विधाय ।
स्वप्नानुसाराद्विदधे पितृभ्यामाख्या यथार्थाऽमिततेजसेति ॥ १२ ॥
राज्येऽर्ककीर्ति विनिवेश्य पुत्रं विद्याधरेन्द्रज्वलनो विरक्तः ।

कैलासशैलस्य विशालशृङ्ग पञ्चास्यशावाविव मानवासौ ॥ २७ ॥
राजार्ककीर्त्ति पुरमेकदा चागात् पोतन जामिदिदृक्षयोत्क ।
प्रत्यट्टमूर्द्धीकृतवैजयन्तीलक्ष्य महामञ्चविपञ्चित च ॥ २८ ॥
आम्रच्छदैरुद्ग्रथितैर्निबद्धस्फारीभवद्वन्दनमालिक च ।
पारे प्रमोदाकुलितैरनेकैराधीयमानोत्सवमादरेण ॥ २९ ॥
आनन्दसम्फुल्लविलोचनश्रीर्दृग्गोचरीकृत्य विसिस्मिये तत् ।
किं स्वर्गत स्वर्गपुर समागादत्यद्भुतश्रीभिरिति श्रितोह ? ॥ ३० ॥

॥ त्रिभिर्विशेषकम् ॥

एत समायान्तमपेतदोष भूमीपति श्रीविजयोऽभ्युदस्थात् ।
अन्योन्यमाश्लिष्य निषेदतुस्तावेकासने प्रेम निदर्शयन्तौ ॥ ३१ ॥
ऊचेऽर्ककीर्तिप्रभव क्षितीश स्मेरानन श्रीविजय प्रहृष्टम् ।
एतत्पुर ते क्रतुराजशक्रसौराज्यसम्बन्धादिन विनैव ॥ ३२ ॥
आमोदसङ्कीर्णमुदित्वराशुप्रोत्फुल्लपाथोरुहवत् किमीदृक् ? ।
सजातमावेदय तन्ममापि हेतु तदत्र प्रियमित्र ! चित्रम् ॥ ३३ ॥

(युग्मम्)

तस्योक्तमेतद्धृदये निधाय प्राह स्म स श्रीविजयोऽतिवाग्मी ।
अस्माद्दिनाद्दष्टमके दिनेऽत्र ज्योतिर्विदक समुपाजगाम ॥ ३४ ॥
आशी प्रदानैरभिनन्द्य मा स प्रत्तासनो वेत्रभृता निविष्ट ।
यत्कार्यमुद्दिश्य समागमस्त्व तन्मे द्विज ! ब्रूहि मयेति पृष्ट ॥ ३५ ॥
नैमित्तिकोऽजल्पदनल्पबोध क्षोणीसुनासीर ! निबोध तत्त्वम् ।
अस्मादृशा यद्यपि याचितेन वृत्तिर्विधात्रा परिकल्पिताऽस्ति ॥ ३६ ॥
त्वत्तस्तथाप्यर्थयितु न चागा किन्त्वागम दर्शयितु कला स्वा ।
युष्मादृशामग्रत एव धीरा क्षान्ति कलाना शमयन्ति यस्मात् ॥ ३७ ॥
ज्योतिर्विद सन्ति परस्सहस्रा येऽतीतमुद्भावयितु क्षमन्ते ।
येऽनागत किञ्चन सम्प्रदर्श्य कातूहल राजहृदा न तेऽत्र ॥ ३८ ॥
तत्किं विजानासि मयेति पृष्टे तेनोक्तमाकर्णय भूमिपाल ! ।
घस्रादित सप्तमकेऽपि घस्रे मध्याह्नकाले पतिताशनिर्द्राक् ॥ ३९ ॥
श्रीपोतनेशोपरि दैवयोगान्नैतद्वचो मे व्यभिचारि किञ्चित् ।
आकर्ण्य तत्कर्णसुदु श्रव मेऽमात्येन वैमत्यविसरथुलेन ॥ ४० ॥

आक्षिप्य नैमित्तिकमात्मनैव क्रोधान्धतामाश्रयता न्यगादि।
त्वन्मूर्ध्नि किं वा पतिता तदानीमाख्याहि मे पृच्छत एव तावत्?॥४१॥
(युग्मम्)
तद्वाचमन्तर्विनिवेश्य तेन प्रोचे मयि स्वर्णमणिव्रजानाम्।
वृष्टिः पतिष्यत्युदयं दिशन्ती भानोरिव ध्वान्तभरं हरन्ती॥४२॥
धैर्यं समालम्ब्य मया ततोऽपि स्वं धीसखं प्रत्युदितं यदस्मै।
न कुप्यतेऽमात्य! विशिष्टशास्त्रदृष्टार्थसार्थप्रतिपादकाय॥४३॥
दैवज्ञसंवेदनसम्प्रसिद्धमाम्नायमावेदय मे पुरः स्वम्।
इत्युक्तमात्रः स जगाद देव! रामः प्रवव्राज यदाचलोऽसौ॥४४॥
शाण्डिल्यनामापि पिताऽनु तं मे वं चाऽनु दीक्षामहमग्रहीषम्।
जज्ञौ निमित्तं तत एव सम्यक्कालत्रयावेदनजागरूकम्॥४५॥
यत्पद्मिनीखण्डविराजमानं श्रीपद्मिनीखण्डमिति प्रसिद्धम्।
अत्राजिपं तत्पुरमन्यदाऽहं कुर्वन् विहारं जनपापदाहम्॥४६॥
तस्मिन् मदीया जनकस्य जामिर्नाम्नाऽहिरण्यापि हिरण्यलोमा।
तत्पुत्रिका चम्पकपत्रगौरी चन्द्रानना चन्द्रयशोऽभिधाऽभूत्॥४७॥
आलोक्य तां मन्मथराजधानीं त्रैलोक्यसुभ्रूसुभगत्वमैत्रीम्।
कामेन लब्धाऽवसरेण वाणैरुच्चैर्जितैः पञ्चभिराहतोऽस्मि॥४८॥
अर्थीव मानं विजहावि लज्जां दूरीकरोतेव पिशाचकीव।
भिन्ते च चार्वाक इवात्मसिद्धिं कन्दर्पवाणैरभिताड्यमानः॥४९॥
दीक्षां प्रतिज्ञामिव हीनवाक्त्री सन्त्यज्य तां प्रार्थ्य कथञ्चनापि।
भव्ये मुहूर्ते परिणीय तत्राऽवात्सं प्रजावत्सल! निश्चलः सन्॥५०॥
इत्येवमाख्याय गृहीतमौने तस्मिन्नुपायं नृपरक्षणाय।
सञ्चिन्तयन् धीसख एक इत्याचख्यौ स्वबुद्धिप्रभवं सुमन्त्रम्॥५१॥
स्वाम्यम्बुधौ विप्लुतु यानपात्रं संश्रित्य तस्मिन् पतिताऽशनिर्न।
अन्योऽब्रवीत्तत्र निवारणीयो भ्रश्यन्नसौ केन विपश्चितापि?॥५२॥
वैताढ्यशैले प्रवरेऽत्र काले सौदामिनी नैव पतेत्ततस्त्र।
तत्कन्दरान्तःस्थितिमादधातु स्वामी समाधाय दिनानि सप्त॥५३॥
मन्त्री तृतीयो निजगाद मन्त्र्याख्योऽपि नैवं विशेषदृष्ट्या।
यद्भाविनो नैव विभङ्गहेतुः कर्मानुभावेन हि भावि सर्वम्॥५४॥

मन्त्रैरनेकैरपि जप्यमानैर्यन्त्रैरनेकैरपि यन्त्र्यमाणे ।
तन्त्रैरनेकैरपि तन्त्र्यमाणैर्नाभाव्यता भाव्यमुपैति किञ्चित् ॥ ५५ ॥
वार्त्तं तदेतन्नियत तथाहि क्षेत्रे पुर श्रीविजयाख्यमत्र ।
यस्याभ्रसौधेषु सुवर्णकुम्भच्छाय समास्कन्दति पूर्णचन्द्र ॥ ५६ ॥
तस्मिन्नवात्सीद्वसुधासुपर्वा पुण्याधिपर्वा किल रुद्रसोम ।
य पूजयामास महेश्वराणा वर्गं स किं नैव नवो द्विजेश ? ॥५७॥
कान्ता शिखाख्या ज्वलनादिरम्याऽऽसीत्तर्जयन्ती ज्वलन स्वकान्त्या ।
लावण्यमुद्दाममधिश्रयन्ती प्राणेशितुर्या मधुरा बभूव ॥५८॥
जज्ञे शिखी नाम तयोस्तनूज प्राप्त प्रणीतैरुपयाचितौघै ।
गार्हस्थ्यवृक्ष सफल पितृभ्याममन्यायि यस्मिन् परिवर्द्धमाने ॥ ५९ ॥
तत्रान्यदा कश्चन यातुधानो मानुष्यमासाऽदनलोलजिह्व ।
एत कुतश्चिन् स नरान्निहन्ति नित्य बहूनत्ति च तत्र किञ्चित् ॥ ६० ॥
श्रीसागराणा गुरुनागराणा विज्ञापनानन्तरमेव भूप ।
साम्ना तमाचष्ट निहंसि कस्माज्जन्तूननेकांस्तनुमासकार्ये ॥ ६१ ॥
स्थानस्थितस्यैव मयैव तत्त्व दत्त बुभुक्षापगमाय मर्त्यम् ।
आस्वादयैक सविधे समेत नित्य स्वय नृक्षय ! रक्षयाऽन्यान् ॥ ६२ ॥
अस्त्वेवमित्यादृतवाचि तस्मिन्नामानि सर्वाण्यपि लेखयित्वा ।
आरक्षकैराशु पुरौकसा राट् क्षिप्तानि नव्येषु करीरकेषु ॥ ६३ ॥
कन्या समाकर्षयदेकमेक प्रातर्विनिर्गच्छति यस्य पत्रम् ।
पत्र यमस्येव स तत्र तूर्णं प्रस्थाप्यते साध्वसकम्पमान ॥ ६४ ॥
(युग्मम्)
अन्येद्युराकर्षि करेण कन्या तस्यैव पत्र द्विजपुत्रकस्य ।
आरक्षकेण प्रहितास्तदानीं भृत्यास्तमादातुमतत्वरश्च ॥ ६५ ॥
तैर्नीयमान समवेक्ष्य पुत्र तारस्वर तज्जननी रुराद ।
सर्वे तदाऽऽसन्नगृहान्तरस्था भूता यथा तत्करुणा प्रपन्ना ॥ ६६ ॥
सामूचिरे ब्राह्मणि ! मा रुदस्त्व पुत्र पुरा ते वयमाहराम ।
आच्छिद्य तस्मात्त्वरित पलादात् सोऽपि स्थितिं नैव तथा बिभेत्ता ॥६७॥
आरक्षभृत्यास्तमथोपनिन्युर्यावत् स तैस्तत्पुर एव तावत् ।
हस्तार्पितस्तस्य जवात् सवित्र्यै क्षिप्तस्तया सोऽपि गिरेर्गुहायाम् ॥६८॥

तत्रोपितेनाजगरेण दैवाद् ग्राहीकृतः स द्विजदारकोऽपि ।
तद्वत्कचिद् भाव्यमभाव्यभावं नैव प्रयात्यन्यदपि त्रिलोक्याम् ॥६९॥
तस्मात् प्रचण्डाशनिपातघातकार्याय सज्जीक्रियतां तपोऽस्त्रम् ।
यद्भावशाणाश्रयणात् समस्तप्रत्यूहमुच्छेत्तुमलंभविष्णु ॥ ७० ॥
श्रुत्वेति तुर्यो वदति स्म मन्त्री ज्योतिर्विदाख्यायि तडिन्निपातः ।
श्रीपोतनेशस्य किलोपरिष्टाद्भावी न तु श्रीविजयस्य राज्ञः ॥ ७१ ॥
सप्ताहमन्यः क्रियतां तदस्य स्वामी पुरस्य प्रयतैर्भवद्भिः ।
प्रज्ञाप्रधानत्वममंस्त तस्यामात्यस्य हृष्टो गणकोऽथ शस्यम् ॥ ७२ ॥
तन्मन्त्रमाकर्ण्य मयापि चोक्तं यः स्थाप्यते राज्यपदे स्वरुच्या ।
तत्प्राणनाशं परिचिन्तयेत् कः कल्याणमिच्छन्निजजीवितस्य ? ॥७३॥
प्राणैः परस्यापि विनश्वरान् स्वान् प्राणानवेयं यदि वस्तुवृत्त्या ।
न स्यात् कदाचिन्मरणं ममापि मुक्तिं गतस्येव निरीहवृत्तेः ॥ ७४ ॥
प्रात्रादिपुर्मन्त्रविदां धुरीणास्तेऽथ क्षणं चेतसि चिन्तयित्वा ।
श्रेष्ठी निवेश्या प्रतिमैव राज्ये नो जीवघातोऽपि भवेत्तथा ते ॥ ७५ ॥
एतत्सदालोचितमञ्जसा वो मत्वानुमत्यायतनं जिनस्य ।
गत्वा कृतार्चः कृतपौषधश्च दर्भैर्विद्ब्धाऽऽस्तरणो न्यषीदम् ॥७६॥
राज्ये धनेशप्रतिमाभिषिक्ता तत्कालमेतैः सचिवैस्त्रिकालम् ।
आराध्यते स्म प्रभुनिर्विशेषं कुर्वन्ति किं नेशहितानुरक्ताः ?॥ ७७ ॥
पूर्वं हि धातोरुपसर्गभावो यद्यप्ययं व्याकरणे प्रणीतः ।
प्रादुर्भवेन्नैव तथापि पुंसामर्हन्नमस्कारमहाप्रभावात् ॥ ७८ ॥
सद्ध्यानकाष्ठामधितस्थुषो म प्राप्ते ततः सप्तमकेऽपि पस्त्रे ।
मध्याह्नकाले दिवि वारिवाहः कल्पान्तकालाब्दसुहृज्जगर्जे ॥ ७९ ॥
शम्पा तटत्काररवैस्तु काष्ठाः सम्पूरयन्ती निपपात यक्षे ।
अन्तःपुरीभिः प्रमदाद्विमुक्ता मुक्तादिवृष्टिर्गणके तु तस्मिन् ॥ ८० ॥
तत्पद्मिनीखण्डमिषाधिलक्ष्मीसंवासितं तोपवनात् प्रवाय ।
श्रीपद्मिनीखण्डपुरं म वित्तैर्दौविध्यमुच्छेद्य मया व्यसर्जि ॥ ८१ ॥
अर्चा कृता रत्नकरस्य नव्या भव्याशया रत्नमयी यदर्न्या ।
तेनैव पौराः परमप्रमोदात् कुर्वन्त्यगर्वं महमात्तगर्वम् ॥ ८२ ॥
इत्थं निशम्यासममर्च्यते स्म देवी सुतारामिततेजसापि ।

तत्रैव कश्चित् समयं समानं स्थित्वा ययौ स्वं स पुरं नरेन्द्रः ॥ ८३॥
ज्योतिर्वनं नाम वनं सुतारादेव्या समं श्रीविजयोऽन्यदाऽयम् ।
शच्या बिडौजा इव नन्दनाख्यं रन्तुं जगाम प्रमदाभिरामः ॥ ८४ ॥
तस्मिन् क्षणेऽसौ कपिलस्य जीवो विद्याधरेन्द्रोऽशनिघोषनामा ।
विद्यां प्रतारण्यभिधां प्रसाध्य व्योम्नापतन् विक्रमशालिबाहुः ॥८५॥
दृष्ट्वैव भर्तुः सविधे सुतारां प्राग्जन्मकान्तां कमनीयकान्तिम् ।
तां हर्तुमिच्छुः प्लवमानरूपं सारङ्गमेकं विचकार सारम् ॥ ८६ ॥
युग्मम्)

नीलाश्मसम्पादिततुङ्गशृङ्गभ्राजत्खुरं काञ्चनचारुवर्णम् ।
व्यालोक्य तं श्रीविजयस्य देवी साभ्यर्थयत् क्रीडनकेच्छयैव ॥ ८७ ॥
एतां विमुच्यावनिवासवोऽपि प्रख्यातशक्तिर्मृगमन्वधावत् ।
वीक्ष्यानुधावन्तममुं मृगोऽपि तस्येर्ष्ययाऽधावदिव त्वरावान् ॥ ८८ ॥
यश्चेतसाऽस्पर्शि न येन जातु नो पाणिपद्मे विधिनाप्यलेखि ।
भालेऽपि नो तं स कथं कुरङ्गं लातुं प्रयासं कुरुतां सरङ्गम् ? ॥८९॥
एतं चतुष्पादमहं द्विपादः प्राप्तुं कथं वा प्रभवेयमेवम् ?।
चित्ते परामृश्य स धावति स्म स्त्रीणां ग्रहस्तत्र परं बलीयान् ॥ ९० ॥
भूत्वा कदाचित्किल सन्निकृष्टस्तूर्णं भवत्येव च विप्रकृष्टः ।
फालं ददद्यो निकषान्तरिक्षं केन ग्रहीतुं हरिणः स शक्यः ? ॥९१॥
वेगः समीरस्य न सन्निधानादेणेऽस्ति तद्वाहनमेव यस्मात् ।
तेनैव धावन् वसुधाधिपालो निन्येऽतिदूरं स जवेन तेन ॥ ९२ ॥
ऐरावणोऽम्भोरुहिणीमिवैतां तारां स हृत्वाऽशनिघोषकोऽपि ।
वेगाज्जगाम स्वपुरीमरीणस्वौजःपराभूतसमस्तभूतः ॥ ९३ ॥
क्लेशाब्धिनिस्तारतरी प्रणुन्ना विद्या प्रतारण्यपि तेन तत्र ।
रूपं सुताराभ्रमकारि कृत्वा पूत्कृत्य उच्चैः स्वरमेवमेषा ॥ ९४ ॥
प्राणेश ! हा कुर्कुटभोगिनाहं दष्टास्मि दष्टास्मि समेहि तूर्णम् ।
श्रुत्वेति हित्वा हरिणं रणेच्छुः क्षोणीपतिर्व्याववृते द्रुतं सः ॥ ९५ ॥
मन्त्रैर्विचित्रैर्मणिभिः पवित्रैस्तां प्रत्यकार्षीन्नृपतिः स यावत् ।
सा तावदत्याजि निरीक्ष्यमाणस्याप्यस्य जीवेन कृतागसेव ॥ ९६ ॥
हंसेन मुक्तां नलिनीमिवासौ तां प्रेयसीं प्रेक्ष्य पपात भूमौ ।

आस्वादितोन्मस्तकत्रन्मुमूर्छे पद्मोपलम्भे प्रथमं निदानम् ॥ ९७ ॥
पद्माकरास्फालननित्यशैत्यगन्धोद्धराराममसमीरणेन ।
स प्राप्तचैतन्यभरो धरेन्द्रश्चक्रे विलापानिति मुक्तधैर्यः ॥ ९८ ॥
मद्विक्रमः किं कुरुतां प्रतापः कं वा समाक्रामतु मामकोऽपि ?।
दृश्योऽभविष्यद्यदि धर्मराजो व्यज्ञास्यत स्फूर्तिरियं तयोस्तत् ॥९९॥
नो धीरुपायुङ्क्ततमां क्वचिन् मे धामापि मे निष्फलतां जगाहे ।
यन्मय्यपि प्राणति मत्प्रियाया वैवस्वतोऽजायत जीवितेशः ॥१००॥
हा ! श्राद्धदेवत्वममुष्य हासाभिव्यञ्जकं किं न यमस्य हन्तुः ? ।
स श्राद्धदेवः प्रथितोऽत्र लोके सर्वत्र कारुण्यमुपादिशद्यः ॥१०१॥
पश्येद्विना पण्डकपण्डितान् कः को वा स्पृशेन्मामपहाय हा ! त्वाम् ? ।
यत्कुक्कुटाहिः प्रययौ विदश्य ज्यायान्विधेः प्रक्रम एव सोऽयम् ॥१०२॥
संसारसर्वस्वमियं ममासीन्नेतां विना जीवत एव लाभः ।
इत्थं विलप्यैव चिरं तयाऽमा क्लृप्तां चितां प्राविशदेष भूपः ॥१०३॥
जज्वाल यावन् स चिताकृशानुर्वातेन दारूपचितः प्रणीतः ।
विद्याधरद्वन्द्वमुपाजिहीत व्योम्नापि तावत् सहसा महिम्ना ॥१०४॥
मन्त्रेण पावित्र्यमितैर्जलौघैरेकोऽभ्यपिञ्चक्षितिचित्रभानुम ।
विद्या प्रतारण्यपि साट्टहासं निर्माय तत्कालमगान् प्रणश्य ॥१०५॥
एतत्किमाकस्मिकमेव जातमित्यभ्यधात्तावपि भूमिपालः ।
व्याजह्रतुर्व्याजविवर्जितौ तौ पत्नी नरेन्द्रामिततेजसो नौ ॥१०६॥
मां विद्धि संबोधकरं विमिश्रं श्रोताभिधानं नृपसावधानम् ।
पुत्रं परं दीपशिखं ततो नौ तीर्थानि नन्तुं प्रयतौ प्रयान्तौ ॥१०७॥
हा प्राणनाथ ! प्रसरत्प्रताप ! श्रीमत्त्रिपृष्ठप्रभव ! प्रजेश ! ।
हा ! शौर्यवर्यामितधामनामसौन्दर्यविद्योतितवंश्यकीर्ते ! ॥ १०८ ॥
त्रायध्वमस्मादिगिकां सुतारां विद्याधरादन्यकलत्रलोलात् ।
आकर्णयामासिव चेति वाचमुच्चैस्तरां व्योम विगाहमानाम् ॥१०९॥
॥ त्रिभिर्विशेषकम् ॥
अस्मत्प्रभोर्जामिरनेन रूपाऽऽक्षिप्ताशयेन ह्रियते स्म नूनम् ।
व्यावर्तयावस्तदिमामिमं च हत्वा दुराचारमपेतसारम् ॥११०॥
चित्ते विमृश्येति रुषारुणौ तौ यावन् प्रवृत्तौ सह तेन योद्धुम् ।

निस्त्रिंशवृत्तेन दुराशयेन निस्त्रिंशमादाय शितं करेण ॥१११॥
(युग्मम्)
तावन्महिष्या भवतोऽभ्यधायि युद्धेन वां पूर्णमितोऽपि तूर्णम् ।
ज्योतिर्वनं नाम वनं प्रयातं प्राणांस्त्यजन्तं प्रतिषेधतं तम् ॥११२॥
विष्णुत्रिपृष्ठान्वयवारिराशिवेलासमुल्लासनशीतरश्मिम् ।
देव्या प्रतारण्यभिधानयामुं मद्रूपसम्पादनविप्रलब्धम् ॥११३॥
स्वस्वामिजाम्या विनियोगयोगात् सा नाशिता देव! लघु प्रतारा ।
तत्त्वं विषादं त्यज नौ प्रसादं सम्पाद्य वैताढ्यमुपेहि शैलम् ॥११४॥
अभ्यर्थ्य ताभ्यां वसुधासुधांशुर्नीतः स वैताढ्यगिरिं गरीयान् ।
वृत्तान्तमुक्त्वाऽमिततेजसे स्वं दुःखं हृदिस्थं गमयाम्बभूव ॥११५॥
कुर्वंल्ललाटे भ्रुकुटिं प्रकोपात्ताम्रीकृतापाङ्गविलोचनाऽऽस्यः ।
ऊचेऽर्ककीर्तिप्रभवाक्षितीशः संरम्भवान् श्रीविजयं प्रतीदम् ॥११६॥
आदाय कस्तक्षकमौलिरत्नं कोटीरकोटेः कुरुतां विभूषाम् ।
सौपर्णपक्षान् परिगृह्य तूणबाणान् सपक्षांश्च जिजीविषुः कः? ॥११७॥
संगृह्य जीवाभ्यधिकप्रियां ते जामिं मदीयां मदविह्वलः सन् ।
स क प्रयाता मयि पृष्ठलग्ने दुर्वारवैरिक्षयकालदण्डे!? ॥११८॥
उक्त्वेति शस्त्रावरणीमणीयोबन्धप्रमोक्षप्रगुणप्रभावाम् ।
विद्यां ददौ श्रीविजयाय हृद्यां निश्शेषदुरन्छिदुरां नरेशः ॥११९॥
श्रीरश्मिवेगादिकतत्तनूजस्फूर्जद्भटानामथ पञ्चशत्या ।
युक्तस्त्रिपृष्ठप्रभवः सुतारामाहर्तुमेवारिपुरीमयासीत् ॥१२०॥
विज्ञाय विद्याबलिनं तमार्कक्षोणीशिताऽसौ हिमवन्महीध्रे ।
कान्त्याऽवदातान् धरणेन्द्रपादानग्रे जयन्तं च मुनिं महान्तम् ॥१२१॥
तेजोविनिर्धूतसहस्रारश्मिं पुत्रं समादाय सहस्ररश्मिम् ।
ज्वालाभिधामन्यवलोपनोदां विद्यां ययौ साधयितुं महाढ्याम् ॥१२२॥
(युग्मम्)
स्थित्वा ततो मासिकभक्तवृत्त्या सप्तत्रियामाप्रतिमां विधाय ।
विद्यां तयोः साभयतोरनिन्द्यां मासो व्यतीयाय सजापमेकः ॥ १२३ ॥
स्थित्वा महीशश्चमरादिचञ्चापुर्या बहिः श्रीविजयोऽथ वीरः ।
आकूतविज्ञं प्रजिघाय दूतं प्रत्यर्थिभूपाय यथार्थभापम् ॥१२४॥

गत्वाऽथ दूतस्तदुपेत्य सिंहद्वारं नृसिंहस्य स सिंहशौर्यः।
विज्ञापितो वेत्रभृता प्रविष्टः सभ्यः सभामध्यमभापतैवम् ॥ १२५ ॥
अन्यस्त्रियं नैव दृशापि सन्तः सतीं स्पृशन्ति प्रतिपन्नपुण्याः।
तस्याः पुनः संहरणं प्रसह्य स्वच्छन्दपापाहरणं न किं तत् ? ॥१२६॥
एतां समानेतुमहो ! सुतारां नैवौचितीमञ्चति तेऽपि चेतः।
आनीय यद्वा जननीव सारैर्वासोभिरभ्यर्च्य समर्पणीया ॥ १२७ ॥
व्रीडां प्रकुर्वन्ति विनिर्मिमाणाः क्रीडावशात्कर्म परं छलेन।
अस्याः पतिः सर्वबलौघशाली नीतिं समालम्ब्य बहिः स्थितोऽस्ति ॥
तस्मै तदेतां स्वयमेव गत्वा सत्त्वावलीढाय समर्पयस्व।
यद्वा समाचर्य विकार्यचर्या नादीयते मन्तुरुपागतस्य ॥ १२९ ॥
मार्गं यदि स्वीकुरुषे कदाचित्त्वं चाटुकारैरुपलालितः सन्।
द्रष्टा कबन्धं यदि वैकबन्धं नूनं तदा तद्भटचन्द्रहासैः ॥ १३० ॥
इत्थं सनिर्बन्धमुदीर्य दूतो जोषं समालम्ब्य स यावदाऽऽस्ते।
तावज्जगादाशनिघोषभूपो भ्रूभङ्गभीमं विदधत्क्रुधाऽऽस्यम् ॥ १३१ ॥
बुद्ध्या विदग्धत्वमवेदि रे ! ते राज्ञो मया यस्य न सन्त्यमात्याः।
नो तेऽप्यमात्या न हितं प्रभोर्ये ब्रूयुः प्रयुञ्ज्याप्युपपत्तिजातम् ॥१३२॥
दासेरकः स प्रभुताधिकारी नैव प्रभुः कर्हिचनापि दूत !।
यः कण्टकास्वादनलोलुपोऽपि स्वस्यैव जानाति हिताहितं न ॥१३३॥
यो मन्त्रिणां नैव वचः करोति नासौ प्रभुस्तेऽपि च मन्त्रिणो न।
अन्योन्यवैरानुगमान् क्षयाय राज्यस्य तौ सम्भवतः स्वतोऽपि ॥१३४॥
ताभ्यामनालोच्य भवादृशोऽत्र प्रस्थापितो दूतविधाऽनभिज्ञः।
वक्तुं न यो वेद पुरः प्रभूणां तस्योचितं दूत्यमिदं किमु स्यात् ? ॥१३५॥
बुद्ध्या विनैकेन पराक्रमेण जेतुं न शक्या रिपवः कथञ्चित्।
गर्जन्तमम्भोदमुपर्यवेक्ष्य स्वं किं न हन्याच्छरभो विबुद्धिः ? ॥१३६॥
अन्धा न पश्यन्ति परस्त्रियं चेत्तै किं प्रशंसां सुधियां श्रयन्ते ?।
यद्येवमेषां चतुरिन्द्रियाणां निन्दा कथं स्याद्विकलेन्द्रियत्वम् ? ॥१३७॥
नान्यस्त्रियं विक्रममन्तरेण हर्तुं नरः क्लीब इव क्षमेत।
नो विक्रमः पुण्यकृते कथं तत् पापाय तस्या हरणं मतापि ? ॥१३८॥
स्त्रीरत्नमेतादृशमद्भुतं चेदानेतुमौचित्यविपश्चना न।

अन्यत्र सा क्वापि वितायमाना स्वाभावमेव प्रथयेन्न किं वा ? ॥१३९॥
शक्त्या समानीय निवास्यते या सा माननीया जननीव किं स्यात् ?।
व्रीडा वधे स्याद्विहिते छलेन लक्ष्म्यां हृतायां न पुनः स्त्रियां वा ॥१४०॥
उद्धाररूपेण समाहृतं यद्विश्राण्यते तत्परमेव नीत्वा ।
नैवोत्तमर्णः स च मे न चाहं तस्याधमर्णः कथमर्पये तत् ?॥ १४१ ॥
मन्तुं स एव क्षमतेऽनुमन्तुं द्वेधापि यस्यास्ति बलं विशालम् ।
आगत्य पुर्याः स बहिर्भवन्तं प्रस्थापयन् स्वस्य बलं न वक्ति ॥१४२॥
स्वाभाविको यस्य न चास्ति मानः संमानभागी स कथं जनानाम् ? ।
अध्याहृतः सङ्गरसीम्नि भर्तृर्वीर्यं विधत्तां किमु कातरस्य ?॥ १४३ ॥
तद्याहि दूताधम ! यावदेते भृत्या ददन्ते न तवार्धचन्द्रम् ।
त्वद्वास्यनुन्नस्त्वरितं स तेऽपि स्वामी समायात्वथवा प्रयातु ॥ १४४ ॥
इत्यूर्जितां तस्य निशम्य वाचं विद्याधरेन्द्रस्य गतः स दूतः ।
आख्यादशेषं निजनायकाय स्वर्नायकं तर्जयते स्वधाम्ना ॥ १४५ ॥
आदेशतः श्रीविजयस्य राज्ञस्तूर्याण्यवाद्यन्त रणोन्मुखानि ।
यन्नादमाकर्ण्य भटाः समग्राः सन्नह्य सन्नह्य समागमंश्च ॥ १४६ ॥
संग्रामतूर्येषु नदत्सु हर्षाद्वीरा दधुः कण्टकपेटकानि ।
तैरेव तत्कङ्कटबन्धनानि त्रुट्यन्ति भूयस्समयोजयंश्च ॥ १४७ ॥
विद्याधरेन्द्रोऽपि रणाय सज्जांस्तानश्वघोषप्रमुखान् स्वपुत्रान् ।
प्रस्थापयामास चमूसमूहैः सार्द्धं प्रतिद्वन्द्विजनान् विजेतुम् ॥ १४८ ॥
सैन्यद्वयान्तर्गतभृत्यवर्गयष्ट्यग्रगाढाहतवाद्यनादैः ।
पार्श्वेऽपि वाचं प्रणिगद्यमानां कस्यापि शुश्राव न कश्चनापि ॥ १४९ ॥
रङ्गत्तुरङ्गक्षुरसन्निपातक्षुण्णक्षमामण्डलरेणुपूरैः ।
आच्छादिते व्योमनि पुष्पदन्तौ शङ्के पलाय्यैव गतौ तदा तौ ॥१५०॥
अश्वक्षुरोत्पातरजःप्रचारैः स्फारेऽन्धकारे यदि चन्द्रहासैः ।
ओजस्विनां पाणिषु विस्फुरद्भिः प्रापे तदानीमपि सान्वयत्वम् ॥१५१॥
सेनाचराणामवलेपभाजामेतादृशोऽजायत सम्परायः ।
रक्तोदसिन्धुः प्रचचार यस्मादुत्साहचन्द्रोदयवर्द्धमानः ॥ १५२ ॥
यो वीरविस्फारितखड्गयष्ट्या विच्छिन्नकुम्भस्थलकुम्भिदेहात् ।
संजातयाऽसृग्भरुद्विलयौघे रक्तोदया बहुभया परीतः ॥ १५३ ॥

धीरैर्विभिन्नद्विपराजकुम्भनिष्पातिमुक्ताफलमण्डलानि ।
यस्मिन्नभूवन् बहुशो विभान्ति धात्रीफलानीव समुज्ज्वलानि ॥ १५४ ॥
नक्रन्ति गात्राणि मतङ्गजानां यस्मिन् भटैः खड्गविदारितानाम् ।
कूर्मन्ति विच्छिन्नचतुष्क्रमाणां यस्मिंश्च तान्येव तुरङ्गमाणाम् ॥१५५॥
स्रस्तानि लूनानि महाभटानां यस्मिन् शिरांसि प्रतिवीरखड्गैः ।
शङ्कन्ति चाऽऽयोधनरञ्जितान्तर्विद्याधरक्षिप्तसुमोत्कराणि ॥ १५६ ॥
॥ पञ्चभिः कुलकम् ॥
भूमीशितुः श्रीविजयस्य सैन्यधानुष्कधन्वध्वनिमात्रतोऽपि ।
काका इवाथ प्रतिभूपपुत्रा नेशुः समस्ता अपि ते विह्वलाः ॥ १५७ ॥
श्रुत्वा प्रनष्टांस्तनयांस्तदैव विद्याधरेशोऽशनिघोषकोऽपि ।
पाणौ समादाय गदां रणाय विद्वेषिसैन्याभिमुखं ससार ॥ १५८ ॥
तस्य प्रहारैः परुषैर्गदाया नद्या इवाऽगाः सलिलप्रवाहैः ।
भग्ना नरेन्द्रामिततेजसोऽपि सम्बद्धमूला अपि ते कुमाराः ॥ १५९ ॥
दृष्ट्वा पराभूतपराक्रमांस्तान् योद्धुं स्वयं श्रीविजयो ढुढौके ।
सेनाचरान् स्वस्य पलायमानान् धीरैर्वचोभिर्विनिवर्तयंश्च ॥ १६० ॥
नैवापराद्धं भवतो ममापि सेनाचरैरेभिरतो हतैः किम् ? ।
त्वं मे कलत्रापहृतेर्विरोधी त्वां हन्तुमिच्छुस्तव चाहमस्मि ॥ १६१ ॥
तस्मादरे ! रेऽशनिघोष ! युद्धं कार्यं त्वयाऽमा मयका च नान्यैः ।
इत्युद्धतध्वानमसौ निवार्याशेषान् भटान् स्वानपि तेन तस्य ॥ १६२॥
श्रीपोतनक्ष्मामघवा नियुद्धं प्राक्रंस्त सेनाशनिघोषकेण ।
विष्ठन् क्षणं व्योमनि सैनिकानां विस्मापयन् मानममास्तदर्पम् ॥१६३॥
॥ त्रिभिर्विशेषकम् ॥
उत्पाट्य तं कन्दुकवद्विपक्षं दोर्भ्यामुभाभ्यां तुलयन्निवाभान् ।
श्रीमत्त्रिपृष्ठप्रभवः सुतारां व्यावर्तयिष्यन् किमिवाप मान्यम् ॥१६४॥
रोषादथ स श्रीविजयेन रोषात्कौक्षेयकेण प्रसभं प्रहृत्य ।
द्वेधा प्रचक्रेऽशनिघोष एतत्खण्डद्वयेनाशनिघोषयुग्मम् ॥ १६५ ॥
जघ्ने विलूनं द्विगुणं पुनस्तद्रम्भामहास्तम्भवदेवमेव ।
यथच्छिदश्छिन्नमनुष्य येन यथाप्रगाढं द्विगुणत्वमाप ॥ १६६ ॥
विच्छिद्य विच्छिद्य शिरांसि यस्य श्रान्तः सुताराद‌यितः स यावत् ।

विद्यां प्रसाध्याऽमिततेजसापि तावत् समागम्यत सान्वयेन ॥ १६७ ॥
आयान्तमालोक्य विलोकनीयं सौन्दर्यलक्ष्म्याऽमिततेजसं तम् ।
सर्वे विपक्षाः प्रपलाय्य जग्मुर्घूका इवादित्यमुदीयमानम् ॥ १६८ ॥
विद्वेपिपक्षांश्च पलायमानानेतान्मुचो मैव कथञ्चनेति ।
विद्यामहाव्यामिततेजसोचे ज्वालाभिधाना ज्वलितारिवंशा ॥१६९॥
व्यामोहितास्तेऽपि तया स्वशक्त्या प्रत्यर्थिवारा अपि दुर्निवाराः ।
जग्मुः शरण्यं शरणं शराकं सर्वेऽपि मत्वाऽमिततेजसं तम् ॥१७०॥
तेपु प्रनष्टोऽशनिघोप एकस्तं वीक्ष्य वैरिक्षयचण्डरोपम् ।
विद्याऽनवद्यापि तमन्वियाय सा तन्नियुक्ता तमथो ग्रहीतुम् ॥१७१॥
तस्मादपाच्ये भरतस्य खण्डे वेगेन सोऽगाच्छरणेच्छयैव ।
सीमाद्रिनाभेयजिनेन्द्रचैत्यं चेतःकुरङ्गीधृतिवागुराभम् ॥ १७२ ॥
संस्थापितोऽस्मिन् समवादिसृत्याख्यस्थानके केतन एव नागः ।
तत्रैकरात्रप्रतिमां महात्मा रामोऽचलस्तिष्ठति निश्चलः सः ॥ १७३ ॥
दुष्कर्मधाराधरके निरस्ते ध्यानानिलेन स्फुरता जगन्ति ।
निर्भासयन् केवलसंविदंशुर्व्योम्नीव तत्राऽऽविरभूत्तदैव ॥१७४॥
आगाज्जगन्नन्दनचारणर्पिस्तत्रोत्सवेऽसाप्यभिनन्दनेन ।
अन्येऽर्ककीर्त्यग्निजटिक्षमेशमुख्याः समेयुर्बहवोऽपि चाऽत्र ॥ १७५ ॥
तस्यैव सेवां विबुधा विधातुमभ्यागमन् केवलबोधभाजः ।
बिभ्यत्ततः सोऽशनिघोपकोऽपि तत्पादपद्मं शरणं प्रपेदे ॥ १७६ ॥
व्यावृत्त्य विद्याऽमिततेजसोऽपि सामीप्यमाशिश्रियदाश्रयस्य ।
स्वाभाविकद्वेपभरा अपि स्युर्न ज्ञानिपु द्विष्टहृदः कदाचित् ॥ १७७ ॥
निर्दिश्य मारीचिमदृश्यदोपं श्लाघ्यं सुतारानयने प्रहृष्टौ ।
नन्तुं ततः केवलिनं प्रयातौ क्ष्मावासवौ श्रीविजयामिताख्यौ ॥१७८॥
सीमाद्रिमागत्य विलम्बवर्जं बिम्बं विनम्यादिजिनस्य पूर्वम् ।
तौ ज्ञानलक्ष्मीहृदयैकहारं साधुं प्रलम्बभ्रमवन्दिपाताम् ॥ १७९ ॥
गत्वा स धीरोऽशनिघोपकस्य मारीचिरप्याशु पुरीं विवेश ।
तन्मन्दिरे तज्जननीसमीपस्थास्नुं सुतारां समवेक्षते स्म ॥ १८० ॥
आसाद्य भर्तुः कुशलप्रवृत्तिं भोक्ष्येऽन्यथा नेति कृतोपवासाम् ।
आस्यानि दृश्यानि वियोगिनीनां नैवेति सध्यानमवाङ्मुखीं ताम् ॥१८१॥

शीतांशुलेखामिव कृष्णपक्षे लक्ष्मीमिवान्यायवतां गृहेषु ।
वाणीमिव प्रातिभवर्जितानां वाढं कृशां शीलगुणैरुपेताम् ॥ १८२ ॥
॥ त्रिभिर्विशेषकम् ॥
आवेदिते तेन पुरः स्ववृत्ते तत्कालमेवाशनिघोषमाता ।
तां प्रापयत्साधुपदारविन्दद्वन्द्वाग्रभूमिस्थिततद्दृदीशम् ॥ १८३ ॥
भेत्तुं न यच्छीलतनुत्रमात्रं सुत्रामवर्गोऽपि शशाक सर्वः ।
तामर्पयामास हृदीश्वराय तोषं दधाना हृदये सुताराम् ॥ १८४ ॥
भक्त्या मुनीन्द्राचलकामपालं नत्वा यथास्थानमुपाविशत् सा ।
विद्याधरेन्द्रोऽशनिघोषकोऽपि तावादरेण क्षमयाम्बभूव ॥१८५॥
भव्येषु सर्वेषु निषेदिवत्सु तन्निघ्नपापेषु विषेदिवत्सु ।
वक्त्राम्बुजं देशनयाऽचलोऽपि संयोजयामास मुनिस्तथाहि ॥१८६॥
मत्ताङ्गनापाङ्गविलासलोलं रूपं वयश्चारु धनं तथायुः ।
भव्या ! भवद्भिः परिभाव्य धर्मे कार्यः प्रमादो न मनागपीह ॥१८७॥
संजाततोषोऽशनिघोषकोऽथ नत्वा मुनिं विज्ञपयाम्बभूव ।
विद्यां गृणन् भ्रामरिकीं स्वपुर्याः श्रीमज्जयन्तान्तिक एकदागाम् ॥१८८॥
सप्तत्रियामाविहितोपवासस्तां साधयित्वा विनिवर्तमानः ।
ज्योतिर्वने वीक्ष्य सतीवतंसामेतामहं प्रीतमना बभूव ॥१८९॥
तस्मादपाहारि मयेयमार्य ! क्रूरेण चित्तेन न तु प्रतीक्ष्य ।
अस्यां मम प्रेमनिरन्धनं यत्तत्त्वं समाख्याहि विशेषतस्त्वम् ॥१९०॥
विज्ञप्तमात्रोऽथ मुनिर्निभाण श्रीषेणभूपादिकवृत्तमेवम् ।
निष्ठापयामास भवं भ्रमित्वा दुष्कर्मजातं कपिलोऽपि तादृक् ॥१९१॥
भीतेः पदव्यामपि भूतरलाटव्यां महाश्वापदसंश्रयायाम् ।
ऐरावतीद्वीपवतीतटान्ते जज्ञे जटी कौशिकनामधेयः ॥१९२॥
तद्वल्लभाऽभूत् पवनादिवेगा धर्मक्रियायाः सहकृत्वरी या ।
सूनुस्तदीयः कपिलस्य जीवः कर्मेरितोऽजायत धर्मिलाख्यः ॥१९३॥
उत्क्रान्तबाल्यः स्वपितुस्तपस्यां लात्वा स्वयं बालतपः स तेपे ।
बिभ्रज्जटा मूर्ध्नि घनाः पिशङ्गीमूर्तिं प्रभूतां च गृहीतवल्कः ॥१९४॥
ग्रीष्मे चतुर्णां ज्वलतां समिद्भिः समार्चिषां मध्यगतः स मूढः ।
मध्ये चतुर्णां हरिदीश्वराणां द्राक् स्वतेजोभिरिवाबभासे ॥१९५॥

धाराभिरासारनिपातिनीभिर्वारीणि वर्षासमये स सेहे ।
जाज्वल्यमानज्वलनोपतापसन्तापितो वा किमसौ तपस्वी ? ॥१९६॥
अन्तर्गतेनेव निपीड्यमानो जाड्येन जाड्यं सहते स्म शीते ।
नो रल्लकं नापि स वल्कलानि वासः प्रतीयेष न वेपमात्रम् ॥१९७॥
निर्मापयामास तडागवापीकूपानगाधान् स धृपैकबुद्ध्या ।
नावुद्ध चैकत्र जलस्य बिन्दौ जीवा अनेके निवसन्ति चेति ॥१९८॥
सम्पूरयामास स पादपानामावापचक्रं स्वयमेव कल्प्रम् ।
आनीय चानीय शिला विशाला अद्भिः स्फुरत्पूतरकाभिरेव ॥१९९॥
निष्पीड्य निष्पीड्य स इङ्गुदीनां दाढं फलान्येव पचेलिमानि ।
आदाय तैलानि निशागमेऽसौ धर्मप्रदीपान्विदधेऽतिमुग्धः ॥२००॥
सम्पूर्य सम्पूर्य जलैरजस्रं वृक्षस्य शाखासु शरावमालाम् ।
रज्ज्वा निबद्धैव बबन्ध पक्षिव्रातस्य पानाय निदाघकाले ॥२०१॥
विश्रम्य विश्रम्य पुरीगृहेषु भिक्षां गृहीत्वा स वनं समेत्य ।
विश्राण्य काकादिविहङ्गमेभ्यो भुङ्क्ते स्म तच्छेषमशेषकृत्यः ॥२०२॥
वस्त्रेण पूतं सलिलं पिबेच्चेत्येतादृशीं स श्रुतिमप्यजानन् ।
आपूरितैर्वारिभरेण कुम्भैः क्व प्रपां वर्त्मनि नो चकार ? ॥२०३॥
स त्रिः परीय प्रणनाम धात्रीं मङ्गलयन् शक्तिमनन्तरूपाम् ।
धेनुं तथैव प्रतिपत्तिपूर्वं दूर्वाङ्कुरास्वादकृतप्रतीतिम् ॥२०४॥
शाखासमाक्रान्तनभोविभागं छायां प्रकुर्वन्तमिलातलेऽपि ।
सान्द्रैर्दलैर्विस्तृतिभावमेतैर्दृष्ट्वा वटं स भृशं ननाम ॥२०५॥
इत्यादि सावद्यममुष्य कर्म सञ्चिन्वतो धर्मधिया जडस्य ।
भूयान् व्यतीयायतमामनेहा हा ! कष्टमज्ञानमपास्य किं वा ?॥२०६॥
सोऽन्येद्युरालोक्य नभोऽन्तराले विद्याधरं यान्तमतुल्यरूपम् ।
चक्रे निदानं मनसेत्यबुद्धिर्भूयासमीदृक् तपसाऽमुनापि ॥२०७॥
मृत्वा स विद्याधरसार्वभौमस्येन्द्राशनेरिन्द्रपराक्रमस्य ।
देव्याऽऽसुरीकुक्षिभवस्त्वमासीश्चञ्चानगर्यां नगराजसारः ॥२०८॥
प्राग्जन्मसम्बन्धवशात्ततोऽस्यां स्नेहस्तवाभूदवलोकितायाम् ।
श्रुत्वेति संवेगतरङ्गितास्ते सभ्या बभूवुः सुकृतोपलभ्याः ॥२०९॥
भव्योऽहमाहोस्विदभव्यरूप इत्युक्त एवामिततेजसाऽपि ।

संवित्तिगङ्गातटिनीतुपारक्षोणीधरो रामगुनिर्वभाषे ॥ २१० ॥

अस्माद्भवान्नवम एव भवे भवाना-
मुच्छेदकोऽत्र भरते भवितासि भव्यः ।
त्वं पञ्चमोऽनुपमविक्रमधामचक्री
श्रीशान्तिनाथ इति षोडश एव चार्हन् ॥ २११ ॥

एष श्रीविजयस्तदादिमतमश्चक्रायुधो नन्दनः
सम्भावी भवतस्तथा गणधरोऽप्येषोऽपि विश्वार्चितः ।
त्रैपृष्ठामिततेजसौ नरपती नत्वा ततस्तं मुनिं
धर्मं द्वादशधा बुधावभजतां सुश्रावकाणां स्वयम् ॥२१२॥

विद्याभृतां परिवृढोऽशनिघोषकोऽश्व-
घोषाभिधं तनयमङ्कगतं विधाय ।
भूमीभुजोरपि तयोः स्वयमादिताऽसौ
दीक्षां बलाचलमुनेः सविधे विधिज्ञः ॥२१३॥

मातापि श्रीविजयनृपतेः सा स्वयंभाभिधाना
भेजे दीक्षां बलमुनिपतेः सन्निधाने विरक्ता ।
युक्तं चान्ते वयसि विदुषी कापि सीमन्तिनीनां
कुर्यादेवं भवपरिभवं भेत्तुमुज्जागरूका ॥२१४॥

सेवित्वा बलभद्रसाधुचरणाम्भोजद्वयं चालिवत्
पीत्वा वाग्मकरन्दबिन्दुपटलीमाकण्ठमाप्यायिताः ।
स्थानं श्रीविजयादयो ययुरथो स्वं स्वं गुरूणां गुणान्
पीयूषांशुमयूखविभ्रमकरान् संवर्णयन्तो मुहुः ॥२१५॥

कल्याणाग्निनिबन्धनं विदधतौ धर्मं त्रिवर्गोत्तरं
तद्द्वाराऽपरयोर्द्वयोरपि फलं तौ प्रापिवांसौ मुदा ।
पीयूषद्युतिमण्डलीमयमहो-! भूमण्डलाखण्डलौ
कश्चित्कालमपि व्यतीयतुरधिप्रौढप्रतापोदयौ ॥२१६॥

अर्हच्चैत्यसमीपपौषधगृहे श्रित्वान्यदा पौषधं
दुष्कर्मामयभेदनौषधमसौ विद्याधराणां पुरः ।
यावद्भूपतिरर्ककीर्तितनयो व्याख्याति धर्मं स्फुटं
तावच्चैत्यमिमं चारणमुनिद्वन्द्वं समाजग्मिवत् ॥२१७॥

अभ्युत्थाय नृपः कृताञ्जलिपुटो हृष्टस्तदालोकना-
त्तां वृन्दारकवृन्दवन्दितपदाम्भोजाववन्दिष्ट सः ।
विश्राण्यान्वयिधर्मलाभवचनं ज्येष्ठस्तयोरादिश-
द्धर्मं शर्मनिदानमार्हतमिमं दुष्कर्मविद्रावकम् ॥२१८॥
सम्पूर्णं फलमादधाति विहितः सम्पूर्ण एवार्हतो-
धर्मः स्वार्थचिकीरहो ! बत नृणां स व्यत्यये व्यत्ययम् ।
प्राप श्रेष्ठिसुतो यथा स धनदो मत्स्योदरान्याह्वयः
कल्याणं जिनधर्मखण्डनवशाद्दुःखेन सम्भावितम् ॥२१९॥
आसीत् श्रीगुरुगच्छमौलिमुकुटश्रीमानभद्रप्रभोः
पट्टे श्रीगुणभद्रसूरिसुगुरुर्विद्यावतां सद्गुरुः ।
तच्छिष्येण कृतेऽत्र षोडशजिनाधीशस्य वृत्ते महा-
काव्ये श्रीमुनिभद्रसूरिकविना सर्गोऽगमत्पञ्चमः ॥२२०॥

॥ इति श्रीशान्तिनाथचरिते पञ्चमः सर्गः ॥

अर्हम्

अथ षष्ठः सर्गः ।

कामधेनुसुरपादपचिन्तारत्नकामकलसा अपि सन्ति ।
यस्य कामजयिनः प्रतिहस्ताः स श्रियेऽस्तु भवतां जिनशान्तिः ॥१॥
कः प्रभो ! धनद इत्युदितोऽपि क्ष्माभुजा मुनिरुवाच तथाहि ।
द्वीपराजविनिवेशितजम्बूद्वीपचक्रिकमलासुषमाक्तन् ॥ २ ॥
अस्ति याम्यभरतार्द्धधरित्रीभामिनीतिलकभूषणरूपम् ।
पत्तनं कनकपत्तनसंज्ञं सान्वयं बुधजनैरपि वर्ण्यम् ॥ ३ ॥
ईश्वरत्वमनुमापरिभाव्यं विद्यते धनवतामपि यत्र ।
यद्द्विजिह्वपतिना सह योगो नार्धचन्द्रपरिशीलनता यत् ॥ ४ ॥
तत्र कोऽपि कनकादिरथोऽभून्मेदिनीपरिवृढोऽपि शुचिः सः ।
धुर्वता करतले करवालं कीर्त्तिरापि युधि येन रिपूणाम् ॥ ५ ॥
तत्र भूपपरमाभ्युपपत्तेर्भाजनं सुजनरञ्जनधुर्यः ।

रत्नसार इति नाम महेभ्यः पावनीकृतमहीतलकीर्तिः ॥ ६ ॥
यस्य मानससरस्वति पुण्यक्षीरनीरनिकरोत्थतरङ्गः ।
खेलति स्म सुतरां जिनहंसो बुद्धिजातनलिनीवनपूर्णे ॥ ७ ॥
प्रेयसी समभवन्मणिचूला तस्य पुण्यकलिता सुचरित्रा ।
यां विलोक्य पतिभक्तिसमृद्धां सा रतिर्न रतिमाप कथञ्चित् ॥ ८ ॥
एतयोर्विषयजानुपभोगान् भुञ्जतोरविरतं क्रमशोऽपि ।
सर्वलक्षणसुलक्षणमूर्त्या शोभितः समभवत्तनुजन्मा ॥ ९ ॥
तस्य जन्मदिवसे स महेच्छो यानि कानि विचिकाय वसूनि ।
तानि दुर्गतगृहेऽपि यदि स्युर्दुर्गतत्वमपि तद्रमयेयुः ॥ १० ॥
द्वादशे समधिजग्मुपि घस्रे मानितेपु सुजनेपु यथार्हम् ।
आदधे धनद इत्यभिधानं स्वात्मजस्य जनको महपूर्वम् ॥ ११ ॥
बालकः प्रववृधे बहुधात्रीलालितो नवनवैश्च रसौघैः ।
स द्विपत्रितसमुद्गतशालीवाङ्गभङ्गिभिरभङ्गुरशाखः ॥ १२ ॥
उत्सवेन पितरौ हृदि हृष्टौ तं कलाविदमवापयतः स्म ।
साक्षिमात्रमुपलभ्य तमुत्कोऽभ्यस्यति स्म स कलाः सकलास्ताः ॥१३॥
कामिनीनयनमत्तचकोरचक्रचङ्क्रमणयन्त्रणपाशः ।
प्रत्यपद्यत स यौवनमिच्छाहस्तिनीवनविलासनिवासः ॥ १४ ॥
आपणे स नियमाद् विपादं सादयन्पितुरजस्रमितश्च ।
द्यूतकृत् सुकृतकुञ्जरसिंहः सिंहलोऽत्र नगरे विदितोऽभूत् ॥ १५ ॥
द्यूतमुख्यगहनं व्यसनानामाकरः स्वपरवञ्चनचुञ्चुः ।
सोऽपि पूःपरिसरे पुरदेव्या मन्दिरेऽरमत नित्यश एव ॥ १६ ॥
किञ्चनापि न जयत्यपि लाभस्यान्तरायकरणेन स जातु ।
सर्वकर्म कुरुतां पुरुपो वा पुण्यसन्ततिमृते न फलानि ॥ १७ ॥
अन्यदा स दृपदं परिगृह्य देवतां प्रणिजगाद दुरात्मा ।
त्वामनेन दलितास्मि न चेन्मे देवि ! देहि विपुलानि धनानि ॥ १८ ॥
मातुरप्यपहरेन् परिधानं द्यूतकृज्जगति विश्रुतमेतत् ।
अभ्युपेत्य भयविह्वलचित्ता देवता प्रवदति स्म तमेवम् ॥ १९ ॥
कर्मठं जगति कर्म तदेकं सर्वकर्मसु निबोध सुबोध ! ।
तद्विलङ्घ्य भवतो वितरीतुं स्वापतेयमहमस्मि किमीशा ? ॥ २० ॥

अन्तरायमकृथा जनुषि त्वं प्राचि तेन तव नास्ति धनायः ।
श्लोकपत्रकमिदं मम लात्वा याहि दास्यति तथापि धनं ते॥ २१ ॥
पत्रकं तदुपगृह्य च देवीभाषितं भवति नैव वृथेति ।
आगतः स च चतुष्पथमिभ्यैः पृच्छ्यते स्म करपत्रकमूल्यम् ॥ २२॥
तद्गिरा प्रणिगदन् स सहस्रं हस्यते स्म वणिजैरतिवेलम् ।
युक्तिरिक्तमतिरिक्तमविद्वानुच्चरन् क इव वा न विहास्यः ?॥ २३ ॥
पर्यटन्नविकटं प्रतिहट्टं खिन्न एव धनदाट्टमुपेतः ।
पत्रमूल्यममुनापि स पृष्टः शिष्टवन् प्रणिजगाद सहस्रम् ॥ २४ ॥
स स्वयं गणकवद्गणयित्वा सारमस्य विततार ससारः ।
श्लोकनिष्टमविचार्य तमर्थं दातुरस्ति यदि वा न विचारः ॥ २५ ॥
तत्र यातवति जातविधेये द्यूतकर्मपरिकर्मविदग्धे ।
बुद्धितर्जितबृहस्पतिरेष श्लोकमेतमपि वाचयति स्म ॥ २६ ॥
यद्यदस्ति विधिना लिखितं तत्तन्नृणां परिणमत्यनिवार्यम् ।
इत्यवेत्य मनसैव महान्तः कातरा न विधुरेऽपि भवन्ति ॥ २७ ॥
तस्य चिन्तयत एव तदर्थं चेतसा विदितमर्घ्यमनर्घ्यम् ।
आससाद जनको जनवाक्यैरापणं व्ययितहेमसहस्रम् ॥ २८ ॥
आः ! किमेतदविचारितमाधा दुर्मते ! पठितमूर्ख ! विवर्ण ! ।
श्लोकक्रयविधौ ननु तादृक्को व्ययीकुरुत एव सहस्रम् ?॥ २९ ॥
त्वं मुखानि मुखराणि खलानां पश्य हास्यचतुराणि निकामम् ।
तद्विधेयमपि कर्म मनुष्यैः स्यान्न येन पिशुनस्य हि हास्यम् ॥ ३० ॥
निर्विमर्शमधिताराणिजातकोपपावकशिखाज्वलितस्य ।
एवमादिवचनैरपि तस्य स द्विजिह्ववचनैरिव दूनः ॥ ३१ ॥
मातुरप्यसुखहेतुमनुक्त्वा तं पराभवमदृष्टचरं सः ।
नक्तमात्मसदनान्निरयासीद् दुष्करं किमिव तस्य तदेतत् ?॥ ३२ ॥
उत्तरां ककुभमाश्रयतः स्याद्भानुमालिन इवाधिकधाम ।
एवमात्महृदये स विचिन्त्याशोत्तरां सहृदयः प्रचचाल ॥ ३३ ॥
उत्तराधिपतितां भजतः स्याद्राजराजपदमित्यवधृत्य ।
श्रेष्ठिभूः स धनदो धनदाशां प्रास्थित क्षितिविदामवतंसः ॥ ३४ ॥
राजहंसबकसारसचक्रमुख्यपक्षिकुलतारविरावैः ।

स्वादुशीतलसुगन्धिजलानि वर्णयन्तमिव वार्द्धिजयाय ॥ ३५ ॥
पिञ्जराणि सलिलानि जिनानामाप्लवाय घुमृणैरिव देवैः ।
निर्मितानि दधतं रविरश्मिप्रबोधिताब्जपतयालुपरागैः ॥ ३६ ॥
क्षीरनीरनिधिमानममानं तर्जयन्तमतिमात्रवितत्या ।
पान्थवर्गहृदयाहितरागं यत्नसौ पथि ददर्श तडागम् ॥ ३७ ॥
॥ त्रिभिर्विशेषकम् ॥
पाणिपादवदनं परिमृज्य वस्त्रपूतममृतं परिपीय ।
तत्तटे वटतरोस्तल एव स स्मरंस्तदपि वृत्तमशेत ॥ ३८ ॥
तस्य दुःखमपनेतुमिवासावक्षमो दिनपतिर्निपपात ।
अस्तशैलमधिरुह्य सदाब्धौ कोचिती स्खलति धामवतां हि ?॥३९॥
अस्तभूधरतिरोहितभानावन्धकारनिकरः प्रससार ।
एकवर्णपरिमृष्टमशेषं विष्टपं समजनिष्ट किमन्यत् ?॥ ४० ॥
शुष्कपत्रपरिकल्पिततल्पे खेदभेदनकृते शयितस्य ।
यावदेव कियती क्षणदाऽगात्तत्र तस्य मधुराकृतिभाजः ॥ ४१ ॥
स्कन्धदेशविधृतेषुधिरेकः पाणिपद्मकृतकार्मुकयष्टिः ।
तावदेव मृगयुः समियाय नीलनूतनयवाङ्कुरवेषः ॥ ४२ ॥
तस्य पार्श्वपरिवर्तनजातमर्मरैर्हरिणसंशयतोऽसौ ।
व्याध एव चरणेऽकरुणस्तं विध्यति स्म निशितेन शरेण ॥ ४३ ॥
यद्यदेव विधिनेति च जल्पन्नुत्थितो मृगयुणा धनदोऽपि ।
प्रोच्यतेति मयका हरिणस्य भ्रान्तिमाश्रितवता निहतस्त्वम् ॥४४॥
तत्सहस्व मम मन्तुमसह्यं सह्यसारनृवरेति निरूप्य ।
पत्रिणं स परिगृह्य निवृत्तोऽस्त्रं पदेऽथ निरगाद्बहु चास्य ॥४५॥
भादिरुण्डपतगेन स रुण्डभ्रान्तिमूलकरणेन तदेपः ।
उन्नमय्य जलधेरपि मध्ये द्वीपके क्वचिदमोचि जवेन ॥ ४६ ॥
सोऽपि तेन पतगेन सजीव इत्यवेत्य मुमुचे बुभुजे न ।
आससाद च निशाप्यवसानं प्रीतिभङ्गिरिव वाररमण्याः ॥ ४७ ॥
पूर्वपर्वतमहोन्नतसानुं भानुमान् समधितिष्ठति यावत् ।
अभ्यघानि तिमिरं किरणौघैस्तावदस्य पुरतः प्रसरद्भिः ॥ ४८ ॥
चद्रवे वत सहस्रमरीचौ चक्रवाकशतपत्रदिनानि ।

संमर्दं कमपि तं दधुरुच्चैर्वन्धुतैव विदिताऽजनि येन ॥ ४९ ॥
भास्करस्य रजनीदयितेन स्वौतिपं निरुपपत्तिकमेव ।
मित्रतां वदति तेन मनो मे न प्रतीतिमपि तस्य विधत्ताम् ॥ ५० ॥
संपदि श्रयति संपदभावमापदि श्रयति चापदभावम् ।
यस्य यः स कथमस्तु सुहृद्वा सत्यता न गणितागम एव ?॥ ५१ ॥
कैरवाण्यपि निशाप्रियवन्धुभावविश्रुततयैव विरोधम् ।
विभ्रते तरणिना सह तस्य नोदये विकसितं यदमीभिः ॥ ५२ ॥
वेधसा कुमुदकोशगतानि संविधाय तिमिराणि कथञ्चित् ।
रक्षितानि समुदञ्चति भानौ नास्ति वृद्धिरिह बीजमृते यत् ॥ ५३ ॥
ध्यानमीलितसरोरुहनेत्रा यामिनीविततयामचतुष्कम् ।
भृङ्गहुङ्कृतिमिषस्मरमन्त्रं पद्मिनी यदजपद्द्विजने सा ॥ ५४ ॥
तेन पुण्यपरिपाकवशेन जीवनं विमलमाश्रयमाणा ।
हंसयोगपरभागनिमित्तं सा परां सपदि निर्वृतिमाप ॥ ५५ ॥
॥ युग्मम् ॥
भास्करं समुदितं समवेक्ष्य रत्नसारतनयः समुदस्थात् ।
पादपावलिसमाकुलमेकं काननं च समवेक्षत शून्यम् ॥ ५६ ॥
वारिराशिपुलिने विपुलेऽसौ सञ्चरंश्चरणचारितयैव ।
शून्यपत्तनसमीपमुपेतः कूपकं मधुरवारिमदर्शत् ॥ ५७ ॥
तत्र पत्रपुटकं परिमाय वल्लरीविततरज्जुभिरेषः ।
सन्निकृष्य सलिलं परिपीय प्राणवृत्तिमकरोत् फलपुष्पैः ॥ ५८ ॥
अस्तमीयुपि पुनर्दिनराजे भूधरप्रवरपादतटस्थः ।
जाड्यपातचकितः शमिकाष्ठैराशुशुक्षणिमपीपतदेषः ॥ ५९ ॥
इत्थमेष रजनीमतिवाह्य प्रातरेव वसुधां शिखिदग्धाम् ।
आत्मकाञ्चनमयीं समवेक्ष्य चेतसेति परिचिन्तयति स्म ॥ ६० ॥
नूनमेष कनकाङ्कितनामा द्वीप एव भविता यदिला स्यात् ।
स्वर्णमग्निसमवायमवाप्य तत्करोमि कनकं किमपीह ॥ ६१ ॥
इत्युदारमतिरेष विमृश्य मृत्तिकाभिरवनेरपि तस्याः ।
इष्टका व्यतत संपुटरूपाः स्वीयनामकलिता लुलिताशः ॥ ६२ ॥
दारुभारखचिते ज्वलनेऽथ प्रज्वलत्यपि धृताः कनकस्य ।

भावमेव दधति स्म ततोऽन्धोः सन्निधौ बुधवरो व्यमुचत्ताः ॥६३॥
भ्राम्यता क्वचन तेन च रत्नान्यापिरे जलनिधेरपि तानि ।
कूपसन्निधिधृतार्जुनहाराऽभ्यासके निदधिरे रुचिराणि ॥ ६४ ॥
अन्यदा प्रवहणादवतीर्णैः पोतवाणिजसुदत्तनरैस्तम् ।
द्वीपमेव सलिलार्थमुपेतैः पृच्छ्यते स्म सलिलाशय एषः ॥ ६५ ॥
तेन तूर्णमुपदर्शितकूपे वारि लान्द्भिरथ तैस्तट एव ।
वीक्ष्य रत्नकनकैष्टकभारः कस्य चेति धनदोऽप्यनुयुक्तः ॥ ६६ ॥
स्वर्णमेतदपि मे खलु तस्मै तुर्यभागमहमेव ददामि ।
यस्तु मां नयति रोधसि वार्द्धेरित्यभण्यत नरान् प्रति तेन ॥ ६७ ॥
तद्वचोऽनुगमुखेन सुदत्तस्तद्यथास्थितमसौ प्रतिपद्य ।
स्वर्णलोलुपतया निजभृत्यैः कैतवेन तमपीपतदन्धौ ॥ ६८ ॥
धर्ममेव जनकं प्रणिहन्ति क्षुद्रसंश्रयतया परिभूय ।
यः कृपामपि निजां जनयित्रीं तं स्तुवन्ति सुधियः कथमर्थम् ? ॥६९॥
नीरमध्यपतितच्छदनान्तःपाततो निधनमाप न चायम् ।
ना न मृत्युमधियाति हि दैवे संप्रसेदुषि पतत्यपि वज्रे ॥ ७० ॥
रत्नहेमनिकरं स सुदत्तः सर्वमेव परिगृह्य जगाम ।
अन्तरीपमपरं न परस्वग्राहिणां क्वचन जातु समाधिः ॥ ७१ ॥
वृत्तसंगतमसावपि चार्थं चिन्तयन्नवटभित्तितटान्तः ।
द्वारमक्षिपथमाप्य तृणौघैर्मन्दमन्दमविशत्पिहितं तत् ॥ ७२ ॥
ग्रावबद्धपदमानपदव्या सोऽवतीर्य शनकैरपि तत्र ।
शून्यपत्तनमवैक्षत रम्यं देवसद्मसुषमारमणीयम् ॥ ७३ ॥
चित्तरागमुपरागसमेते चारुचित्रमकरन्दरसाढ्ये ।
पुण्डरीकमनुकुर्वति लक्ष्म्या यत्र दृष्टिमधुपी विनिविष्टा ॥ ७४ ॥
कालिमानमपनेतुमिवान्तःस्थायिनं कलयितुं स्थिरतां वा ।
ईदृशं क्वचन किञ्चन रम्यं नात्र भाति वसुधासरसीह ॥ ७५ ॥
पुण्यमन्त्रपरिपाकवशेन स्तम्भिता निगडिता किमु बद्धा ?।
कुर्वती मतिमतामिति तर्कं नेहते स्म परमीक्षितुमेव ॥ ७६ ॥

॥ त्रिभिर्विशेषकम् ॥

एष वीक्ष्य तदवीक्षितपूर्वं संमदस्फुरितदृग् हृदि दध्यौ ।

पुण्यबद्धमनसां पुरुषाणां राशिरेष यशसां किमुदीर्णः ?॥ ७७ ॥
शारदाभ्रनिकरानवलम्बे व्योमनि स्थितिविधावसमर्थः ।
भूमिमण्डलगतः किमयं वा कौमुदीसमुदयः किमुदञ्चन् ?॥ ७८ ॥
चिन्तयन्निति स मण्डपमापत्तत्र च स्थितिमयं विदधानः ।
सुप्रभावविदितामथ चक्रेद्देवतां नयनमार्गमनैषीत् ॥ ७९ ॥
तां विनम्य विनयादरपूर्वं नाकनायकनिकायविनम्याम् ।
योजिताञ्जलिपुटः स्तवमस्याः कर्तुमप्ययमुपक्रमते स्म ॥ ८० ॥
भारती भगवती भवतीह ख्यातिमागतवती गुरुवाचा ।
बिभ्रती सुभगतां विगतांशां त्वं जगज्जननि ! हैमवतीति ॥ ८१ ॥
त्वं पुनः कमलमाश्रयमाणा विश्रुतात्र कमला विमलात्मा ।
सर्वकामफलदानविधानान्मातरस्यनुपमा कुरुकुल्या ॥ ८२ ॥
क्रीडयैव धरणोरगराजं संश्रिता त्वमसि किं न न पद्मा ?।
चक्रमात्मकरपङ्कज एव स्थापयन्त्यपि च चक्रधरा त्वम् ॥ ८३ ॥
श्रीयुगादिजिनशासनभक्ता विघ्नवारविनिवारणशक्ता ।
देवतासु सकलास्वपि चक्रेश्वर्यपि त्वदपरा न परास्ति ॥ ८४ ॥
तावदापदमुपैति मनुष्यो दुर्भगत्वमपि विन्दति तावत् ।
दुःस्थतां समधिगच्छति तावद्यावदाचरति देवि ! न तेऽर्चाम् ॥८५॥
आन्तराणि करणानि नराणां न स्वरूपमवधारयितुं ते ।
विस्फुरन्ति धिषणा धिषणानां बोधवारिधुतकर्ममलानि ॥ ८६ ॥
कामधेनुमपि कामितलब्ध्यै कल्पवल्लिमपि वेल्लितपापः ।
प्रार्थये न भवतीमपहाय स्वामिनि ! प्रणतदुःखनिहन्त्रि ! ॥ ८७ ॥
आश्रये विकचचम्पकचञ्चत्पुष्पदामकमनीयशरीराम् ।
आधिधूननविधौ विबुधानां वन्दनीयचरणां मनसा त्वाम् ॥ ८८ ॥
इत्थमादरपरः स्तुतिमेतां यावदेव विरचय्य स तस्थौ ।
तावदेव मुदिता हृदि देवी रत्नपञ्चकमदादियमस्मै ॥ ८९ ॥
आद्यमापदपसारणकर्म श्रीविलासकरणं च ततोऽन्यत् ।
द्वन्द्वमस्ति विपदुर्भगताभिद्रोगभङ्गकुशलं खलु शेषम् ॥ ९० ॥
रत्नपञ्चकमहामहिमानं श्रोत्रमार्गमवतार्य स देव्याः ।
जङ्घिकां छुरिकयैव विदार्य स्वां न्यधीविशदिदं च तदन्तः ॥९१॥

भेषजैरुपचितां निजजङ्घां स प्रणीय पटुबुद्धिनिधानम् ।
यन्नगप्रमुबलो नगरान्ता राजमन्दिरमुदैक्षत राजत् ॥ ९२ ॥
तत्र चित्रवति सप्तमभूमिस्थायिनीं नयनयोर्विषयं सः ।
चित्तसंमदकरीं नयति स्म क्षीरनीरधिसुतामिव कन्याम् ॥ ९३ ॥
एणनाभिधृतपत्रकमस्या यन्मुखं कमलराजिमजैषीत् ।
तद्भुवं द्विजपतिः प्रपलाय्य व्योम केवलमशिश्रियदेषः ॥ ९४ ॥
अङ्गचङ्गिमरुचिर्मयकास्या नो मनागपि हृतेत्यधुनापि ।
स्वस्य शुद्धिविधये ज्वलनान्तःकाञ्चनं विशति विश्वसमक्षम् ॥ ९५ ॥
एतदीक्षणयुगेन कुरङ्गी लोचने नु विजिते निजकीये ।
संविमृश्य वनवासमयासीद्दुःसहः परिभवो हि जगत्याम् ॥ ९६ ॥
रूपधेयमवलोक्य यदस्या लज्जितैव कमला निममज्ज ।
सागरप्रमथने परिक्लृप्ते सोन्ममज्ज दिविपद्भिरशेषैः ॥ ९७ ॥
नास्यमेतदलिकस्य पुरस्तादर्धचन्द्रपरिकल्पनमिन्दोः ।
अष्टमीशशिनमारचयंस्तं स्वाभिसन्धिमकरोद्विधिशिल्पी ॥ ९८ ॥
वर्णयन्निति समीपमुपेतः सत्कृतः समुचितप्रतिपत्त्या ।
अभ्यधायि स तया किमिहागा भद्र ! दैवविमुखः सुमुख ! त्वम् ? ॥ ९९ ॥
चन्द्रसुन्दरमुखि ! त्वमपीदं साध्वसाप्लुतवचः स किमात्थ ?।
सा जगाद भरतेऽत्र समृद्धं श्रीचितं तिलकपत्तनमस्ति ॥ १०० ॥
ऋद्धिसंहतिनिरस्तमहेन्द्रस्तत्र भूपतिरभूत्स महेन्द्रः ।
नैव यः कृपणतां स्पृशति स्म दातृराड् परवधूमिव जातु ॥ १०१ ॥
तद्विपद्भिरपरैःसुरसूयासूचितैः पुरमरोधि वलौघैः ।
वारिदैरिव विकर्त्तनबिम्बं शारदैर्विहितगर्जितघोरैः ॥ १०२ ॥
तं तदा वसुमतीशतमन्युं व्यन्तरोऽभ्यधित कोऽपि सुपर्वा ।
पूर्वजन्मसुहृदस्मि तवाहं वारिवाह इव तापनिहन्ता ॥ १०३ ॥
भूभुजापि कथमित्यनुयुक्ते व्यन्तरः प्रणिजगाद सहर्षम् ।
दक्षिणार्धभरतावनिवामाभूषणं जयति चन्द्रपुरं तत् ॥ १०४ ॥
रक्षति स्म किल चन्द्रयशास्तत्पत्तनं वसुमतीहृदयेशः ।
खेचरीभिरुदगीयत यस्य व्योम्नि विक्रमकथा दयितेषु ॥ १०५ ॥
राजराज इतिशब्दमुवाह भूतनायकसखः स कुबेरः ।

यत्र शासति परं क्षितिचक्रं चक्रपाणिममधिक्रमधाम्नि ॥१०६॥
सा बभूव दयिता शशिकान्ता नाम तस्य जलधेरिव गङ्गा।
शीलमुज्ज्वलमवर्णयदिन्द्रः प्रेयसीषु निखिलास्वपि यस्याः ॥१०७॥
तत्र केलिसदनं करुणाया दीनदौस्थ्यविनिबर्हणकर्मा ।
वाणिजो निवसति स्म जिनेन्द्रोपासनाप्रवणहृज्जिनदत्तः ॥१०८॥
शङ्खदत्त इतिनाम वयस्यस्तस्य शङ्ख इव गौरगुणोऽभूत्।
साधुशब्दवसतिः कुटिलत्वं नो बभार हृदि यो वणिजोऽपि ॥१०९॥
हट्टविष्टरनिविष्टमदुष्टं शङ्खदत्तमपरेद्युरुपेत्य ।
कोऽपि तस्करवरोऽतिमहार्घं रत्नमेकमुपदर्शयति स्म ॥११०॥
मूल्यमस्य वणिजाऽप्यनुयुक्तस्तस्करः प्रवदति स्म स तेन।
किञ्चनापि यदिदं लभसे द्राक् साधुरत्न! मम यच्छ तदेव ॥१११॥
दस्युमेतमनवेत्य स चापि मुग्धमेव कलयन् कलयापि।
संमदेन कनकस्य सहस्राण्यर्पयद्दश तदैव धनाढ्यः ॥११२॥
यावदेव नगरे स नु तत्र स्वेच्छयैव वसु तद्विललास ।
तावदेव नृपतेरधनोऽन्यः कोऽपि कोशमपि लुण्टयति स्म ॥११३॥
तद्गवेषणकृते भ्रमतैवारक्षकेण निखिले नगरेऽपि ।
स व्ययन् समवलोक्य धनानि तद्भ्रमेण विनिबन्धित एव ॥११४॥
सर्वमर्पितमनेन च लोप्त्रं दस्युना निबिडताडनभीत्या।
प्रत्यपादि पुररक्षितुरग्रे शङ्खदत्तवणिजस्य च वृत्तम् ॥११५॥
तत्स्वरूपमधिगम्य नृपेणारक्षकादथ वणिग्विधृतोऽपि ।
श्रावकस्य जिनदत्तमहेभ्यस्याग्रहेण मुमुचे स इतश्च ॥११६॥
सोमराज इति तत्र कुटुम्बी न्यायवित्तपरिपोष्यकुटुम्बः।
रुक्मिणी प्रियतमाजनि तस्य रुक्मिणीव सुभगत्वमहर्द्धा ॥११७॥
रेवणाख्यपुरुषे मनसः सावस्थितिं व्यधित भर्तृविरागा ।
विश्रुता चपलता चपलाया वस्तुतः स्फुरति सा वनितानाम् ॥११८॥
तत्प्रियोऽप्युपपतिं विबुभुत्सुर्गुप्त एव तदनुभ्रमति स्म।
सापरेद्युरुपसूचितमेका शून्यदेवकुलमैदविलम्बम् ॥११९॥
व्यग्रतां कचन कर्मणि बिभ्रद्रेवणोऽहनि न तत्र समागात्।
तत्र देवमभिवन्दितुकामः शङ्ख एव स तदा प्रविवेश ॥१२०॥

रुक्मिणीपतिरवेक्ष्य विशन्तं तत्र तं स रहसि स्थित एव ।
स्वप्रियोपपतिशङ्कितचेताः संविधूल्य नयति स्म नृपान्तम् ॥ १२१ ॥
विज्ञपय्य नृपतिं जिनदत्तो भूय एनमपि मोचयति स्म ।
तापसस्य सविधे स तपस्यामग्रहीद्भवपराभवशङ्की ॥ १२२ ॥
संविधाय वनवालतपांसि स्वायुषः स निधनं प्रतिपद्य ।
व्यन्तरत्वमनुभूय भवं च व्यन्तरोऽहमभवं पुनरेव ॥ १२३ ॥
आर्हतः स परमो जिनदत्तः स्वर्गमाद्यमधिगम्य ततश्च ।
विच्युतो नृप ! भवानपि जज्ञे तेन मैत्र्यपदमस्मि तवाहम् ॥ १२४ ॥
ये त्वया विरचिता उपकारास्तानहं गणयितुं कथमीशः ? ।
काञ्चनक्षितिधरस्य सुवर्णं कः प्रभुस्तुलयितुं यदि वा स्यात् ?॥१२५॥
मोचितो नरपतेर्भवताऽहं यद् द्विरस्मि तदिदं हृदयं मे ।
सर्वदा न विजहाति ततस्त्वं कृत्यमादिश किमप्युचितं मे ? ॥१२६॥
उत्तमा उपकृतेर्निरपेक्षाः संभवन्त्युपकृतीरपि कृत्वा ।
वर्धुको जलधरोऽमृतवृष्टिमादधत्किमपि वाञ्छति किं वा ? ॥१२७॥
मां तथाऽप्यनृणमाचर राजन् ! स्वेप्सितप्रथनताविनियुक्त्या ।
क्वापि न प्रतिहता खलु शक्तिर्व्यन्तरस्य करणीयपरस्य ॥ १२८ ॥
एवमस्य वचनं विनिशम्य क्षोणिनायकवरः स बभाषे ।
त्वत्प्रसादगरुडादरिनागा मत्पुरं परिभवन्ति यथा न ॥ १२९ ॥
व्यन्तरामर ! विधेहि तथा त्वमागमं सफलयन्निजमेव ।
इत्युदारवचसाऽवनिभर्तुः सोऽत्र पत्तनमिदं निरमामीत् ॥ १३० ॥
संप्रवेशनविनिर्गमनाभ्यां युक्तमन्धुविनिबन्धलसद्वाः ।
न स्वचक्रपरचक्रभयाभ्यां संश्रितं जितमहेन्द्रपुरश्रि ॥ १३१ ॥
सक्रयाणकततिर्विषयेभ्योऽभ्यागमत्प्रवहणैरपरेभ्यः ।
श्रीयुगादिजिनराज्यवदस्मिन्भिक्षुकस्य विदितं न च नाम ॥ १३२ ॥
अध्युवास सकलैः सह पौरैर्भूपतिस्तदिदमेव सुखाय ।
इत्यतुल्यमुपकृत्य नृपाय व्यन्तरः स निजधाम जगाम ॥ १३३ ॥
वत्सरेष्वतिपतत्सु मुदैव पौरकल्मपसमुच्छ्रयनुन्नः ।
कोऽपि मर्त्यपिशिताशनविद्याभृत् समागमदिहानुपमौजाः ॥ १३४ ॥
सेन पौरनिकुरम्बमशेषं प्राणवृत्तिमुपकल्पयतैव ।

प्रस्तमेतदुभयोरपि पुर्योर्नष्टमन्यदविनष्टवलं च ॥ १३५ ॥
कन्यकाऽहमपि भूपुरुहूतस्याख्यया तिलकसुन्दरिकेति ।
सप्तमेऽह्नि भणिताऽहमतोऽहः कौणपेन शृणु सुन्दरि ! किञ्चित् ॥१३६॥
रत्नसञ्चयपुरे किल वैताढ्यादिमण्डनमणौ समभूवम् ।
भूपतिः पवनवेग इतीड्यो मर्त्यजाङ्गलरतिः क्रमतोऽहम् ॥ १३७ ॥
यातुधानकुलसंप्रतिपन्नं कर्म तद्विरचयन् सचिवार्यैः ।
त्याजितो नृपपदं छलवृत्त्या विभ्रमंस्तव पितुः पुरमागाम् ॥ १३८ ॥
त्यक्तवानहमशेषर्भवतीं यत्तेन विद्धि नियतं परिणेता ।
इत्युदीर्य स जगाम च सम्प्रत्यागमिष्यति गमी निरयान्तः ॥ १३९ ॥
तत्प्रयाहि परिहाय विलम्बं जीवितं निजमवेति कुमार्या ।
व्याहृतः प्रवदति स्म स भीतिं मा कृथास्तमहमद्य निहन्मि ॥१४०॥
साऽप्युवाच हृषिताखिलरोमा यद्यवश्यमिदमाचरितासि ।
देवतार्चनमसौ विदधानस्तत्र वक्ति गदितोऽपि मघोना ॥ १४१ ॥
मत्समर्पितपितुर्निशितासिप्रेरणान्निधनमापय चैनम् ।
जल्पतोरिति तयोरविशङ्कमाययौ स लघुखेचरपाशः ॥ १४२ ॥
आपतन्तमवलोक्य तमारात्तस्थिवान् स धनदोऽपि निलीय ।
खेचरोऽप्युपविवेश स विद्यादेवतार्चनचिकीः शुचिदेहः ॥ १४३ ॥
वालिकाऽर्पितमसौ करवालं धारयन् करसरोरुहमध्ये ।
तर्जयंस्तमिदमभ्यधितारे ! तिष्ठ तिष्ठ शठ ! रे ! क नु गन्ता ?॥१४४॥
भाषितोऽपि मुहुरुद्धतमेवं जोषमास्थित कृतार्चनकृत्यः ।
यावदेव शनकैः स उदस्थात्तेन तावदसिना विनिजघ्ने ॥ १४५ ॥
पाणिपीडनविधिस्थितिहेतोराहृतोपकरणैरपि तस्य ।
भूमिपालतनयां धनदोऽथ सानुरागहृदयामुपयेमे ॥ १४६ ॥
किञ्चिदत्र समयं सुरसमः कान्तया सह तया गमयित्वा ।
पूर्महार्घ्यतमरत्नसमेतः कूपमार्गमभिसृत्य स तस्थौ ॥ १४७ ॥
यावदागमयते स तु तत्र पूरुषान् परमपौरुषभाजः ।
तावदेव कतिचित्समुपेता न्यक्षिपन् सलिलभाजनमन्धौ ॥ १४८ ॥
रज्जुचालनवशादवबुध्य स्त्रीसखं पुरुषमेव निरीक्ष्य ।
तत्स्वरूपमवगम्य च देवदत्तपोतवणिजे जगदुस्ते ॥ १४९ ॥

सोऽपि विस्मयपरिप्लुतचेतास्तत्क्षणादनुचरैः सममेत्य ।
स्वापतेयदयितायुतमन्धोर्मध्यकेन निरजीगमदेनम् ॥१५०॥
सप्रियं स तमवेक्ष्य स्वरूपं विस्मितः स्मितपुरस्सरमूचे ।
ईदृशस्त्वमुपमातिगमूर्तिः सन्मते ! निपतितः कथमन्धौ ? ॥ १५१ ॥
तन्निशम्य स बभाण सधैर्यं भग्नपोतविभवोऽन्धुसमीपे ।
तीरमाप्य फलकेन कथञ्चिन्नीरमत्र च निरैक्षिषि पश्यन् ॥ १५२ ॥
एषिकाऽतितृषिता जलमिच्छुः कूप एव निपपात जवेन ।
नैव निर्गमयितुं प्रभुरेतां पृष्ठ एव निपपात तदस्याः ॥ १५३ ॥
रत्नमुख्यमखिलं न्यतरन्मे संप्ररूढकृपया जलदेवी ।
सात्त्विकस्य पुरुषस्य हि वृद्ध्या देवता हृदि वहन्ति समाधिम् ॥१५४॥
कान्तया सह षडंशगृहीत्या यानपात्रमधिरोपित एषः ।
भाटकं कपटलम्पटचित्ताः कस्य लान्ति वणिजो न हि लोके ?॥१५५॥
अन्तरम्बुनिधि गच्छति पोते देहचिन्तनविधौ विनिविष्टम् ।
तत्प्रियाहृतमना धनदं सोऽक्षेपयज्जलनिधौ वणिगीशः ॥ १५६ ॥
कापथे पदनिवेशनसक्तं व्यक्तमेव परियाति विवेकः ।
मानसं दहति मन्मथवह्नौ स क तिष्ठतु निराश्रयवृत्तिः ? ॥ १५७ ॥
पूर्वमस्य वसु तादृशमिद्धं दापयत्यपथ एव पदानि ।
सा शशाङ्कवदना परिदृष्टा तत्खलो नृपतिसंपदमाप ॥ १५८ ॥
अन्यदा प्रवहणाधिपतिस्तां शोकशङ्कुमपनेतुमिवासौ ।
ऊचिवांश्चटुवचोभिरधीरां मा वृथा हृदि कृथाः परिखेदम् ॥ १५९ ॥
आससाद नियतेरपमृत्युं तावकः स पतिरत्र न शोकः ॥
तत्पदे सुतनु ! मामभिषिञ्च येन शर्म सकलं सुलभं स्यात् ॥ १६० ॥
दुष्कृतप्रवणमेव तदीयं चेष्टितं समवधार्य हृदन्तः ।
साऽभ्यधत्त यदि भद्र ! नृपस्ते मां प्रदास्यति तदा तव जाया ॥१६१॥
सङ्कटे निपातिता विधियोगात् प्रार्थयन्तमपरं पुरुषं वा ।
विप्रतार्य परिरक्षति शीलं काचनापि निजवंशपताका ॥ १६२ ॥
पूर्वपुण्यपरिपाकफलेन रत्नसारतनयः फलकेन ।
प्रेरितेन मरुता निजवृत्तं संस्मरञ्जलधितीरमभीतः ॥ १६३ ॥
तत्र दत्तनयनः परिपश्यंश्चैत्यराजिकलितं स्वपुरं तत् ।

लक्षणैरविकलैरुपलक्ष्य यावदेव मुदितः स बभूव ॥ १६४ ॥
संप्रसारितमुखस्तिमिरेतं तावदेव सहसा ग्रसते स्म ।
साकमेव फलकेन मनुष्यो नागवल्लिदलकैः क्रमुकं च ॥ १६५ ॥
रत्नमत्सरदसौ विनिहन्तुमापदं तदपि वृत्तमभीष्टम् ।
मारुतोत्थिततरङ्गविनुन्नस्तीरमाप स तदैव तिमिश्च ॥ १६६ ॥
वीक्ष्य तं सपदि धीवरषण्ठाः पाणिसंचितकठोरकुठाराः ।
धाविता जठरदारणपूर्वं जघ्नुरेप निरगाच्च यथास्यः ॥ १६७ ॥
विस्मितास्तदवलोकनतस्ते तत्क्षणान्निधिविलोकनवत् तम् ।
हृद्यमान्तमिव वेत्रिमुखेन क्ष्माभुजे निजभियैव शशंसुः ॥ १६८ ॥
भूभुजा कनकपूर्वरथेनाह्वाय्य निर्मलकुलादि स पृष्टः ।
स्वं जगौ वणिजमेव नरेन्द्रस्याग्रतोऽवितथमेव हि भाष्यम् ॥ १६९ ॥
आतपत्रतल एव नृपेण स्नापितः शुचिभिरम्बुभिरुष्णैः ।
संमदेन पुनरप्यनुयुक्तः कामितं स्वमनसः कथयेति ॥ १७० ॥
संस्मरन् सुभगताकृति रत्नं योजिताञ्जलिरसौ वदति स्म ।
मां स्वगीधरामिनस्तनुतां, स्यां येन सन्निहित एव हितो वः ॥ १७१ ॥
तं तथैव स वितत्य च मत्स्योदरसंज्ञकमथाह्वत राजा ।
संज्ञया स विदितः स्वकयाऽस्माद्भूपतेः सविधवर्त्यपि नित्यम् ॥ १७२ ॥
शूलभृत्पशुपतिः स कपाली स्थाणुरुद्रविषमेक्षणवाच्यः ।
राजसंश्रयवशादिह जज्ञे किं न नाम महितः स महेशः ? ॥ १७३ ॥
स क्रमादथ महेभ्यसुदत्तो ज्ञापितः प्रथममेव नियुक्तैः ।
आगतः क्षितिपतिं प्रणिपत्तुं तेन तूर्णमुपलक्षित एषः ॥ १७४ ॥
न्यायायन्नारकतस्य विशालस्थालमामलकमौक्तिकपूर्णम् ।
अग्रतोऽवनिपतेः स इतीव द्वेषिणामयशसामुपरिष्टात् ॥ १७५ ॥
सङ्गराङ्गणपलायिचराणां शारदेन्दुकरनिर्मलधाम ।
तावकं स्फुरति देव ! यशोऽदः सर्वतः समुदितं भुवनान्तः ॥ १७६ ॥
(युग्मम्)
पादपास्तव सुमानि ददन्ते मौक्तिकानि जलराशय एते ।
भूभृतोऽपि मणिसंचयमर्हं वाणिजोऽपि विपुलानि धनानि ॥ १७७ ॥
अर्धशुल्कमकरोन्नृपतिस्तं शुक्लकीर्तिपरिवीतदिगन्तः ।

कल्कपूरितमना मनसीदं सोऽप्यचिन्तयदचेतनरूपः ॥ १७८ ॥
हा स्वर्गीभृदसकाववटान्तःक्षिप्तमानुपसमाकृतिधर्मः ।
दृश्यते तदिह किं स भवेद्वा बुध्यते विलसितं न विधातुः?॥ १७९ ॥
संविमृश्य मनसेति स किञ्चिद्वैरिणं सविधभाजमपृच्छत् ।
किं स्वर्गीभृदवनीशिसुराद्यो नूतनः किमयमत्र निविष्टः ? ॥ १८० ॥
तत्प्रवृत्तिमवगम्य यथार्थां तन्मुखादधृतिमान्स सुदत्तः ।
तज्जिघांसनधिया नृपमानोन्मत्तगीतरतिगायनमूचे ॥ १८१ ॥
राद्‌स्वर्गीभृदतिगायन ! वाच्यः सोदरेति भवता मदरिः सः ।
इष्टकाश्च कनकस्य चतस्रः पूर्वमेव भवतो वितरामि ॥ १८२ ॥
स प्रमाणमिति वाचमुदीर्य्य प्राप्य काञ्चनमुदीरितपूर्वम् ।
बीटकं वितरतः श्वपचोऽसौ प्रातरेव लगति स्म गलेऽस्य ॥ १८३ ॥
वीक्षितोऽसि सुचिरेण मया हा भ्रातरित्यभिदधत्स रुरोद ।
आदिदेश नृपतिः कुपितस्तं वध्यमेव स ततः सुविचित्तः ॥ १८४ ॥
अब्रवीद्वनद एव ततश्चारक्षकं श्वपच एव भवामि ।
यद्यपि त्वमभिधेहि तथापि क्ष्मापतेः पुरत एव मदुक्तम् ॥ १८५ ॥
किञ्चिदेव भवतां पुरतोऽसौ भूमिपाल ! धनदोऽस्ति विचक्षुः ।
एतदेव विनिशम्य नृपेणाकारितोऽभ्यधित सोऽपि सुबुद्धिः ॥ १८६ ॥
राद्‌प्रसादसदनं जनको मे गायनः समभवन्नृपतेऽत्र ।
द्वे स्त्रियावभवतामपि तस्यैका प्रसूर्मम तयोरपराऽस्य ॥ १८७ ॥
आप्रिया मम परं जनयित्री किञ्चनापि समजायत वस्तुः ।
रत्नपञ्चकमदत्त च योगक्षेमभावविधये जनको मे ॥ १८८ ॥
प्रेयसीतनुभुवे पुनरस्मै नैकधा मणिगणं तिमिरघ्नम् ।
इत्युदीर्य्य स विदार्य च जङ्घां स्वामदीदृशदिलापतये तत् ॥ १८९ ॥
अभ्यधाच्च नरदेव ! वपुष्यस्यापि रत्ननिकरोऽस्त्यसिलाङ्के ।
तद्विदारयितुमेव नियुक्तैः पातितो झगिति गीतरतिः सः ॥ १९० ॥
अन्तकस्य रसनामिव पश्यन् शस्त्रिकां भयविकम्प्रशरीरः ।
निर्जिह्वानमिव जीवितमिङ्गैस्तथ्यमेव स चभाण नृपाग्रे ॥ १९१ ॥
(युग्मम्)
तेन दत्तमथ तत्क्षणमेवानाययत्तदपि भर्म स सर्वम् ।

प्रस्तुते हि सदसत्त्वविचारे भूभुजां न खलु कालविलम्बः ॥ १९२ ॥
तद्विलोक्य धनदोऽवददेवं मामकं नरपते ! सममेतत् ।
सम्पुटेऽत्र कनकेष्टकरूपे नाम मध्यगतमस्ति च यन्मे ॥ १९३ ॥
पाटिते झटिति राजनिदेशात्सम्पुटे पटुभिराश्रितभृत्यैः ।
तत्तथैव समवेक्ष्य नरेशो विस्मितः स्मितमुखः स बभूव ॥ १९४ ॥
सुप्रसन्नमवलोक्य तमीशं श्रेष्ठिसूः पुनरुदीरयति स्म ।
श्रेष्ठिनः प्रवहणेऽष्टशती मे पादयुक् कनकसम्पुटकानाम् ॥ १९५ ॥
अस्ति शस्तमिह सार्धसहस्रं रुक्सहस्रकरजेत् मणीनाम् ।
युक्तमत्र यदपि प्रतिभाति तत्प्रसद्य कुरुतां प्रभुरेव ॥ १९६ ॥
(युग्मम्)

तत्सुदत्तवणिजोऽखिलमेवानाय्य भूपतिरवेक्ष्य च सत्यम् ।
सर्वमेव परिगृह्य च वध्यावादिशत् समुचितावथ तौ सः ॥ १९७ ॥
स स्वगीर्भृदपि भूपतिमेवं मङ्क्षु विज्ञपयति स्म सुविज्ञम् ।
मुञ्चतु प्रभुरिमौ कृतकृत्यौ तद्गिरा व्यमुचदेव स हृष्टः ॥ १९८ ॥
तुर्यभागमुपलभ्य गतेऽस्मिन् रैजलैर्नृपतिना स्नपितोऽसौ ।
मानितो रहसि मूलरहस्यं पृच्छयते स्म शपथानुपहृत्य ॥ १९९ ॥
तावकीनपुरसत्तमसाररत्नसारतनयो धनदोऽस्मि ।
वृत्तमुख्यझपवक्त्रनिपातप्रान्तवृत्तचरितं स जगौ स्वम् ॥ २०० ॥
तद्विभो ! सदयितोऽत्र स देवदत्तपोतवणिगेति न यावत् ।
तावदेतदखिलं हृदि धार्य वन्दितास्मि जनकं च ततश्च ॥ २०१ ॥
श्रीमहेन्द्रनृपनन्दनयाऽमा देवदत्तवणिजोऽपि समेतः ।
उत्तमं प्रवहणं परिपूर्य द्वैप्यवस्तुनिवहैः शतमूल्यैः ॥ २०२ ॥
प्राभृतं निभृतमेव महार्घं चित्तचौर्यचतुरं नृपतीनाम् ।
संनिवेश्य तकया सह पाणौ द्वास्थभूमिमवलम्ब्य निविष्टः ॥२०३ ॥
देवदत्त इति नाम महेभ्यो वाहनादुपगतोऽत्र दिदृक्षुः ।
त्वामुपागमदिति प्रतियुक्तैः शंसितः स नृपतिं प्रणनाम ॥ २०४ ॥
(त्रिभिर्विशेषकम्)

---

१ पञ्चविंशत्यधिकाऽष्टशतीत्यर्थः । २ यथेव विधिना लिङ्गितमित्येवंरूपम् ।
३ शब्दभेदप्रकारात्स्थावारान्तत्वमत्र ।

संज्ञया धनद एव तटस्थोऽज्ञापयत्तमपि तां च नृपाय ।
भूपतिर्विरचयन्नवहित्थां वक्तुमारभत तेन यथेच्छम् ॥ २०५ ॥
आगतो ननु कुतस्त्वमसीह केयमावृतमुखी गुरुलज्जा ? ।
किंनिमित्तमिह राजकुले वा नीयते स्म भवता सममेव ? ॥२०६॥
एवमुक्तवति मानवदेवे देवदत्तवणिजोऽपि जगाद ।
आयता प्रतिनिवृत्य कटाहद्वीपतः क्षितिपते ! मयकेयम् ॥ २०७ ॥
प्राप्यगाधपरिखायितवार्धिद्वीपमध्यपतिता पुनरेका ।
स्वामिशासनमवाप्य दुरापं मत्प्रिया भवति देव ! ततोऽसौ ॥ २०८ ॥
(युग्मम्)
इत्युदीर्य्य विरतेऽपरतन्त्रा तत्र सा प्रवदति स्म मृगाक्षी ।
नाथ ! जल्पति मृषाऽयमशेषं त्वय्यपि प्रभवति क्षतसीमः ॥ २०९ ॥
पातितो मम पतिर्जलराशौ दुष्कृतं कृतवता तदनेन ।
शीलभङ्गभयतोऽहमकार्षं राजशासनसदुत्तरमस्य ॥२१०॥
भूषयन्त्यखिलमेव शरीरं भूषणानि मणिहेममयानि ।
आदधाति नु कुलद्वयभूषां शीलमाभरणमात्मगतं सत् ॥ २११ ॥
साम्प्रतं विरचयेर्यदि तातो दारुभारनिचितां नु चितां तत् ।
जातवेदसमवाप्य सहायं जीवितेशमनुयामि महीश ! ॥ २१२ ॥
तत्त्वमान्तरमिदं यदि, तत्त्वं पुत्रिकेव मम सद्मनि तिष्ठ ।
धर्म्यकर्मरचना रुचिराऽत्र दुर्लभं मनुजजन्म यदेतत् ॥ २१३ ॥
किञ्च पश्य मुखचन्द्रमुदञ्च्य त्वं स्वगीधरमिमं मम वत्से ! ।
आकृतिं प्रियतमस्य भवत्या किं परिस्पृशति नो कलयायम् ?॥ २१४ ॥
साऽब्रवीन्मम पतिः पतिभक्ता पातितो विषमनक्रभृतेऽब्धौ ।
आगमत् कथमिहापरमीश ! प्रायशः कति समा न भवेयुः ?॥२१५॥
तां तदेकपतिकामवधृत्याज्ञापितः क्षितिभुजा धनदोऽयम् ।
भूतरङ्गपरिपालनतोऽथ व्याहरत्स्मितविराजितवक्त्रः ॥ २१६ ॥
सोऽवनीश्वर ! भवेत् पतिरस्याः श्वभ्रसौधशिखरस्थितिमेताम् ।
एतदात्तकरवाल्बलेनाहृत्य खेचरमुपायत यश्च ॥ २१७ ॥
स्वानुभूतमिति चानु तदीयं व्याजहार धनदः शुचि वृत्तम् ।
साऽवगुण्ठनमपास्य विलोक्य स्वं पतिं प्रमदमापदनन्तम् ॥ २१८ ॥

देवदत्तवणिजं विनिबद्धं भूपतेरथ विमोच्य कथञ्चित् ।
सचकार निजवित्तपडंशस्पर्शनात् स धनदत्तरिताख्यः ॥ २१९ ॥
सज्जना विरचयन्त्युपकारं दुर्जनस्य विहितेऽप्यपकारे ।
छिन्नघृष्टमथवा परितापं किं न चन्दनमपास्यति पुंसाम् ? ॥२२०॥

अथ कनकरथस्य क्षोणिशक्रस्य वाक्या–
जनकगृहमयासीत्पादचारेण सोऽपि ।
चिरपरिचययोगाल्लक्षणैर्लक्षयित्वा
प्रणतमपि पिता तं हर्षतोऽप्यालिलिङ्ग ॥ २२१ ॥

दिष्ट्या वत्स ! निरीक्षितोऽसि मयका जीवंश्चिराय स्वयं
प्राणान् धारयता निमित्तविदुरज्योतिर्विदां वाक्यतः ।
कुत्रास्थाः किमुपार्जयो विषयमद्राक्षीः कमित्यादरा-
त्पृष्टोऽसौ जनकेन तं तमखिलं वृत्तान्तमाख्यन्मुदा ॥२२२॥

एकाकी निरगादयं निजगृहात्कश्चित्सहायोऽपि न
द्रष्टा नाप्युपवर्तनस्य न परिच्छेत्ता पुनः कस्यचित् ? ।
स्वर्णद्वीपमवाप्य तादृशमहो ! यत्स्वर्णमप्यार्जय-
द्राजानं रमयन् गुणान्विवृणुते तत्पुण्यविस्फूर्जितम् ॥२२३॥

मत्वैवं रत्नसारः प्रमुदितहृदयः साररत्नोपदाभि-
र्विज्ञप्य क्षोणिपालं तनयमथ निजं वाहने मर्त्यवाह्ये ।
आरोह्यामैव बध्वा सह नगरजनैः सेन्दिरे मन्दिरे तं
नीत्वा वर्द्धापनं स व्यरचयदसमं स्वस्य कल्याणमिच्छुः॥२२४॥

आसीच्छ्रीगुरुगच्छमौलिमुकुटश्रीमानभद्रप्रभोः
पट्टे श्रीगुणभद्रसूरिसुगुरुर्विज्ञानभाजां गुरुः ।
तच्छिष्येण कृतेऽत्र षोडशजिनार्धीशस्य वृत्ते महा-
काव्ये श्रीमुनिभद्रसूरिकविना सर्गोऽत्र षष्ठोऽगमत् ॥२२५॥

॥ इति श्रीशान्तिनाथचरिते षष्ठः सर्गः ॥



अर्हम्

अथ सप्तमः सर्गः ।

यस्य दर्शनमवाप्य योगिनो योगमेव सफलं विजानते ।
दुष्टकर्मविनिबर्हणक्षमः शान्तिरस्तु भवतां शुभाय सः ॥ १ ॥
साऽथ कान्तधनदोपदेशतः प्राणमत्तिलकसुन्दरी वधूः ।
रत्नसारचरणाम्बुजद्वयं सेवितं किमपि रत्नचूलया ॥ २ ॥
तौ समीक्ष्य विनयोज्ज्वलामिमां हर्षमेव विभराम्बभूवतुः ।
मानमे द्रमकदम्पती ज्वलत्स्वर्णरत्नखचितं निधिं यथा ॥ ३ ॥
सा बभार गृहभारमात्मनाऽऽवर्जयन्त्यपि कुटुम्बपेटकम् ।
धर्म्यकर्मणि मनः समाहितौ तौ च बिभ्रतुरपेतविभ्रमौ ॥ ४ ॥
कान्तया सह तया समाश्रयत्सोऽथ शर्म धनदो धनेश्वरः ।
कामकेलिजनितं हि यौवने मुख्यमेतदुपचारतोऽपरम् ॥ ५ ॥
भर्तृसङ्गमुपलभ्य भाविनी दुःखमेव न वियोगसंभवम् ।
साऽध्यगात्कुमुदिनीव कौमुदीनायके समुदिते मुदन्विता ॥ ६ ॥
लज्जया किमपि कामकौशलं या न वल्लभमबूबुधत्पुरा ।
प्रेम पत्युरवलोक्य संभृतं सा स्वतस्तदनु तं न्यवीविदन् ॥ ७ ॥
चप्तुरङ्कमधितष्ठुपोऽन्यदा नन्दनस्य नृपतेः समार्पयत् ।
प्राभृतं निभृतमानमच्छिरा मालिकः सुरभिपुष्पमालिकाम् ॥ ८ ॥
घ्राणदेशविषयं नयन्नयं तां मधुव्रतविकर्पणापधीम् ।
दश्यते स्म वदनेऽन्तराश्रिता निर्निमिसरिपुराजभोगिना ॥ ९ ॥
तत्क्षणादपि पपात भूतले क्ष्वेडपीडितवपुर्मुमूर्छ च ।
व्याकुलश्च नृपतिः सहस्रशोऽजूहवद्विषचिकित्सकानयम् ॥ १० ॥
औषधानि कतिचिन्न्ययोजयंस्तत्र मन्त्रमपरे च मान्त्रिकाः ।
सम्प्रयुज्य सकलाः स्वकौशलं केवलं श्रममवापुरास्थिताः ॥ ११ ॥
तान्निरीक्ष्य विफलीकृतक्रियान् मान्त्रिकान्विषचिकित्सकानपि ।
देवतार्पितमणेर्जलोक्षणान्निर्विषं धनद एव तं व्यधात् ॥ १२ ॥
रत्नमेतदुपकर्तुमप्यलं त्वादृशां समधिगम्य सन्निधिम् ।

वेधसैव घटितं विचेतनं रत्नसारसुत ! चेतनाश्रय ! ॥ १३ ॥
रत्नसारतनुजन्मता तव प्रागभूद्धनद ! सा निरन्वया ।
रत्नसारतनुजन्मताधुना सान्वया मदुपकारकारणात् ॥ १४ ॥
एवमस्य बहुधा प्रशंसनं बन्दिवन्नरपतिस्ततान सः ।
कीर्त्यते स हि वदावदः परं यः प्रशंसति गुणाश्रयं जनम् ॥ १५-॥
(त्रिभिर्विशेषकम्)

यौवनोपचयसुन्दरोऽन्यदा कुञ्जरं समधिरुह्य यन् पथि ।
भूपसूः स च गवाक्षमाश्रितां सूरभूपतनयामवैक्षत ॥ १६ ॥
श्रीपद्मोपचितपेणिकाभिधां क्षीरनीरधिसुतानुजामिव ।
हस्तपाणिकमलामनाविलां रूपलक्षणगुणोपशोभिताम् ॥ १७ ॥
(युग्मम्)

पुष्पसायकनिशातसायकैराहतः सममजन्यचेतनः ।
का तदङ्गसुकुमारता परा तस्य कोऽत्र ननु विक्रमक्रमः ॥ १८ ॥
चेतनाविकलमेव मन्दिरं तं सुहृत्समुदयः समानयत् ।
चन्दनेन हृदये निवेशितैस्तापशान्तिरभवत्तदङ्गके ॥ १९ ॥
मान्मथं ज्वरमपोहितुं क्षमा भेषजैर्न भिषजो रसैरपि ।
लङ्घनैरपि घनैर्न साधनैः सुश्रुतोक्तविधिना विधापितैः ॥ २० ॥
तस्य शस्यशयनीयपल्लवा मर्मरत्वमगमन् प्रतिक्षणम् ।
अङ्गदाहशमनाय कल्पिता दाहमेव विपुलं वितेनिरे ॥ २१ ॥
तच्चिकित्सकचिकित्सितं वृथा संप्रपद्य सुहृदा स भाषितः ।
तथ्यमेव यदि कथ्यते त्वया तद्रुजोपशमनाय यत्यते ॥ २२ ॥
तेन तस्य परिपृच्छतः पुरः स्वस्वरूपमखिलं प्रकाशितम् ।
नैकमानसविभिन्नवर्ष्मणो गोप्यमस्ति सुहृदो हि किञ्चन ॥ २३ ॥
तस्य सत्युरवगम्य तत्तथा भूपतिः सपदि मूलमन्त्रिणम् ।
सूरभूमिपतिसन्निधौ सुतां प्राहिणोन् मृगयितुं मृगेक्षणाम् ॥ २४ ॥
आपतन्तमवलोक्य मन्त्रिणं रंहसा समुदतिष्ठदासनात् ।
आसने समुपवेश्य गौरवादित्युवाच च स सूरभूपतिः ॥ २५ ॥
भूपतिप्रतिकृतिस्त्वमेव यन्मन्दिरं मम समागमः स्वयम् ।
पूर्वजाचरितपुण्यसञ्चयस्तद् ध्रुवं जयति मे महत्तमः ॥ २६ ॥

एतके वयमियं वधूस्तव कन्यकेयमुभयोश्च जीवितम् ।
देहमेतदपि गेहमृद्धिमद् ब्रूत येन करणीयमस्ति वः ॥ २७ ॥
धीसखोऽभ्यधित काश्यपीपते ! वस्तुतो यदिदमुच्यते त्वया ।
तत्सुतां वितर भूपसूनवे युज्यते गुणवतोर्हि सङ्गमः ॥ २८ ॥
श्यामलेन जलदेन चञ्चला भाति नो विकचचम्पकप्रभा ।
पुत्रिका तव नरेन्द्रसूनुना योगमाप्य च यथा विभास्यति ॥ २९ ॥
अन्वमन्यत स सूरभूपतिर्मन्त्रिवाक्यमवधानतः श्रुतम् ।
स्वं प्रदत्तमवबुध्य पुत्रिका भूमिपालतनयाऽथ साभ्यधात् ॥ ३० ॥
क्षोणिवासवसुताय मां पिता चेत्प्रदास्यति तदा तदग्रतः ।
स्वं कृशानुविषपाशलम्भनाल्लम्भयामि निधनत्वमात्मना ॥ ३१ ॥
धीसखोऽपि तदुपेत्य भूपतिं सर्वमेव रहसि व्यजिज्ञपत् ।
राजपुत्रविरहानलेन्धनं कामसायकनिघर्षसाधनम् ॥ ३२ ॥
अर्पितं सुभगतानिबन्धनं रत्नमाशु धनदेन तत्ततः ।
वासराणि कतिचिन्निराकुलो ध्यायति स्म नृपतेः कुमारकः ॥ ३३ ॥
तन्मणेर्निरुपमप्रभावतो दुर्भगत्वगरलं हृदि स्थितम् ।
दुष्टकर्मभुजगोपपादितं तस्य नश्यतितरां स सत्वरम् ॥ ३४ ॥
यस्य नाम सहते स्म नापि या वैरिनामवदुपेतमत्सरा ।
तस्य सा तदपि सूरकन्यका मन्त्रवज्जपति मन्मथातुरा ॥ ३५ ॥
मत्प्रियप्रियसुहृद्विरोधिनं राजनन्दनमसौ समाश्रयत् ।
इत्यमूं समभिसृत्य जालकैस्तापमापयति कौमुदी भृशम् ॥ ३६ ॥
एतदीयवदनेन मामकं मण्डलं विजितमित्यसौ विधुः ।
तापभेदनधिया तया श्रितस्तापमेव तनुते तदङ्गके ॥ ३७ ॥
मानिताऽपि बहुश सखीजनैः किञ्चनापि बुभुजे न सा सकृत् ।
भोजिताऽपि न रसं विवेद सा भूतदोषकलितेव केवलम् ॥ ३८ ॥
भाषिताऽपि वचनं न सा ददौ मूकतामुपगतेव सामञ्जा ।
जल्पति स्म यदि वा कथञ्चन क्लिष्टमार्हतमबद्धमुद्धतम् ॥ ३९ ॥
ईदृशीं समवलोक्य तां सखी बुद्धिकौशलभृताऽनुयुज्य च ।

---

१ अविस्पष्टम् । २ मृषार्थकम् ।

तत्स्वरूपमवगम्य तत्पितुः सर्वमेव कथयाम्बभूव तत् ॥ ४० ॥
सूरभूपरिवृढो निशम्य तद्दूतिकाभिहितमात्तसंमदः ।
विज्ञपय्य नृपतिं महोत्सवात्कन्यकां नृपसुवा व्यवाहयत् ॥ ४१ ॥
अन्यदा नरपतिः शिरोऽव्यथाकुक्षिशूलविषमामयार्दितः ।
वैद्यमान्त्रिकगणैरुपेक्षितो जीवितव्यविमुखो विनिश्वसन् ॥ ४२ ॥
रत्नसारतनयार्पितोल्लसद्रोगभेदिमणिवारिभिरुक्षितः ।
तत्क्षणादपि विशीर्णवेदनो व्याहरद्धनदमन्तिकस्थितम् ॥ ४३ ॥
॥ युग्मम् ॥
भास्करः प्रकुरुतेऽप्युपक्रियां तापमादधदधिप्रकाशनः ।
चन्द्रमास्तु कलयन् कलङ्किता मादधाति जनतापहिंस्रताम् ॥ ४४ ॥
चन्दनं हरति तापमान्तरं घृष्टमेव दृषदा धृतं तनौ ।
रत्नसारगुरुवंशकेतनं स्वव्यतिक्रमगुणो भवानभूत् ॥ ४५ ॥
॥ युग्मम् ॥
मादृशामसमभाग्यवैभवाज्जात एष भवतो भवोदयः ।
चक्रवाकसुकृतानुभावतो भानुमानुदयते हि सन्ततम् ॥ ४६ ॥
शंसतीत्थमवनीश्वरे स्वयं रत्नसूर्विनतिवामनोऽब्रवीत् ।
एष देव ! महिमा महांस्तव वक्ति यद्विभुरुपक्रियां मम ॥ ४७ ॥
उत्तमाश्रयवशात्प्रशस्यतां यात्यवश्यमपि वर्णदूषकः ।
पीतरक्तसितवर्णयोगतश्चित्रके स्फुरति कृष्णवर्णकः ॥ ४८ ॥
सम्भवेदिततमां महीयसामाश्रयेण महिमाऽमहीयसाम् ।
आरकूटशकलं धनेशितुः पाणिना विधृतमर्जुनायते ॥ ४९ ॥
रत्नलब्धिविषये महीपते ! त्वत्प्रसत्तिरपि मूलकारणम् ।
राजनि प्रणयिनां प्रसेदुषि प्रीतिमान् भवति देवताजनः ॥ ५० ॥
एवमेष मणिभिश्च पञ्चभिः स्वापरोपकृतिकर्म निर्ममे ।
इन्द्रियैरिव महामनाः पुमानात्मशुद्धिपरभागकाङ्क्षया ॥ ५१ ॥
तत्पुरोपवन एव चान्यदा चित्रतुष्टयधरो मुनीश्वरः ।
शीलधार्य्यभिध आययौ गुरुः शिष्यवृन्दविनिषेवितक्रमः ॥ ५२ ॥
प्रेयसी मम हृदः परं क्षमा तां न वीक्षितुमयं क्षमः क्षणम् ।
इत्यवेक्षितजिनेश्वरागमः कोपमेव निजघान यः स्वयम् ॥ ५३ ॥

मत्प्रियङ्करणपालितात्मना संविदा सह सदा विरोध्ययम्।
इत्यशेषभुवनानुगामिनं मानमुद्धतमधश्चकार यः॥ ५४॥
आर्जवं मम हृदः प्रियङ्करं धावतीयमपि तज्जिघांसया।
इत्यतः प्रथममेव मायिकां यो बिभेद सुकृतोपदेशकः॥ ५५॥
पापमुग्रमसुहृन् ममाधुना तद् विवर्द्धयितुमेष काङ्क्षति।
इत्यतो निखिलदोषपोषकं लोभमेव शमयाम्बभूव यः॥ ५६॥
॥ पञ्चभिः कुलकम्॥
पौरलोकमवलोक्य कानने यान्तमुत्सुकतया सकारणम्।
पार्श्वगं कमपि पृष्टवानयं सूरिमागतमजिज्ञपश्च सः॥ ५७॥
रत्नसारवणिगीशनन्दनः स्यन्दनं समधिरुह्य सोऽथ तम्।
वन्दितुं विदितयोगसङ्गतं गच्छति स्म मुनिनायकं मुदा॥ ५८॥
तं विनम्य पुरतः श्रितासने भक्तिभाजि धनदे मुनीश्वरः।
शर्करारसमयीमिवानघश्रोतृकां व्यधित धर्मदेशनाम्॥ ५९॥
आदधीत सुकृतं सभावनं सर्वमेव खलु नान्तरान्तरा।
भावनाविकलमेव यन्न तत्स्यात् समग्रफलदायकं नृणाम्॥ ६०॥
प्राग् यथैव जिनराजमन्दिरं श्रेष्ठिपुत्रमथनो विधाप्य सः।
खण्डितं फलमविन्दत ध्रुवं भावखण्डनवशेन तद्यथा॥ ६१॥
दक्षिणेऽत्र भरते रतेः पुरं नाम रत्नपुरमस्ति सान्वयम्।
तत्र कोऽपि कनकप्रभोऽभवत्क्षिप्ततप्तकनकप्रभो नृपः॥ ६२॥
तत्प्रियाऽपि कनकप्रभाऽजनि प्रीतिवह्निवनसारणिप्रभा।
यां समीक्ष्य मधुराकृतिं शिवा वल्लभं स्ववपुषाऽप्यनीनहत्॥ ६३॥
आस तत्र वसुदत्त इभ्यकस्त्यागकीर्तिभरचन्दनोज्ज्वलः।
प्रार्थनाभिमुखमन्यकामिनीवर्गमेव विमुखीचकार यः॥ ६४॥
पूर्णचन्द्रशुचिशीलधारिणी चार्व्यजायत सधर्मचारिणी।
तस्य धर्मधिषणा वसुन्धरी चित्ररूपरसनावसुन्धरा॥ ६५॥
माररूपमथनः सुतस्तयोर्नामतोऽपि मथनोऽभवत् कृती।
श्रीश्च सोमपदपूर्विका वधूस्तस्य सोमवदना गुणाश्रया॥ ६६॥
सोऽन्यदा सखिभिरावृतो गतः केलिकौतुकितयावनं वनम्।
ऐक्षत द्रुमतले तपोधनं मूर्तिबद्धमिव धर्ममर्हतः॥ ६७॥

वीक्ष्य तं मुनिपतिं शमाश्रयं मित्रमन्तिकगमन्वयुङ्क्त मः ।
कोऽयमङ्ग ! किमिहावतिष्ठते कश्मलाविलकृशाखिलाङ्गकः ॥ ६८ ॥
तेन तं प्रति निवेदितं सखे ! साधुरेप विरतस्तपस्यति ।
एतदंह्रियुगलं विनम्य तत् स्वं पुनीहि दुरितं लुनीहि च ॥ ६९ ॥
इत्युदीरितममुष्य सादरं तन्निपीय मथनोऽनमन् मुनिम् ।
भूमिमण्डलरजोमिलच्छिरा भावनां प्रकटयन्निवान्तरीम् ॥ ७० ॥
साधुराशिषमुदीर्य्य साधवे साधुधर्ममुचितं दिदेश सः ।
आगताय महते महाशयाः सारमेव सकलं विवृण्वते ॥ ७१ ॥
देशनां स विनिशम्य हर्षवान् भाषते स्म मथनो मुनीश्वरम् ।
धर्ममेतमुपदिष्टमर्हता नालमस्मि विनिषेवितुं मनाक् ॥ ७२ ॥
अभ्यधायि गुरुणा महामते ! श्राद्धधर्ममुररीकुरुष्व तत् ।
शुद्धदर्शनपुरस्सरं स तं स्वीचकार वचसा मुनीशितुः ॥ ७३ ॥
स प्रणम्य मुनिपादपङ्कजं मन्दिरं प्रति जगाम मित्रयुः ।
देवधर्मगुरुतत्त्वचिन्तनाजीवितं सफलमेव संविदन् ॥ ७४ ॥
तीर्थनाथभवनं स चान्यदा स्वापतेयनिचयैरचीकरत् ।
तत्र बिम्बविनिवेशनक्षणे भग्नभाव इति च व्यचिन्तयत् ॥ ७५ ॥
भूरि भूरि रभसाद्व्ययीकृतं हन्त ! मेऽपि किमकार्यकारिता ।
इत्यनेकमनुतापमादधे तापयन् हृदयमेप चिन्तया ॥ ७६ ॥
यातवत्यपि कियत्यपि क्षणे भूय एव विशदीकृताशयः ।
तीर्थराट्प्रतिमया समन्वितं पूर्णमेव रचयाम्बभूव सः ॥ ७७ ॥
पूर्णतामुपगतेऽथ तत्र स ध्यातवान् पुनरपि प्रसङ्गतः ।
वित्तवित्तविहितव्ययस्य मे स्यात्फलं किमपि नो परत्र वा ॥ ७८ ॥
साधुयुग्ममपरेद्युरागतं प्रत्यलाभयदसौ स्वमन्दिरे ।
प्रासुकैरशनपानकैः परेऽचिन्तयद्रजनिशेष इत्यपि ॥ ७९ ॥
अव्यवस्थितफले धुपेऽत्र किं जन्यते खलु मया परिश्रमः ?।
एवमेष परिचिन्त्य निर्मलं धर्ममाश्रित पुनर्विशुद्धधीः ॥ ८० ॥
वर्त्मनि व्रजत एकदा मुनीनेष वीक्ष्य सजुगुप्समभ्यगत् ।
नाऽहला इव मलाविला अहो ! एतके मलिनताममो भृशम् ॥ ८१ ॥
उग्रगन्धीनि मिचयानि यदमी निस्त्रपाः परिदधत्यनेनसः ।

किं विनश्यति ततस्तपस्विवेत्याग्रयं मुनिविगानमाचरत् ? ॥ ८२ ॥
एवमेव समुपास्य दर्शनं सातिचारमविचारसुन्दरः ।
श्रेष्ठिसूरनभिधाय तद् गुरोर्मृत्युमाप्य भुवनोद्धुरः सुरः ॥ ८३ ॥
जायते स्म वनजायतेक्षणो वत्सरायुतमितायुरद्भुतः ।
प्रच्युतः स च ततो भवानभूद्रत्नसारतनयो नयोज्ज्वलः ॥ ८४ ॥
॥ युग्मम् ॥
तेन ते समभवंश्च सम्पदः सापदः परपदाभिलाषिणः ।
भावभावितमनास्ततः पुमान् धर्ममेव विदधीत धीधनः ॥ ८५ ॥
प्राग्भवस्मरणमाप्य तत्क्षणं ज्येष्ठनन्दनधनावहेऽथ तम् ।
वेश्मभारमधिरोप्य स व्रतादानमातत सुवर्णदानकृत् ॥ ८६ ॥
कश्चिदेव नरजन्मकाञ्चनं सद्व्रताचरणरत्नयोगतः ।
प्रापयेद् गुरुकलादसंविदा लक्षकोटिकलनामहर्घताम् ॥ ८७ ॥
तत्प्रिया तिलकसुन्दरी पिता तस्य सापि जननी जनेश्वरः ।
कान्तया सह महाव्रतं ललुर्निर्वृतिप्रणयकार्मणौषधम् ॥ ८८ ॥
तन्मुनिक्रमसरोजषट्पदास्तद्यथाविधि समे प्रपाल्यते ।
प्राप्य देवपदवीं दिवि क्रमाल्लेभिरे पदमनन्तमव्ययम् ॥ ८९ ॥
इत्थमात्मरुचिचारणव्रती भूपतेरमिततेजसः पुरः ।
पौषधादवसितस्थितेः कथां संप्रकाश्य परितोषमासदत् ॥ ९० ॥
श्रद्दधे नृपतिरेव तामपीच्छामि नूनमनुशिष्टिमित्यणन् ।
तौ च चारणमुनी विहायसा स्वेच्छया व्यहरतां क्षमाश्रयौ ॥ ९१ ॥
तौ च खेचरमनुष्यनायकौ वत्सरं प्रति जिनेन्द्रसद्मसु ।
चक्रतुः सुमहिमत्रयं महासंपदामनुगुणं तथाहि च ॥ ९२ ॥
चैत्रकाश्विनकमासयोरिमौ स्वस्वजैनभवनेषु चक्रतुः ।
शश्वदेव विभवेन शाश्वताष्टाह्निकं शुभनिबन्धनं नृणाम् ॥ ९३ ॥
सीमभूमिभृति रामकेवलज्ञानभुव्यनुपमं तृतीयकम् ।
श्रीयुगादिजिनचैत्यमन्दिरे काञ्चिदुत्सवममू वितेनतुः ॥ ९४ ॥
अर्ककीर्तिसुतभूमिवासवः संपदा विजितवासवोऽन्यदा ।
खेचरैः परिवृतः पर शतैराश्रितः परिषदं ससमदः ॥ ९५ ॥
धर्म एव दशधा विभाजितोऽप्येकतामिव गतोऽतिहार्दतः ।

एकवाससमुपास्तिजन्मनो विष्टपात्रितयतत्त्ववेदिभिः ॥ ९६ ॥
अन्तरेण सततोपवासिनां यो विचित्रविषयोपलम्भनम् ।
पश्यताममृतपारणाविधिं चक्षुषां विरचयन्निवारुचत् ॥ ९७ ॥
मासकक्षपणपारणेच्छयाऽभ्यापतन्तमतिमात्रदुर्बलम् ।
दुश्चरेण तपसा मुनीश्वरं तत्र नेत्रविषयं निनाय तम् ॥ ९८ ॥
॥ चतुर्भिः कलापकम् ॥
सिंहविष्टरमपास्य सोऽथ तं त्रिः परीय च विनम्य भक्तितः ।
धर्मलाभवचसाऽतितोषितः प्राशुकान्यशनपानकान्यऽदात् ॥ ९९ ॥
पात्रदानमाहिमप्रकाशकं तत्क्षणादजनि दिव्यपञ्चकम् ।
ज्ञानपञ्चकविपञ्चनस्थितिं भूपतेर्वदद्दिवात्मनः स्फुटम् ॥ १०० ॥
एवमार्हतवृषोद्यमे रतौ श्रीत्रिपृष्ठतनयामितौजसौ ।
वत्सरान् प्रकृतिवत्सलौ नृपौ तौ व्यतीयतुरिमौ सहस्रशः ॥ १०१ ॥
तौ विमानमधिरुह्य मानिनौ जग्मतुर्नरपती परेद्यवि ।
नन्दने सुरपतेर्मनोरमे शाश्वताञ्जिनपतीन्विवन्दितुम् ॥ १०२ ॥
तत्र काञ्चनशिलातलासनौ वीक्ष्य चारणमुनीश्वरौ नृपौ ।
सत्तमौ विपुलधीमहामती तौ प्रणेमतुरपेतकल्मषौ ॥ १०३ ॥
अग्रतोऽपि विनिविष्टयोस्तयोराद्यसाधुरतनिष्ट देशनाम् ।
प्राप्य मानुषजनु- सुदुर्लभं मा प्रमादवशगाः स्त साधवः ! ॥ १०४ ॥
धर्ममार्हतमुपादध्वमादराज्जन्मकोटिकृतकल्कनाशकम् ।
ग्रीष्मकालजनितं निरर्गलं तापमम्बुभृदपास्यति क्षणात् ॥ १०५ ॥
आशुशुक्षुणिरिवेन्धनैर्घनैर्वारिराशिरिव वारिराशिभिः ।
हा ! चकोर इव कौमुदीभरैर्जीव एष विषयैर्न तृप्यति ॥ १०६ ॥
धर्ममारचयितास्मि यौवने वार्धकेऽपि यदि वा विरक्तधीः ।
धर्मराजमवितर्क्य मित्रक कोऽपि जल्पतु किमीदृशं वचः ?॥ १०७ ॥
बालिशं त्यजति नो न पण्डितं नैव रङ्कमपि नापि चक्रिणम् ।
नैव देवमपि नापि वासवं क्रुद्ध एष शमनः कथञ्चन ॥ १०८ ॥
उत्तमर्ण इव न प्रतीक्षते प्रार्थितोऽपि बहुभिश्चटूक्तिभि. ।
याममात्रमपि नो मुहूर्तकं न क्षणं कुपित एष दण्डभृत् ॥ १०९ ॥
तज्जना. ! जिनपतिप्ररूपितं धर्ममाचरत निश्चलाशयाः ।

येन वोऽपि शिवसम्पदः स्थिराः सम्भवेयुरुभयत्र भाविनः ॥ ११० ॥
एवमस्य वचनं निशम्य तौ संसृतेः परिहृतौ निबन्धनम् ।
पृच्छतः स्म परिशेषमायुषः प्राञ्जली नतविनेयवन्मुनिम् ॥ १११ ॥
तौ प्रति प्रणिजगाद चारणः साधुरेव दिवसानि विंशतिम् ।
षड्युतानि नियतानि संस्कृतच्छन्दसामिव विभाजनाविधाः ॥११२॥
दुर्लभं मनुजजन्म हारितं हा! प्रमादमदसंगमेन नौ ।
ईदृशं कथमहो! निरर्थकं सर्वशस्यपुरुषार्थसाधनम् ? ॥ ११३ ॥
अन्तरेण परमायुर्जना श्रेयसो वितनुते न योग्यताम् ।
वेश्मनि ज्वलति जातवेदसा कस्य हास्यमपि नान्धुनिर्मितिः ? ॥११४॥
सान्त्वनामतनुतां मुनीश्वरौ भूभुजोरथ तयोर्विषण्णयोः ।
खेदमेदुरहृदौ युवां कथं धीधनौ भवथ एवमुन्नतौ ? ॥ ११५ ॥
घस्रमात्रमपि सेवितं व्रतं भावतो भवति निर्वृतिप्रदम् ।
दीपिका विरचिताऽपि किं गृहे नान्धकारनिकरं निरस्यति ? ॥ ११६ ॥
चारु चारणमहर्षिबोधितौ तौ जवान्निजनिजं निकेतनम् ।
नागरैः प्रमुदितैरवेक्षितौ भूपती शुभमती समागतौ ॥ ११७ ॥
भक्तिपूर्वमुपहूय सर्वतः पूज्यभावमुपनीय भावतः ।
संघमार्च्य परमं चतुर्विधं दीनदौःस्थ्यमपनीय दानतः ॥ ११८ ॥
न्यस्य राज्यमपि पुत्रयोः स्वयोस्तौ व्रतं जगृहतुर्महीपती ।
विश्वनन्दनगुणाभिनन्दनस्यान्तिके मुनिपतेः पितुर्गुरोः ॥ ११९ ॥
॥ युग्मम् ॥
पादपोपगमनाम्नि तस्थतुस्तौ मुनी अनशने समाहितौ ।
अस्मरत्स्वपितरं तथा स्थितः श्रीविराजिविजयो महामुनिः ॥ १२० ॥
तस्य ऋद्धिमधिकां विचिन्तयन् स्वस्य किञ्चन तनीयसीं ततः ।
स्यामहं कमलया पितुः समस्तन्निदानमकरोदसाविति ॥ १२१ ॥
तौ विपद्य मुनिपुङ्गवौ शुभध्यानसन्ततिनिलीनमानसौ ।
प्राणतेऽनुपमऋद्धिवैभवौ कल्प एव भवतः स्म नाकिनौ ॥ १२२ ॥
नन्दितादिपदसुस्थितादिमावर्त्तनामकविमानकद्वये ।
दिव्यचूलमणिचूलसंज्ञकौ तत्र च व्यलसतां दृशान्तरम् ॥ १२३ ॥
जम्बुनामनि महान्तरीपके प्राग्विदेहसुषमाविशेषकम् ।

श्रीजयोऽस्ति विजयः सुखास्पदं सत्यनाम रमणीयसंज्ञकः ॥ १२४ ॥
तत्र सैतपुलिनेऽस्ति दक्षिणे पुण्यधाम नगरी शुभाऽभिधा ।
पश्यता शतमखेन यां मता चक्षुषां दशशती फलोत्तरा ॥ १२५ ॥
सङ्गरप्रहतशत्रुसन्ततिः सत्यसङ्गरशिरोऽवतंसकः ।
अन्वशान्नयसुधांशुसागरस्तां चिरं स्तिमितसागरः प्रभुः ॥ १२६ ॥
द्वे प्रिये अभवतां वसुन्धराऽनुद्धरा च किल तस्य भूपतेः ।
प्रीतिरत्यभिधयैव विश्रुते संवरद्विप इव प्रिये हृदः ॥ १२७ ॥
स्वीयमायुरुपभुज्य नन्दितावर्तनामकमहाविमानतः ।
जन्तुरप्यमिततेजसश्च्युतः संजगाम महिषीं वसुन्धराम् ॥ १२८ ॥
सा सुखेन शयिता सुलक्षणा तत्क्षणं प्रविशतो मुखान्तरे ।
स्वप्नकांश्चतुर ऐक्षतोपदालम्भितानिव चतुर्दिगीश्वरैः ॥ १२९ ॥
तद्विलोकसमनन्तरं प्रियाऽजागरीन्नरपतेः शशंस च ।
ईदृशां मम फलं नु किं विभो ! स्याच्छुभं तदितरन्नवेति सा ? ॥१३०॥
अभ्रमुप्रियतमो विलोकितः कीर्तिराशिरिव मूर्तिमाश्रितः ।
जङ्गमस्तुहिनकाश्यपीधरः शृङ्गपाटिततटो वृषोऽपि च ॥ १३१ ॥
शीतरश्मिरथ पूर्णमण्डलो विश्वतापमपसारयन्निव ।
स्वच्छनीरनिकरैः प्रपूरितं पद्मराजिरुचिरं महासरः ॥ १३२ ॥
तन्निवेदितमिदं हृदि क्षणं संप्रधार्य्य नृपतिर्बभाण सः ।
देवि ! वैरिबलजित्वरो बलः संभविष्यति भवत्तनूभवः ॥ १३३ ॥
भूमिपालवचनं मनोरमं संनिधाय हृदि सांशुकाञ्चले ।
एवमस्त्विति निवेदनोन्मुखी ग्रन्थिमेव निबबन्ध हर्षतः ॥ १३४ ॥
तत्प्रभृत्यपि नरेश्वरप्रिया गर्भमेव विभराम्बभूव सा ।
अर्थजातमिव नीतिरुच्छ्रिता धर्मबुद्धिरिव तत्त्वमान्तरम् ॥ १३५ ॥
गौरवर्णपरिपूर्णविग्रहं कामपालकलिताग्र्यलक्षणम् ।
सन्निधानमिव सा वसुन्धरा पुत्रमप्यजनयद्वसुन्धरा ॥ १३६ ॥
चेटिकाभिरभिवर्धितो नृपस्तस्य जन्मनि परप्रमोदतः ।
निर्विकल्पमविकल्पितं परं कल्पवृक्ष इव काङ्क्षितं ददौ ॥ १३७ ॥
द्वादशापि दिवसेश्वरानसौ भूपतीनपि महौजसा सुतः ।
जेष्यतीति नृपतिर्विनिर्ममे द्वादशेऽह्नि किल नाम उत्सवम् ॥ १३८ ॥

तत्सवे बहुविधे प्रसर्पति प्रीतिपूर्वमपराजिताभिधा ।
भूभुजाऽस्य विदधे समन्ततो द्वेषिभूपतिभयैककारणम् ॥ १३९ ॥
प्राणतत्रिदिवतोऽवतीर्णके जीव एव विजयस्य राट्प्रिया ।
स्वप्नसप्तकमवैक्षतापरा पुण्यगर्भमहिमानुभावतः ॥ १४० ॥
केसरी प्रथममेव वृत्कृतैर्दिग्गजानपि बिभीषयन् शुभः ।
शारदेन्दुकरराशिकेसरश्चञ्चलाचलविलोचनाञ्चलः ॥ १४१ ॥
क्षीरनीरनिधिनन्दना ततः क्षीरनीरनिचयैर्मतङ्गजैः ।
पार्श्वतो विरचिताभिषेचना पद्मपीठविनिवेशितक्रमा ॥ १४२ ॥
चक्रवाकमिथुनानि हर्षयन् पद्मजातिमभितो विकासयन् ।
सर्वशोऽपि ककुभः प्रकाशयन् संहरंश्च तिमिराण्यहर्पतिः ॥ १४३ ॥
पद्मिनीदलगताम्बुमौक्तिकक्षोदनिर्मलजलौघपूरितः ।
कण्ठदेशनिहिताम्रपत्रकः पूर्णपूर्णकलशोऽथ शोभितः ॥ १४४ ॥
वाहिनीभिरधिकं समाश्रितः सार्वभौम इव जीवनाश्रयः ।
आगताभिरतिसारसद्रसैः सत्त्वमादधदपांनिधिस्ततः ॥ १४५ ॥
रत्नराशिरथ तेजसां भरैर्ध्वान्तसंहतिविधूननक्षमः ।
द्वादशार्कमहसां समुच्चयः किं न्वयं समुदितो मुखाशया ? ॥ १४६ ॥
जाड्यकालकमनीयसङ्गमः सत्यनिर्मथितदाहशक्तिकः ।
ज्वालजालकलितान्तरिक्षको धूमसङ्गविकलो विभावसुः ॥ १४७ ॥
स्वप्नसन्ततिमिमां विलोक्य साऽनुद्धरा प्रमुदिता समुत्थिता ।
लक्षरत्नमिव रङ्ककामिनी प्रेयसे सरभसं व्यजिज्ञपन् ॥ १४८ ॥
अङ्कं पुलकितं दधन्नृपस्तन्निशम्य स जगौ प्रियामिति ।
स्वप्नलब्धिविनिवेदितागमः केशवस्तव सुतो भविष्यति ॥ १४९ ॥
मेरुभूमिरिव कल्पशाखिनं श्यामलं सुतमसूत सा सुखम् ।
भाग्यभङ्गिललितात्मनां नृणां न प्रसूतिजमशं प्रसूः श्रयेत् ॥ १५० ॥
मागधा द्रविणमापुरीप्सितं गायनाश्च विपुला अलङ्कृतीः ।
प्रीणितान्नरपतेः सुतोद्भवात् शर्मणे न खलु कस्य तादृशः ?॥ १५१ ॥
वेदशास्त्रयुगलेन वा बुधश्चन्द्रसूर्ययुगलेन वा नभः ।
अर्थकामयुगलेन वा वृषस्तद्द्वयेन नृपतिर्व्यभूष्यत ॥ १५२ ॥
तस्य नाम विदधे महीभुजाऽनन्तवीर्य इति सान्वयं मुदा ।

भावि यादृशमहो ! शरीरिणां तादृशं भवति चेष्टितं पुरा ॥ १५३ ॥
अङ्कतोऽङ्कमुपयातुमुद्यतौ बालिकाभिरवनीभुजामिमौ ।
पाल्यमानवपुषौ प्रयत्नतो वृद्धिमापतुरथ क्रमेण तौ ॥ १५४ ॥
कामपालगरुडध्वजाविमौ श्वेतकृष्णवपुषौ विरेजतुः ।
संगतावधिकहार्दतो मिथः क्षीरवार्द्धिलवणाम्बुधी इव ॥ १५५ ॥
सद्भवैः शुभदिने समर्पितौ तौ कलागुरुरशिक्षयत्कलाः ।
स्थान एव विनयो नियोजितः किं करोति न मनीषितं नृणाम् ?॥१५६॥

रणरणकितां दस्रौ द्रष्टुं जनो वितनोति न
श्रयति न पुनः श्रद्धालुत्वं नरेश इलाभवे ।
मनसिजमपि क्षामच्छायं व्यनक्ति विवेकवान्
नयनपदवीमापायेतौ नराधिपनन्दनौ ॥ १५७ ॥

सा काचिन्न नितम्बिनी समभवद्या वीक्ष्य रूपं तयोः
पाण्डित्यं प्रकटीचकार न च तद् व्यावर्णयन्ती मुहुः ।
या तत्सङ्गमपीहते स्म न हृदा नेत्रे स्तुवाना निजे
स्वप्ने तौ समवाप्य मोहनमयं नैवाऽऽपि सौख्यं यया ॥१५८॥

नृपः स्तिमितसागरः समवलोक्य धानुष्कतां
तयोर्निजकुमारयो रतिकुमारसम्वादयोः ।
अमन्यत न कञ्चन प्रवलमेव विद्वेषिणं
विलक्षमतिमार्गणं गुणविमुक्तिबद्धादरम् ॥ १५९ ॥

मुद्धया प्राक् समुपासितौ नृपसुतौ सौभाग्यभङ्ग्या ततो
गाम्भीर्येण मनोहरेण च ततोऽप्यौदार्य्यसंयोगिना ।
लावण्येन ततस्ततोऽतिरभसात् शौर्य्येण वर्य्येण त-
द्वञ्च्येऽहं किमहो ! विमृश्य तदिदं तौ यौवनेनाश्रितौ ॥१६०॥

राज्ञा तौ परिणायितौ नृपसुते रूपेण चेतोभुवः
पत्नीं पत्तिपदं प्रपञ्चविगमात्संप्रापयन्त्यावपि ।
भुञ्जन्तौ विषयातिरक्तमनसौ सौख्यानि ताभ्यां समं
कल्याणं कलयाम्वभूवतुरिमौ भूपालपुत्रौ भृशम् ॥ १६१ ॥

आसीच्छ्रीगुरुगच्छमौलिमुकुटश्रीमानभद्रप्रभोः
पट्टे श्रीगुणभद्रसूरिसुगुरुर्विज्ञानभाजां गुरुः ।

तच्छिष्येण कृतेऽत्र षोडशजिनाधीशस्य वृत्ते महा-
काव्ये श्रीमुनिभद्रसूरिकविना सर्गोऽगमत्सप्तमः ॥ १६२ ॥

॥ इति श्रीशान्तिनाथचरित्रे सप्तमः सर्गः ॥

अर्हम्

अथाष्टमः सर्गः ।

भवरुजापगमाय शमौषधं सुलभमेव दिदेश गतस्पृहः ।
जगति यः स पुनस्त्रिजगद्भिषग् भवतु शान्तिविभुर्भवतां श्रिये ॥ १ ॥
उपवने क्वचनापि गुरुः स्वयंप्रभमुनिः समवातरदन्यदा ।
दिनपतिं तपसां महसा जयन्निधनतां तमसां प्रसभं दिशन् ॥ २ ॥
स्तिमितसागरभूमिपतिस्तदा तुरगवाहविनोदमधिष्ठितः ।
परिसरं समियाय पुरः पुरस्सरदनेकपदातिपरिष्कृतः ॥ ३ ॥
कमपि कालमसौ क्षितिपालकः स चतुरः परिवाह्य तुरङ्गमान् ।
श्रमजलाविलगात्रविलेपनस्तदपि काननमभ्यसरज्जवात् ॥ ४ ॥
कुसुमगुच्छविनम्रमहीरुहप्रकरनिश्चलभृङ्गरुतैरलम् ।
क्षितिपतेः शरदिन्दुसहोदरां यदुपवर्णयतीव गुणावलिम् ॥ ५ ॥
सुरभिशीतसमीरनिषेवितो भवति तत्र स यावदपश्रमः ।
रहसि तावदमुं प्रतिमास्थितं मुनिमपश्यदशोकतरोस्तले ॥ ६ ॥
दुरितसन्ततिरेतदवेक्षणादपगता प्रणतेः शुभसन्ततिः ।
प्रभवतीति विमृश्य हृदा नृपः प्रणमति स्म मुनिं मतिमन्नुतम् ॥ ७ ॥
मुनिपतिः प्रतिमां परिपूर्य सः क्षितिभुजेऽप्रतिमां ददधाशिषम् ।
उपदिदेश कृपामयमार्हतं सुकृतमुग्रकषायनिवर्त्तकम् ॥ ८ ॥
परिहरन्ति कषायपरिग्रहं किमिति नैव जनाः सुखलिप्सवः ? ।
न खलु कर्हिचनापि निषेवितः शुभमयं खलवत्प्रथयिष्यति ॥ ९ ॥
त्यजति निम्बतरुर्यदि तिक्ततां स सितदुग्धघटैर्भृशमुक्षितः ।
यदि सुधासमतां च विषं भजेद्विविधमन्त्रपवित्रितमप्यदः ॥ १० ॥
मधुरयाऽपि गिरा परिवर्णितः कनकरत्नविहायितमानितः ।

यदि खलः कलयेदपि साधुतां तदपि पुण्यमहो ! न कपायतः ॥११॥
॥ युग्मम् ॥
अमरदत्तनृपादिवदेतके विरचिता वचसाऽपि कपायकाः ।
इह भवेऽपि परत्र च शर्मणे नहि भवेयुरधर्मनिबन्धनम् ॥ १२ ॥
इति निशम्य शुभानगरीश्वरः प्रणिजगाद गुरूनभिवन्द्य सः ।
अमरदत्तनृपादय एव के त इह ये भगवद्भिरुदाहृताः? ॥ १३ ॥
गुरुरुवाच नरेन्द्र ! निशम्यतां समवधाय मनागपि दक्षिणे ।
भरत एव पुरं सुररोचितं तिलकसंज्ञकमस्ति समृद्धिमत् ॥ १४ ॥
अजनि तत्र नृपो मकरध्वजः प्रवररूपकलामकरध्वजः ।
यमवलोक्य परं द्युसदङ्गनाः श्रद्धुरेव वरं न निजं वरम् ॥ १५ ॥
सुवदना महिषी मदनाभिधा तदवनीदयितस्य बभूव सा ।
स्वदयितापुरतः प्रशशंस यत्सुभगतां विनयानुगतां स्मरः ॥ १६ ॥
कमलराजिविराजि सरोवरं शयितबुद्धतमा रजनीभरे ।
समवलोक्य निवेद्य महीभुजे तदनुगर्भमधत्त नृपप्रिया ॥ १७ ॥
अजनयत्तनयं नयशालिनं कमलकेसरनामतया श्रुतम् ।
प्रणयिनी नृपतेरखिलार्थिनामशमयच्च धनैश्चिरदु:स्थताम् ॥ १८ ॥
विदितविद्यमवद्यपराङ्मुखं दितधनुर्धरमानपरिश्रमम् ।
क्षितिपतिर्युवराजपदेऽथ तं साचिववासनयाऽभ्यषिचत्समम् ॥ १९ ॥
जितकलापिकलापकलापकं नृपतिकेशकलापमथान्यदा ।
व्यरचयद्विवरीतुमुपक्रमं स्वरुचि यावदसौ नृपवल्लभा ॥ २० ॥
पलितमभ्रतिरोहितचन्द्रम.प्रकटितैककरभ्रमकारणम् ।
नृपतिमूर्द्धनि वीक्ष्य निरैक्षयत् स्मितमुखी मुकुरेण महिष्यपि ॥ २१ ॥
तदवलोक्य महीमघवा हृदि व्यपददन्यपराजितसैन्यवत् ।
दयितया हितया स तया ततो निजगदे जगदेकपतिः पतिः ॥ २२ ॥
जरितया प्रिय ! किं परितप्यते पटहघोषणया प्रतिपेत्स्यते ?।
सकल एव जनः स तु दण्ड्यते दशमिनं प्रवदिष्यति यो नृपम् ॥२३॥
नरपतिः स्मितपूर्वमथावदत् प्रियतमे ! न च वृद्धतया त्रपे ।
अनवलोक्य पुनः पलितं मम व्रतमुपादिपतासिलपूर्वजाः ॥ २४ ॥
अहमहो ! विपयैरुपलालितः पलितवानपि नैव समाददे ।

इति विषादनिवन्धनमाशु ते निगदितं मयका प्रियवादिनि !॥ २५ ॥
हृदि निधाय तदुक्तमियं ततः प्रियमुवाच रसाधिपतेः प्रिया ।
किमधुनाऽपि न तत्क्रियतेतरां फलितमेव जनैरुपवर्ण्यते ॥ २६ ॥
तदनु तद्वचनं हितमीहितं समवधार्य्य सुतं विनिवेश्य तम् ।
निजकराज्यपदे नृपतिर्वने प्रमदया सह तापसतां ललौ ॥ २७ ॥
यमपि गर्भमुवाह निकेतने स्थितिमती मकरध्वजवल्लभा ।
स ववृधे जलसिक्तवसुन्धरानिहितबीजगताङ्कुरवत्क्रमात् ॥ २८ ॥
नृपमुनिः समवेक्ष्य विशेषविद्रहसि तां समपृच्छदुवाच सा ।
प्रथम एष मया प्रतविघ्नभीकलितया कथितो न भवत्पुरः ॥ २९ ॥
कुलपतेः पुरतोऽकथि तेन तत्स च रहोऽसूत तां विततान्वयाम् ।
सकललक्षणसारसमन्वितं सुतमसूत ततः समये सती ॥ ३० ॥
विदधतीषु यथाऽवगमं तपोधनकनीषु चिकित्सितमञ्जसा ।
उचितभेषजहीनतया वने विषमसूचिरुजाऽजनि साऽर्दिता ॥ ३१ ॥
विधुरतां धृतवत्सु जटाधरेष्वपि तदीयरुजाऽनुपशान्तितः ।
दयितया सह देवधरस्तदा वणिगुपैदपि निर्जरसेनया ॥ ३२ ॥
पुरवरं स च हर्षपुरं गतो वलित उज्जयिनीनगरीवणिक् ।
गुरुजटाधरभक्तिपरायणः शुभमनाः प्रविवेश तपोवनम् ॥ ३३ ॥
कुलपतिं प्रणिपत्य विलक्षतां प्रति निमित्तमपृच्छदथो वणिक् ।
गुरुरुवाच यथायथमेव च प्रणयिनीनवसूतिरिहास्ति मे ॥ ३४ ॥
वितरताशु तमद्भुतलक्षणं तनयमेव यथा भवतां वधूः ।
तमनुशास्तितरां मयकाऽर्पितं स च तथैव चकार विचारवित् ॥३५॥
कुलपतिप्रतिपादितपुत्रकं समुपलभ्य वणिग्दयिताऽतुषत् ।
युगमजीजनदित्यपि सर्वतः परिजनादपि सिद्धिमचीकरत् ॥ ३६ ॥
प्रमदया प्रमदोद्धलया समं स गत उज्जयिनीपुरमुत्सवात् ।
अमरदत्तमथाह्वत नन्दनं त्वभिधया तनयां सुरसुन्दरीम् ॥ ३७ ॥
धनधनेश्वरसागरजीविताभ्यधिकमित्ररमादयिताभवः ।
अमरदत्तसुहृत्समभूदिहासमगुणाकरमित्रमुदाह्वयः ॥ ३८ ॥
यमवलोक्य समुन्नतमम्बरे प्रमदमान्वरमेव शिखण्डिनः ।
प्रकटयन्त्यपि नृत्यविधानतः स्तनितनुन्नमृदङ्गरवानुगम् ॥ ३९ ॥

सितविहङ्गमपङ्क्तिरवेक्ष्य यं समुदितं नभसि स्तनितोद्धतम् ।
अवजिता शिखिनां विरुतैरिव प्रचलिता सर एव नु मानसम् ॥ ४० ॥
उपययौ जलभृत्समयोऽन्यदा तपऋतुं गमयन्विषयाद्बहिः ।
जलमयं भुवनं स सृजन्निव प्रततवारिकदम्बकवर्षणैः ॥ ४१ ॥
॥ त्रिभिर्विशेषकम् ॥
विमलसैप्रमहापुलिनोदितायतवटद्रुमसन्निधिमाश्रितौ ।
सहचरौ मिलतः किल तत्र तौ कनकमौधिकया श्रुतखेलया ॥ ४२ ॥
नृपसुते प्रणुदत्यपि मोहिकं सुहृदि चाभ्युपगच्छति साऽमिशत् ।
वटमहीरुहलम्बिशवानने तदपि सोऽपि जहास च मित्रमुत् ॥ ४३ ॥
कुणप आह च मित्रमुदाह्वयं परिहसन्तमिमं ननु मा हसीः ।
कतिपयेषु दिनेषु गतेष्वियं तव मुखेऽपि ममेव पतिष्यति ॥ ४४ ॥
तदथ तस्य वचो विनिशम्य सोऽप्यमरदत्तमभाषत भीतिभृत् ।
कृतमनेन च खेलनकेन नौ सदनमेव सखे ! लघु यावकः ॥ ४५ ॥
अकथि तेन शवाननमध्यतः पतितया भवतोऽपि किमेतया ।
सहृदयास्त्यपराऽपि ममान्तिके किमिति तत्र यथारुचि रम्यते ? ॥४६॥
इति मुकोमलयाऽपि गिरोदितः स सुहृदा रमते स्म न मित्रमुत् ।
वहति चेतसि चारुविरागतां किमपि न प्रतिभाति हि देहिनाम् ॥४७॥
अथ विहाय जवादपि तावुभौ निजनिजं सदनं समुपेयतुः ।
परिजने रमते मतिरङ्गिनां न विजनेऽपि वने हि कथञ्चन ॥ ४८ ॥
अशनितोर्ध्वममुं मिलितं हितं नृपकुमारवरो निजगाद तम् ।
त्वमधुनाऽपि वयस्य ! किमुन्मना इव मयाऽपि परं समवेक्ष्यसे ? ॥४९॥
अवितथे कथिते खलु तेन चाभ्यधित राजसुतो मधुराक्षरम् ।
वदति नैव शवः पुनरेतकद् वनचरस्य सुरस्य विजृम्भितम् ॥ ५० ॥
अवितथं वितथं यदि तेन वा प्रकथितं खलु वेद तदेव कः ? ।
मतिबलं प्रवितत्य ततः सखेऽयमपि विभ्रकणः परिभूयते ॥ ५१ ॥
अतुलमाप फलं मतिसागरः सचिव एव यथा विहितोद्यमः ।
वद स कोऽयमिति प्रनिरूपितः स सुहृदा वदति स्म वदावदः ॥५२॥
भरत एव पुरी किल मालिनी फलफलिद्रुमहाविषयेऽस्ति या ।

१ धन्या ।

निजसमृद्धिवितानसमुच्चयैरजयदेवं पुरीममरावतीम् ॥ ५३ ॥
नरपतिर्जितशत्रुरजायत प्रथितविक्रम एव स तत्र यम् ।
स्वदयिताभिरजस्रमजीगपन् दिविपदो दिवि धर्मधुराधरम् ॥ ५४ ॥
अजनि तत्सचिवो मतिसागरः स्वमतिवैभवरञ्जितनागरः ।
सुरगुरुप्रतिरूपतयैव यन्मतिमधत्त विधिः श्रितकौतुकः ॥ ५५ ॥
प्रियतमाऽस्य बभूव गुणावली, विलसदुज्ज्वलभूरिगुणाश्रयः ।
तनुभवोऽपि सुबुद्धिरभूत्तयोर्विनयिनां नयिनां च धुरि स्थितः ॥ ५६ ॥
ममभवन्नपरेऽपि तयोः सुता गुणगणग्रहणे विहितादराः ।
श्रुतमहोदधिपारमवापिता जनकनाविकसन्मतिवेडया ॥ ५७ ॥
वसुमतीदयितेन विभूषिते सदसि कोऽपि समागमदन्यदा ।
गुणनिकेतनिमित्तविदां वरः कनकदण्डकवेत्रिनिवेदितः ॥ ५८ ॥
जय नरेश्वर ! जीव चिराय चेत्यभिहिताशिषमासितमासने ।
तमवदद् नृपतिर्वद किं किमस्त्यवगतं भवताऽपि निमित्तकम् ? ॥ ५९ ॥
वसुमिताङ्गनिमित्तकलाविदित्यभिहिते गणकेन पुनर्नृपः ।
स तमवग् वद भावि सदःसदां किमपि, भूतविदो हि परःशताः ॥ ६० ॥
स च विचार्य जगौ जगतीपतिं शुभमतेर्मतिसागरमन्त्रिणः ।
अपि कुटुम्बजुषो भविता मृतिर्हतविपक्षक ! पक्षदिनान्तरे ॥ ६१ ॥
श्रुतिसृतिं विनिवेश्य स तद्वचो हृत इव व्यसृजद् नृपतिः सभाम् ।
मम पुनीहि गृहं स्वपदाम्बुजैरिति निरूप्य समानयदालयम् ॥ ६२ ॥
स परिपृच्छति मन्त्रिवरः स तं गणकमुल्वणभक्तिपुरःसरम् ।
यदुदितं विदितं नृपतेः पुरः सरलतां प्रतिपद्य तदुत्तर ॥ ६३ ॥
(युग्मम्)
अकथि तेन सुबुद्ध्यभिधा श्रुतात्तव सुतात्प्रथमाद् भविता मृतिः ।
इति निशम्य विनिर्मितसत्कृतिं स विससर्ज निमित्तविदं रयात् ॥ ६४ ॥
अशनपानकमूत्रपुरीषकस्थलततीर्विरचय्य निवेद्य च ।
तमपि पुत्रमहो ! गुरुपेटिकान्तरमुमक्षिपदक्षयकौशलः ॥ ६५ ॥
न विपदापतति प्रतिवासरं स्फुरति सम्पदपायविवर्जिता ।
नयति लोकयुगं वशतां यया भवति पुण्यवतः खलु सा मतिः ॥ ६६ ॥
स्वयमिमां विनियन्त्र्य स तालकैर्नृपतिदृष्टिसमक्षममोचयत् ।

भवनसारमिदं निखिलं ममेति विनिरूप्य नृपेण सुमुद्रिताम् ॥ ६७ ॥
प्रकृतमन्यदपि प्रियमात्मनः प्रयत एव विधाय स धीसखः ।
अगमदालयमध्यगचैत्यकं गृहमरक्षयदश्वपदातिभिः ॥ ६८ ॥
अहनि पञ्चदशे समुपागते, स्पृशति यौवनमित्यभवन्महान् ।
कलकलो गगनाङ्गणसृत्वरोऽवरोधचरास्यसमुद्भवः ॥ ६९ ॥
अयममात्यसुतो नृपपुत्रिकाप्रवररत्नवतीं कवरीं द्रुतम् ।
क्षुरिकया परिभूय महत्तमो व्रजति धावत धावत तद्भटाः ! ॥ ७० ॥
सदसि तद्विनिशम्य रुषाऽरुणः क्षितिपतिर्ध्वजिनीपतिमादिशत् ।
सचिवनिग्रहणाय महाबलं बलसमन्वितमाजिभयानकम् ॥ ७१ ॥
सप्रतनं पृतनापतिमागतं समवगम्य बभाण स मन्त्र्यपि ।
अनुचरैर्भवतः परिवेष्टितो नृपतिविज्ञपनं करवै सकृत् ॥ ७२ ॥
अनुमतः स च तेन समेत्य तं वसुमतीशतमन्युमजिज्ञपत् ।
गणकवाक्यमथाहितपेटकोद्घटनकर्मणि शर्मणि कर्मठम् ॥ ७३ ॥
स नृपतिः कुपितोऽप्युपरोधतोऽस्य सचिवस्य चकार वचस्तथा ।
सुतमवैक्षत तत्र च मन्त्रिणो निदधतं कवरीक्षुरिके करे ॥ ७४ ॥
तदवलोकवशादथ विस्मितेऽवनिपतौ सचिवोऽवददीदृशम् ।
वनचरस्य सुरस्य च कस्यचिद् मयि विचेष्टितमन्यभवद्द्विषः ॥ ७५ ॥
अवनिवासवमन्त्रिवरौ च तौ तदवलोक्य विरक्तहृदौ पदम् ।
स्वसुतयोर्विनिवेश्य निजं निजं व्रतमवाप्य दिवं समुपेयतुः ॥ ७६ ॥
तव सखेऽप्यविताऽस्मि विनिश्चितं तनुकविघ्नमिमं लघु मा मुहः ।
इति सधैर्यवयस्यवचोऽमृतं स परिपीय जगावथ मित्रसुत् ॥ ७७ ॥
विषयसेवनवह्निपयस्थितिर्लाद्रियमाशु सखे ! परिमुच्यते ।
न खलु यत्र मनो दधते धृतिं भवतु तत्र कथं विदुषां स्थितिः ? ॥ ७८ ॥
इति विचिन्त्य चिरं हृदि तावपि प्रचुरचारुविचारविचक्षणौ ।
किल परस्परमन्दिरसुप्ततोपधिमुखेन निरीयतुरालयान् ॥ ७९ ॥
विदधतावनिशं गमनं च तौ विषयजातविलोकनविस्मितौ ।
कुसुमपत्तनबाह्यवनान्तिके विबुधसद्म विलोकयतः स्म तत् ॥ ८० ॥
पृथुशिलाशकलैरधिकौशलं सुघटितेऽपि जनैर्भृशमाश्रितः ।

न खलु सन्धिरलक्षितलक्षणैरिव कदाचन यत्र विबुध्यते॥ ८१ ॥
(युग्मम्)

विमलशीतलपुष्करदीर्घिकासवननिर्मितिपावितवर्ष्मकौ ।
तत इमौ त्रिदशायतनं गतौ विविधचित्रसमाहितलोचनम् ॥ ८२ ॥
उपलकल्पमनोहरपुत्रिकां नृपसुतः समवैक्षत तत्र च ।
नयनयुग्ममममन्यत सोऽर्थवत् किममृतं प्रियलाभमृतेऽपरम् ? ॥ ८३ ॥
दृशशतीं स समैहत चक्षुषां दृशशतेक्षणवत् कमलेक्षणः ।
विषयमूर्तिमिमामवलोकयन्नपघनस्थितिरूपमनोरमाम् ॥ ८४ ॥
कठिनमस्य न तद् हृदयं कृतं विदधता विधिना, कथमन्यथा ।
सुमशरः कुसुमैरपि सायकैरतितमां परिपीडयितुं क्षमः ? ॥ ८५ ॥
मनसिजेन युवा स पराहतः किमपि नैव विवेद विचेतनः ।
अपरथा कथमेष दृषन्मयीं रतिलयं विदधीत विधीरतः ? ॥ ८६ ॥
सुरवधूर्न्दविशायपराहतोपलमयत्वमशिश्रियदेपिका ।
न दृपदीदृशरूपविवर्तना क्वचन सम्भवतीति विचिन्तयन् ॥ ८७ ॥
अभिदधे सुहृदा स कुमारकः प्रकल मित्र ! पुरान्तरमीयते ।
स निजगाद सखे ! क्षणमास्यतां किमपि यावदिदं वपुरीक्ष्यते ॥ ८८ ॥
(युग्मम्)

अमरदत्तवचो विनिशम्य सोऽभ्यधित मित्रमुदागमितक्षणः ।
पुनरपीदमथायमवोचत ह्रियमपास्य नृपस्य तनूभवः ॥ ८९ ॥
अहमिमामपहातुमनीश्वरः सुचरितामिव पूर्वभवप्रियाम् ।
यदि बलादपि मां नयसे सखे ! न तदसून्मम तर्हि किमन्तिताम् ? ॥ ९० ॥
इति स तद्वचनाच्छ्रुतिसङ्गताद् व्यथित मङ्क्षु सुहृत् परिदेवनम् ।
तमनु रोदिति स स्म नृपाङ्गजो ध्वनिमयं भुवनं समभूत्तदा ॥ ९१ ॥
गुणवदिभ्यमणिर्मणिसारकः सकरुणः स च तत्र समागतः ।
स्म परिपृच्छति शोकनिबन्धनं तमथ सागरिराह यथातथम् ॥ ९२ ॥
स च विचिन्तयति स्म ततो जनः कथमहो मदनेन विडम्बितः ? ।
इदमचेतनमेव सचेतनं न भवतीति विवेकमलं न य. ॥ ९३ ॥
अथ स मित्रमुदिभ्यमुवाच तं रचयिताऽस्य मया परिपृच्छ्यते ।
प्रतिकृतिः किमियं खलु पुत्रिका किमपि शिल्पधियाऽथ विकल्पितम् ? ॥ ९४ ॥

तदवधार्य स इभ्य उदाहरद् व्यरचयं त्रिदशालयमेतकम् ।
जलधिकूलगपूगमहाऽभिधाश्रुतपुरस्थितशूरकतक्षतः ॥ ९५ ॥
अहमियर्मि पुरा ननु तत्र च प्रकथिते सुहृदाऽथ सुहृज्जगौ ।
न भविताऽस्मि भवन्तमृते, स तद् व्यतत मासयुगावधिमाधिभृत्॥ ९६ ॥
तमुपरुध्य महेभ्यशिरोमणिं निजसुहृत्परिरक्षणकर्मणि ।
जलधितीरमतीत्य स तत्पुरं प्रथितमासददुत्तमलक्षणैः ॥ ९७ ॥
विहितवेषविशेषविभूषणः स उपदापदपाणिसरोरुहः ।
तदथ तक्षगृहं रुचिरं गतः सुपरिपृष्टसमागमकारणः ॥ ९८ ॥
रचितसत्कृतिरीप्सितशिल्पिना वदितुमारभताथमनन्तरम् ।
विबुधसद्म विधापयितुं मतिर्मतिसमुद्र ! समुल्लसते मम ॥ ९९ ॥
स्थपतिषु प्रथमः प्रथितस्ततः प्रतिकृतिं विनिवेद्य तत्पुरः ।
प्रतिकृतिः कृतिनां श्रुतिमागता यदधिकां वितनोति विभावनाम् ॥१००॥
अथकथत् स च सूत्रभृदीदृशं सुमपुरोपवने रचितं मया ।
विरचितं मणिसारकसाधुना यदपि तद्भवता किमवेक्षितम् ? ॥ १०१ ॥
सदवलोकितमित्यभिधाय तं पुनरपृच्छदसावपि पुत्रिका ।
प्रतिकृतेन धृता खलु तत्र या किमपि शिल्पमहो यदि वा तव ? ॥ १०२ ॥
स गिरमादित पुष्पकरण्डिनीपतिमहापृतनाङ्गभवा मया ।
निपुणमारचिता मणिमञ्जरी न खलु शिल्पविकल्पितमत्र मे ॥ १०३ ॥
वचनमभ्युपगम्य स शिल्पिनः स्वपरिकल्पितमुत्तरमब्रवीत् ।
अहमुपैमि पुरा गणकोत्तमं गुणकरं परिपृच्छय मुहूर्तकम् ॥ १०४ ॥
इति निवेद्य स उज्जयिनीपुरीपरिसरेऽपि गतो रजनीमुखे ।
अवसदायतगोपुरमध्यतः प्रततगोपुरवासिनिकेतने ॥ १०५ ॥
स्थितिमयं कलयन्नपि तत्र च समश्रृणोत्पटहस्य पटुध्वनिम् ।
भवति दोषमृतं तरसाक्षयं क्षपितभीतिरसुं कथमेव यः ॥ १०६ ॥
दिशति तस्य सुवर्णसहस्रकं धनवतां प्रभुरीश्वरनामकः ।
स विनिशम्य तदाह च यामिकं किमिति रक्ष्यत एव शवो ननु? ॥ १०७ ॥
स जगिवान् दुरवोऽयमहो नरः पथिक ! मारिकदर्थनमारितः ।
पिदधिरे निखिलान्यपि गोपुराण्यवितुमेतमतो हि महादरः ॥ १०८ ॥

---

१ उज्जयिनीपतिमहासेनसुता ।

पटहमस्पृशदेव धनाशया धनमवाप निवेदितसामि च ।
उपसि चानतिसृज्य धनं बलाच्छवमनैपुरिदं प्रियबान्धवाः ॥ १०९ ॥
अनयमैहत मित्रमुदेतकं, तमपि बोधयितुं वसुधाभुजे ।
वसुशतात्तसुवेपविराजितस्तदनु वारवधूसदनं ययौ ॥ ११० ॥
मदयति स्म हिरण्यचतुःशतीवितरणेन तदैव स कुट्टिनीम् ।
सवनभोजनकर्मभिरेव सा विहितगौरवमेतमतूतुपत् ॥ १११ ॥
सहचरार्थविनिर्मितिचिन्तनः कमनशास्त्रपरिस्मृतिशून्यधीः ।
अनयदेव तमीमखिलामसौ हृदि समाधिविधिं किल नाटयन् ॥ ११२ ॥
इति निशात्रितयेऽपि नियन्त्रितं विदधतं सुतमां सुनिवन्मनः ।
सविधभाजि गुणोपचितस्त्रियां, तत इयं तमवोचत शम्भली ॥ ११३ ॥
मम सुता भवता किमुपेक्ष्यते विकचगन्धफलीव षडङ्घ्रिणा ?।
किमुचिता न गुणैर्निचिता नवा प्रियतयोपाचिता यदि वा नवा ?॥११४॥
अथ जजल्प स मातरिदं हितं त्वदुदितं समये विदधे पुरा ।
कथय किञ्च तवाप्यवरोधके किमु गतिर्दृढसङ्गतिशालिनी ? ॥११५॥
वदति सा स्म ततो, मणिमञ्जरी तनुभुवो मम यत्सुतरां सखी ।
सदृशरूपकलाबलशीलयोर्भवति सख्यमपेक्ष्यमिदं यतः ॥ ११६ ॥
अपि स तामवदद् वदतां वरो जननि ! सा तदिदं प्रणिगद्यताम् ।
सुतनु ! वाचिकतोऽप्यनुरागयुग् दृढहृदो भव मे प्रिय ईदृशात् ॥११७॥
अमरदत्तमहापुरुषेण ते प्रियतमेन सुते ! प्रहितः परम् ।
हृदयमेव परं समुपागतो मधुरवागिह वाचिकहारकः ॥ ११८ ॥
॥ युग्मम् ॥
श्रुतिपदं तदवाप्य जगाम तां हृपितरोमततिर्लघु कुट्टिनी ।
अभिहिताऽथ तया प्रमदाश्चितैव भवती प्रसवित्रि ! किमीक्ष्यते ?॥११९॥
अथ जगावपि सा तदुदीरितं हृदि निधाय च धूर्तधुरन्धरा ।
विकटकैतववृत्तिपरिष्कृतं तमपि मेलय मे प्रियमेलकम् ॥ १२० ॥
तमुदितं मुदिता विनिवेद्य सा तमथ मित्रमुदं समतोपयत् ।
नृपसुताऽऽलयमीक्षयितुं स्वयं सुजवना निशि तेन सहागमत् ॥ १२१ ॥
प्रणिजगाद च वत्स ! महामते ! वरणसप्तकयामिककोटिभिः ।
परिवृते कथमत्र तदालये भयमपास्य ! भवानपि यास्यति ? ॥१२२॥

अथ तया भवने तदपेक्षिते निजकराम्बुरुहा समवेक्षिते ।
असमविक्रमभृत्तडिदुच्छिखं करणमेव ददावतिसाहसः ॥ १२३ ॥
अतिविशालससुन्नतशालकप्रविततिं समतीत्य निमेषतः ।
प्रवरजालगवाक्षमधिश्रितः समवलोकयति स्म स कन्यकाम् ॥ १२४ ॥
अहह! वीरशिरोमणिरेष को बलमियच्च यदीयमवेक्ष्यते ?।
इति सहर्षमियं परिचिन्तयन्त्यचिरमालयमापक कुट्टिनी ॥ १२५ ॥
सपनमन्तमनन्यसमाकृतिं सुकृतवीक्ष्यमवेक्ष्य च कन्यका ।
वितनुते किमयं तदवेक्ष इत्युपधितः स्वपिति स्म सविस्मया ॥ १२६ ॥
स च विकृष्य ततः क्षुरिकां शितां करिकराकृतिदक्षिणसक्थनि ।
किमपि तां करभोरुमलाञ्छयद्वलयमादित वामकराद् द्रुतम् ॥१२७॥
करणशक्तियथागतवर्त्मना पणवधूभवनं प्रविवेश सः ।
प्रतिपदा सचिवेन महौजसा तदिह किं नहि यत्सुकरं नृणाम् ?॥ १२८ ॥
सुलपना तदनालपनापि सा स्वमपि विभ्रमदा स्म विगायति ।
कथमपि क्षणदाविरतिक्षणे शयनशर्म समासददाशु च ॥ १२९ ॥
अमरदत्तसुहृद् दिवसोदये नृपतिमन्दिरवेत्रिमहीस्थले ।
सरलवंशपुरस्तृणपूलकमधृत पूत्कृतिपूर्वकमुच्चकैः ॥१३०॥
तमथ वेत्रिमुखेन महीपतिर्द्रुतमजूहवदाश्रुतिपूत्कृतिः ।
तदनु पृच्छति च स्म स चावदत् परिभवं वणिजा कृतमात्मनः ॥१३१॥
क्षितिपतेर्वरपत्तिभिराहृतः स उपदासहितो वणिगीश्वरः ।
उपगतः प्रणतो नृपभाषितोऽवगततत्त्वमुवाच कृताञ्जलिः ॥ १३२ ॥
अवनिवासव! पुत्रविपत्तितः शुचमकार्यमहं दिवसत्रयम् ।
व्यवहृतिः परमा परमार्थतो भजति ना न विनैव तया सुखम् ॥१३३॥
प्रभुपदाम्बुजयुग्ममयं तवः सुमतिराश्रितवान्मतिमात्प्रियः ।
इति निवेद्य विसृज्य च तद्धन गृहमिते वणिजे तमवग् नृपः ॥ १३४ ॥
कथय सत्त्वनिधे! कुणपं त्वया कथमिदं परिरक्षितमक्षतम्? ।
स निजगाद निशम्य महीपते ! परिकरं दृढमत्यवधानतः ॥ १३५ ॥
करतले क्षुरिकां निशितां दधद् निदधदक्षि विदिक्षु च दिक्षु च ।
प्रहमतिप्रमतः प्रहरे गते विहितफेत्कृतिभीमशिवागणः ॥ १३६ ॥
यदनु च द्विमिते प्रहरे परे नृपलभोज्यकृतोऽपि नृचक्षसः ।

प्रहर एव भयङ्करशाकिनीसमुदयः समियाय तृतीयके ॥ १३७ ॥
विविधखेलननर्तनजल्पनैः सुचिरमप्यधिवास्य तिरोदधुः ।
अपरिभूततयाऽवहिताशयो विगतभीरपि यावदवास्थिषि ॥ १३८ ॥
उपगता रमणीयतमाकृतिः कुणपसन्निधिमेव तुरीयके ।
प्रहर आगमिता ननु मान्त्रिकैर्वरमणी रमणीयविभाभरैः ॥ १३९ ॥
सनय ! मारिरिति प्रतिपद्य साऽध्रियत वामकरे प्रसभं मया ।
विदधती प्रपलायनमेपिका सपदि दक्षिणसक्थनि लाञ्छिता ॥ १४० ॥
रभसनाशविकृष्टकराम्बुजे मम करे किल तद्वलयं स्थितम् ।
नृपनिदेशवशादथ दर्शितेऽत्र नृपतिर्मनसीदमचिन्तयन् ॥ १४१ ॥
कनककङ्कणमेतदहो ! मया स्वतनयाकर एव विलोकितम् ।
इदमजायत तस्करतः कथं श्लथनवर्जि च तस्करगोचरः ? ॥ १४२ ॥
समभिसृत्य ततः शयितां सुतां परिहिताच्छतराभरणांशुकाम् ।
सुदृढमूरुनिबद्धकपट्टिकां नृपतिरैक्षत संहृतकङ्कणाम् ॥ १४३ ॥
किमभवत्तरणेस्तिमिरोदयः सलिलतो यदि वा ज्वलनोद्भवः? ।
यदिदमश्रुतपूर्वकमीदृशं तनुभुवो मम मारिविदूषणम् ॥ १४४ ॥
अपि समक्षविलक्षणलक्षणैरियमजायत किंनु कलङ्किनी? ।
किमथवा सहसा न निगृह्यते सकलमेव कुलं परिरक्षितुम् ? ॥ १४५ ॥
इति विमृश्य तमेत्य रहोऽभ्यधात् सरससाहसिकोत्तम ! साहसम् ।
कुणपरक्षण एव तवाथवा स्फुरति किञ्चन मान्त्रिककौशलम् ? ॥ १४६ ॥
निनयिथ क्षणदाप्रहरेऽन्तिमे सुनयनां नयनायनमेव याम् ।
कलयतां तनयां विनयान्वितां मम विचक्षण ! मारितयेङ्गिताम् ॥ १४७ ॥
यदि तवास्त्यपि शक्तिरनाहता तदिमिकां निगृहाण गृहाण च ।
प्रथममेव निरीक्ष्य परीक्ष्य च प्रवदितास्मि नृपेति च सोऽवदत् ॥ १४८ ॥
नृपनिदेशवशात्समुपागतं सदकरोद् नृपतेस्तनयाऽपि तम् ।
किमुचिताचरणव्यभिचारणां विदधते क्वचनापि महाशयाः? ॥ १४९ ॥
अथ जगौ जगतीपतिनन्दनाममरदत्तसुहृद् यदहं ब्रुवे ।
शुभमुताशुभमेव मदीरितं तदविमर्शमिदं क्रियतां त्वया ॥ १५० ॥
न वलयापहृतौ तव केवलं नवलयापहृतौ मनसोऽस्म्यऽलम् ।
कुवलयाक्षि ! च सक्थनि दक्षिणे विहितवानहमस्मि तवाङ्कनम् ॥ १५१ ॥

शुभवती भवती नृपतेः पुरः कनि ! मया खलु मारिरितीरिता ।
जडधिया निजकार्यविधित्सया परमघं न हि दूषणरोपणात् ॥ १५२ ॥
शृणु यतोऽस्ति सुहृत्सुमपत्तनेऽप्यमरदत्त इति प्रथितो मम ।
सुरगृहे तव रूपकपुत्रिकासुभगताकलनारस भवन्मयः ॥ १५३ ॥
निधनतां त्वदलम्भनतो गमी गमितशक्तिरसौ स्मरसायकैः ।
सुहृदहं भवदर्थमिहागमं कपटमारचयं किल तादृशम् ॥ १५४ ॥
मम मृतिर्नियता त्वदलाभतः स च मरिष्यति तत्र शुभाशये ! ।
तव कलङ्कयुगं भविता गिराऽयमपि चेतसि तन्वि ! विचारय ॥१५५॥
नृपसुताऽपि विचिन्त्य जगाद तं मयि दृषद्वपुषि स्थिरसौहृदः ।
अयि ! सुहृत्तव मित्रयुरीदृशस्त्वमपि तद्द्वयमाप्यमिदं ध्रुवम् ॥ १५६ ॥
तदनुरागमवेक्ष्य विसारिणं स वदति स्म यदा जनकस्तव ।
मम समर्पयते भवतीं तदा सुतनु ! फेक्रियतां सुतरां त्वया ॥ १५७ ॥
इति विनीय स तां मणिमञ्जरीं नृपतिमभ्यगमन्निजगाद च ।
क्षितिपते ! मम साध्यतमाऽस्ति सा चतुरगस्तुरगः परमर्प्यताम् ॥१५८॥
दिनकराभ्युदयात्प्रथमं यथा जनपदान्तरमेव तकां नये ।
अपरथा तु तथाश्रितलक्षणा कुलविघातकरी भवितैव सा ॥ १५९ ॥
क्षितिभुजा चकितेन च तस्य सा कचविकर्षणपूर्वकमर्पिता ।
अथ सुता गुरुफेत्कृतिभीषणा व्यवसिता कुलजा हि कुलश्रिये ॥ १६० ॥
अयमपि प्रणयप्रवणः स हुंफुडितिमन्त्रसमुच्चरणादिमम् ।
नृपसुतामधिरोह्य तुरङ्गमं निरगमन्नगराद्दिवसात्यये ॥ १६१ ॥
उदित एष तया हयमाश्रयेति स जगौ स्फुटमेककवाहने ।
सह सुहृत्प्रियया त्वधिरोहणं न खलु सङ्गतिमञ्चति कुत्रचित् ॥ १६२ ॥
नृपसुताऽपि विचिन्तयति स्म सा सुकृतिनां कृतिनां स शिरोमणिः ।
गुणनिधिः सुहृदेष यदीयकः श्रुतिविदां व्यवहारविदां गुरुः ॥ १६३ ॥
अहमपि त्रिजगत्प्रमदाजनस्तुतिपदं न भवाम्यधुना कथम् ? ।
अपि दृषद्वपुषा परिकॢप्तया युवमनः प्रसभं प्रहृतं यया ॥ १६४ ॥
विमृशतीति महीपतिकन्यका सुहृदपेक्षितसिद्धिविधित्सुना ।
द्रुतमनीयत पुष्पपुरान्तिकं नयवता कमलेव विशालताम् ॥ १६५ ॥
परमितश्च दृषन्मयपुत्रिकास्मरणलीनमना नृपनन्दनः ।

अवसिते सुहृदाऽभिहितेऽवधौ तमरामिभ्यमयाचत चित्त्यिकाम् ॥१६६॥
विरचिते खलु तेन तदीहिते निरुपचारमथोपचितानले।
निखिलपौरजनप्रतिपत्तितस्तदहरेकमवास्थित भूपजः ॥ १६७ ॥
तुरगवाहन एति पदातिना सममिति प्रजया प्रनिरूपिते।
अमरदत्तसुहृन् तयका समं स समयाऽमरदत्तमुपागमत् ॥ १६८ ॥
उपलमूर्त्तिरियं समुपासिता कलयति स्म यदत्र समक्षताम्।
अविकलं तदिदं किल भावनाबलफलं कलयन्तु मनीषिणः ॥ १६९ ॥
अमरदत्तकुमारशिरोमणिः समवलोक्य स तां मणिमञ्जरीम्।
सुखमवाप तदेव न निर्वृतेर्यदपि निर्वृतिमाप्य दुरासदम् ॥ १७० ॥
कटसुहृत्प्रियता कटसंगराम्बुधितटप्रतिपत्तिरनाहता ।
कटविसाध्वसमानसवृत्तिता कटमतिप्रचयोऽपचयोज्झितः ॥ १७१ ॥
इति स मित्रमुदाश्रितसंमदैरभिनुतो मणिसारकनागरैः।
न गुणवद् यदि वस्तु विवर्ण्यते क रसना रसमद्भुतमश्नुताम्? ॥ १७२ ॥
(युग्मम्)

सुजनभावमितेरथ नागरैर्भजति शुष्मणि तत्र च साक्षिताम्।
सुमनसः परितापनिवृत्तये व्यधित सोऽपि विवाहविधिं तया ॥ १७३ ॥
नवनवं खलु मन्मथयुगेन यत्कृतमशर्म दृषद्वपुषा तया।
अपि शिरीषसुमारसुकुमारया तदपि तस्य तदेव तया क्षतम् ॥ १७४ ॥
वितनुतेऽसुखमेव विचेतनो मिलित एव सुखं तु सचेतनः।
अपरथा हि दृषद्वपुषा तया सुखमजन्यत नास्य तदा कथम्? ॥ १७५ ॥
अथ निशीथभरेऽत्र महीश्वरेऽसुतकुले मृतिमीयुषि मन्त्रिणः।
अभिविसृज्य मिथोऽभ्यपिचन् समे गजमुखाद् युवदिव्यगुपञ्चकम्॥१७६॥
दयितया सुहृदा सह चामरस्फुरणाञ्चितयाहवने स्थितः।
स जलपूर्णघटेन समुक्षितः स निहितः करिणा निजकुम्भके ॥ १७७ ॥
तुरग एष चकार च हेषितं शशिकरोज्ज्वलचामरवीजितः।
स्वयमवास्थित चातपवारणं शिरसि दैवमहामहिमाश्रयात् ॥ १७८ ॥
अमरदत्त इतिप्रथिताभिधो जयति भूमिपतिः क्षितिविश्रुतः।
इति जगादतमां दिवि देवता सचिवमुख्यजनैः स्म विनम्यते ॥ १७९ ॥
जनपदान्तरमप्यधिजग्मुषः सुकृतिनः सुकृतं फलवद्भवेत्।

क्वचन तिष्ठतु गच्छतु वेच्छया कनकमस्य हृता न महार्घता ॥ १८० ॥
प्रविशतो नृपतेर्नगरान्तरं वदनचन्द्रमवेक्षितुमुत्सुका: ।
व्यधिपताऽऽलपनं नगराङ्गना भवनतुङ्गगवाक्षमधिश्रिता: ॥ १८१ ॥
समवलोक्य महीपतिमेकिका प्रवदति स्म सखीं प्रति पश्य यत् ।
सुरपतेरिव मर्त्यपतेः श्रियः परबलच्छिदुरत्वमनोहराः ॥ १८२ ॥
अवददप्यपरा मणिमञ्जरीकरसरोरुहपृक्त्यनुभावतः ।
पथिकवृत्तितयाऽप्युपागतः सखि ! विलोकय राज्यमविन्दत ॥ १८३ ॥
रसनया सखि ! वर्णनमेकया किमिव मित्रमुदोऽस्य विधीयताम् ? ।
जलधिपारमवाप्य च मालवप्रभुसुतां य इमां सुधियाऽऽनयत् ॥१८४॥
सखि ! विवर्ण्यतमो मणिसारको दयितया दयया समलङ्कृतः ।
कथमपीममजीजिवदेव यः सहचरेण विनाऽत्र पुनः स्थितम् ॥ १८५ ॥
इति नयन् वचनं विषयं श्रुतेः प्रमुदिताशयनागरयोषिताम् ।
नृपतिसौधमवाप नरेश्वरः सचिवमाण्डलिकैरभितो वृतः ॥ १८६ ॥
व्यधित भूमिपतेरभिषेचनं सचिवसंहतिरभ्युदयोन्मुखी ।
विविधतीर्थजलैरुपहारितैः कनककुम्भधृतैरथ पावनैः ॥ १८७ ॥
सुहृदि मन्त्रिपदं निदधेऽमुना प्रविदधे महिषी मणिमञ्जरी ।
सममहेभ्यवरो मणिसारकः क्षितिभुजा जनकेन समस्तदा ॥ १८८ ॥
परमवाप्स्थित भास्वति सूरता कुमुदिनीदयिते किल राजता ।
निविडमेव विडौजसि जिष्णुताऽप्यमरदत्तनृपेऽवति मेदिनीम् ॥ १८९ ॥
अतिगतेषु कियत्स्वपि वत्सरेष्वमरदत्तमहीपतिमन्यदा ।
विनयपूर्वमभाषत मित्रमुन्नुदति तन्नृप ! मां शवभाषितम् ॥ १९० ॥
कुरु तदभ्युपपत्तिमिलापते ! विसृज मामिति सामहगीरितः ।
नरपतिः स्वजनैरनुवर्त्तकैरथ वसन्तपुरे नयति स्म तम् ॥ १९१ ॥
कतिपयैर्दिवसैस्तदुदन्तकेऽनवगतेऽधृतिमान् धरणीधवः ।
अकृत शुद्धिमभीष्टजनैर्निजैर्न तदुदन्तमविन्दत कश्चन ॥ १९२ ॥
प्रियवयस्यकवार्तमनाप्नुवन् हृदि वहन्नसमाधिभरं नृपः ।
इति विचिन्तयति स्म स कोऽपि विद् यदि समेति तदा रुचिरं भवेत्॥ १९३॥
अथ वनीपतिरप्यवनीपतिं समुपगम्य विनम्य जगाद तम् ।
तव वने समुपास्थित चित्चतुष्टयधरो वृषघोषमुनीश्वरः ॥ १९४ ॥

१ धर्मघोषनामा ।

अमरदत्तनृपः प्रमदोद्गसद्बहलरोमसमाचितविग्रहः ।
सदयितोऽथ विवन्द्य गुरूनयं गुरुमुखात्सुकृतश्रवणं व्यधात् ॥ १९५ ॥
तदनु शोकसदत्तमहेभ्यको दुहितृशोकसमाकुलमानसः ।
स्फुटमपृच्छदनिच्छद्मदो गुरून् मम सुताऽपि सदा किमहो ! सरुक्[1]॥१९६॥
गुरुभिरात्मसमीपमवापिता गुरुदृशाऽजनि साऽपि निरामया ।
धनपतिस्तु किमेतदिति स्वयं मुनिपतीन् स ततः परिपृष्टवान् ॥ १९७ ॥
गुरुरवोचत भूतकशालके पुरवरेऽजनि भूतकदेवकः ।
वणिगभूतमहाव्यसनोदगः समुदयच्छुभकर्ममनोरथः ॥ १९८ ॥
कुरुमती समजायत तत्प्रिया सरसिजायतलोलविलोचना ।
नवपयः समवेक्ष्य च साऽपि पीविपयमाहृतमोतुभिरन्यदा ॥ १९९ ॥
मतिमतीमपि देवमती वधूमिति जजल्प रुषाऽरुणितेक्षणा ।
किमवधानपराङ्मुखि ! शाकिनीकवलिताऽसि न पासि यदेतकत्[2]॥२००॥
(युग्मम्)
तदतिभीमवचःश्रवणादपि प्रचलदङ्गलतां क्षुभितामिमाम् ।
छलयति स्म बलादपि शाकिनी छलपरा हि खला न यथेपिका ॥ २०१ ॥
अथ नरेन्द्रगणैः कृतमण्डलैः प्रचुरमन्त्रविधानविशारदैः ।
मलविसारितया स निगृह्यते परचमूरिव सा विरसारवा ॥ २०२ ॥
पुनरभूद्वपुषाऽपि समाहिता प्रतिकृता खलु तैरपि योगिभिः ।
कुरुमती किल कालरसक्षिकेति भुवि सा श्रुतिमेव ततो गता ॥ २०३ ॥
तदसमानविरागभरादियं व्रतमुपेत्य दिवं च तवाङ्गजा ।
अजनि पुण्यमतेऽम्बरदेवतास्तत इमां व्यथयन्ति कुकर्मणः ॥ २०४ ॥
मम समीक्षणतोऽप्यपहाय तास्तव सुतां प्रपलायिषताधुना ।
सहजवैरभरार्दितचेतसामपि न वैरकथा दृशि विद्वलाम् ॥ २०५ ॥
स्मृतभवान्तरजातिरयं व्रतं भवविरक्तिरयाचत साऽप्यलम् ।
गुरुमुखाधिकभोगफलश्रुतेः शिवफलं गृहिधर्ममुपाददे ॥ २०६ ॥
नृपतिविज्ञपनासमनन्तरं गुरुरवोचत मित्रचरित्रकम् ।
तत्र भटैः सह भक्तिपरंस्तदा गहन एव पपात स मित्रमुत् ॥ २०७ ॥
दिनमवास्थित यावदतन्द्रितो जनसुराय सरा तत्र तत्र सः ।

---

१ दुग्धम् । २ वानीरयम् ।

बहलनाहलराजिरुपागमद्यमभटा इव तावदतर्किता ॥ २०८ ॥
तव भटेष्वखिलेषु पलायितेष्वथ पलायितवान् स सुहृत्तव ।
कचन केचन तेऽपि च मण्डले परमपत्रपयाऽस्थुरवाङ्मुखाः ॥ २०९ ॥
कचन कानन एव परिभ्रमंस्तृषित एव निपीय सरोजलम् ।
श्रममपासितुमातपवर्जिते शयितवान् वटभूमिरुहस्तले ॥ २१० ॥
तदुरुकोटरतोऽत्र विनिःसृतस्तमदशत्सहसैव सरीसृपः ।
उपगते हि विधौ प्रतिकूलतां प्रतिपदं महतां विपदेत्यपि ॥ २११ ॥
तमथ तस्य विषेण विचेतनं सपदि कोऽपि जटी समजीजिवत् ।
उपकृतिः सुकृताय महीयसे भवति संजनिता यदसंस्तुते ॥ २१२ ॥
जटिनि जग्मुषि तत्र निजाश्रमं तव समीपमुपेतुमना वने ।
स जगृहे वलिभिर्नरतस्करैः, क सुखमस्ति विधौ विमुखेऽथवा ? ॥ २१३ ॥
स विभवग्रहणेन समर्पितोऽभ्युपगतो बहुनोपरिचारिभिः ।
सरसपारसकूलयियासया क्रमश उज्जयिनीमगुरेव ते ॥ २१४ ॥
भृशमुपद्रवजातमवापिता प्रबलचौरगणेन तदा पुरी ।
स्वयमिलाऽधिपतेर्विनियोगतो भ्रमति दुर्गपतिर्भ्रमणीविधौ ॥ २१५ ॥
स कथमप्यपसृत्य पलायितः समभिवञ्च्य विलोककरक्षकान् ।
वरणमध्यगवार्गमनाध्वना पुरि विशन् ददृशे पुररक्षकैः ॥ २१६ ॥
निशि मलिम्लुचविभ्रमतो धृतो निविडशृङ्खलया विनियन्त्रितः ।
दिनकरेऽभ्युदिते पुररक्षितुः सरभसं त्वविमृश्य समर्पितः ॥ २१७ ॥
स तदवेक्षणतः कुपितोऽधिकं वटतरावुदलम्बयदाशु तम् ।
यदुपकण्ठमधिश्रितयोस्तदा स भवतोः किलतोरवदच्छवः ॥ २१८ ॥
विदधतामथ तत्र च खेलनं ललितयौवनगोपतनूभुवाम् ।
उपरिभागमिते तदुदञ्चिका प्रविशति स्म भवत्सुहृदानने ॥ २१९ ॥
त्रिदिवलोकमुपैतु, रसातलं विशतु वा, यदि वा भजतां नभः ।
फलमुपैति पुमानविशङ्कितं स्वविहितानुगुणं हि परं स्वयम् ॥ २२० ॥
यतिपतेरितिमित्रसुदुर्मृतेः समुपलभ्य कथां नरपुङ्गवः ।
गुणगणं गणनाऽतिगतं स्मरन् सदयितः परिदेवनमाधित ॥ २२१ ॥
गुरुरपि प्रसरद्वचनामृतैः शुगुपतापमपाकृतवांस्तयोः ।
प्रियवयस्यवियोगनिदाघजं घनजिनागमसङ्गमसंभृतैः ॥ २२२ ॥

अमुमतः सुहृदोऽथ महीभुजा गतिमपृच्छयत सद्गुरुशेखरः ।
स पुनराह तदा शुभभावनः, स उदभूद्भवतो दयितोदरे ॥ २२३ ॥
कमलगुप्त इतिप्रथिताभिधः स भविता भवतस्तनयः परम् ।
अथ धराधिपतिः स्वतयस्ययोरपि च पूर्वभवौ परिपृष्टवान् ॥ २२४ ॥

सूरिः प्राह पुरे क्वचित् समजनि क्षेमङ्करोऽपि द्विधा
सत्यश्रीरिति गेहिनी कुमुदिनीचेन्दोरमुष्याभवत् ।
ख्यातः कर्मकरस्तयोः स चतुरः सचण्डसेनाभिधः
क्षेत्रं रक्षति खाद्यमानमभितः पक्षिव्रजैः सोऽन्यदा॥ २२५ ॥

स्वक्षेत्रनिष्ठा नवबीजकोशिकाः स्वक्षेत्रपार्श्वे समवेक्ष्य कश्चन ।
लान्तं स्वयं कार्पटिकं स चाह भोः! उल्लम्ब्यतां दस्युरयं वयस्यकाः!॥२२६॥
शाखामूले शाखिनोऽस्मिन्विशाले, श्रुत्वा चैतद्दुःश्रवं वाक्यमेषः।
चित्ते दूनः केवलं नास्य किञ्चित् कारुण्येन क्षेत्रनाथेन क्लृप्तम् ॥ २२७ ॥
सन्ध्याकाले चण्डसेनोऽपि चण्डः संवेशाय स्वामिवेश्माऽऽजगाम ।
युक्तं चैतत् कर्म निर्माय घस्रे नक्तं सेवा स्वामिनः किङ्कराणाम्॥ २२८ ॥

तदाऽभत्या वध्वा विपुलकवले लग्नमचले
गले वीक्ष्य क्षेमङ्करदयितयाऽवाचि कटुकम् ।
अरे ! रक्षःकान्ता त्वमसि किमलं स्थूलकवलै-
र्यदेवं भुङ्क्षे चेति परिगदिते साऽशममजत् ॥ २२९ ॥

अप्राक्षीच्चण्डसेनोऽप्यवसरमधिगम्यैकदा स्वामिनं स्वं
सस्नेहं बन्धुवर्गं मिलितुमयि ! विभो ! याम्यहं त्वन्निदेशात् ।
तेन प्रोचे रुषैवाविरतममिलनिर्बन्धुवर्गेण तेऽस्तु
श्रुत्वा चैतत् स्वचित्ते पृथुतरमसुखं धारयामास सोऽपि ॥२३०॥

शुद्धान्नं मुनये नयेन ददतौ तावेकदाऽऽलोकितौ
धन्यावित्यनुमोदनां विदधता दासेन तेनाधिकम् ।
याते तत्र मुनीश्वरे निजपदं तेषां त्रयाणामुप-
र्येवापप्तदनित्यतामुपदिशत् सौदामिनीदाम तत् ॥ २३१ ॥

ते मृत्युं समवाप्य पुण्यवशतो देवास्ततो जज्ञिरे
सौधर्मेऽप्युपभुज्य भोगममम तेऽपि त्रयोऽपि च्युताः ।
सत्यश्रीर्दयिता तवेयमभवद्ध्वां च दुर्वाक्यतो

मारित्वेन कलङ्किता नरपते! क्षेमङ्करात्मा भवान् ॥ २३२ ॥
दासं प्रत्युदितं विरुद्धवचनं यत्तेन ते बन्धुभि-
जातोऽयं विरहः, सखा च समभूचण्डस्य जीवस्तव।
यत्तं कार्पटिकं प्रतीरितमसत्तेनायमुद्दम्भितः
शाखायां वटशाखिनो, नहि गिरा कार्याः कषायास्त्वतः॥२३३॥
स्मृत्वा पूर्वभवं निजं गुरुमुखात्तौ दम्पती श्राद्धता-
मङ्गीकृत्य गुरुं स्म पृच्छत इदं किं भाषते वा शवः? ।
मृत्वा कार्पटिकः क्रमादुदभवत् स व्यन्तरेष्वल्पधीः
प्राग्वैरात् स शवान्तिकस्थितिरुवाचैवं गुरुः प्राह सः॥२३४॥
श्रुत्वैवं सुगुरुं प्रणम्य भवनं जग्मुर्नृपाद्याः क्रमा-
द्देवी सूनुमसूत सुरिगदितं ताभ्यां च नामादधे ।
पुत्रस्यास्य च पद्मगुप्त इति सोऽप्यासाद्य संवर्धनं
धात्र्यङ्कं सकलाः कलाः परिकलय्यापत् क्रमाद्यौवनम् ॥ २३५॥
तस्मादेव गुरोः परेद्यविरयं वैराग्यवान् भूपती-
राज्ये न्यस्य सुतं तया दयितया सार्द्धं तपस्यां ललौ ।
राजर्षि गुरुरन्वशादपि तथा तं, नित्यसौख्यार्थिना
दीक्षा कल्पलता शमामृतरसैः पाल्या त्वयाऽविश्रमम् ॥ २३६ ॥
सर्वोपाधिविशुद्धमाप्य मनुजाः प्रायः कलादाद् गुरोः
किञ्चिद्ग्रन्धकगन्धसङ्गविपर्यैर्मृताभिचारोद्धतैः ।
देहालङ्कृतिसन्निभं धनमिदं ये दूषयन्ति व्रत-
स्वर्णं तेऽनुभवन्त्यशं प्रतिभवं धर्मार्थयत्नक्षितेः ॥ २३७ ॥
माकन्दीतनयावुभाविह परं साधर्म्यवैधर्म्यकौ
दृष्टान्तौ तु यथाक्रमं शृणु मुने! मे शंसतस्तद्यथा ।
चम्पा नाम पुरी कलिङ्गविषये तत्रास्ति धात्रीधवः
प्रख्यातो जितशत्रुरित्यभिधया तद्वल्लभा धारिणी ॥ २३८ ॥
माकन्दीति महेभ्यमस्तकमणिस्तत्रास्ति माकन्दको
भद्रा तद्दयिता सुतावभवतां तत्कुक्षिजौ द्वौ परम् ।
नाम्नैको जिनपालितो व्यवसितिप्रारम्भबद्धोद्यमः
प्रेक्षावान् जिनरक्षितस्तदपरः सौभाग्यभङ्गीनिधिः॥ २३९॥

ताभ्यां व्यज्ञपि चान्यदा स्वजनकः सांयात्रिकत्वाय स
प्रोचे नो मकराकरेऽपि गमनं कार्य्यं युवाभ्यां सुतौ ! ।
यात्रा वां च यदन्तरायविकला एकादशासन् पुरा
प्रत्यूहेन युता भवेदियमहो ! वेला खलु द्वादशी ॥ २४० ॥
संख्यातीतमुपार्जितं च बहुलं तावद्भवद्भ्यां धनं
तद्दत्तं च यदृच्छया विलसतं मत्सन्निधौ तिष्ठतम् ।
तौ तेनेति निषिध्यमानगमनौ वारांनिधौ प्रस्थिता–
वारुह्यार्थसमीहया, प्रवहणं लोभो बलीयान् यतः ॥ २४१ ॥
वार्द्धेर्मध्यमधिश्रिते प्रवहणे कैश्चिद्दिनैर्दुर्दिनं
संवृत्तं वियति स्थिरागगनयोरैक्याय वातो ववौ ।
पोतो वीचिभिराहतः क्षितिभृता संस्फाल्य विस्फोटितो
रत्नद्वीपमवापतुश्च फलकं संप्राप्य तौ यत्नतः ॥ २४२ ॥
यावत्कृत्वाऽऽत्मवृत्तिं मधुमधुरफलैः सोदरौ तत्र तौ स्तो
रत्नद्वीपाधिपाऽऽगात्सरभसममरी तावदाकृष्य खड्गम् ।
सौख्यं सार्द्धं मया वां विषयजमसमं मानयेथां समानौ
नो चेच्छेत्स्याम्यहं वां कमलवदिमकं मण्डलाग्रेण मौलिम् ॥२४३॥
स्वीकृत्याज्ञां तदीयां भयचकितहृदौ कामयेते स्म तां तौ
हृत्वाऽसत्पुद्गलौघानिशमपि तया पूर्यमाणाभिलाषौ ।
अन्येद्युः साऽवदत् तौ सलिलनिधिपतेः सुस्थितस्योग्रशिष्टेः
शोध्याब्धिःसप्तकृत्वो जलनिधिरभितस्तत्र वां शर्म चेत् स्यात्॥२४४॥
हित्वाऽपाच्यवनं च दृग्विषफणिव्यालीढमाशात्रये–
ऽन्यत्रोद्यानतर्तिषु रम्यमिति सा प्रोचार्य्य देवी ययौ ।
आसाद्यारतिमेव तेषु गहनेष्वेतावपाच्ये वने
यातावेकमपश्यतामसुशिनं शूलानुविद्धं नरम् ॥ २४५ ॥
आक्रन्दं करुणस्वरं विदधता तेनेति तावीरिता–
वायातौ कथमात्रहे बत ! युवामस्याः पिशाच्या ननु ? ।
काकन्दीपुरवास्यहं वणिगहो ! संभग्नपोतोऽनया
नीतो मन्तुलवेऽपि दृश्यविषमामीदृग्दशां दुष्टया ॥ २४६ ॥
तेषामेषोऽस्थिकूटः स्फुटतरमनया ये हताः सन्ति चान्ये

श्रुत्वैवं तौ विभीतौ तदपगमकथां स्वस्य तं पृच्छतः स्म ।
तेनोचे प्राच्यवन्यां तुरगमयतनुः शैलकाख्योऽत्र यक्षो
भूतेष्टाष्टम्युपेतेऽहनि वदति स कं तारये पामि कं वा ? ॥ २४७ ॥
एवं तत्तत्र यातं त्वरितमभिदधत्पूर्वरीत्या युवाभ्यां
याच्यः संयोज्य हस्तावुपकृतिनियते ! नाथ ! नौ रक्ष रक्ष ।
तौ नत्वाऽभ्यर्च्य पुष्पैस्तमपि च समये जीवितं याचमानौ
प्रोक्तौ नेष्यामि तीरं सपदि जलनिधेर्वामवामप्रवृत्ती ॥ २४८ ॥
पृष्ठे सा समुपेत्य किन्तु यदि वां देवी भृशं भापये-
द्भेतव्यं न च तत्कथञ्चन गिरा दृष्ट्याऽपि संभाव्यताम् ।
आमेति प्रतिपद्य वाहवपुषः पृष्ठे समारुक्षताम्
तौ तस्यैव चचाल सोऽथ नभसा तत्पत्तनं प्रत्यरम् ॥ २४९ ॥
सा ज्ञात्वा तद्विभङ्गात् झगिति समुपगत्यानु तावाचचक्षे
व्याघुर्त्ति किं न दासौ ! कुरुतमपरथा हन्मि कौक्षेयकेण ।
दक्षौ यक्षस्य शिक्षां मनसि निदधतौ तौ न तां पश्यतः सा-
ऽक्षिभ्यामप्यक्षियातामिव पुनरवदत्तावनाथाऽस्मि मुक्ता॥२५०॥
स्वप्नेऽप्यप्रियमाहितं न मयका, किञ्चित् कदाचित्कृतं
चेद्युष्मद्बहुमानताम्रहिलया धार्य्यं न तच्चेतसि ।
दुष्टादुष्टवचोभिरेवमुदितौ यावन्न तौ क्षुभ्यतः
स प्रोचे किल भेदवाक्यमनया तावत्पुनः क्रूरया ॥ २५१ ॥
किं त्वं मां जिनरक्षित ! त्यजसि या गाढानुरागां मिथो
यन्मेऽयं जिनपालितः समभवन्नेष्टः सदा दुष्टधीः ।
इष्टा नास्य कदाऽप्यहं तव कथं प्राणेश ! तत् प्रस्मृतं ?
न स्त्रीणामिव मानसानि हि नृणां चाञ्चल्यमातन्वते ॥ २५२ ॥
इत्युक्ते सोऽपि लज्जाभरविनतमुखः संमुखं संददर्श
तस्या दुष्टाशयायाः सरभसवलितग्रीवमुत्कण्ठमानः ।
नोच्चैरारोहणं स्याद्विचलितवचनस्येति संचिन्त्य चित्ते
पृष्ठाद् यक्षोऽपि धृष्टं तमकृत निकृतिच्छित्तयेऽधः स्वतोऽपि॥२५३
अप्राप्तोदधिमध्यमेव तमियं कौक्षेयकेणाच्छिनद्
गत्वाऽथो जिनपालितं पुनरनु व्याचष्ट मिष्टाक्षरम् ।

सर्वं नाथ ! मृषाऽप्यभाष्यत पुरा त्वद्भ्रातुरग्रे मया
स्निग्धोऽभूर्मम यत्त्वमेव तव चाहं प्रेयसी सर्वदा ॥ २५४ ॥
तद्वाक्यश्रवणाय यद्बधिरतामापन्नपूर्वीव यद्
द्रष्टुं तामविलोचनप्रभुरिव प्रापत् पुरीं तेन सः ।
अस्मिन्नैलविलेन तत्परिसरोद्याने विमुक्ते रयाद्
व्यावर्तिष्ट सुरी वरीतुमिव या तत्पृष्ठमालम्बत ॥ २५५ ॥
सम्प्राप्तो जिनपालितो निजगृहं मातापितृभ्यां मुदा
पृष्टोऽसौ जिनरक्षितस्य रुदितं कुर्वश्चरित्रं जगौ ।
अन्येद्युः समवासरज्जिनपतिः श्रीवर्द्धमानः प्रभु-
र्गीर्वाणप्रभुवृन्दवन्दितपदस्तत्पत्तनारामके ॥ २५६ ॥
श्रुत्वा स्वामिसमागमं द्रुततरं गत्वा प्रणम्यादराद्
मातापितृपसङ्गतः श्रुतिलसद्धर्मोपदेशामृतः ।
प्रव्रज्यां जिनपालितो जिनपतेः पार्श्वे प्रबुद्धोऽग्रहीत्
तप्त्वा तोपपरः सुदुस्तपतपः कैवल्यमापत् क्रमात् ॥ २५७ ॥
तत्साधोऽमरदत्त ! सम्प्रति मया व्यावर्णितेदंस्फुर-
द्दृष्टान्तोपनयं स्फुटं शृणु यथा तौ वाणिजौ संसृतौ ।
जीवाः स्युर्द्विविधास्तथा मणिमयद्वीपाधिपा देवता
योक्ता साऽविरतिः स्मृता छलपरा पुंसां विशेषं विना ॥ २५८ ॥
मर्त्यः सोऽपि व्रतशिथिलताऽवाप्तदौर्गत्यदुःखः
स्याद्दाचार्यः प्रथितमधुरामङ्गुवत्स्वं विगायन् ।
शुद्धाख्यानप्रकटनपरो गुह्यकः सोऽश्वरूपः
संसाराब्धेस्तरणकरणं चारु चारित्रमेव ॥ २५९ ॥
जीवो निघ्नो विरत्या प्रतिसमयमयं शस्यते ज्येष्ठशिष्ट-
माकन्दीभ्याङ्गसूनुद्विरचितमहदाहेशभङ्गीविभङ्गं ।
दृष्ट्या पश्येन्न तां यो भवजलधिमहापारसिद्धिं पुरीं सः
प्रायो यायादवश्यं, हतगुरुवचनः क्षुद्रमाकन्दिसूनुः ॥ २६० ॥
निशम्य तदिदं कथानकमहो ! भविष्यत्परं
विरागपरिपुष्टधीरमरदत्तराजार्भक ।
सहार्दमणिमञ्जरीदयितया समेतश्चिर

तपांसि परितप्य सोऽप्यजनि सिद्धिकान्ताप्रियः ॥ २६१ ॥
इत्थं चैते कषाया वचनरचनयाऽप्याततता नैव भव्याः
मित्रानन्दादिवत् कं न भवजलनिधौ पातयामासुराशु ? ।
वह्नौ जाज्वल्यमाने स्फुरति च किमपि स्थावरे जङ्गमे वा
क्ष्वेडे घोरे ज्वरे वा कुलिशनिपतने मन्त्रतन्त्रादि नैपु ॥ २६२ ॥
आकर्ण्यावहितः स्वयंप्रभुगुरोरेतादृशीं तां कथां
नत्वा पादयुगं व्यजिज्ञपदिदं यावद्धरित्रीभरम् ।
पुत्रे न्यस्य समैमि सत्वरतरं तावत्स्थितिर्वोऽस्त्विहे-
त्युक्त्वा धाम जगाम भूपरिवृढः कल्याणमालेच्छया ॥ २६३ ॥
आसीच्छ्रीगुरुगच्छमौलिमुकुटश्रीमानभद्रप्रभोः
पट्टे श्रीगुणभद्रसूरिसुगुरुः प्रामाणिकानां गुरुः ।
तच्छिष्येण कृतेऽत्र षोडशजिनाधीशस्य वृत्ते महा-
काव्ये श्रीमुनिभद्रसूरिकविना सर्गो यथाष्टमः ॥ २६४ ॥

॥ इति श्रीशान्तिनाथचरिते सर्गोऽष्टमः संपूर्णः ॥



अर्हम्

अथ नवमः सर्गः ।



जिगाय यो मन्मथसैन्यमेककः कषायमुख्यैः सुभटैरनुद्रुतम् ।
शमासिना स्वीकृतशीलकङ्कटः स वैश्वसेनिप्रभुरस्तु वः श्रिये ॥ १ ॥
अनन्तवीर्यं विनिवेश्य नन्दनं प्रजाऽऽधिपत्ये चिरकालपालिते ।
विधाय सर्वानपि चार्थिनोऽर्थिनः सुवर्णदानैरथ वर्णनोचितैः ॥ २ ॥
असंशयं शिक्षितमन्त्रिनागरः शुभापुरीभूमघवा शुभाशयः ।
सुतक्षितीशाततवाञ्छितोत्सवो गुरुक्रमान्ते व्रतमाददितेहितम् ॥ ३ ॥
(युग्मम्)
चिराय दुष्कर्ममहीधराशनिं महीश्वरर्षिः परिपाल्य स व्रतम् ।
विराध्य चान्ते मनसा सुरेश्वरः प्रभुत्वशाली चमराभिधोऽजनि ॥ ४ ॥
अनन्तवीर्योऽप्यपराजितान्वितः शशास पृथ्वीमपराजितोऽरिभिः ।

तनूनपादेकक एव दुर्जयः किमङ्ग ! वातेन समन्वितो ज्वलन् ? ॥ ५ ॥
अजर्यमासाद्य कदाऽपि खेचरः प्रसिद्धविद्याबलमानदुर्धरः ।
अदत्त विद्या अनुरुध्य कश्चन प्रसाधिता ज्ञप्तिमुखास्तयोर्मुदा ॥ ६ ॥
अकृत्रिमं नाटकपाटवं दधद् बभूव चेटीद्वितयं तयोर्वरम् ।
अगर्वविद् बर्बरिकाभिधाऽऽदिमा परा किरातीति गुणैः समाश्रिता ॥ ७ ॥
सभामधिष्ठाय कदाचिदेतकौ कृताऽऽसनौ नाट्यविधिं व्यलोकताम् ।
किरातिकाबर्बरिकाख्यकिङ्करीप्रकल्पितं विश्वजनेक्षणोत्सवम् ॥ ८ ॥
अनेकतीर्थामलवारिसंभृतं करारविन्दे निदधत् कमण्डलुम् ।
परासने नैव कदाचन स्थितिर्बुधैर्विधेयेति वृषीं च पावनीम् ॥ ९ ॥
मनोवचःकायविचेष्टितत्रयं पुमान्प्रभुर्दण्डयितुं न कश्चन ।
जिनेन्द्रशिष्यानपहाय केवलं वहंस्त्रिदण्डीमिति संविदाश्रितः ॥ १० ॥
जपं विधातुं स्फटिकाक्षमालिकां वहन् स्वपाणौ शरदिन्दुनिर्मलाम् ।
स्फुरत्सितध्यानविवर्णिकामिव प्रदर्शयन् भव्यजनस्य संचिताम् ॥ ११ ॥
अधो विधेयं कनकं महर्षिभिः महर्षतः पादतलेन निःस्पृहैः ।
इति प्रजा ज्ञापयितुं जगद्गुरोर्गुरूपदेशं स सुवर्णपादुकः ॥ १२ ॥
धृतोपवीतस्तुहिनाचलच्छविः स्फुरच्छिखः पीवरकुक्षिरंसलः ।
नभोविहारेण जगन्निभालयन् कलिप्रियस्तत्र समागमद् द्रुतम् ॥ १३ ॥

॥ पञ्चभिः कुलकम् ॥

विचित्रनाट्येक्षणसक्तचक्षुषौ न तं समायान्तमिमौ स्म पश्यतः ।
कुतः पुनर्विष्टरपाद्यसंकथा, प्रसक्तमन्तःकरणं न चेष्टते ॥ १४ ॥
स तं विजानन्नपमानमात्मनो विचिन्तयामास दिवौकसां मुनिः ।
अभूतपूर्वो तनुरप्यमानना महीयसां किं न भवेन्महीयसी ? ॥ १५ ॥
अखण्डभूमण्डलपालका अपि प्रयान्ति केचिद् न मदं कथञ्चन ।
इमौ तु चेटीद्वितयोपलम्भतः कथं नु मत्तौ बहुमानसङ्गिनौ ? ॥ १६ ॥
जगत्त्रयीनायकमाननीयतां गतो न चाभ्यामपि मानितोऽस्म्यहम् ।
यदाश्रयात् तत्खलु चेटिकाद्वयं मया तदाच्छेद्यमुपात्तविस्मयम् ॥ १७ ॥
इति स्वचित्ते परिभाव्य नारदस्ततो निरीय प्रययौ जवेन सः ।
यथार्थनाम्नो दमितारिभूपतेः समीपमाकाशविकाशलीलया ॥ १८ ॥

॥ त्रिभिर्विशेषकम् ॥

क्षणेन वैताढ्यवसुन्धराधरे शतेन सप्तत्यधिकेन चार्हताम् ।
विराजिते केतनराजिसद्मनां समृद्धविद्याधरनिर्मितस्थितौ ॥ १९ ॥
समागतं तं समवेक्ष्य संभ्रमात् स्वविष्टरात्स प्रतिविष्टरश्रवाः ।
मृगेन्द्रविष्ठाद्धदतिष्ठदुन्नताद् महीध्रशृङ्गादिव रङ्कुनायकः ॥ २० ॥

(युग्मम्)

कृती समुत्सार्य सुवर्णपादुके स तं प्रणम्यासनमात्मनो ददौ ।
मुनिः परित्यज्य नरेश्वरासनं निजासनं स्वीकुरुते स्म कल्पवित् ॥ २१ ॥
निविष्टमग्रे समुपासनापरं विनीतमेतं निजगाद नारदः ।
त्रिखण्डभूमण्डलनाथ! सर्वदा समस्तु ते स्वस्ति समस्तदुर्नय! ॥ २२ ॥
महीश! राज्यं कुशलेन वर्तते तवापि सप्ताङ्गमनङ्गसन्निभ! ।
गुरुष्वतुल्या प्रतिपत्तिरेव ते सनातनं मङ्गलमाह सर्वतः ॥ २३ ॥
सदेतदाकर्ण्य मुनीन्द्रभाषितं जगौ नरेन्द्रः स्मितशोभिताननः ।
तव प्रसादेन सदाऽखिलं शिवं ममास्ति दृष्ट्या तव पापविच्युतिः॥ २४ ॥
भवादृशां दर्शनमेव केवलं पुराकृतैरेव शुभैरवाप्यते ।
न जातु दृष्टः क्वचनापि संश्रुतो न पापिनः सद्मनि रत्नसेवधिः ॥ २५ ॥
मुनीन्द्र! पृच्छामि पुनः किमप्यहं प्रसह्य वक्तुं यदि तत्त्वमर्हसि ।
त्वया समस्तं भुवनं प्रपश्यता कुतूहलं किञ्चन किं विलोकितम्? ॥ २६ ॥
अहो! ममैषां तपसां विजृम्भितं तदेतदाशंसितमात्रमेव मे ।
कृते विलम्बं यदभूत्फलेमहीति चिन्तयित्वा मुनिरप्यभाषत ॥ २७ ॥
शुभापुरीस्वामिपुरो निरीक्षितं मयाऽद्य यन्नाटकमद्भुतं नृप! ।
विधीयमानं पटुचाटुचेटिकाद्वयेन तन्न श्रुतलेऽपि भूतले ॥ २८ ॥
धराधराणामिव मेरुभूधरो जलाशयानामिव नाम सागरः ।
अये! द्रुमाणामिव देवतद्रुमः परं महीयांस्त्वमहो! महीभुजाम् ॥ २९ ॥
समृद्धमत्र विजयार्धकेऽत्र यद्यदस्ति वस्तु प्रवरं तवैव तत् ।
तदाशु चेटीद्वितयं तदानय स्वमन्दिरं सेन्दिर! सुन्दराशयः ॥ ३० ॥
भविष्यदायोधनविश्रुतश्रुतेरयं तदोङ्कारवदुद्धतस्वरम् ।
निवेद्य तत्कालमियाय कुत्रचिन्मुनीश्वरः सोऽम्बरचारिणां गुरुः ॥ ३१ ॥
अनन्तवीर्याय महीभुजे महाननन्तवीर्यः प्रजिघाय स प्रभुः ।

तदेव दूतं परिभूतसाध्वसं प्रदिष्टतद्वाचिकवाचनाचणम् ॥ ३२ ॥
समुत्सुकः सोऽपि शुभापुरीं गतः प्रदर्शनात्प्रागपि वेत्रिबोधितः ।
अनन्तवीर्यं प्रणिपत्य भूपतिं यथास्थितं वाचमुवाच चारुवाक् ॥ ३३ ॥
नरेन्द्र ! किञ्चिद्विजयार्धकेऽत्र यन्मनोहरं सम्भवतीह वस्तुतः ।
प्रहीयते तत्सकलं महीश्वरैः प्रसादहेतोर्दमितारयेऽनिशम् ॥ ३४ ॥
किरातिकावर्यरिकेतिकिङ्करीद्वयं दधानं पटुतां च नाटके ।
अनुग्रहार्थं प्रभवे प्रहीयतां ततस्त्वयेदं पिशुनप्रशंसितम् ॥ ३५ ॥
अनन्तवीर्यो नृपतिर्जगाद तं प्रतिष्ठमानो भव दूत ! तत्त्वकम् ।
इदं प्रहेष्यामि च चेटिकाद्वयं भयन्तमन्वेव महीमरुत्वते ॥ ३६ ॥
निशम्य चेदृग्वचनं महीपतेर्गतः स दूतो निजसिद्धदूत्यवित् ।
महीमघोने प्रतिहारवेदितः शशंस तद्वाचिकमीतवञ्चनः ॥ ३७ ॥
निजं समाहूय स बान्धवं रहः स्वरूपमाचष्ट विशिष्टशंसितम् ।
असौ तदाकर्ण्य तदाऽपराजितस्तमाह माहात्म्यविपश्चितं वचः ॥ ३८ ॥
अनन्तवीर्यस्त्वमनन्तविक्रमः समीक्ष्यसे यद्यपि चापराजितः ।
अनन्तवीर्योऽहमथापराजितस्तथापि वैरं सहसा न तेन नौ ॥ ३९ ॥
पदे पदे स्यादविमृश्यकारिणां नृणां विपन् सम्पदुपायिनामपि ।
स्वयं विमर्शप्रतिपत्तिशालिनां प्रतिक्षणं हि प्रभवन्ति सम्पदः ॥ ४० ॥
असाम्यविद्याबलमात्मनो विदन् सुखेचरत्नप्रबलं बलं तथा ।
स एवमाज्ञापयति प्रसह्य नौ बलं न नैसर्गिकमस्य किञ्चन ॥ ४१ ॥
तदावकाभ्यां प्रतिपादिता पुरोपरोप्य विद्याः खलु खेचरेण याः ।
प्रसाधितास्ता वितरन्तु नौ हितं बलं परं स्यादधिकं किमस्य तन् ? ॥४२॥
उभौ तु यावत्खगराजतालकध्वजौ रहोऽमन्त्रयतामिमाविति ।
प्ररोचितज्ञप्तिमुखाः समागमंस्तदमतस्तावदुपांशुदेवताः ॥ ४३ ॥
प्रदीपरत्नाभरणप्रभाभरप्रणाशितध्वान्तविविक्तशक्तयः ।
अगादिपुत्ता रचिताञ्जलिक्रमास्तनुं श्रिताः कल्पलता इवाथ तौ ॥ ४४ ॥
स्मृता भवद्भ्यामपि याश्च देवताः प्रसाधनायैव समागतास्तकाः ।
वयं स्वतः प्राग्भवप्रसाधितास्तन्निष्ठसंकल्पवशादिहापि वाम् ॥ ४५ ॥
समाश्रयामो भवदीयमङ्गकं युवां समाज्ञापयतं यदि स्वयम् ।
इति प्रवीलैव तदङ्गकेषु तास्तयोरनुज्ञामधिगम्य चाविशन् ॥ ४६ ॥

महाभुजौ तौ स्वयमेव किं पुनर्विभूपितौ ताभिरुदीर्णशक्तिभिः ?।
क्रमादभूतां भुवनेऽप्यविक्रमौ सुतौ महाकच्छककच्छयोरिव ॥ ४७ ॥
प्रफुल्लसन्तानकपुष्पवासितैः पटीरवासैर्घनसारसारितैः।
यथेच्छमानर्चतुरेव ताश्च तौ न पूज्यपूजां जनयन्ति के जनाः ?॥ ४८ ॥
अथो पुनस्तत्र निदेशमात्रतः प्रतीन्द्रवैरिद्विपतः समेत्य तौ ।
बभाण दूतः परितर्जयन् रुपा न सामसाध्या हि भवन्ति तादृशाः ॥ ४९ ॥
अहो ! युवां यौवनमानदुर्द्धरौ किमारभेथे प्रभुणा सह स्वयम् ?।
अधीतशास्त्रेण बुधोपजीविना न नर्म कार्यं गुरुभिः समं क्वचित् ॥५०॥
भवद्गिरामव्यभिचारकारणाप्रचारणातः कुपितं प्रभूत्तमम् ।
अपास्य मां रक्षितुमेव कः प्रभुर्भवन्महाविग्रहानिग्रहाग्रहात् ? ॥ ५१ ॥
प्रसादमासाद्य यदीयमीदृशं प्रपाल्यते राज्यमलं भवादृशैः ।
स तोपमाक्रामति चेटिकाद्वयीसमर्पणाग्रेत्किमपेक्ष्यते ततः ? ॥ ५२ ॥
प्रदाय चेटीद्वितयं प्रसाद्य तं महीमहेन्द्रं महसा समुज्ज्वलम् ।
द्विपत्पराभूतिमतर्कयन् हृदा चिराय राज्यं कुरु बन्धुना समम् ॥ ५३ ॥
अनन्तवीर्योऽपि निशम्य तद्गिरस्तमाचचक्षेऽतिनिगूढरुड्भरः ।
स राजराजो मम चेटिकाद्वये परं स्पृहावानिति दूत ! कौतुकम् ॥ ५४ ॥
परं प्रभूणामपि चित्तवृत्तयः प्रवर्तमानाः स्वरसातिरेकतः ।
सुदुर्निवाराः किल निम्नगा इव समुद्रमाक्रम्य पतन्ति केवलम् ॥ ५५ ॥
करोति चेटीद्वितयेन किं प्रभुर्विलोकते नौ तु निदेशवर्तिताम् ? ।
विलोकतां चेटकतां प्रपद्य नौ त्वया समं धीर ! समैव सत्वरम् ॥ ५६ ॥
इति प्रतिख्यातमधूद्भवद्रसं वचोऽमृतं तस्य निपीय निर्वृतः ।
जगाम दूतो बलिवैरिणार्पिते गृहे गृहीताभ्युपपत्तिसाधनः ॥ ५७ ॥
निवेश्य राज्यं निजमन्त्रिषु स्वयं क्रमागतेषु श्रुतिशास्त्रवेदिषु ।
बभूवतुस्ते कुटहारिके च तौ प्रगल्भविद्यावलतो बलाच्युतौ ॥ ५८ ॥
अनन्तवीर्येण सबन्धुनाऽपि नौ स्वनायकाय प्रहिते स्व उत्तमे ।
इति स्फुटं ते वदतः स मायया श्रिते भुजिष्ये उपदूतमागते ॥ ५९ ॥
सहैव ताभ्यां मुदितोऽभ्ययादयं स मङ्क्षु वैताढ्यगिरिं महामतिः ।
व्यजिज्ञपद्यावनिपाकशासनं कृताञ्जलिर्वक्त्रविसृत्वरस्तुतिः ॥ ६० ॥
वहन्ति मूर्ध्ना तव शासनं नृपाः समेऽपि मालामिव भूमिमण्डले ।

विशेषतस्तौ च विशेषवेदिनौ नरेन्द्र! धत्तो मणिवन्महोदयम् ॥ ६१ ॥
उपायने स्तः प्रहिते च चेटिके इमे च ताभ्यां श्रुतसङ्गते! तव ।
सरस्वती नाट्यकलामशिक्षयत्कुतूहलार्थं तव ये नरोत्तम! ॥ ६२ ॥
समादिशत्ते दमितारिरात्मना प्रकृष्टनाट्याभिनये तदा नृपः ।
प्रवर्धमानोत्कलिकाऽऽकुलं मनः कथं विलम्बं सहतां मनस्विनाम्? ॥६३॥
रसोऽपि यो यः प्रकटीकृतस्तदा जनैः सदस्यैः स नवो नवो मतः ।
यदैव तेनैव रसा नव स्मृता नटाङ्गशास्त्रेषु विचित्रभङ्गिषु ॥ ६४ ॥
यमेव शैलूषमतल्लिकारसं तदाभ्यनैषुर्ललिताङ्गहारिकाः ।
सभाजनस्तन्मयतां व्यगाहत प्रलीनचेताः स तु तत्र तत्र सः ॥ ६५ ॥
तदैव चक्षुःश्रवसो व्यवर्णयन् जना अभिन्नेन्द्रियभिन्नकर्मणः ।
समीक्षमाणा अपि नृत्यकौतुकं सुगीतगीतान्यपि येऽत्र शृण्वते ॥ ६६ ॥
तदा न तृष्णां विविदुः सभाजना न वा बुभुक्षामपि केऽपि जाग्रतीम् ।
श्रमं निविष्टा अपि केऽपि नासदन् सुगीतलास्यस्थिरचित्तवृत्तयः ॥ ६७ ॥
चतुर्विधासु श्रितकर्णवृत्तिषु प्रवाद्यमानास्वपि वाद्यभङ्गिषु ।
भियेव तासामपरो ध्वनिस्तदा सदस्यकर्णान्तिकमाजगाम न ॥ ६८ ॥
अदृष्टपूर्वं समवेक्ष्य नाटकं तदेवमीदृग् दमितारिभूपतिः ।
पराक्रमं स्वीयमथापि जीवितं तथा प्रतापं सफलं व्यबुध्यत ॥ ६९ ॥
सरस्वतीक्षीरसमुद्रनन्दिनीद्वयप्रतिच्छन्दमिवाङ्गसङ्गतम् ।
तदाप्य चेटीद्वितयं नरोत्तमस्तृणाय मेने शतमन्युमप्ययम् ॥ ७० ॥
अथ स्वपुत्रीं कनकश्रियं द्विधा रुचाऽपि नाम्नाऽपि समार्पयद् नृपः ।
तदैव ताभ्यामबलागुणोज्ज्वलां प्रमोदभृन्नाटकसारशिक्षणे ॥ ७१ ॥
निरीक्ष्य तां कृत्रिमचेटिके पटुश्रिया जयन्तीममराङ्गना अपि ।
सुशिक्षितां शिक्षयतः स्म नाट्यकं समग्रकं साभिनयं क्रमेण ते ॥ ७२ ॥
अगायतां ते च गुणैकसेवधिं सदैव नाट्यान्तरनन्तवीर्यकम् ।
गुणांस्तदीयान् श्रुतिगोचरं नयन्त्यपृच्छदेते नृपतेः सुताऽन्यदा ॥ ७३ ॥
युवा युवाभ्यामपि गीयते नृपः सदा वयस्ये! क उदग्ररागतः?।
इदं निशम्याभ्यधितापराजितः स चेटिकारूपधरोऽथ तां प्रति ॥ ७४ ॥
शुभाशयेऽस्मिन्विजये शुभापुरी समृद्धिसङ्केतनिकेतमस्ति ताम् ।
समागता यत्र विहारलीलया पुलोमजाऽमंस्त न चामरावतीम् ॥ ७५ ॥

अभूदिह क्षत्रियवंशमौक्तिकप्रभो नरेन्द्रः स्तिमितादिसागरः ।
व्रतं समादाय नृजन्म सार्थकं चकार कारुण्यरसाम्बुधिश्च यः ॥ ७६ ॥
तदङ्गजन्माऽजनि चापराजितः सपत्नसङ्घैरपराजितः सदा ।
अनन्तवीर्यः कमलाक्षि ! सान्वयः समस्ति तस्यानुज उत्तमोत्तमः ॥ ७७ ॥
स मुख्यवृत्त्या सुभगे ! कलानिधिः कलानिधिर्ग्लौरुपचारवृत्तितः ।
गुणाश्रयोऽसौ परमार्थवृत्तितो गुणाश्रयो द्रव्यमवास्तवी श्रुतिः ॥ ७८ ॥
कचिद्भवेदाकृतिरेव सुन्दरा न चापि सौभाग्यमभङ्गुरास्थिति ।
कचित्पुनः श्रेयसि तत्र न ज्ञता, विभाव्यते भाविनि तत्र तत्त्रयम् ॥ ७९ ॥
विभर्तु किं तद्गुणवर्णनाविधौ विदग्धतां मादृगबोधविक्लवा ? ।
चतुर्मुखीभूय विरञ्चिरात्मना विधाय यत्र प्रभुतां व्यधत्त न ॥ ८० ॥
गुणांस्तदीयान् श्रवणावतंसतां यथा यथा सा नयति स्म तन्मुखात् ।
तथा तथा तामदुनोद् मनोभवः प्रक्लृप्तनालीकशरैः स निष्ठुरम् ॥८१॥
शुभापुरीभूमिरियं प्रशस्यते स एव यस्याः पतिराश्रितस्थितिः ।
महीभृतं तं हृदयेन बिभ्रती शिरीषमृद्वी श्रममागमं परम् ॥ ८२ ॥
विलोक्य तं मध्यमलोकनायकं विलोचने पायसपारणाविधिम् ।
अमूदृशाऽनीक्षणिकोपवासिनी चिराय ते मेऽपि कदा विधास्यतः? ॥ ८३ ॥
समीहितं पुण्यमृते न लभ्यते कदाचन स्फीतिमताऽपि सम्पदाम् ।
न चापि पुण्यं विहितं मया हितं विलोकिताहे वरमेव तं कथम् ? ॥ ८४ ॥
विचिन्तयन्तीति नरेन्द्रकन्यका भुजिष्यया वाचि तयैव धूर्तया ।
विचक्षणे ! तस्य समीक्षणे मनः समुत्सुकं किं तव वर्तते मनाक् ? ॥ ८५ ॥
॥ चतुर्भिः कलापकम् ॥
अवोचदेतामिति राजनन्दिनी विमुच्य निःश्वासपरम्परामियम् ।
तदीक्षणे धावति मामकं मनो विधौ प्रसन्ने सखि ! वीक्ष्यते परम् ॥ ८६ ॥
तदुक्तमाकर्ण्य समुच्छ्वसन्मनाः पुनर्जगौ कृत्रिमचेटिकाऽपि सा ।
त्वयोच्यते सुन्दरि ! चेन्मदग्रतः समानयाम्येव तदाऽत्र तं नृपम् ॥ ८७ ॥
जगाद चैनां दमितारिकन्यका सखि ! क्व वैताढ्यमहामहीधरः ।
शुभापुरी सा क्व दवीयसी यतः किमाम्रपाकोऽपि भवेदपेक्षया ? ॥ ८८ ॥
परं तदभ्यासजुषि प्रसादनापरायणे त्वय्युपपद्यतेऽखिलम् ।
प्रसादमासेदुषि वा विधौ नृणां न दुर्घटं किञ्चन सम्भवत्यपि ॥ ८९ ॥

कृतप्रतिज्ञाऽनुगते ! त्वमात्मनः सखि ! प्रतिज्ञां परिपूरयेति सा ।
तयोदिता स्वीयवयस्यया समं निसर्गरूपं प्रकटीचकार तत् ॥ ९० ॥
विलोक्य तां विस्मितमानसामसाविमामवादीदपराजितो बलः ।
अनन्तवीर्यः सुमुखि ! त्वदग्रतः कृतं यदीयं गुणवर्णनं मया ॥ ९१ ॥
विलोचनेन्दीवरयोर्विकाशिनोर्विलोकनादस्य कलानिधेर्ननु ।
फलं समादत्स्व तथा कृतार्थतां स्वजन्मनः साध्वि ! विधत्स्व साम्प्रतम् ॥ ९२ ॥
निरीक्ष्य तं सा दमितारिपुत्रिका समालिलिङ्ग प्रथमं सखीमिव ।
त्रपामियं संमदसंविभाजनं ततो रतिं कर्तुमिवैकसौहृदम् ॥ ९३ ॥
अनन्तवीर्योत्तमराजदर्शनाद्बभूव तद्वक्त्रकमलं विकस्वरम् ।
तदीयतातस्य महान्वयक्षये परं किमुत्पातनिबन्धनं भवेत् ? ॥ ९४ ॥
इयं समीक्ष्य खेसरं नरेन्द्रजा स्वयं पुरस्तादपराजितं नृपम् ।
व्यधत्त वक्त्रं यदि वा कुलाङ्गनाः कुलाङ्गनानां न विदन्ति किं स्थितिम् ? ॥ ९५ ॥
अनन्तवीर्यं निजघान वल्लभं कटाक्षबाणैर्निशितैर्यदीपिका ।
अनन्तवीर्यस्य तदाशये पुरा स्थितस्य कामस्य न किं तदीहितम् ? ॥ ९६ ॥
शिशुत्वमारभ्य मयैव पालिता समेधितप्रौढिरियं निषेधति ।
ममैव पत्या सह भाषणं मियो निरस्य लज्जामिति सेति तं जगौ ॥ ९७ ॥
कुमुद्वती चन्द्रमसेव पद्मिनी दिवाकरेणेव रमेव विष्णुना ।
बलाहकेनेव तडिद् गुणालय ! त्वया सनाथाऽस्मि परं महीपते ! ॥ ९८ ॥
मदीयभाग्यैरसमैरिहागमत् स नारदः शारदमेघपाण्डुरः ।
प्रदातुमेव प्रियमन्यथा कथं समागमः स्याद्भवतोऽत्र मद्गृहे ? ॥ ९९ ॥
ममैव दुर्गे हृदये वसन्नयं विजित्य कामं विषमायुधस्त्वया ।
यथा स्वदासत्वपदेऽभ्यषिच्यताऽभिषिच्यतां नाथ ! तथा द्विषज्जनः ॥ १०० ॥
अनन्तवीर्योऽवददाहतं न चेदिदं वचश्चम्पकपत्रगौरि ! ते ।
प्रियो गृहं तर्हि शुभां शुभाशये ! पुरीं मदीयामुररीकुरु द्रुतम् ॥ १०१ ॥
निधाय वाक्यं हृदये हृदीशितुस्ततो बभाषे दमितारिनन्दिनी ।
मया निजाकूतमुदाहृतं पुरा त्वमेव मे नायक ! जीवितेश्वरः ॥ १०२ ॥
परं मदीयः कुपितः कृतान्तवत् पिता स वां वाञ्छितविप्रकारकः ।
बलैश्च विद्याभिरयं महाबलो महौजसौ वामपि निष्परिग्रहौ ॥ १०३ ॥

१ भ्रातरम् २ मृगाऽर्भकम् ।

स्मितं वितत्याऽभ्यर्थितार्थ माधवः प्रियेऽभिधानादपि तस्य मैव भैः।
न सांयुगीनत्वमयं परिस्पृशेद् ममाग्रजे संयुगसीमभागिनि ॥१०४॥
निपीय वाचं दयितस्य तामियं समन्वचालीद्दमितारिजा ततः।
उदस्तहस्तः करटीव दुर्धरोर्जितां गभीरां गिरमुज्जगार सः ॥१०५॥
अहो! नु विद्याधरमण्डलेश्वराः! भटावतंसाः! दमितारिगृह्यकाः!।
कृतावधानाः! मम वाचगुम्फकैः श्रवःपथे धत्त महाभिमानिनः! ॥१०६॥
इमां भवत्स्वामिसुतामहं बलादनन्तवीर्यस्त्वपराजिताश्रयः।
हरामि यद्यस्ति बलं भवत्स्वपि प्रदर्श्यतां तद्दलनाय तत्परम् ॥१०७॥
स एवमुच्चार्य विधूतसाध्वसं विमानमास्थाय विहायसि स्थितः।
द्विधाऽपि रामाऽनुगतः पराक्रमं प्रयोजयन् प्रास्थित विष्टरश्रवाः ॥१०८॥
निशम्य तत्खेचरवर्गनायकः प्रकोपताम्राधरपल्लवोऽभ्यधात्।
क एष भूमीचर उग्रसाहसः स्वरूपसंवेदनताजडस्थितिः ॥१०९॥
निहत्य चैनं हतकं सबान्धवं वधार्हमुद्बन्धनदुष्टमृत्युना।
समानयध्वं विनिवर्त्य पुत्रिकामिति स्ववीरान् नृपतिः समादिशत्॥११०॥
निदेशमात्रेण महीपतेर्भटा विनिःसृताः स्वस्वपदात् सरंहसः।
करम्बकोदण्डकृपाणपाणयो रणाय तावन्वसरन् महौजसः ॥१११॥
प्रतीपभूमीपतिधर्मराड्गृहप्रकाशदीपप्रतिमानि जज्ञिरे।
हलोग्रशार्ङ्गप्रमुखानि भास्वरप्रभाणि रत्नानि तदा यतोस्तयोः ॥११२॥
यथैव गन्धद्विपदानगन्धतः प्रणश्यति क्षुद्रमतङ्गजावली।
तथैव तन्मुक्तशरौघपाततो ननाश सर्वारिपताकिनी रयात् ॥११३॥
पलायितान् स्वान् विनिशम्य सैनिकान् मुखं ह्रियेवेक्षयितुं किलाऽक्षमान्।
युगान्तकालार्कवदुद्धतद्युतिश्चचाल योद्धुं दमितारिरप्यथ ॥११४॥
प्रयाणभेरीध्वनिरुद्भवंस्तदा दिगन्तरेषु प्रतिशब्दमूर्छितः।
परः प्रभुः कोऽपि बभूव नेदृगित्युदीरणाय प्रययौ जवेन किम्?॥११५॥
विमुच्य नः स्वामिसुतामिमामरे! युवां प्रयातं प्रपलाय्य कातरौ!।
न चेत्प्रकोपज्वलिताशुशुक्षणौ क्षणात्प्रभोर्नः शलभीभविष्यथः ॥११६॥
इतीरितां तस्य पुरःसरैर्भटैर्निशम्य वाचं बलतः स तावपि।

---

१ बाणः।

वधूमधीरां वचनैः समुद्धतैर्विधाय धैर्यप्रतिबद्धकञ्चुकाम् ॥११७॥
निरीक्ष्य विद्वेषिबलं बलोत्तरं बलानुजोऽप्युग्रबलारिविक्रमः ।
बलेन विद्याप्रभवेन चात्मनो बलं ससर्ज द्विगुणं स सद्गुणः ॥११८॥
उपक्रमन्ते स युधि द्विपद्भटास्तयोः परावृत्तिमवेक्ष्य तत्क्षणम् ।
चिरोपभुक्तं दमितारिचेतनं कृतार्थतां नेतुमभीप्सवोऽभयाः ॥११९॥
पदातिमुद्दिश्य पदातिरिङ्गितः तुरङ्गसादी तु तुरङ्गसादिनम् ।
रथी रथस्थं गजयुग् निषादिनं बभूव तत्राजिरवर्णसङ्करम् ॥१२०॥
रणापणे येन यशःक्रयाणकं समर्थमादायि न काङ्क्षता श्रियम् ।
विनश्वरप्राणपणेन दौस्थ्यभाक् स एवमूचुः समरेऽत्र बन्दिनः ॥१२१॥
शरं समुद्धृत्य विलग्नमङ्गके द्विपद्भटेन प्रहितं स्वपाणिना ।
वहन्नमर्षं हृदि तेन तं तथा न्यहन् यथा कोऽपि ययौ स पञ्चताम् ॥१२२॥
पलायमानस्य न कोऽपि सात्त्विकः शरप्रहारेण जहार जीवितम् ।
तदीयवंश्यैश्च कृतं यशश्चयं शरत्सुधादीधितिदीधितिप्रभम् ॥१२३॥
पराक्रमेणोद्भटतां दधत्तमान् कटाक्षितान् किञ्चन तज्जयश्रिया ।
रणाङ्गणे वीक्ष्य विरोधिनो भटांस्तदैव दध्मौ जलजं जनार्दनः ॥१२४॥
न पाञ्चजन्यध्वनिना प्रसर्पता न पाञ्चजन्यं गलित विरोधिनाम् ।
इहापि जन्ये प्रतिरूपवर्तिनां विचेतनानामुपलब्धमूर्छया ॥१२५॥
स्वयं समालोक्य महारथस्तथा रथाधिरूढो दमितारिरञ्जसा ।
प्रचक्रमे योद्धुमतन्द्रिताशयोऽभिसृत्य नागान्तकलक्ष्मणा समम् ॥१२६॥
मुमोच यद्दमितारिरायुधं प्रकोपदष्टाधरपल्लवोऽरये ।
अनन्तवीर्यश्च भयं दिशन् द्विषां विहस्य तत्तत्प्रतिकूलमीश्वरः ॥१२७॥
अवेत्य विद्वेषिणमन्यथा निजं सुदुर्जयं श्रीदमितारिरस्मरन् ।
सममदिक्चक्रतमोऽपहारकं महोदयं चक्रमरेर्जिघांसया ॥१२८॥
प्रभापराभूतपरप्रभाभरं तदीयपाणौ विरराज चक्रकम् ।
यथाऽस्तभूमीधरतुङ्गशृङ्गके दिनेशितुर्मण्डलमच्युतांशुकम् ॥१२९॥
उवाच चैनं दमितारिरुल्लसन्महाभिमानं करुणां स्पृशन्निव ।
वृथा मृथा मा, तनयापरिग्रहाग्रहं विहाय व्रज रे! विनिःश्वसन् ॥१३०॥
अनन्तवीर्योऽपि जगाद तं द्विषं तवाङ्गजां मूर्त्तिमतीं जयश्रियम् ।
श्रिये समादाय तथा च जीवितं यशश्च यास्यामि निरूपणाद्दते ॥१३१॥

असौ परिभ्रम्य मुमोच शक्तितस्तदेव चक्रं शमनाय विद्विषः ।
परे समालिङ्गति या जयश्रियं किमौचिती रक्षितुमस्त्रमङ्गिनाम्? ॥१३२॥
चुचुम्ब चक्रं हृदि चक्रधारिणं प्रवर्तयत् तुम्बकघातयातनाम् ।
बलेन चेलाञ्चलवीजितः क्षणं मुदा सहोत्तिष्ठति स स्म ससम्यः ॥१३३॥
शतारमेव प्रथमं बभूव यत् तदा सहस्रारमितं हरेः करे ।
महीयसां सङ्गमतो लघीयसां प्रवर्धते किं महिमा महान्नहि ? ॥१३४॥
अनन्तवीर्यो दमितारिमूचिवान् स्मितश्रिया विच्छुरिताधरस्ततः ।
हृदीश्वरतया: कनकश्रियो भवान् पितेति मुक्तो मयका प्रयाहि तत् ॥१३५॥
जगौ सधैर्य्यं दमितारिरीदृशं परस्य शस्त्रेण च शासितां वहन् ।
न लज्जसे किं धनितामिवाल्पधीरहो ! परम्यासविलोपकर्मणा? ॥१३६॥
यदाशु मुष्वेदमपत्रपाकरं ममेव ते चापि भविष्यति ध्रुवम् ।
विरोधिसंरोधनकारि पौरुषं ममापि जागर्त्ति परार्तिभञ्जनम् ॥१३७॥
नृपेण तेनेति स तर्जितो विधुर्घृताक्तवैश्वानरवत् क्रुधा ज्वलन् ।
मुमोच चक्रं दमितारयेऽरये शिरोऽच्छिनत्तच्छरकाण्डलीलया ॥१३८॥
विवर्णयामो वरवर्णिनीष्विमां किमुत्तमां नो कनकश्रियं वयम् ? ।
जयश्रियं भेजुषि वल्लभे तदा प्रसन्नमन्तःकरणं चकार या ॥१३९॥
विचित्रवर्णैः सुमनोभिरद्भुतैर्दिवोऽभिवृष्टिः सुमनोभिराहिता ।
अनन्तवीर्येऽद्भुतवीर्यसेवधौ जिनेशितुः पारणकारणे यथा ॥१४०॥
अवादि तैः श्रोत्रपथे विधत्त नो गिरं तु विद्याधरनायकाः ! हिताम् ।
अनन्तवीर्यो हरिरेष सान्वयो हलायुधोऽसावपरोऽपराजितः ॥१४१॥
बलाभिमानं तदपास्य चैतयोः पदाम्बुजच्छायमुपाध्वमादरात् ।
यथा परातङ्कनिदाघजातपप्रभूतसन्तापमहो न विन्दथ ॥१४२॥
दिवौकसां वाचमवाप्य ते ततस्तदंह्रियुग्मं शरणं समाश्रिताः ।
प्रियाप्रजाभ्यां सहितः स तैः सहाचलद् विमानेन पुरीमथो निजाम् ॥१४३॥
सुवर्णशैलं परितो व्रजन्नयं जनार्दनो व्यद्यपि खेचरेश्वरैः ।
अनेकशः सन्ति विभोऽत्र भूधरे जिनेन्द्रचैत्यानि मुदो निबन्धनम् ॥१४४॥
विधेहि माऽऽशातनिकां तदीदृशां प्रतिष्ठमानोऽनभिवन्द्य चाग्रतः ।
इतीरितस्तैर्विधुरन्तरिक्षतो रयेण तत्रावततार तारवाक् ॥१४५॥
सुवर्णचैत्येषु सुवर्णपङ्कजेष्विवात्र कुर्वन् प्रयतः प्रदक्षिणाः ।

न राजहंसश्रियमाप किं विधुः श्रितो विवेकेन गुणेन तेजसा ? ॥१४६॥
सुरद्रुमानेव विनेयतां नयन्नवारिताकाङ्क्षितदानदीक्षया ।
भ्रमन् गिरौ तत्र हरिः सविभ्रमं तपोधनं कश्चिदवेक्षतोत्तमम् ॥१४७॥
अवाप यः केवलसंविदं शरत्प्रमोपवासप्रतिमां समाश्रितः ।
अभिख्यया कीर्तिधरो मुनीश्वरः सुवर्णशैलेऽत्र जगत् पवित्रयन् ॥१४८॥
अवाप्यमानं महिमानमुच्चकैरमानवैर्मानववृन्दसंयुतैः ।
स तं ववन्दे विहितारमनां गुरुं हरिः स्फुरत्पुण्यसुपण्यताऽऽपणम्॥१४९॥
चतुर्गतिद्वारनिपातुकाखिलप्रजासमुद्धारविधौ समुद्धताम् ।
श्रितासने तत्र सुवर्णकेतने व्यधत्त साधुः स च धर्मदेशनाम् ॥१५०॥
समन्वयुङ्क्तावसरे हरिप्रिया प्रियाऽऽभिमुख्येन कृतावगुण्ठना ।
पितुर्वधः किं समभूद् मम प्रभो ! सुदुःसहः किं विरहश्च बन्धुभिः ?॥१५१॥
मुनीशिता व्याहरति स्म तामिदं स धातकीखण्डमहाविभूषणे ।
अदूषणे प्राग्भरते गवां कुलैरलङ्कृतं शङ्खपुरं तु विद्यते ॥१५२॥
निरर्गलग्राम्यजनोपशोभिते मनोहरे ग्रामशतेषु तत्र च ।
स्त्रियोषितं श्रीपदपूर्वदत्तयाऽभिधानतोऽपुण्यवशेन दुःस्थया ॥१५३॥
समानयन्त्यम्बु गृहेषु कपुचित् पिनष्टि केष्वेव निरूपिता सती ।
यदा तदा सा तनुते भुजिक्रियां न दुःस्थताऽन्यत् पदमाससाद तत्॥१५४॥
ययौ भ्रमन्ती वनराजिराजिते विलोकयन्ती तरुवल्लरीरियम् ।
अथान्यदा श्रीपदपूर्वके गिरौ सुमेरुभे पर्वतनामनि श्रुते ॥१५५॥
शिलातलासीनमहीनसन्निभं क्षमामहाभारधृतौ धृतैः पदम् ।
निरीक्ष्य चेतोविनियन्त्रणक्षमं ननाम सा सत्ययशोऽभिधं मुनिम्॥१५६॥
सुधर्मलाभं शिवलाभकारकं समासदच्चित्तविषादहारकम् ।
इदं स्वदौस्थ्येन कदर्थिताशया शुभाशया विज्ञपयाम्बभूव सा ॥१५७॥
यथेन्द्रगोपप्रमुखा निरन्वया मुनीश ! शब्दा विबुधैरुदीरिताः ।
तथा ममैषा गुरुभिः प्रकल्पिताऽभिधाऽपि तादृग् गुरुनिःस्वताजुषः॥१५८॥
मनोरथाम्भोजकुलप्रकाशिता दुरन्तदौर्विध्यघनोदये सति ।
प्रभो ! कदाचिद् मम या बभूव नास्तु सा त्वदालोकशरत्समागमात्॥१५९॥
पुराकृतैः सम्पदवाप्यते शुभैः कृतानि नो तानि मया भवान्तरे ।
ततोऽन्वभूवं च दरिद्रतामुरं यदस्ति नाहेतुकमत्र हेतुमत् ॥१६०॥

मुनीन्द्र ! दुष्कर्मरजःप्रभञ्जनप्रभं ममैतर्हि किमप्युपादिश ।
इतीष्टविज्ञापनया तदीयया स चक्रवालाभिधमादिशत्तपः ॥१६१॥
शुभाशये ! त्रिंशदमाऽपि सप्तभिर्वरं चतुर्थानि चतुर्गतिक्षये ।
तथा त्रिरात्रं कुरु पूर्वतोऽन्ततः तपः समाराध्यमिदं मदापहम् ॥१६२॥
यथेदृशं नान्यभवे भवेत् पुनस्त्वबाधिबाधाकृदशर्म भाविनि ।
इति प्रतीतां गिरमभ्युपेत्य सा गुरोर्निजधाममुपागमज्जवात् ॥१६३॥
तपः समारब्धमवेत्य पारणादिनेषु तस्यै ददुरुत्तमस्त्रियः ।
निमन्त्र्य चाहूय भुजिक्रियाविधिं विधाप्य वासांसि कृतप्रशंसनम् ॥१६४॥
चकार कर्माणि गृहेषु येषु सा भृतिं द्विरुक्तामपि तेष्वविन्दत ।
तपःप्रभावेण दिनैश्च कैश्चन समृद्धिमत्त्वं कलयाञ्चकार सा ॥१६५॥
निकेतकुड्यैकतरप्रदेशकः प्रचण्डवातप्रतिघाततोऽन्यदा ।
पपात तस्याः सुतरां जरत्तरस्तदन्तरे किञ्चिदवाप सा वसु ॥१६६॥
निरन्तरायं तपसि प्रसाधिते सहर्षमुद्यापनमाततान सा ।
चतुर्विधं सङ्घमपूपुजच्च सा प्रमोदसङ्घप्रतिपादनक्षमम् ॥१६७॥
तया तप पारणकान्त्यवासरो भुजिक्रियायै विनिविष्टया पुरः ।
समैक्षि मासक्षपको महामुनिः शमाचलः सुव्रतनामधेयकः ॥१६८॥
अकल्पितैः प्राशुकपानभोजनैरुदारभक्त्या प्रतिलाभ्य सा स्वयम् ।
अथापि धर्मं शिवशर्मकारणं जिनेश्वरोपज्ञमपृच्छदेव तम् ॥१६९॥
मुनिर्बभाषे गृहमेत्य साधवः कदापि सौख्ये सुकृतोपदेशनम् ।
न कुर्वते किं पुनरालयैषिणां गृहीतुमाहारमुपागता हितम् ॥१७०॥
यदिच्छसि श्रोतुमुपाश्रयं श्रयेः सुसाध्वि! निश्रेयससाधनोन्मुखि! ।
इतीष्टमुक्तार्य गते मुनीश्वरे चकार सा पारणकं मुदन्विता ॥१७१॥
भुजिक्रियाऽनन्तरमेव सा रयाद् मुनिं प्रणन्तुं सह नागरैरगात् ।
प्रणम्य तत्पादयुगं प्रदक्षिणापुरस्सरं च न्यपदच्च तदग्रतः ॥१७२॥
तदीयं तस्या गुरुराशिषं निजां समादिशद्धर्ममधर्ममर्मभित् ।
जगत्त्रयीनायकभूरिकामितप्रदानचिन्तामणिमानतस्करम् ॥१७३॥
जलं तपर्तौ पिबतोऽपि शीतलं पुनः पिपासाभवनाद् न शर्मणे ।
शुचिं हिमर्तौ भजतोऽपि केवलं पुनः स्फुरज्जाड्यविधेर्न तुष्टये ॥१७४॥
महातपे छायभरं च विन्दतः क्षणान्तरे तापभयान्न पुष्टये ।

विसृष्टपौरं बहुमानपूर्वकं प्रवर्तमानं करिनिमहे स्वयम् ।
सुतो नृसिंहः प्रणिपत्य पत्तिवद् व्यजिज्ञपाद्विज्ञपतिर्विशांपतिम् ॥१८८॥
प्रभो ! प्रयासः पशुमात्रबन्धने स्वयं कथं सत्यपि मादृशे जने ।
अपेक्षते भूमिगृहप्रकाशने रविप्रकाशः किमु दीपके सति ? ॥१८९॥
इति प्रसह्य प्रतिषिध्य भूपतिं स च स्वयं व्यालसमीपमागतः ।
स्वमुत्तरीयं प्रवितत्य कन्दुकं सुखेन चिक्षेप तदग्रतः क्षणात् ॥१९०॥
विधाय तं क्रोधवशात् स खण्डशः समुद्भवत्क्रुत् प्रतितन्तुपाण्डुरम् ।
हरिस्तु सर्वास्विव विक्षिपन्नभात्कुमारसम्बन्धियशस्तरोभवम् ॥१९१॥
चिरं परिक्लेश्य विधूतविश्रमं भ्रमिप्रकारैर्बहुभिर्विचेष्टितैः ।
श्रमं समायातमवेत्य तं सुधीः समारुरोह प्रयतः स कुम्भिनम् ॥१९२॥
गवाक्षमारूढवता महीभुजा निरीक्षितश्चित्रविकाशिचक्षुषा ।
जनैः प्रशंसामुखरैश्च विस्मितैर्गजं तमालानयति स्म स स्वयम् ॥१९३॥
वसुन्धराभारधुरंधरं सुतं विभाव्य भूपो भुजवीर्यशालिनम् ।
अनन्यसाधारणधर्मकर्मणे समागमं साधुगुरोः समैहत ॥१९४॥
तदा तदायुक्तजनाननाम्बुजादुपागतं सूरिजयंधरं वने ।
नृपः समाकर्ण्य चचाल वन्दितुं सुधीर्विलम्बं कुरुतां शुभे हि कः? ॥१९५॥
विनम्य तं तस्य स धर्मदेशनां निपीय संसारविरागमागतः ।
निवेश्य राज्ये तनयं लसन्नयं कृती तपोराज्यमशिश्रियत् स्वयम् ॥१९६॥
जनोऽन्यदा विज्ञपयाम्बभूव तं पुरीनिवासी नरसिंहभूपतिम् ।
पुरी तवेयं नृपतेऽमरावती जहास या पौरमहर्द्धिभिः पुरा ॥१९७॥
मलिम्लुचैः संह्रियमाणकाञ्चनाऽधुनाऽभजद् ग्रामटिकातुलां च सा ।
इतीरयित्वा मद्दिते गते जने नृपः पुरारक्षकमादिशत्ततः ॥१९८॥
(युग्मम्)

गृहाण चौरान्निगृहाण सत्वरं तव स्थितिर्नापरथेति भाषितः ।
नृपेण सोऽपि प्रतियामिनि भ्रमन् न चौरनामापि समासदत् कचित् ॥१९९॥
पुनर्जनैर्व्यज्ञपि नागरैर्नृपः प्रभो ! ह्रियन्ते नगरीश्रियो निशि ।
प्रविश्य चौरैर्भवनेषु नोऽधुना निवस्तुमन्यत् पुरमाशु दर्शय ॥२००॥
ततः स लज्जाभरसंकुचन्मुखः समीक्षितुं तान् परमोषिणः स्वयम् ।
निवस्य नीलं वसनं तमीमुखे स्वमन्दिराद् भूमिपतिर्विनिर्ययौ ॥२०१॥

कृपाणपाणिः कृपणत्ववर्जितः कृपाश्रयोऽपि श्रुतचोरनिष्कृपः ।
अहर्मुखं यावदसौ भ्रमन्नभून् परं न कश्चित् समवैक्षत प्रभुः ॥२०२॥
पुनः प्रदोषे तिमिराऽच्छवेषभृत् पुरः प्रतोल्या बहिरेव निर्गतः ।
मलिम्लुचान्वेषणवद्धमानसस्तरुं समाश्रित्य स एककं स्थितः ॥२०३॥
त्रिदण्डभृत् कश्चन तत्र तापसः समाययौ सालसमायताङ्गकः ।
स तेन पृष्टो वसुधासुधाकरः, प्रणम्य तं पान्थमवोचत स्वकम् ॥२०४॥
जगौ परिव्राजक एव रेऽत्र कौ विलोकिताः के विषयास्त्वया ननु? ।
ततः स तं प्रत्यवदत् कृतादरं मुनीश ! दृष्टा विषयाः परःशताः ॥२०५॥
कलिङ्गवङ्गाङ्गतिलङ्गगूर्जराः सहूणकाश्मीरखसोड्रचेदयः ।
इमेऽपि दृष्टा न धनं कचिन्मया किमप्यवापि, क शुभं शुभं विना ?॥२०६॥
तदुक्तमाकर्ण्य स तापसोऽभ्यधात् तवाद्य दारिद्र्यमपाकरोम्यहम् ।
धनं समानीय, पुरः पयोऽम्बुधेर्नगस्य सन्तापमिवाम्बुदो घनम् ॥२०७॥
प्रफुल्लतापिच्छनिभे तमोभरे प्रसृत्वरे प्रास्थित सोऽपि सुस्थितः ।
पदातिवत् तेन समं महीपतिर्महीभुजः स्वार्थपरा हि केवलम् ॥२०८॥
समुद्धतैरेव वचोभिरिङ्गितैरवेत्य चैनं परमोषिणं नृपः ।
महेच्छ ! यद्येवमहं न कर्मकृद् नु ते किमाश्वासमिति प्रकाशयन् ॥२०९॥
निहन्तुमेनं जगदेकवैरिणं करेऽसिमाधात् प्रतिकारमध्वनः ।
प्रयाति वा कुत्र करोति चैष किं हृदा विमृश्येत्यसिमाधिताश्रये ॥२१०॥
कृतान्तकान्ताकबरीसहोदरं करे कृपाणं समवेक्ष्य पृष्ठतः ।
विचिन्तयामास मलिम्लुचोऽप्ययं ध्रुवं न सामान्यपराक्रमः पुमान् ॥२११॥
किमस्त्वमीदृक् पथिकस्य सम्भवेदिति स्वचित्ते परिचिन्त्य सोऽभ्यधात् ।
अहो ! प्रतीक्षस्व विचक्षण ! क्षणं यदेष जागर्त्यधुनाऽपि पूर्जनः ॥२१२॥
ततो वलित्वा विपुलापतिस्तरोरधस्तदादेशवशादशङ्कितः ।
चकार संस्तारकयुग्ममायतं दलैश्च विश्रामसमीहया क्षणात् ॥२१३॥
अयं प्रमीलामुपलप्स्यते परं मयि प्रसुप्ते प्रथमं न चान्यथा ।
इति स्वचित्ते विनिवेश्य तस्करोऽप्यशेत निद्रामपि स स्म विन्दति॥२१४॥
ततः समुत्थाय स दारुखण्डकं मुमोच संस्तारक एव भूपतिः ।
निजोत्तरीयेण पिधाय तस्थिवान् विशालशालान्तरितः स्वयं सुधीः॥२१५॥
स तु प्रबुद्धः शयितं विबुध्य तं त्रिदण्डमध्यस्थमसिं करेऽकरोत् ।

तदन्तिकं प्राप्य शनैश्च दारु तद् द्विखण्डमाधाञ्निशितेन तेन च ॥२१६॥
दृढाभिघातादसृजामवाहतः स वीक्ष्य भीतिं रचयन् व्यचिन्तयत् ।
शठेन जागर्यपि तेन वञ्चितः ततोऽनुयास्यामि तमेव मायिनम् ॥२१७॥
इति स्मृतिव्यापृतिचान्तचेतसं मलिम्लुचं प्रत्यवदद्धराधिपः ।
प्रकाश्य चात्मानमदः सतर्जनं भटो मृगाधीशमिव प्रभोद्भटः ॥२१८॥
अरे! मुषित्वा नगरीं दुराशय! क यास्यसि क्रोधपरेऽद्य मय्यपि ?।
भवानिव च्छद्मपरो न चाहकं तदायुधं सज्जय सज्जनेतर ! ॥२१९॥
इतीरिताकूतसमुद्भवत्क्रुधं तमापतन्तं नृपतिश्छलाचितम् ।
अपातयच्छिन्नपलाशिवत् क्षितौ निहत्य खड्गेन निबारयन्निव ॥२२०॥
तथास्थितः स क्षितिपालमूचिवांस्तवासिघातेन सुरक्षितोऽस्म्यहम् ।
प्रयाहि तद्वीरशिरोमणेऽधुना निरीक्ष्यते यत्र वटोऽयमायतः ॥२२१॥
रमापतेस्तत्र निकेतनं महच्चदन्तिकश्वभ्रगृहान्तरास्थिता ।
अनेकशः सन्ति मृगेक्षणा. समं ममाऽपि जाम्या धनदेविसंज्ञया ॥२२२॥
प्रभूतलोप्त्रं गणनाऽवधीरितं सनाथय त्वं निखिलं तदेतकत् ।
असिं त्वभिज्ञानकृते ममाप्यमुं वरं समादाय जवाद्व्रज स्वयम् ॥२२३॥
इति ब्रुवाणः स मलिम्लुचाग्रणीर्भियेव राज्ञः परितत्यजेऽसुभिः ।
नृपोऽपि कौक्षेयकलक्ष्यपौरुषो धरागृहद्वारमुपागमद् द्रुतम् ॥२२४॥
तदीयजामिं तदुदीरिताख्यया नृपः समाहूय तयोदजीघटत् ।
रसागृहद्वारशिलापिधानकं न चाप्रकाशः सति धामसंश्रये ॥२२५॥
अथाब्रवीत् सा सुकुमारया गिरा क्षणं महाभाग! विनोदय श्रमम् ।
निषद्य तल्पेऽपनयस्व चक्षुषोर्विषादमुच्छृङ्खलमेतयोर्मम ॥२२६॥
तव क्रमक्षालनहेतवेऽधुना पयः समादाय समाव्रजाम्यहम् ।
इतीरयित्वाऽसिविलोकनाच्छुचं हृदि स्पृशन्ती व्रजति स्म सोत्सुका॥२२७॥
नृपो नयग्रन्थविचारचातुरीविदांवरस्तल्पमरेर्भजन ।
सहोदरस्याऽपि महीपुरन्दरा न विश्वसन्ति द्विषतः स्वसुस्तु किम् ?॥२२८॥
निवेद्य चोच्छीर्षकमेव तत्र स प्रदीपपृष्ठं स्वयमाश्रयद् नृपः ।
तदैव यन्त्राऽभिहताऽत्र सारवं शिला विशाला निपपात केवलम् ॥२२९॥
हतः स मद्भ्रातृविघातपापभागितीरयन्ती सहसाऽऽजगाम सा ।

१ जागरोऽस्यास्तीति जागरी जागरूकोऽस्यहमित्यर्थः ।

परेद्यविः सत्ययशोऽभिधं यतिं प्रणन्तुमेकाऽपि यती विहायसि ।
विमानमारूढममानमानभृत् सुरूपविद्याधरयुग्ममैक्षत ॥२४५॥
अथागता सा निजमप्युपाश्रयं प्रशस्यतद्रूपविमोहिता सती ।
लमेविचिकित्साविचिकित्स्यदूषणं गुरोरनालोच्य खलु व्यपद्यत ॥२४६॥
इतश्च जम्बूपपदान्तरीपकान्तरस्थितप्राच्यविदेहमध्यगे ।
मनोरमे श्रीरमणीयवैजये समस्ति वैताढ्यमहामहीधरः ॥२४७॥
तदस्ति तस्मिञ्छिवमन्दिरं पुरं प्रमोदलक्ष्मीघनकेलिमन्दिरम् ।
वसन्ति यस्मिन् परमार्थिनो जना न यैः कदाऽपि श्रितमत्र लाघवम् ॥२४८॥
बभूव तस्मिन् कनकार्च्यसंज्ञको नरेश्वरः खेचरवर्गनायकः ।
यशांसि यस्योपजगुः सुरस्त्रियो दरीषु मेरोर्जनितानि विक्रमैः ॥२४९॥
स वायुवेगाप्रभवो भवद्विभुस्तदङ्गजः कीर्तिधरोऽहमाख्यया ।
अरिष्टदीपाः महता यदोजसा बभूवुरालेख्यकृताः, इवोदये ॥२५०॥
प्रिया बभूवाऽनिलवेगिका मम प्रदर्शयन्ती कुलयोषितां स्थितिम् ।
निशाविरामे स्वपती मनोहरं निरैक्षत स्वप्नमतल्लिकात्रयम् ॥२५१॥
ततः समुत्थाय फलानि बिभ्रती सुपात्रयुक्ता व्रततीव पुष्पयुक् ।
समेत्य मां जल्पितकल्पपादपं स्फुटं जगावार्यसुतावधार्यताम् ॥२५२॥
व्यलोकय निर्जरराजकुञ्जरप्रभं प्रभो ! कुञ्जरमादितस्ततः ।
अनुत्तमं स्वप्नगता शरत्सुधाकरद्युतिव्रातसमद्युतिं वृषम् ॥२५३॥
पयोभिराकण्ठमनाविलैर्भृतं सुमार्चितं पूर्णघटं शुभाश्रयम् ।
फलं यदेषां मम भावि साम्प्रतं तदादिश त्वं श्रुतशास्त्रकोविद ! ॥२५४॥
तवार्द्धचक्री भविता तनूभवस्त्रिखण्डमुर्वीवलयं स भोक्ष्यते ।
इति प्रहृष्टोऽहमवोचमात्मनः प्रियां प्रति प्रीतिविकाशिचक्षुषम् ॥२५५॥
नदादि सा गर्भमधत्त भाविनी प्रपूर्यमाणातिदुरापदोहदा ।
क्रमेण सा पुत्रमजीजनच्छची जयन्तनामानमिवोरुतेजसा ॥२५६॥
अधिश्रितेऽस्मिन्नपि गर्भमञ्जसा सुदुर्दमो यद्दमितो द्विषज्जनः ।
मया प्रसह्यैव, ततोऽभिधां व्यधां सुतस्य तुष्टो दमितारिरित्यहम् ॥२५७॥
कलाकलापं सकलं ममग्रहीत् कुशाग्रबुद्धिः कुशली स लीलया ।
सुलोचनालोचनमीनजालकं ततः परं यौवनमाससाद सः ॥२५८॥
अथाऽपरस्मिन् विजये परेद्यविर्जिनेशशान्तिः समवासरद्विभुः ।

हलायुधस्तान् गिरि राजसारभृद्धलं समुद्यम्य रुपाऽन्वधावत ॥
तमापतन्तं समवेक्ष्य ते भटा दिशो दिशं जग्मुरपेतशक्तयः ।
अजातसङ्गं भयमेव बिभ्रतो मृगाधिपं मत्तमहामृगा इव ॥
शुभे दिने पौरनिबद्धतोरणां शुभापुरीं प्राविशतां बलाच्युतौ ।
अनन्तवीर्य्यः पुनरर्धचक्रितापदेऽभ्यषेचि प्रमदेन राजभिः ॥
अथापरेद्युः समवासरद् जिनः स्वयंप्रभस्तत्र पवित्रयन् जगत् ।
वनीपतिर्वेत्रिनिवेदितो जिनागमेन भूमीपतिमप्यवर्धयत् ॥
बलानुजेन प्रमदेन तस्य च प्रदापिता द्वादश रुक्मकोटयः ।
विशिष्य सार्द्धाः, कियदेतदद्भुत प्रवृत्तवृत्तानुकृतां हि तादशाम् ॥
मधुप्रियाभ्यामिव पुष्पसायको विनेतुमिच्छुः कृतमन्तुमात्मनः ।
बलप्रियाभ्यां सहितो जनार्दनो जिनं प्रणन्तु समियाय तत्क्षणम् ॥
अविच्युतो भक्तिभरेण जातुचित् प्रदक्षिणीकृत्य विभुं त्रिरच्युतः ।
प्रणम्य भूमावुपविश्य सस्पृहं तदास्यचन्द्रामृतपुण्यमप्यपात् ॥२
शुभोपदेशावसितौ हरिप्रिया जिनेश्वरं विज्ञपयाम्बभूव सा ।
ममैव भाग्येन विभो! त्वदागमो व्रतप्रदत्त्याऽनुगृहाण मा तदा! ॥२
तवाभिकश्चेदनुमन्यते मुदा तदा भवत्वेवमितीरितेऽर्हता ।
स्वसौधमभ्याययुरेव तत्र ये समर्थयन्तः स्वकृतार्थतां तथा ॥२
प्रिय प्रविज्ञप्य गुरुं च तत्कृतोत्सवेन लोकोत्तरतामुपेयुषा ।
स्वयंप्रभुस्वामिपदान्तमागता व्रतं लले सा दमितारिनन्दिनी ॥२
तपांसि कृत्वा कनकावलीमुखान्युदीर्णकर्माणि च भस्मसादपि ।
उपार्ज्य सज्ज्ञानबलेन संविदं समासदत् सा परमं पद क्रमात् ॥२
वनीपकानामपरोपवर्तनात्समागतानां ददतौ धनानि तौ ।
यथाऽभिलाषं विषयोपसेवनात्सुखेन कालं गमयाम्बभूवतुः ॥२
बलस्य पुत्री विजयाङ्गसम्भवा यथार्थनामा सुमतिः कृपापरा ।
शिशुत्वमारभ्य गुरुप्रसङ्गतो बभूव जैनागमतत्त्ववेदिनी ॥२८
तया परेद्युर्विहितोपवासया प्रसक्तया पारणकप्रवृत्तये ।
स्वमन्दिरद्वारमवेक्षमाणया समाव्रजन् प्रैक्षि महातपोधनः ॥२८
प्रवर्धमानाधिकभक्तिभावया तया विशुद्धाशनके विहारिते ।

१ आः इति हर्षे । २ कामकिता ।

सुपात्रदानप्रवरप्रभावतोऽत्र पञ्च दिव्यानि तदैव जज्ञिरे ॥२८७॥
मुनिप्रभौ वायुवदप्रतिश्रये गते ततोऽन्यत्र तदद्भुतश्रुतेः ।
बलाच्युतौ तत्र समागतौ च तां विलोक्य वर्य्यां वराचिन्तयाऽऽश्रितौ॥२८८॥

आनन्दोत्तममन्त्रिमन्त्रपरया शक्त्या समं सीरिणा
निर्णीय प्रथमं स्वयंवरविधिं तस्या वरार्थे परम् ।
आहूता हरिणा स्वयंवरमहे विद्याधरा भूचरा-
अप्येतौ विजयार्धतोऽत्र बहवो दूतप्रवृत्त्या नृपाः ॥२८९॥

वास्तुमन्थविचारचारिमचणा वैकुण्ठनिर्देशत-
श्चक्रुर्मण्डपमुत्तमैश्च माणिभिर्ध्वान्तौघविध्वंसिनम् ।
चक्रैर्मञ्चसमुच्चयं च रुचिरं तत्रापि यत्राऽलयो
वासः कृत्रिमपुष्पगन्धभरतः कोलाहलं लम्भिताः ॥२९०॥

तस्मिन्मेरुमहीध्रशृङ्गजयकृत्सिंहासनानि व्यधु-
र्जात्याष्टापदभङ्गभाङ्गिभिरलं रत्नैर्विचित्रैरपि ।
आरूढा अपि येषु राजतनयाः सिंहा इव स्वौजसाऽ-
नल्पाऽऽकल्पविभूषिताः सुरतरुच्छायां समाचक्रमुः ॥२९१॥

श्रीश्रीखण्डविलेपना विरचितस्नाना मनोहारिणी
दिव्याऽऽकल्पधरा सितं च सदशं संव्यानमाबिभ्रती ।
स्वे पाणौ वरमालिकां निदधती बाहु दधाना प्रती-
हार्या बाहुतले-स्म मण्डयति सा त मण्डपं कन्यका ॥२९२॥

वक्त्राक्षिक्रमपाणिमुख्यकमलैर्बिम्बोष्ठबन्धूकक-
व्यामिश्रैरपराङ्गचम्पकदलैर्नित्योल्लसत्सौरभैः ।
मूर्ता तां वरमालिकामिव समालोक्य प्रहृष्टाशया
चेष्टाऽनेकविधा व्यधुर्नृपसुताः पञ्चेषुविद्धा इव ॥२९३॥

अस्मिन्नन्तर एव भास्वरमणिव्रातद्युतिद्योतिता-
शेषाऽऽशं माणिसिंहविष्टरसमासीनामरीराजितम् ।
भास्वद्भास्करमण्डलच्छविपरिभ्राजिष्णु तन्मण्डपा-
ऽन्त स्थास्वेव कुतोऽप्युपागमदरं व्योम्ना विमानं महत्॥२९४॥

देव्युत्तीर्य तदग्रतस्तत इयं संश्रित्य सिंहासनं

---

१ याताः ।

नेपथ्यप्रभयैव मण्डपमलं विद्योतयन्ती ततः ।
पाणिं दक्षिणमुत्थितं विदधती प्रोवाच तां कन्यकां
स्मृत्वा पूर्वभवं धनश्र्यभिधया बुध्यस्व मा मा मुह. ॥२९५॥
द्वीपे पुष्करनाम्नि पूर्वभरते मध्येऽस्ति खण्डे पुरं
यच्छ्रीनन्दनसंज्ञया श्रुतमभूत्रो मारनाम्नाऽपरम् ।
भूमीन्द्रोऽपि महेन्द्र इत्यभिधया तस्मिन् महेन्द्रः श्रिया
जिष्णुर्य शतमन्युतामरिजनेऽप्याविर्श्वकारैव ना ॥२९६॥
तस्याऽनन्तमतिः प्रिया समभवद्रूपामरी सान्वया
देवैरप्यतिदुर्लभा समुदयत्सौभाग्यभङ्गीरिथति. ।
एतस्यास्तनये उभे अभवतां स्वप्नोपलम्भोल्लस-
त्पुष्पस्रग्युगसूचिते च कनकश्री· श्रीधनश्रीरपि ॥२९७॥
ते बाल्येऽपि कलाकलापकलिते क्रीडाविचित्रां मिथः
कुर्वत्यौ प्रियतारसह्रदसमे तारुण्यमासेदतु. ।
अन्येद्युर्गिरिपर्वतं गिरिमिमे स्वेच्छाविहारोद्यते
वृक्षाणां कुसुमावचायरचनाव्यग्रे उभे जग्मतुः ॥२९८॥
चल्लयौ जङ्गमतां गते इव सुमैस्ते पर्यटन्त्यौ चिरा-
दद्राष्टां कचनाऽपि नन्दनमुनिं पुण्यश्रिया नन्दनम् ।
हृष्टस्तस्य पदारविन्दयुगलं नत्वा निविष्टे पुरो
योग्ये इत्यवगम्य ते मुनिरपि व्याचष्ट धर्मं तयोः ॥२९९॥
सिद्धिप्रापणदर्शनप्रतिभुव ते श्राद्धधर्मं ततः
स्वीकृत्य स्वनिकेतनं बत गते त पालयामासतु. ।
क्रीडाभूधरदीर्घिकापरिवहत्कूलंकपासंकुलां
नानाशालियुतामशोकवनिकां ते जग्मतुश्चान्यदा ॥३००॥
क्रीडन्त्यौ समवेक्ष्य तत्र सुभगे वीराङ्गविद्याधरः
क्षोभात् स त्रिपुराधिप. सरभसं हर्षादहार्षीदिमे ।
वज्रश्यामलिकाकलत्रवचनैश्चेतोऽवसादप्रदै.
पद्मिन्याविव ते क्षणेन मुमुचे व्योम्न. सुरानेकप ॥३०१॥
ग्रस्ते तेन च ते मृगाधिपतिना बाले कुरङ्गयाविव
लक्के द्राक् पतत स्म दुर्गपदवीस्रोतस्विनीरोधसि ।

आर्यो वंशवनस्य सान्द्रविटपच्याली ढतारावतौ
देवे वा प्रतिकूलतां कलयति क स्याच्छुभं प्राणिनाम् ? ॥३०२॥
चुल्लाऽनिर्गमनं स्वकीयमथ ते तस्या विबुद्धा स्फुर-
द्धर्मध्यानपरायणे अनशनं कृत्वा विपन्ने उभे ।
ज्येष्ठाऽभूवमहं ततोऽग्रमहिषी शक्रस्य दृश्यप्रभा-
जालैर्ध्वान्तविभेदिका नवमिका नाम्ना प्रसिद्धाऽधिकम् ॥३०३॥
जीवस्त्वं तु धनश्रियोऽग्रमहिषी जाताऽपि यक्षेशितु-
श्च्युत्वा रामतनूभवा समभवः पुण्यप्रभावाद्भुता ।
आवाभ्यां तदियं व्यधीयत मिथः सङ्केतकेली पुरा
या पूर्वं च्यवते च साऽऽर्हततपं बोध्याऽन्यया वस्तुतः ॥३०४॥
तत्त्वां बोधयितुं समागममहं प्रेम्णा स्वसा ते स्वयं
कस्माद्विस्मृतमेतकत्तव जडे ! दुःस्वप्नवत् सर्वथा ।
दुष्प्रापं समवाप्य मानुषभवं प्रार्थ्यं सुराणामपि
प्रव्रज्यां प्रतिपद्यसे किमिति नो दुष्कर्मविच्छित्तये ? ॥३०५॥
इत्येतत्प्रणिगद्य शक्रमहिषी सा स्वं जगामालयं
प्राग्जन्मस्मृतिमाप साऽपि सुमतिस्तांश्चिन्तयन्ती भृशम् ।
चारित्रप्रतिपत्तयेऽथ खलु तानापृच्छते स्माखिलान्
संयोज्य स्वकरौ स्वयंवरसमायातान् नृपान् खेचरान् ॥३०६॥
एत्य प्राग्भवहार्दतो धनपतेरग्र्यप्रियास्तां प्रियाः
शक्रस्याऽपि परप्रमोदकलिता आनर्चुरर्द्ध्या समम् ।
षन्यासप्तशतीवृताऽऽदित हितं श्रीसुव्रताऽऽर्यापदो-
पान्ते सा कृतनिष्क्रमोत्सवभरा ताभ्यां पितृभ्यां व्रतम् ॥३०७॥
अल्पैरेव दिनैः समग्रमसमं जीतं समभ्यस्य सा
दुर्वारान्तरवैरिवारमजयत् साध्वी तपःखड्गभृत् ।
बिभ्राणा स्वहिते हिते च समतां कर्मक्षये केवल-
ज्ञानं प्राप्य महोदयं पदमलंचक्रे च शक्रेडिता ॥३०८॥
अन्योन्यं प्रियतागभीरसरसीबैसारिणश्रीस्पृशौ
सम्यग्दर्शनहारहारिहृदयौ लीलाविहारोद्यतौ ।
तौ नीलाम्बरपीतपीतवसनौ प्राक्पुण्यमाहात्म्यतः

प्राज्यं राज्यमखण्डशासनमनुच्छिन्नस्थिती चक्रतुः ॥३०९॥
तत्क्षेत्रीयजिनायुषा परिमितं सम्पूर्य चायुर्निजं
गत्वाऽऽद्यां नरकावनीमशुभतो रत्नप्रभाख्यां हरिः ।
स्मृत्वा प्राग्भवदुष्कृतं स्ववधितः संविग्नचित्तः सुधीः
संसेहे बहुवेदनाश्च विविधाः, धिक्कर्मणां चेष्टितम् ॥३१०॥
अस्य श्रीचमरेन्द्र एत्य जनकः प्राग्जन्महार्दोदयात्
संक्राता इव वेदनाः समहरत् स्वस्मिन्कृपामाश्रयन् ।
राज्ये न्यस्य सुतं बलोऽपि कलयन् भ्रातुर्वियत्त्या शुचं
जग्राहाग्रहतो जयन्धरगुरोः पार्श्वे विरक्तो व्रतम् ॥३११॥
मुख्यैः षोडशसंख्यया परिमितैः राज्ञां सहस्रैस्ततः
प्रव्रज्यामधिगम्य सेवनविधिश्रद्धापरैरन्वितः ।
विंशत्युग्रपरीषहान् द्विकलितान् बाढं विषह्य व्रती
पर्यन्तेऽभ्युपगम्य सोऽप्यनशनं मृत्वाऽच्युतेन्द्रोऽजनि ॥३१२॥
द्विरुक्ताग्न्यागारिप्रथगुणसहस्रैः परिमितं
हरेर्जन्तुः स्वायुर्निरयनियतं पूर्तिमनयत् ।
इतश्चास्मिन् द्वीपे भरततटवैताढ्यगिरिगो-
त्तरश्रेण्यामस्त्यप्रतिकृति नभोवल्लभपुरम् ॥३१३॥
तस्मिन् विद्याधरपरिवृढो मेघवाहो बभूव
प्रेयस्यस्याऽभवदधिगुणा मेघमालिन्यभिख्या ।
तस्याः कुक्षौ स च मधुरिपोर्जन्तुरुद्वर्त्य दुःख-
क्रीडावेशाम् नरककुहरान् मेघनादः सुतोऽभूत् ॥३१४॥
राज्यं न्यस्य तनूभवे नरपतिस्तास्मिंस्ततो वार्धके
वीरो लोकमसाधयत् परमसौ वैराग्यखड्गं दधत् ।
साम्राज्यं समवाप्य विक्रमनिधिः श्रेणिद्वयं चापरो
बाह्याभ्यन्तरवैरिवारविजये युक्तस्तयोर्हि क्रमः ॥३१५॥
अन्येद्युः स जगाम मन्दरगिरिं विश्राण्य नीवृच्छतं
भागेनाङ्गभुवां शताधिकमयं भाग्यस्फुरद्वैभवः ।
कुर्वाणस्य च सिद्धचैत्यमहनं तस्मिंस्तदा नन्दने
देवा कल्पनिवासिनोऽप्यवतरन्ति स्मावनेऽरं वने ॥३१६॥

प्राग्जन्मप्रियबान्धवं पुर इह प्रेक्ष्याऽच्युतस्वर्पतिः
प्रेम्णैत परलोकसाधनविधौ प्राबोधयद्बोधभृत् ।
तस्मिन्नेव किल क्षणेऽत्र समुपैच्छ्रीमान् मुनीन्द्रोऽमरः
सिद्ध्यत्येव मनीषितं सुकृतिनां प्रायो विलम्बं विना ॥३१७॥

दीक्षां तत्पदसन्निधौ नरपतिः श्रीमेघनादोऽग्रहीत्
निर्दम्भं स तपो विशुद्धमनसाऽप्याराधयामासिवान् ।
आलम्ब्य प्रतिमां स नन्दनगिरावन्येद्युरेकां क्षपां
तस्थौ पुण्यसमीहया हि यतयः किं किं न कुर्वन्त्यपि ? ॥३१८॥


अश्वग्रीवतनूभवोऽतिविभवो दैतेयभूय श्रितः
प्राग्वैरात्समुपाद्रवत्प्रतिघयुक् तत्रस्थमालोक्य च ।
वैफल्यं कलयाम्बभूव विविधाऽऽबाधा कृता तेन सा
तस्मिन् ध्याननिलीनचित्तविततौ स्वर्णाद्रिवन्निश्चले ॥३१९॥

शाखाऽपेतः कपिरिव ययौ दानवोऽथ विलक्ष-
स्तत्र ध्यानं व्यसृजदसमं मेघनादो मुनीन्द्रः ।
कस्याऽत्यन्तं स्फुरति विशदं ध्यानमप्येकतानं
संसाराध्वभ्रमणकरणाऽसन्निधानं विहाय ॥३२०॥

एवं तप्त्वा चिरमपि तपस्त्यक्तभोज्योऽन्तकाले-
ऽध्यात्मप्रीतिप्रणयविवशां चित्तवृत्तिं वितन्वन् ।
द्वाविंशत्यम्बुधिपरिमितं जीवितं बिभ्रदुच्चैः
कल्याणात्माऽच्युतसुरपतेराप सामानिकत्वम् ॥३२१॥

आसीच्छ्रीगुरुगच्छमौलिमुकुटश्रीमानभद्रप्रभोः
पट्टे श्रीगुणभद्रसूरिसुगुरुर्विद्यावतां सद्गुरुः ।
तच्छिष्येण कृतेऽत्र सुष्ठु नवमः श्रीशान्तिवृत्ते महा-
काव्ये श्रीमुनिभद्रसूरिकविना सर्गो विशालो ययौ ॥३२२॥

॥ इति श्रीशान्तिनाथचरित्रे नवमः सर्गः ॥



अर्हम्

अथ दशमः सर्गः ।

यदीयनामाऽस्ति समीहितार्थप्रदानकर्मण्यपि सिद्धमन्त्रः ।
स धर्मचक्रित्वपदं प्रशासच्छ्रीशान्तिनाथस्तनुतां सुखं वः ॥ १ ॥
अथाऽत्र जम्बूपपदान्तरीपे सीतानदीदक्षिणतीरनिष्ठः ।
श्रीमङ्गलावत्यभिधोऽस्ति पूर्वविदेहचित्रं विजयो जयाढ्यः ॥ २ ॥
पुर्यस्ति तस्मिन् मणिसञ्चयाख्या विख्यातनामा त्रिदिवाधिकर्द्धिः ।
सुखैकभोगान् वृषशर्मयोगाद्दिवौकसो यत्र हसन्ति सन्तः ॥ ३ ॥
क्षेमङ्करः क्षोणिपतिः स तस्यां वसुन्धराक्षेमविधानदक्षः ।
बभूव, यद्विक्रममाक्रमेण न्यवर्णयन्मागधवन्महीशाः ॥ ४ ॥
चतुर्मुखो यद्गुणवर्णनायां चतुर्मुखीभावमधत्त नूनम् ।
तथाऽपि तां कर्तुमयं नितान्ताऽऽरोहत्प्रकर्षेण शशाक नैव ॥ ५ ॥
देवी तदीयाऽजनि रत्नमाला सुरत्नमालाततहारयष्टिः ।
उमा यदीयं समवेक्ष्य रूपं वपुर्निबद्धं गिरिशं चकार ॥ ६ ॥
अथाऽच्युतेन्द्रत्वपदात् च्युतः सोऽच्युतः श्रिया श्रीअपराजितात्मा ।
तत्कुक्षिशुक्तौ प्रतिपद्यते स्माऽवदातमुक्ताफलमञ्जुभावम् ॥ ७ ॥
तया निरैक्ष्यन्त निशाऽवसाने स्वप्ना महान्तश्च चतुर्दशापि ।
चक्रं तथा पञ्चदश, सदास्या किञ्चित्प्रसुप्ताऽभ्यधिकं प्रबुद्धा ॥ ८ ॥
संख्याय सा तान्निजगाद तुष्टा राज्ञेऽथ राज्ञी प्रतिपत्तुमर्थम् ।
न्यवेदयत् सोऽपि तदैव देवि ! चक्री सुतस्ते भविता श्रियेन्द्रः ॥ ९ ॥
असूत पूर्णे समये सुतं सा समग्रसामुद्रकलक्षणार्च्यम् ।
स्वतेजसा तर्जितविग्मरश्मिं निरस्तनिःशेषवलं बलेन ॥ १० ॥
यदायुधं वज्रमदर्शि देव्या स्वप्नेऽत्र गर्भस्थितिमादधाने ।
वज्रायुधस्तज्जनकेन नाम्नाऽभ्यधायि पुत्रः स्वगुणैः पवित्रः ॥ ११ ॥
धात्रीभिरुत्सङ्गमवापितोऽसौ दिने दिनेऽवर्द्धत बालशालः ।
छायां प्रकुर्वन्नपि संश्रितानां रसैरनेकैः परिपोष्यमाणः ॥ १२ ॥
पद्मा इवोरुव्यवसायभाजं सौभाग्यसम्पन्नमिव स्त्रियोऽपि ।

महाकविं सत्प्रतिभा इवाशु विद्यास्तमाश्रिश्रियुरादरेण ॥ १३ ॥
नितम्बिनीलोचनपक्षिजालप्रबन्धसम्पादनपाशरूपम् ।
केलीनिकेतं विषमायुधस्य क्रमात्स तारुण्यभरं बभाज ॥ १४ ॥
लक्ष्मीवतीं नाम नरेन्द्रकन्यां विवाहितोऽसौ परमोत्सवेन ।
हर्षात्पितृभ्यामथ कामसेवां विधातुमुद्योगमधत्त वीरः ॥ १५ ॥
अनन्तवीर्यस्य तदैव जीवः परिच्युतः सोऽच्युतदेवलोकात् ।
व्यभूषयद्भूषणभूषिताङ्गलक्ष्मीवतीकुक्षिमुपेत्य पुण्यैः ॥ १६ ॥
सम्पूर्यमाणाखिलदोहदा सा सुतं प्रसूते स्म रविं स्वधाम्ना ।
पित्रा सहस्रायुध इत्यभिख्या तस्यैव चक्रे महतोत्सवेन ॥ १७ ॥
प्रक्षालितरण्यां निरवद्यविद्याऽकूपारपारं स विगाहते स्म ।
सीमन्तिनीमोहनबद्धकक्षं वयो द्वितीयं स समाससाद ॥ १८ ॥
द्वेधाऽप्युदूहे कनकश्रियं स क्ष्मापालकन्यां जनकाज्ञयैव ।
क्रमेण कान्ते विषयप्रसक्ते साऽसूत सूनुं शतवल्यभिख्यम् ॥ १९ ॥
परैरवधिः पुष्कलपुत्रपौत्रप्रपौत्रमुख्यैः सहितः कुमारैः ।
क्षेमङ्करः संसदमध्यशेत क्षपाकरो द्यामिव तारकौघैः ॥ २० ॥
देवैस्तदेशानदिवः प्रभूतैर्विचारसारं वच इत्यवादि ।
नामोपवत्रायुधमेव सर्वे श्राद्धाश्च सम्यक्त्वविशुद्धिशुद्धाः ॥ २१ ॥
श्रुत्वा तदेतत्किल चित्रचूलो मिथ्यादृशां मूर्द्धमणिः सुपर्वा ।
दुर्वासनावासितचित्तवृत्तिस्तदैव तां संसदमाससाद ॥ २२ ॥
स तत्र सभ्यैर्नृपतेः समक्षं निरूप्यमाणासु विचित्रवाक्षु ।
चार्वाकरूपं प्रतिपद्य सद्यः प्रोवाच वाचालनियन्त्रणोत्कः ॥ २३ ॥
नैवाऽस्ति धर्मः स च नाप्यधर्मस्तदाश्रयो नास्ति तथैव चात्मा ।
गमी ततः कः परलोकमङ्ग ! तद्वामुकं कः प्रतिपद्यतां वा ? ॥ २४ ॥
अभ्येतु को वा परलोकसत्त्वं प्रामाणिकोऽप्यत्र विना प्रमाणम् ।
बलीयसी हि स्फुटचक्षुराद्यप्रवृत्तिरेषा तदभावमाह ॥ २५ ॥
तस्याप्यभावात्किमयं वृथाऽऽत्मा तपोविधानैः परिखिद्यतेऽत्र ।
तत्साधनं नो सुखदुःखमुख्यभावान्विधातुं सुधियाऽपि शक्यम् ॥ २६ ॥
अभिन्नखानिप्रभवत्वसाम्ये • निविश्यते मूर्धसु रत्नमेकम् ।
परं कमेतत्र न पुण्यपापसम्बन्धजन्यं सुखदुःखसत्त्वम् ॥ २७ ॥

इतीरयित्वा विरते च तस्मिन् वज्रायुधोऽप्यास्तिकमौलिरत्नम् ।
जगाद किं स्वानुभवेऽपि जाग्रत्यहो ! विरुद्धं भवतोच्यतेऽदः ॥ २८ ॥
दत्त्वोपयोगं विशदावधेस्त्वं विद्धि स्वयं प्राग्भवधर्मजन्यम् ।
फलं स्वकस्याऽस्खलिता विचित्रा यद्दिव्यसम्पत्तिरहार्यरूपा ॥ २९ ॥
यमूविथ प्राच्यभवे पुमांस्त्वं देवोऽधुना दिव्यमहर्द्धिधाम ।
आत्मा न चेदस्ति कथं तदेतदिसद्धि समाक्रामति निर्निमित्तम्?॥ ३० ॥
नराऽमरप्राच्यभवोपलब्ध्या स्फुरत्स्वसंवित्तिकृतानुभूत्या ।
प्रत्यक्ष एवाऽस्ति परोऽपि लोकस्तवाऽपि किं, मन्यस एतकं न?॥ ३१ ॥
इत्येष वज्रायुधशुद्धवाचा विबोधिताऽऽत्मा विबुधोऽभ्यधत्त ।
निष्कारणोपक्रिययाऽनुरक्तस्त्वं साधु साध्वत्र महाशयोऽसि ॥ ३२ ॥
समर्थमिथ्यात्वपिशाचकेन विडम्बितोऽबद्धमवोचमीदृक् ।
सद्धर्ममन्त्राक्षरवाचकेन सज्जीकृतोऽहं भवतैव नूनम् ॥ ३३ ॥
प्रसीद विश्राणय सांप्रतं तत्सम्यक्त्वमौदार्य्यनिधान ! मे त्वम् ।
इतीरितः सोऽपि तथा चकार किमर्थवैमुख्यमहो ! सतां स्यात् ? ॥ ३४ ॥
क्षेमङ्करक्ष्मापुरुहूतवंशमुक्तामणे ! मुक्तसमस्तदोष ! ।
अतः परं तेऽस्मि निदेशवर्ती दूरस्थितोऽप्येष सदा सदान !॥ ३५ ॥
सम्यक्त्वदातुर्भवतः कथञ्चिन्नैवानृणः स्यामुपकारसार ! ।
सुवर्णरत्नादि तथाऽपि किञ्चिद्याचस्व मत्तः स्वहिताऽप्रमत्त !॥ ३६ ॥
श्रुत्वेति देवोक्तिमवक् कुमारस्त्वदर्थये संप्रति देववर्य्य ! ।
सम्यक्त्वरत्ने सुकृतोपलब्धे कुर्य्याः प्रयत्नं सुमतेऽत्र सम्यक् ॥ ३७ ॥

॥ त्रिभिर्विशेषकम् ॥

देवो न्यगादीत् किमिवार्थितं ते स्वार्थो ममैवेष महानुभाव ! ।
किञ्चित्तदानृण्यकृते परं मे नाथापरं नाथ ! सुवृत्तपान्थ ! ॥ ३८ ॥
इत्यर्थनायां विमुखे कुमारेऽप्यस्मिन्नलङ्कारसमुच्चयं सः ।
दिव्यं प्रदाय त्रिदिवं जगाम तद्वर्णनातत्परवाग्विलासः ॥ ३९ ॥
ईशानकल्पप्रभुरप्यमुष्मादेतत्प्रशंसां विहितां निशम्य ।
अनागतं तीर्थकरं स्वचित्ते संभाव्य तुष्टाव सुतुष्टचित्तः ॥ ४० ॥
प्रहेलिकाभिः पदशालिनीभिः प्रश्नोत्तरैश्चाऽपि बुधैर्मतार्थैः ।

विलासिनीभिः सह संश्रिताभिः वज्रायुधः कालमवाहयत् सः ॥ ४१ ॥
प्रोल्लासयन् कामिमनांसि कामं मानं निरस्यन्नपि मानिनीनाम् ।
उन्मादयन् भृङ्गकुलानि पुष्पैरन्येद्युरागात् स ऋतुर्वसन्तः ॥ ४२ ॥
बन्धूकबन्धूनि विकस्वराणि भवन्ति चैतानि न किंशुकानि ।
वनस्थली मूर्धनि किन्तु धत्ते सिन्दूरपूरं मधुकान्तदत्तम् ॥ ४३ ॥
कर्णाऽमृतध्यानविधानहेतोर्न कालिमाऽङ्गे यदि कोकिलस्य ।
स्याद् दृष्टिदोषेण तदा जनानां विपत्तिरेतस्य न संशयोऽत्र ॥ ४४ ॥
विहाय मानं दयितैः सहाशु प्रेमाणमादद्ध्वमयं समेतः ।
प्राणान् मधुर्वोऽपरथा निहन्ता कान्ताहितं कोकिल इत्यवादीत् ॥ ४५ ॥
न मानमत्याक्षुरनेकशोऽपि दूतीभिरुक्ता अपि सामपूर्वम् ।
प्रकुप्य याः, ता मदनोपतप्ता मधौ प्रियान् स्वान् स्वयमेव भेजुः ॥ ४६ ॥
इतीदृशेऽस्मिन्नृतुराजराज्ये प्रवर्तमाने कुतुकाऽसमाने ।
सुदर्शना रूपसुदर्शनाऽसौ पणाङ्गनानङ्गशरासयष्टिः ॥ ४७ ॥
पाणौ दधाना पटलीं सुमानामुपेत्य वज्रायुधमाः! कुमारम् ।
सुमायुधश्रीजयिनं श्रियेति कृताञ्जलिर्विज्ञपयाम्बभूव ॥ ४८ ॥
समागतेऽस्मिन्नपि पुष्पकाले प्रफुल्लपुष्पावलिशालमाने ।
लक्ष्मीवती ते महिषी कुमार! प्रियं मया विज्ञपयत्यदस्त्वाम् ॥ ४९ ॥
प्रभो! वनं शूरनिपातसंज्ञ पौष्पै रजोभिः स्खलदङ्घ्रिभृङ्गम् ।
द्रष्टुं भवद्भिः सममेव गत्वा चेतःपथे कौतुकमद्य नोऽस्ति ॥ ५० ॥
अस्त्वेवमित्यभ्युपगत्य तस्या वाचं कुमारः प्रतिपत्तिसारः ।
उद्यानमानन्दपरिष्कृतस्तयया परीवारयुतस्तदैव ॥ ५१ ॥
लक्ष्मीवतीमुख्यमनोज्ञदेवीशतानि सप्ताऽपि तदाऽन्वयुस्तम् ।
आकल्परत्नाभरणप्रशस्त्यान्याखण्डलस्त्रैणविडम्बकानि ॥ ५२ ॥
माकन्दमञ्जुप्रभोगहृष्टः पुंस्कोकिलः कूजति यत्र तारम् ।
वज्रायुधस्य क्षितिपालसूनोरभ्यागमस्वागतपृच्छयेव ॥ ५३ ॥
पुष्पाणि यस्मिन्मकरन्दजातं श्च्योतन्ति वातापहृतानि शीतम् ।
श्रमापनोदाय नृपात्मजस्य समागतस्येव दिशन्ति पाद्यम् ॥ ५४ ॥

१ मन्मथधनुर्लता । २ आः हर्षे ।

॥ त्रिभिर्विशेषकम् ॥

श्रान्तः स पुष्पावचयं प्रकुर्वन् दोलां परिक्रीडितकेन चाऽपि ।
सहाऽबलाभिर्जलकेलिहेतोर्वापीमचालीदचलप्रतिष्ठः ॥ ५५ ॥
विनिर्मिमाणाः कमलोपभोगं सरस्वतीमद्मपदाधिवासाः ।
वलक्षपक्षद्वयचारुरूपाः खेलन्ति यस्यां खलु राजहंसाः ॥ ५६ ॥
वज्रायुधस्त्रैणमुखेन्दुभासा संकोचमापुः कमलानि यस्याम् ।
विरोधिवर्गेऽभ्युदयं प्रपन्ने क्व वा विकाशः कमलाकराणाम् ? ॥ ५७ ॥
समीरसम्पातसमुत्थलोलकल्लोलदम्भात् सलिलानि यस्याः ।
वज्रायुधस्याऽऽपततः कुमारस्याऽभ्युत्थितिं चक्रुरिव प्रमोदात् ॥ ५८ ॥
समर्प्य वस्त्राभरणानि दास्याः संवीय धौतांशुकमेकमेव ।
रतेः सपत्नीभिरिव स्वभासा तस्यां स पत्नीभिरमा विवेश ॥ ५९ ॥

॥ चतुर्भिः कलापकम् ॥

प्रस्पर्धमानं मम लोचनाभ्यां दूरादभूदेतदिति प्रकोपात् ।
उपेत्य काचित् परिगृह्य तत्र स्वपाणिपद्मेन बिभेद पद्मम् ॥ ६० ॥
हरिप्रियाऽस्मिन् वसतीति सत्या प्रसिद्धिरास्ते वितथाऽथवा सा ।
इति स्वयं काचन तत्र पद्मं विलोकयामास समन्ततोऽपि ॥ ६१ ॥
श्वासान्मदीयादधिकं किमस्य स्यात्सौरभं न श्विदिति स्वतोऽपि ।
प्रतीतिमाधातुमजिघ्रदेका तत्राऽऽयताक्षी प्रवितत्य पद्मम् ॥ ६२ ॥
कस्तूरिकाकुङ्कुममिश्रतोयैः सम्पूर्य सम्पूर्य सुवर्णशृङ्गाः ।
वज्रायुधस्ता असिचत् सुमेघोः सन्तापसम्भारमिव व्युदस्यन् ॥ ६३ ॥
इदं विशालं यदि वा मदीये नेत्रे विशाले इति तत्र काचित् ।
निर्णेतुमादाय सरोजपत्रं ममौ समाभ्यां[1] स्वविलोचनाभ्याम् ॥ ६४ ॥
सुवर्णशृङ्गीजलसंप्रयोगैः सेक्तुं प्रवृत्ता प्रियमेव काचित् ।
पुनर्निवृत्तेति विचिन्त्य तत्र जडैर्न सङ्गः कृतिनोऽस्य कार्यः ॥ ६५ ॥
स्नात्वं विनिर्माय विनिर्गतास्ता वापीसमीपे विधुर्निविष्टाः ।
वासोभिरार्द्रैरपि निर्जरेन्द्रवामा इव व्योमनदीजलार्द्राः ॥ ६६ ॥
इत्यम्बुकेलिं रचयंश्चिराय वज्रायुधः स्थैर्यमधत्त धीमान् ।

१ सश्रीकाभ्याम् ।

ललाटदत्तोग्रलाटदृष्टिक्रोधाग्निभीत्येव दशार्द्धवाणः ॥ ६७ ॥
प्राग्जन्मदुर्हृद् दमितारिजीवो भवं भ्रमित्वा निजकर्मशिष्ट्या ।
अजायत स्वर्गिभवे स विद्युद्दंष्ट्राभिधो दिव्यमहर्द्धिधाम ॥ ६८ ॥
तत्र स्थितं तं रममाणमेष प्रेक्ष्याभवत् क्रोधविलोहिताक्षः ।
चिक्षेप वापीजलसञ्चरिष्णौ तस्मिन् कुमारे स तदैव शैलम् ॥ ६९ ॥
पादौ तदीयावपि नागपाशैर्बबन्ध पाशीव स देवपाशः ।
भवान्तरस्य स्फुरति प्रकोपे किं किं विधत्ते नहि शक्तिचुञ्चुः ?॥७०॥
संचूर्णयामास पतन्तमद्रिं स मुष्टिना मोदकवत् कुमारः ।
आशीविषांस्तानपि वैरिराज्ञीवेणीरिव स्वैष रयाच्छिनत्ति ॥ ७१ ॥
ततः सदारः स च दीर्घिकाया विनिर्जगामाक्षतविग्रहोऽयम् ।
विस्फूर्त्तिमाक्रामति पुण्यपुण्ये शरीरभाजां हि न विघ्नभावः ॥ ७२ ॥
तदा विदेहेषु जिनान् विनम्य नन्दीश्वरद्वीपजिनान् निनंसुः ।
व्रजन् विडौजा निविडौजसं तं विलोकयामास लसत्कलत्रम् ॥ ७३ ॥
भवांस्तु चक्री भविता भवेऽग्रेतः पञ्चमे पञ्चम एव चक्री ।
भावी पुनर्भारत एव वर्षे त्वं षोडशः सात्त्विक ! धर्मचक्री ॥ ७४ ॥
इतीरयित्वा प्रणिपत्य भक्त्या संपूज्य देवद्रुमपुष्पजातैः ।
नन्दीश्वरद्वीपमियाय वज्री वज्रायुधस्यात्मनिकेतनं सः ॥ ७५ ॥
(युग्मम्)
क्षेमङ्करक्षोणिपतिः स काले लोकान्तिकामर्त्यविबोधितः सन् ।
दीक्षां जिघृक्षुर्निजकेऽपि राज्ये न्यधत्त वज्रायुधमेव पुत्रम् ॥ ७६ ॥
दानं स सांवत्सरिकं प्रदाय चारित्रमादत्त विदीर्णरागः ।
असह्यमानश्च परीषहेभ्यश्चिरं धरित्र्यां विजहार देवः ॥ ७७ ॥
समागतः क्षीणविभातिकर्मा भूयः स तत्रैव जगत्त्रयेशः ।
अनन्तविज्ञानमवाप, चक्रे शक्रैरथैकैः परमोत्सवश्च ॥ ७८ ॥
जगद्गुरुर्वप्रिणि सन्निविष्टे वज्रायुधे चापि पुरो निविष्टे ।
परोपकाराय दिदेश धर्मं समग्रभाषानुगया गिरा सः ॥ ७९ ॥
दशप्रकारे यतिभिः प्रयत्नं प्रमादमुत्सृज्य सदैव धर्मे ।
शर्मैकहेतौ पुनरेव तत्र दयानिविष्टैः गृहमेधिभिश्च ॥ ८० ॥
धर्मं दयामूलमुशन्ति सन्त ऋते दयां नैव यतोऽस्ति धर्मः ।
धर्मार्थिना तेन दया विधेया स्वर्मोक्षसौख्यादनुरागयानि ॥ ८१ ॥
अपास्तलोकायतिकं समेकं धर्मं निरस्यन्ति न केचनापि ।

विचार्य्य कार्यः प्रतिपद्वता तत् स चापि सत्त्वं प्रतिपद्यते यः ॥८२॥
कथञ्चिदत्राप्यविचार्य कार्यं कृतं किमादीनवकृद् न भव्याः ! ?।
किञ्चामृताग्रक्षितिनायकादेरिवानुतापं जनयत्यवश्यम् ॥ ८३ ॥
अथ प्रभुं विज्ञपयाम्बभूवुर्वज्रायुधाद्याः प्रणिपत्य सर्वे ।
जिनेश्वरामी अमृताग्रभूपादयस्त्वयोदाहरणीकृताः के ? ॥ ८४ ॥
स्वामी ततः प्राह समस्ति जम्बूद्वीपेऽत्र वर्षे भरते त्वपाच्ये ।
श्रिया विशाला नगरी विशाला शालेन तुङ्गेन विशालमाना ॥ ८५ ॥
तत्रावनीशो जितशत्रुनाम्ना धाम्ना निराशीकृतशत्रुवर्गः ।
दिवस्पतिर्जामति यत्र जिष्णौ व्यर्थं दधे जिष्णुरिति स्वनाम ॥ ८६ ॥
देवी तदीया कनकश्रयभिख्या बभूव सौन्दर्यगुणैकभूमिः ।
तद्रूपसम्पद्विजितैव लीना रम्भासु रम्भा निजनाम चक्रे ॥ ८७ ॥
विश्वम्भरास्वाम्यपरेद्युरुच्चैर्वितत्य वैभातिककृत्यजातम् ।
पूर्वाचलं विस्फुरितप्रतापः सिंहासनं सूर इवाधितष्ठौ ॥ ८८ ॥
दौवारिकोऽभ्येत्य तदैव भूपं व्यजिज्ञपद् द्वारि जनाधिनाथ !।
चतुर्मिता राजसुताः समेतास्ते किं प्रवेश्या यदि वा निवर्त्याः ?॥८९॥
प्रवेशयाऽऽश्वित्यवनीभुजोक्ते प्रावीविशत्तानथ वेत्रपाणिः ।
नम्रान् विनीतान् सविधासनेषु न्यवीविशच्चाधिपशासनेन ॥ ९० ॥
पप्रच्छ तान् भूमिपतिः प्रसन्नो भद्राः ! कुतो यूयमुपागताः स्थ ?।
कैर्नामभिर्वा प्रथिता जगत्यां कार्यं च किं शंसत तत्समस्तम् ?॥९१॥
तेषु न्यगादीद् वचनं कनीयान् भाद्राम्बुदध्वानजये समर्थम् ।
पुरं नरेन्द्रोत्तरादिक्पथेऽस्ति यत्काञ्चनं प्राकृतिलकोत्तरं च ॥ ९२ ॥
तत्पत्तनं पालयति स्म राजा श्रीशत्रुमर्दी प्रवराभिधानः ।
प्रत्यर्थिनो यस्य निशम्य नाम निलीय कुञ्जेषु दिनानि निन्युः ॥९३॥
तद्देव्यभूद्रूपवती यथार्थाभिधा विधातुः प्रथमेव सृष्टिः ।
तत्कुक्षिशुक्तिप्रभवा इमेऽपि विभान्ति मुक्ताफलवत् सुभासः ॥ ९४ ॥
मुख्यः सतां वल्लभदेवराजस्ततो द्वितीयः खलु वत्सराजः ।
तृतीयको दुर्लभराजनामा मां कीर्तिराजं चरमं निबोध ॥ ९५ ॥
बाल्ये कलाभ्यासमकार्ष्म सर्वे परस्परं प्रीतिसमृद्धिभाजः ।
उद्यानदेशेषु विहारकेलीरनन्तलीलाकलिताश्च लक्ष्म्या ॥ ९६ ॥
मूर्ता उपाया इव साममुख्या वयं महाराज ! महीभुजां स्मः ।
दानादिधर्मा इव पुण्यभाजां मुदे न केषां मनसां भवामः ? ॥ ९७ ॥

वृद्धत्वमासन्नचरं विचिन्त्य ज्येष्ठं तनूजं विनिवेश्य राज्ये ।
राजा तपस्यां स्ववशां विधाय स्वर्लोकलक्ष्मीं कलयाञ्चकार ॥ ९८ ॥
दायादगृध्रैश्छलपक्षपातैर्दुराशयैराहितकेलिकामैः ।
राज्यामिषं तस्य गृहीतमाराद् मायाविनः किं न हि कुर्युरुग्राः ?॥९९॥
सोऽयं विनिर्गत्य ततः पुरात् त्वां सिषेविषुर्देव ! समागतोऽस्ति ।
त्रिभिः समेतोऽवरजैस्त्रिनेत्रो नेत्रैरिवोपेक्षितकामचारैः ॥ १०० ॥
ईदृक् तदीयं वचनं निशम्य प्रहृष्टचेता नृपतिः प्रसन्नः ।
अतिष्ठिपन् तांश्चतुरोऽपि पार्श्वे यथोचितां वृत्तिमसौ विधाय ॥ १०१ ॥
क्रमेण कालेऽपि कियत्यतीते नियोजयामास नृपोऽपि चैतान् ।
निजाङ्गरक्षाकरणे विशुद्धान् विशुद्धशीला हि भवन्ति मान्याः ॥१०२॥
भुजैरिव श्रीपतिरोजसाऽऽढ्यैर्वक्त्रैः स्वयम्भूरिव वेदमूलैः ।
नृपः प्रजापालनबद्धकक्षो रेजे चतुर्भिः सविधस्थितैस्तैः ॥ १०३ ॥
प्रोद्दामतिग्मांशुकरोऽपरेद्युर्निदाघकालः सहसापपात ।
न यत्र जाड्यं विदुषीव किञ्चित्प्रवर्तते ध्वस्तकलाविलासम् ॥१०४॥
यस्मिन्नृपाणामधितापभाजां दासीकराः शान्तिमवाप्नुवन्ति ।
इतस्ततः शीतलनीकरौघप्रवर्षकृच्चामरचालनेन ॥ १०५ ॥
धूपातपः कर्मकरैरमन्दं यत्रातिशीताः परिपूरितासु ।
धनेश्वराः कृत्रिमदीर्घिकासु क्रीडन्ति पल्येऽपि समं कलत्रैः ॥ १०६ ॥
विलोक्य मां पुष्पवतीं दिनेशः प्रवृद्धवीर्यो भवतीति मही ।
इयं निजं यत्र विकाशदम्भात्सौभाग्यमेव प्रथयत्यवश्यम् ॥ १०७ ॥
प्रवर्द्धमानः स दिनाधिनाथः प्रवर्धयामास दिनानि यत्र ।
किं स्वामिना तेन विधेयमत्र यः सेवकान् पोषयते न चापि ? ॥१०८॥
चारित्रभाजो यतिनो विहाय स कोऽपि यस्मिन्न बभूव मर्त्यः ।
यस्तालवृन्तं न दधाति पाणौ यत्नेन नो वीजयति स्वमङ्गम् ॥१०९॥
इतीदृशे ग्रीष्मऋतौ प्रवृत्ते श्रीदेवराजो नृपतिं प्रणम्य ।
व्यजिज्ञपच्चेति जनाधिनाथ ! त्वच्छासनाद् ग्राममहं व्रजामि ॥११०॥
विज्ञप्तिमाकर्ण्य नृपः स विश्रम्यस्वेति तं प्राह निजे पदे त्वम् ।
निवेश्य कञ्चिन्निपुणं व्रजेति श्रुत्वा च तं व्याज्ञपयत्स भूपम् ॥ १११ ॥
मासं समेष्यामि महीमहेन्द्र ! विमुच्य कार्याणि परःशतानि ।
इति प्रतिज्ञाय गतोऽभिरामं ग्रामं स कामस्मृद्दर्पापमूर्तिः ॥ ११२ ॥
सन्ध्याह्नकालेऽथ निवर्तमाने निर्वृत्तकार्यः स्वपुरं प्रति द्राक् ।

विष्वक् समीरालिपुरःप्रचारः प्रचक्रमे वर्षितुमम्बुवाहः ॥ ११३ ॥
धूलीजलक्लेदनशङ्कया स न्यग्रोधवृक्षं निकटं श्रितश्च ।
तस्योपरिष्टादिदमुच्यमानं शुश्राव सुश्रव्यगुणावदातः ॥ ११४ ॥
शृण्वन्तु कौतूहलमेव सर्वेऽप्ययानघः पुष्पकरण्डिनीशः* ।
विभावरीप्राक्प्रहरे विभावान् विपत्स्यते कृष्णभुजङ्गदष्टः ॥ ११५ ॥
दध्यौ तदाकर्ण्य स कोऽयमेवं वटोपरिष्टात् कटुकं प्रवक्ति ?।
विज्ञातमेतत्स्वगिरा गरीयान् पिशाचकान् स्वान् न्यगदत्पिशाचः ॥११६॥
स्वस्वामिनोऽनिष्टमिदं निशम्य रयादयासीत् स्वपुरं दयालुः ।
जज्ञे तदा भाविमहापदोऽस्य क्षोणीश्वरस्याप्यरतिर्नितान्तम् ॥ ११७ ॥
विसृज्य पार्श्वानुचरान् समग्रान् नृपः प्रदोषेऽपि समं महिष्या ।
शिश्ये निदद्रौ च महीपतीनां वार्ताक्षमानां सुलभा हि निद्रा ॥११८॥
मा स्वामिनं मे भुजगो निहन्यात् सत्त्वावधाने मयि सेवकेऽपि ।
पाणौ कृपाणं विनिवेश्य तीक्ष्णामिति स्वयं दीपमनु स्थितोऽयम् ॥११९॥
प्रेङ्खाश्वपल्यङ्कदृढानुलग्ने प्रलम्बमानं कटके निरीक्ष्य ।
सरीसृपं मङ्क्षु विकृष्य धृत्वा तुण्ड्यां द्विधाऽऽधात्तरवारिणाऽयम् ॥१२०॥
पिधाय खण्डद्वितयं क्वचित्तत्तदस्रबिन्दून् पतितान् महिष्याः ।
हृदि स्वहस्तेन तदाऽपनिन्ये विषोग्रसङ्क्रान्तिभियाऽयमाशु ॥१२१॥
तदा विबुद्धेन नृपेण देव्या वक्षः स्पृशन्नेव निरैक्ष्यतैषः ।
प्रकोपभावारुणलोचनेन चित्ते व्यचिन्तीति सचेतनेन ॥ १२२ ॥
मत्प्रेयसीसक्तमनस्कमेतं निहन्मि सम्प्रत्यपि शक्तरोषः ।
भृशं स्वशक्त्या बलवानयं वा तस्मादुपायेन विनाश्य एव ॥ १२३ ॥
इति स्वयं चिन्तयतो नृपस्य यामो रजन्याः प्रथमो जगाम ।
श्रीदेवराजानुज एव सोऽथ प्रजेश्वरप्राहरिकीबभूव ॥ १२४ ॥
अत्र स्थितः प्राहरिकोऽस्ति को वेत्युक्ते नृपेणाभिदधे स वत्सः ?।
स्वामिन्नहं सम्प्रति जागरूकोऽस्मीतीरिते तेन नृपोऽप्युवाच ॥१२५॥
आदेशमेकं भवते दिशामि विधास्यसे वत्स ! तमेव चेत् त्वम् ।
किं स्वामिवाचां करणे विचारः क्रियेत भृत्यैरिति सोऽप्यवादीत् ?॥१२६॥
ततः क्षितीशोऽपि तमादिदेश श्रीवत्सराज ! श्रितराजपाद ! ।
हत्वाग्रजं तस्य शिरो ममाग्रे समानयेश्छिन्नविचारभारः ॥ १२७ ॥
तदैव गोत्राधिपतेर्नियोगं स्वीकृत्य कृत्याय समुत्थितः सः ।

* उज्जयिनीपतिः ।

पदानि गत्वा कतिचित् कथञ्चिद् विचारयामास विचारचारुः ॥१२८॥
पीयूषमाक्रामति चेद् विषत्वं जलं यदि स्याज्ज्वलनस्वरूपम् ।
श्रीदेवराजस्य ममामजस्य तत् संभवेद् दूषणमेव किञ्चित् ॥ १२९ ॥
तदागसा केनचनापि शङ्केऽलीकेन तस्मै कुपितो महीशः ।
केनाप्युपायेन ततो विलम्ब्य नृपस्य सम्बोधमहं विधास्ये ॥ १३० ॥
इति स्वचित्ते परिभाव्य भव्यः स्थित्वा मुहूर्तं वलितस्ततः सः ।
इति स्वयं भूमिपतिं सधैर्यः कृताञ्जलिर्विज्ञपयाम्बभूव ॥ १३१ ॥
अद्यापि जागर्ति स देवराजस्तच्छक्यते देव ! न हन्तुमेषः ।
क्षणेन चैकेन निहन्तुमेतं यास्यामि निद्राभरमन्थराक्षम् ॥ १३२ ॥
तद्दीनकोपप्रशमाय वत्सः सद्वत्सलस्तं नृपमेवमाह ।
इयं त्रियामाऽपि सहस्रयामा विनोदहीनस्य विभोस्त्रियामा ॥१३३॥
आख्यानकं किञ्चन तन्ममाभे स्वामी प्रवक्तुं यततामिदानीम् ।
यद्वा समाकर्णयतु स्वकर्णौ निर्दिश्य मत्तः प्रभुरेव विज्ञः ॥ १३४ ॥
आदिष्टमात्रः प्रभुणाऽथ सोऽपि कथामुपाक्रंस्त विवक्तुमित्थम् ।
यदायदा ये विनियोजिताः स्युस्ते किं नियुक्ताः स्वयमेव नैव ?॥१३५॥
श्रीपाटलीपुत्रपुरे समस्तवर्णाश्रये चित्रविधानधुर्यः ।
बभूव पृथ्वीपतिरङ्ग ! पृथ्वीराजो विराजद्विपुलप्रतापः ॥ १३६ ॥
देवी सदीया समभूत् सुतारा सम्पूर्णतारापतिबिम्बवक्त्रा ।
कलङ्कभृत्तापकरावितीमौ या चन्द्रसूर्यौ न कदाऽप्यपश्यत् ॥१३७॥
मान्यस्तयोस्तत्र पवित्रवृत्तश्री रत्नसारः समभूद् महेभ्यः ।
धर्मो यमाश्रित्य सदाऽपि तस्थौ विशालमालानमिव द्विपेन्द्रः ॥१३८॥
भार्या सुरी तस्य सुरीव कान्त्याऽभवत्सच्छीलविभूषणा सा ।
स्वर्भानुसंस्पर्धनकर्मणेव यत्केशपाशोऽधृत कृष्णभावम् ॥ १३९ ॥
तयोस्तनूजो धनदत्तनामा कामावतारोऽजनि रूपऋद्ध्या ।
माल्यं समारभ्य यथैव धीभिः श्रितस्तथाऽयं स कलाभिराभिः ॥१४०॥
शृङ्गारशेचिष्णुरगारतोऽसौ शृङ्गाटके यानपरेशुरुक्तम् ।
द्वयोः कयोश्चिन्मिथ एव पुंसोरेतत् समाकर्णयति स्म धीरः ॥ १४१ ॥
कोऽप्यग्रणीरेष गुणोत्तमानां पुण्याधिकानां च ललामभूतः ।
भुक्त्वा प्रदायैव वनीपकानां धनं निजं यः सफलीकरोति ॥ १४२ ॥

तत पर प्राह न चास्य मित्र ! श्लाघे वदान्यत्वमहं कथञ्चित् ।
यो वीजिवित्तेन तनोति दानं भोगांश्च नो चित्तहृदेव मे सः ॥१४३॥
तदुक्तमीदृक् स निशम्य सम्यग् व्यचिन्तयद् युक्तमवाच्यनेन ।
किं तैर्विनीतैर्गुणिभि. समर्थैः सुतैर्न येषां स्वभुजार्जिता श्री. ?॥१४४॥
ध्यायन्निति प्राप निकेतनं स व्यजिज्ञपत् स्वं पितरं विनीत. ।
नरोत्तमा स्युर्विपयोपपत्त्या ते चोपलभ्या विपयोपपत्त्या ॥ १४५ ॥
रूपेऽनुरूपे प्रबले बलेऽपि बुद्धौ प्रवृद्धाधिकचित्तशुद्धौ ।
कदाऽपि तात ! प्रतिपद्यते न श्रिया विना ना पुरुषोत्तमत्वम् ॥१४६॥
निदेशमासाद्य तवैव तात ! देशान्तरं यामि रमार्जनाय ।
इति स्वपुत्रस्य मनोभिलापं श्रुत्वा महेभ्यः स सुधीर्बभाषे ॥ १४७ ॥
मनोरथं व्यञ्जयता स्वकीयं मच्चित्तमायासितमाः ! किमर्थम् ? ।
भाग्येन ते वत्स ! गृहे मदीये प्रवर्धते श्रीरधिकाधिकं च ॥ १४८ ॥
यदृच्छया तां विनियोजयस्व स्ववाञ्छितार्थेषु वधूमिवोढाम् ।
सद्मस्थितोऽपि व्यवसायजातं कुर्वन् ममानन्दय पुत्र ! चित्तम् ॥१४९॥
इति स्ववाचा प्रतिषेधितोऽपि पित्रा सनिर्बन्धमुवाच पुत्रः ।
अप्यूर्जिता तात ! तवार्जिता मे लक्ष्मीरियं नो भगिनीव भोग्या ॥१५०॥
इत्याग्रहग्राहनिपीतचित्तं स तातमापृच्छ्य गृहीतपण्यः ।
शुभे मुहूर्ते शकुनेषु सत्सु देशान्तरं प्रत्यचलद् धनाय ॥ १५१ ॥
सोऽजन्यसौजन्यविभावनेन संवाहयन् सार्थममा चलन्तम् ।
विस्मारयन् वेश्मसुखं वनेऽपि प्रयाणकैः श्रीपुरमाप कैश्चित् ॥ १५२ ॥
तस्योपकण्ठे पटमण्डपान् स प्रदाय कीलप्रतिबद्धरश्मीन् ।
अवासयत् सार्थिकसम्मतेन सार्थं परिश्रान्तवृपाश्वसार्थम् ॥ १५३ ॥
तदैव कश्चित् पुरुषोऽतिविह्वलं प्रकम्पमानावयवो भयेन ।
निश्वासधाराविनिरुद्धकण्ठस्तं सार्थवाहं शरणं प्रपेदे ॥ १५४ ॥
निघ्नन्तु निघ्नन्त्विति भापमाणाः पाणौ दधाना निशितान् कृपाणान् ।
अन्वागमंस्तं कतिचित् पुमांसो धावन्त एवास्खलितांह्रिवेगम् ॥१५५॥
स सार्थवाहोऽपि बभाण चैतान् शरण्यरूपः शरणोत्सुकानाम् ।
किं वोऽपराद्धं सरुपामनेन वधं यदर्हत्ययमुग्रवीर्याः ! ? ॥ १५६ ॥
तेऽप्यूचिरे सत्तम ! सार्थवाह ! प्रेष्यो नृपस्यैप नृपस्य तस्य ।

विभूषणं किञ्चन चोरयित्वा व्यधादयं देवनदेवनं च ॥ १५७ ॥
दीव्यन्तमेतं समवाप्य बद्ध्वा समर्पयामोऽवनिनायकाय ।
एतं सकोपः स तदैव वध्यं समादिशद् दिष्टनयः प्रजानाम् ॥ १५८ ॥
विभूषणप्राप्तिमिलेश ! यावत् सुरक्षगुप्तावयमेव रक्ष्यः ।
विज्ञप्त एवं सचिवेन भूपस्तथा तदाऽऽधत्त विधेयगृह्यः ॥१५९॥
एषोऽद्य यामे चरमे रजन्या आरक्षमर्त्यं विनिहत्य शक्त्या ।
कारागृहादाशु विनिर्जगाम सपौरुषः किं न करोति यद्वा ?॥ १६० ॥
बलोपयुक्ताननुगच्छतोऽस्मान् विबुध्य बुद्ध्या झटिति प्रविश्य ।
निलीय तिष्ठन् नलिनीवनान्तः कियन्तमप्येष निनाय कालम् ॥१६१॥
निर्गत्य तस्मादधुना महेच्छ ! स्वच्छं भवन्तं शरणं प्रपन्नः ।
श्रुत्वेति तद्वृत्तमवृत्तपूर्वं तान् सार्थवाहः पुनरेवमूचे ॥ १६२ ॥
ईदृग्विधाकृत्यविधानतोऽसौ वधस्य संबन्धमुपैति नूनम् ।
निवेद्यतां किञ्चन भूषणं तद् नृपेण लब्धं यदि वा न चापि ?॥१६३॥
संप्राप्तमेवेति निवेदिते तैर्भूयो बभाषे धनदत्त एतान् ।
प्रतीक्षतां तर्हि मनाक् प्रतीक्ष्यं यावद् नृपं विज्ञपयामि विज्ञम् ॥१६४॥
सोपायन सोऽपि तदैव गत्वा विज्ञाप्य भूपालमतिप्रसन्नम् ।
अमोचयत्तं शरणप्रपन्नं परोपकारे हि सतां प्रवृत्तिः ॥ १६५ ॥
एत्योपकार्यामथ भोजयित्वा वासांसि दत्त्वा प्रवराणि तस्मै ।
अदत्त लोकद्वयसाधनार्हां शिक्षामिमां शिक्षितसाधुवृत्त- ॥ १६६ ॥
बन्धादिदुःखाप्तिनिदानभूतं कदापि चौर्यं भवता न कार्यम् ।
इहाप्यमुत्रापि सुखाभिलाषस्तवास्ति चेच्चेतनया समेत ! ॥ १६७ ॥
इतीष्टशिक्षामृतपानतृप्तः परां गतो निर्वृतिमाह तं स ।
त्वदुक्तमेतद् मयकाभ्युपेतं मत्प्राणविश्राणनपूर्णपुण्य ! ॥ १६८ ॥
त्वत्तोऽनृणः स्यां न कदाचनापि जीवाधिकं वस्तु न यज्जगत्याम् ।
तथापि भूताद्यभिचारचारुं मन्त्रं ममादत्स्व कृतप्रतीतिम् ॥ १६९ ॥
मा प्रार्थनास्यास्तु मुधेति मन्त्रं तस्मादुपादत्त स सार्थवाहः ।
यत्प्रार्थनाभङ्गविधानतो वा स्यात् प्राणभङ्गः सुकरो बुधानाम् ॥१७०॥
स्थित्वैव कञ्चित् समयं सुखेन तत पुरात् प्रस्थित इभ्यपुत्र ।
महाटवीं शालविशालमालां कादम्बरीं नाम समाससाद ॥ १७१ ॥

तरङ्गिणीतीरकृताधिवासः शुचाऽऽकुलं व्याघमवेक्ष्य चैकम् ।
नेत्राम्बुसंक्लिन्नमुखं सचिन्तं जजल्प चैवं धनदत्तसाधुः ॥ १७२॥
व्याधिर्विधत्ते तव कोऽपि बाधां किं वाऽऽधिरुच्छ्रायमुपैति किं ते ? ।
निमित्तमन्यद् यदि वाऽऽपि किञ्चिच्छोकाकुलस्त्वं यदवेक्ष्यसेऽत्र ? १७३
इत्यूक्त्वा ! पृष्टः स जगाद सर्वं निशम्यतां श्रेष्ठिगरिष्ठ ! तथ्यम् ।
इतः सरित्सान्निधिदुर्गशैलपार्श्वेऽस्ति पल्ल्यद्रिकुडङ्गिकाख्या ॥१७४॥
प्रचण्डदोर्दण्डनिपीडितारिः श्रीचण्डसिंह- पतिरस्ति तस्याम् ।
तद्गेहिनी सिंहवती नृसिंहकान्ताप्रतिच्छन्दधरेव कान्त्या ॥ १७५ ॥
परेद्यविर्भूतविभूततीव्रदोषेण पीडामुपलम्भिता सा ।
तज्जीविताशा गलिता कथञ्चित् तेनैव किञ्चित् परिदेवनं मे ॥१७६॥
इत्युमतदुःखमसौ निशम्य तेनैव साकं शबरेश्वरस्य ।
पार्श्वेऽपि गत्वा प्रथमं श्रुतेन मन्त्रेण तद्दोषमपाचकार ॥ १७७॥
इत्थं सुधादीधितिवत् कलावान् परोपकारं रचयन् निरीहः ।
अवाप गम्भीरपुरं सरस्वद्गम्भीरचेता धनिसार्थयुक्तः ॥ १७८ ॥
मनीषितं लाभमनाप्य तत्राप्ययं प्रयासं बहु मन्यमानः ।
यामे रजन्याश्चरमे निदध्याविति प्रमीलापगमादतन्द्रः ॥ १७९ ॥
विदेशमाक्रान्तवतोऽपि तादृग् ममापि लाभो न बभूव येन ।
तेनापि रत्नाकरनन्दिनीयं प्राप्या न रत्नाकरमन्तरेण ॥ १८० ॥
इति स्थिरं चिन्तयतोऽस्य साधोर्विभावरी पर्यवसानमाप ।
अयं पुनस्तत्क्षणमेव वेलाकूलं वितत्यैव विभातकृत्यम् ॥ १८१ ॥
अभ्यागतानामपि दैशिकानां तृष्णामपाकर्तुमलं न यानि ।
तेषां न गौरत्वमितीव कालान्यम्भांसि धत्ते विरसं रसन् यः ॥१८२॥
यः प्रीणयामास सुरानशेषान् प्रदाय पीयूषमतन्द्रितः सन् ।
स्फुरत्प्रभामण्डलभास्वराणि रत्नानि मर्त्यानपि सर्वतोऽपि ॥ १८३ ॥
समीरसंजाततरङ्गजालैरुत्सर्पिभिर्व्योम विगाहमानैः ।
स्ववल्लभां व्योमतरङ्गिणीं यः प्रेम्णा परिष्वङ्क्तुमना इवाभात् ॥१८४॥
रत्नाकरं तं समवेक्ष्य सोऽपि प्रहृष्टचेता विकसन्मुखश्रीः ।
अभ्यर्चयामास सुचारुपूजासारप्रकारैरुचितैरुदारः ॥ १८५ ॥
॥ चतुर्भिः कलापकम् ॥

आपूर्य देश्यैरभिवाञ्छितार्थैः क्रयाणकैः सोऽप्यथ यानपात्रम्।
आरुह्य निर्यामकमर्थवस्त्रैः सन्तोष्य च प्रास्थित तीरमन्यत्॥ १८६॥
अन्येद्युरम्भोनिधिमध्यभागमधिश्रिते तत्र स यानपात्रे।
सांयात्रिकः कीरमवैक्षतैकं रसालसालस्य फलं दधानम्॥ १८७॥
श्रमेण भारेण तथा विखिन्नः पोतान्तिके नैप पपात यावत्।
निर्यामकस्तस्य निदेशतस्तं तावत् सुधीरानयति स्म यानम्॥ १८८॥
ततः समीराम्बुभिषेचनेन कृपालुना तेन कृतः स सुस्थः।
क्षणेन कीरोऽपि फलं विमुच्य मनुष्यवाचा तमिदं जगाद॥ १८९॥
परोपकारप्रवणस्य मह्यं प्राणप्रदातुः करुणापरस्य।
तन्वन्नपि प्रत्युपकारमीषद् महाशय! स्यामनृणः कथं ते?॥ १९०॥
मत्प्राणविश्राणनकर्मणा मे न रक्षितौ किं पितरौ त्वयाऽपि?।
तौ यातयामावपयातनेत्रौ यदल्पसारौ च मदेकपुत्रौ॥ १९१॥
ते पुण्यवन्तः पुरुषावतंसा नित्यं परेषामुपकुर्वते ये।
परोपकाराक्षममत्र धिग् मां तिर्यक्स्वभावेन विदूषितं च॥ १९२॥
रसालसालस्य फलं तदेतदादीयतां भद्र! तथाऽप्यतुल्यम्।
स्वजातिसामान्यगुणेन यस्माल्लोके परः स्यादुपकार एव॥ १९३॥
स विस्मितस्तस्य गिरं निशम्य प्रोचे शुकेनैकेन फलेन किं मे?।
आस्वादय स्वादुतमं त्वमेतत् कृतादिकं किञ्चन च स्वरुच्या॥१९४॥
आम्रस्य तस्याथ शुकः प्रभावमसौ जगौ विन्ध्यमहीधरेऽस्ति।
महाटवी केशरिणां कुलानि यस्यामवात्सुर्भयवर्जितानि॥ १९५॥
तत्रातितुङ्गद्रुकुलायभाजौ चिरं मम स्तः पितरौ सुखेन।
तयोरभूवं सुत एककोऽहं मद्भक्तिवल्लीद्रुमयोरजस्रम्॥ १९६॥
एकत्र कुत्रापि वनेऽन्यदाऽहं रसालशाखाविनिविष्ट एव।
इति ब्रुवाणं* स्वविनेयमग्र्यं संशुश्रुवानेकमुनिं शमस्थम्॥ १९७॥
अम्भोधिमध्यस्थितविन्ध्यभूभृत्पादे महानाम्रमहीरुहोऽस्ति।
सदाफलः तस्य फलैरसाम्यैरास्वादितैर्व्याधिपरिक्षयः स्यात्॥ १९८॥
इत्यद्भुतां तस्य निशम्य साधोस्तथ्यां च पथ्यां च गिरं तदेमाम्।
अन्धत्वदोषापगमाय पित्रोरेकं तदीयं फलमाददेऽहम्॥ १९९॥

* ब्रुवो द्विकर्मकत्वम्।

तरङ्गिणीतीरकृताधिवासः शुचाऽऽकुलं व्याधमवेक्ष्य चैकम् ।
नेत्राम्बुसंक्लिन्नमुखं सचिन्तं जजल्प चैवं धनदत्तसाधुः ॥ १७२॥
व्याधिर्विधत्ते तव कोऽपि बाधां किं वाऽऽधिरुच्छ्रायमुपैति किं ते ? ।
निमित्तमन्यद् यदि वाऽऽपि किञ्चिच्छोकाकुलस्त्वं यदवेक्ष्यसेऽत्र ? १७३
इत्यङ्ग ! पृष्टः स जगाद सर्वं निशम्यतां श्रेष्ठिगरिष्ठ ! तथ्यम् ।
इतः सरित्सन्निधिदुर्गशैलपार्श्वेऽस्ति पल्ल्यद्रिकुडङ्गिकाख्या ॥१७४॥
प्रचण्डदोर्दण्डनिपीडितारिः श्रीचण्डसिंहः पतिरस्ति तस्याम् ।
तद्गेहिनी सिंहवती नृसिंहकान्ताप्रतिच्छन्दधरेव कान्त्या ॥ १७५ ॥
परेद्यविर्भूतविभूततीव्रदोषेण पीडामुपलम्भिता सा ।
तज्जीविताशा गलिता कथञ्चित् तेनैव किञ्चित् परिदेवनं मे ॥१७६॥
इत्युक्तदुःखमसौ निशम्य तेनैव साकं शबरेश्वरस्य ।
पार्श्वेऽपि गत्वा प्रथमं श्रुतेन मन्त्रेण तद्दोषमपाचकार ॥ १७७ ॥
इत्थं सुधादीधितिवत् कलावान् परोपकारं रचयन् निरीहः ।
अवाप गम्भीरपुरं सरस्वद्गम्भीरचेता धनिसार्थयुक्त ॥ १७८ ॥
मनीषितं लाभमनाप्य तत्राप्ययं प्रयासं बहु मन्यमानः ।
यामे रजन्याश्चरमे निदध्याविति प्रमीलापगमादतन्द्र ॥ १७९ ॥
विदेशमाक्रान्तवतोऽपि तादृग् ममापि लाभो न बभूव येन ।
तेनापि रत्नाकरनन्दिनीयं प्राप्या न रत्नाकरमन्तरेण ॥ १८० ॥
इति स्थिरं चिन्तयतोऽस्य साधोर्विभावरी पर्यवसानमाप ।
अयं पुनस्तत्क्षणमेव वेलाकूलं वितत्यैव विभातकल्यम् ॥ १८१ ॥
अभ्यागतानामपि दैशिकानां तृष्णामपाकर्तुमलं न यानि ।
तेषां न गौरत्वमितीव कालान्यम्भांसि धत्ते विरसं रसन् यः ॥१८२॥
यः प्रीणयामास सुरानशेषान् प्रदाय पीयूषमतन्द्रितः सन् ।
स्फुरत्प्रभामण्डलभास्वराणि रत्नानि मर्त्यानपि सर्वतोऽपि ॥ १८३ ॥
समीरसंजाततरङ्गजालैरुत्सर्पिभिर्व्योम विगाहमानैः ।
स्ववल्लभां व्योमतरङ्गिणीं यः प्रेम्णा परिष्वङ्क्तुमना इवाभात् ॥१८४॥
रत्नाकरं तं समवेक्ष्य सोऽपि प्रहृष्टचेता विकसन्मुखश्रीः ।
अभ्यर्चयामास सुचारुपूजासारप्रकारैरुचितैरुदारः ॥ १८५ ॥
॥ चतुर्भिः कलापकम् ॥

आपूर्य देश्यैरभिवाञ्छितार्थैः क्रयाणकैः सोऽप्यथ यानपात्रम् ।
आरुह्य निर्यामकमर्थवद्भिः सन्तोष्य च प्रास्थित तीरमन्यत् ॥ १८६ ॥
अन्येद्युरम्भोनिधिमध्यभागमधिश्रिते तत्र स यानपात्रे ।
सांयात्रिकः कीरमवैक्षतैकं रसालसालस्य फलं दधानम् ॥ १८७ ॥
श्रमेण भारेण तथा विखिन्नः पोतान्तिके नैष पपात यावत् ।
निर्यामकस्तस्य निदेशतस्तं तावत् सुधीरानयति स्म यानम् ॥ १८८ ॥
ततः समीराम्ब्वभिषेचनेन कृपालुना तेन कृतः स सुस्थः ।
क्षणेन कीरोऽपि फलं विमुच्य मनुष्यवाचा तमिदं जगाद ॥ १८९ ॥
परोपकारप्रवणस्य मह्यं प्राणप्रदातुः करुणापरस्य ।
तन्वन्नपि प्रत्युपकारमीषद् महाशय ! स्यामनृणः कथं ते ? ॥ १९० ॥
मत्प्राणविश्राणनकर्मणा मे न रक्षितौ किं पितरौ त्वयाऽपि ? ।
तौ यातयामावपयातनेत्रौ यदल्पसारौ च मदेकपुत्रौ ॥ १९१ ॥
ते पुण्यवन्तः पुरुषावतंसा नित्यं परेषामुपकुर्वते ये ।
परोपकाराक्षममत्र धिग् मां तिर्यक्स्वभावेन विदूषितं च ॥ १९२ ॥
रसालसालस्य फलं तदेतदादीयतां भद्र ! तथाऽप्यतुल्यम् ।
स्वजातिसामान्यगुणेन यस्माल्लोके परः स्यादुपकार एव ॥ १९३ ॥
स विस्मितस्तस्य गिरं निशम्य प्रोचे शुकैकेन फलेन किं मे ? ।
आस्वादय स्वादुतमं त्वमेतत् क्रूरादिकं किञ्चन च स्वरुच्या ॥१९४॥
आम्रस्य तस्याथ शुकः प्रभावमस्मै जगौ विन्ध्यमहीधरेऽस्ति ।
महाटवी केशरिणां कुलानि यस्यामवात्सुर्भयवर्जितानि ॥ १९५ ॥
तत्रातितुङ्गाद्रुकुलायभाजौ चिरं मम स्तः पितरौ सुखेन ।
तयोरभूवं सुत एककोऽहं मद्भक्तिवल्लीद्रुमयोरजस्रम् ॥ १९६ ॥
एकत्र कुत्रापि वनेऽन्यदाऽहं रसालशाखाविनिविष्ट एव ।
इति ब्रुवाणं* स्वविनेयमग्र्यं संशुश्रुवानेकमुनिं शमस्थम् ॥ १९७ ॥
अम्भोधिमध्यस्थितविन्ध्यभूभृत्पादे महानाम्रमहीरुहोऽस्ति ।
सदाफलः तस्य फलैरसाम्यैरास्वादितैर्व्याधिपरिक्षयः स्यात् ॥ १९८ ॥
इत्यद्भुतां तस्य निशम्य साधोस्तथ्यां च पथ्यां च गिरं तदेमाम् ।
अन्धत्वदोषापगमाय पित्रोरेकं तदीयं फलमाददेऽहम् ॥ १९९ ॥

* ब्रुवो द्विकर्मकत्वम् ।

समाव्रजन् वर्त्मनि निर्विलम्बं फलातिभारेण पतन् पयोधौ ।
सौम्य ! त्वया न्यायवतेव रायमाकृष्य पार्श्वे समवापितोऽस्मि॥२००॥
ज्वरादिरोगापमृतिप्रणाशस्फुटप्रभावं फलमेतदेव ।
लात्वा धृतिं मे कुरु मानसस्य नैतावता व्येति तवोपकारः ॥२०१॥
एवं निगद्याप्रतिशृण्वतेऽपि फलं प्रदाय प्रययौ शुकोऽस्मै ।
पोतः पुनः कैश्चिदवाप घस्रैः कञ्चित् तटं पूगतमालमालम् ॥२०२॥
आस्वादितेनापमृतिच्छिदाऽपि स्वादीयसाऽनेन फलेन किं मे ? ।
विश्वोपकारप्रवणाशयस्य शयस्य कस्य प्रददे तदेतत् ? ॥२०३॥
आः ! ज्ञातमाखण्डलधामधामविश्वम्भरामण्डलपालकस्य ।
भूमीशितुः कस्यचन प्रदाय परोपकर्तॄनखिलान् जयामि ॥२०४॥
एवं विचिन्त्यैव स तस्य वेलाकूलाधिपस्योपनिनाय तच्च ।
दिक्चक्रविद्योतकरत्नपूर्णस्थाले निवेश्य प्रमदं दधान ॥२०५॥
माहात्म्यमस्यैव फलस्य तादृक् तदाननादेव निशम्य भूप ।
सममेतस्य मुमोच शुल्कं शरन्निशानायकशुक्लकीर्त्तिः ॥२०६॥
धनानि सन्तोषनिबन्धनानि तत्रार्जयित्वा सुबहूनि चैष ।
तेनैव गम्भीरपुरान्तगेन पथा चचाल स्वपुरं प्रतीप्सु ॥२०७॥
कादम्बरीनाममहाटवीभूभागाधिवासानधितष्ठुषोऽस्य ।
पुलिन्दधाटी निपपात रात्रावतर्किता भीमरवा कुतोऽपि ॥२०८॥
हताहतेत्युद्धतभीमघोषा भटास्तदीया धृतमण्डलाग्राः ।
संनह्य संनह्य पुलिन्दवीरैर्महौजसो योद्धुमुपाक्रमन्त ॥२०९॥
युद्धेऽसमानेऽप्यथ जायमाने तद्द्वारभट्टो विहितोर्ध्वबाहु ।
जयं वदन्नस्य बभाण चैवं जयन् घनं तारतरस्वरेण ॥२१०॥
अव्याहत. सिद्धनदीप्रवाह इवोपकारप्रकरोऽत्र यस्य ।'
असंविदानस्य परात्मभेदं जयत्ययं श्रीधनदत्त एव ॥२११॥
इदं समाकर्ण्य किरातराज स चण्डसिंहः स्वभटानुवाच ।
भो भो भटाः ! युद्धमपास्य तावद् गिरं मदीयां शृणुतावधानात् ॥२१२॥
अयं स चेत् सार्थपतिर्ममैवोपकारकारी धनदत्तसाधु ।
तदाहमेव प्रथमं कृतघ्नो भवादृशैरप्यनवेक्ष्यवक्त्रः ॥२१३॥
ततो विनिश्चित्य स तद्भटेभ्यस्तमेव गत्वा प्रणिपत्य भक्त्या ।

सखा तवासीत्युपरुध्य सोऽपि पल्लीं निजामानयति स्म मानात् ॥२१४॥
असौ स मुक्ताफलचित्रकायत्वक्चामरैभायतदन्तराशीन् ।
प्राणप्रियां प्राणयता त्वयेमामुज्जीवितोऽस्मीति वदन्नदत्त ॥२१५॥
पल्लीशमापृच्छ्य स राजसारिः सार्थेन सार्थेन दिनैः कियद्भिः ।
अनुसरंस्तस्य कृतज्ञभावं प्रत्याययौ स्वं नगरं नगोश्वः ॥२१६॥
कृतार्थयन्नर्थिजनानशेषान् स्वोपार्जितेनैव धनोच्चयेन ।
गर्वं त्यजन् पूर्वजशीलितस्य गृहस्थधर्मस्य ललौ फलानि ॥२१७॥
उपासकानां समुपास्य धर्मं समाः सुबुद्धिः कियतीः सुभाग्यः ।
प्रव्रज्य पार्श्वे सुगुरोरकामात् क्रमादकार्षीत् परमार्थसिद्धिम् ॥२१८॥
इतश्च भूपोऽप्यमृताम्रकम्रफलं तदीशो धनदत्तदत्तम् ।
अवीवपत् सर्वजनोपकृत्यै स्वोद्यानभूमीषु वनावनेभ्यः ॥ २१९ ॥
अन्तर्बहिश्चापि वृतैर्निविष्टैः समं निविष्टैरथ यामिकौघैः ।
संरक्षितश्चूततरुर्जनानां मनोरथैः सार्धमवर्धतायम् ॥ २२० ॥
वर्षेषु गच्छत्सु कियत्स्वपीमे तपागमे यामिकपूरुषास्ते ।
फलोदयं तस्य निवेद्य राज्ञेऽस्याढौकयन्नेव फलं मनोज्ञम् ॥ २२१ ॥
श्रुत्वा नृपः सेवधिलाभवत् तच्चकार तेभ्यः परितुष्टिदानम् ।
तुष्टः पुनस्तत्फलमीक्षमाणो विचारयामास हृदेति धीरः ॥ २२२ ॥
स्वदेवगुर्वोरिदमप्रदाय न युज्यते स्वादयितुं ममापि ।
चित्ते विचिन्त्येति फलं तदाशु पुरोधसेऽदाद् गुरुभक्तिसक्तः ॥२२३॥
पुरोहितोऽप्याप्लवदेवपूजापूर्वाणि कार्याणि पुरा विधाय ।
आस्वादयामास फलं रसाढ्यं माधुर्यभङ्ग्यां विजितामृतं तत् ॥२२४॥
आस्वादमात्रेण स तस्य मूर्च्छन् शनैः शनैर्मृत्युमवाप विप्रः ।
तद् दुःश्रवं भूमिपतिर्निशम्य सन्तापितश्चिन्तयति स्म चैवम् ॥ २२५ ॥
अदः फलं केनचिदुग्ररोपाद् मद्विद्विषा प्रैषि विषाग्रजातम् ।
मात्सर्यभारेण मदीयराज्यप्रेक्षाऽक्षमेनाजिपराजितेन ॥२२६॥
पट्टेभपट्टाश्वकुमारदेवीपुरोहितैः राडपमृत्युरेतैः ।
विहन्यते चेति पुनः श्रुतिर्या पुरोधसा तेन ऋतीकृता सा ॥ २२७ ॥
ध्यात्वेति राजा निदिदेश भृत्यांश्छेत्तुं तमाम्रं प्रसरत्प्रकोपः ।
द्रुतं द्रुतं तेऽपि तदैव गत्वा कठोरधारैरलुनन् कुठारैः ॥ २२८ ॥

छिन्नं तमाम्रं विनिशम्य लोका विषाम्रबुद्धया सुखमृत्युहेतोः ।
त्वग्दोषवाधिर्यरुजादिबाधाविबाधिता मङ्क्षु जना अधावन् ॥२२९॥
फलानि पूर्वेऽप्यपरे सुमानि पत्राणि केचित् परिगृह्य चाद्युः ।
तदैव ते मन्मथमूर्तिरूपास्तत्तद्रुजानां विलयाद् बभूवुः ॥२३०॥
संश्रुत्य चैतान् स्मरवत् सुरूपांस्तान् यामिकान् व्याहरति स्म भूपः ।
तरुस्थितं किं फलमाहृतं तत् किं वा धरित्र्यां पतितं भवद्भिः ? ॥२३१॥
व्यजिज्ञपंस्तेऽथ जनाधिनाथ ! फलं रजन्यां गलितं स्वतोऽपि ।
अस्माभिरासाद्य मुतुष्टचित्तैः संप्रापितं ढौकनिकात्वमेव ॥ २३२ ॥
राजाऽथ निश्चित्य विपश्चिदीड्यो भुजङ्गमक्ष्वेडपरिप्लुतं तत् ।
विवेकवैकल्यभुजङ्गदष्टं स्वं संविदन् बह्वनुतापमाप ॥२३३॥
दुरन्ततैवं कुपरीक्षितस्य कार्यस्य विद्वद्भिरवेक्षणीया ।
विचक्षणैस्तत्सुपरीक्ष्य कार्यं कार्यं विवेकप्रतिपत्तिभाग्भिः ॥ २३४ ॥
कथां निगद्येति पुरो निषण्णं मनाग्विषण्णं हृदये तथोक्त्या ।
रात्रेर्द्वितीयप्रहरे व्यतीते धराधवस्तं व्यसृजद् गृहाय ॥ २३५ ॥
अथागतं वल्लभराजसंज्ञं प्रवाद्यमानैर्गतयामवाद्यैः ।
विबुद्धमाचष्ट नृपो निदेशं दिशामि ते चेत् कुरुषेऽविलम्बम् ॥ २३६ ॥
विज्ञस्ततो व्यज्ञपयत् स चायं विभो ! न भृत्याः प्रभुवागुपेक्षाः ।
नृपः पुनः प्राह तदाशु गत्वा विचारवर्जं जहि देवराजम् ॥ २३७ ॥
प्रमाणमादेश इतीरयित्वा विलम्ब्य किञ्चिद् विनिवृत्य सोऽपि ।
निजाग्रजं जाग्रतमेव राज्ञे निवेद्य चैतां स कथामवादीत् ॥ २३८ ॥
पुरोत्तमे राजपुरे पुरे राड् यथार्थनामा रिपुमर्दनोऽभूत् ।
औदार्यधैर्यप्रमुखा गुणौघा यमाश्रयन् वर्ण्यविवेकभाजम् ॥२३९॥
तद्वल्लभाऽजायत रत्नमाला सुरत्नमालाधृतभूषणा या ।
भोगान् यया:माऽनुभवन् निनाय शच्येव शक्रः समयं स राजा ॥२४०॥
आस्थानमास्थाय नृपे स्थितेऽस्मिन् विज्ञापितो वेत्रभृताऽन्यदाऽऽगात् ।
कश्चिद् बटुर्माल्यविभासिहस्तः शस्तः प्रसिद्धैः स्वगुणैर्विचित्रैः ॥२४१॥
जयेति वाचं प्रणिगद्य हृद्यां विप्रो यथास्थानमुपाविशत् सः ।
तां संसदं क्षोणिपतिः क्रमेण विसर्जयामास ततो नयज्ञः ॥२४२॥
स्नात्वा तदानीतसुमानि मान्यः क्षोणीभुजामेष करे विधाय ।

उदीरयामास गिरं गरिष्ठः कुतस्त्वमागा द्विज ! वा किमर्थम् ? ॥२४३॥
जगौ स कौबेरदिगन्तराले विभो ! पुरेऽरिष्टपुरे वरिष्ठे ।
द्विजोत्तमो यज्ञनिविष्टचित्तः श्रीयज्ञदत्तोऽस्ति निरस्तदोषः ॥२४४॥
विद्युन्मुखाकुक्षिभवोऽभवं तत्सुतः प्रतीतोऽस्मि शुभङ्कराख्यः ।
चन्द्रकान्तवाल्यो जनकेन वेदानध्यापितो बुद्धिधनः क्रमेण ॥२४५॥
देशान्तरं द्रष्टुमना निरीतो भ्रमन् समागां नगरे वरेऽस्मिन् ।
नेत्रातिथीकृत्य च देवपादांश्चिरात् फलं जन्मतरोरवापम् ॥२४६॥
तद्वाक्यचातुर्यमवेत्य भूपस्तुष्टस्तमभ्यर्च्य सुवर्णवस्त्रैः ।
वेदार्थवित्कौस्तुभरत्नविष्णुं पुरोहितं स्वं रचयाञ्चकार ॥२४७॥
द्विजोत्तमः सोऽपि गुणैः स्वकीयैर्नृपस्य चित्तान्तरमेव जज्ञे ।
शुद्धान्तमध्येऽपि च संचचार शुद्धाशयः कौमुदबन्धुवत् सः ॥२४८॥
तयोर्मिथः प्रेमसमृद्धिभाजोर्दिनेषु गच्छत्सु कियत्सु चैवम् ।
एकः पुरोपान्तवने कुतोऽपि सिंहः समागादपरेशुरुग्रः ॥२४९॥
श्रुत्वा समेतं वनपालतस्तं सिंहं नृसिंहः स्वबलेन सिंहः ।
दिदृक्षयेव श्रुतसत्त्वराशेः पुराद् निहन्तुं निरगाज्जवेन ॥२५०॥
बलं वनद्वार्यनुवर्त्तमानं स स्थापयित्वा बलवत्पुरोगः ।
आधोरणं तं द्विजमेव कृत्वा गजाधिरूढो विपिनं विवेश ॥२५१॥
अघ्रातगन्धद्विपदानगन्धद्विरूक्तरोषः स मृगेश्वरोऽपि ।
अभ्यागमत्तं सहसा कडारविलोचनन्यक्कृतविद्युदर्थः ॥२५२॥
जिघांसया तस्य ददाति फालं सिंहः स यावत् प्रतिघप्रकम्प्रः ।
व्यात्ते द्विजन्मावटुपात्ततीक्ष्णशृण्यग्रभागेन मुखे न्यहंस्तम् ॥२५३॥
तालुप्रहारेण निपीडितोऽसौ प्राणैरमोचि स्वभियेव तूर्णम् ।
तस्यावदातेक्षणतो द्विजस्य निमीलदक्षः क्षितिपो ह्रियाऽभूत् ॥२५४॥
जगाद विप्रः पृथिवीन्द्र ! हर्षस्थाने विषादं कथमादधासि ? ।
सदाऽवदातैः मियःकिङ्कराणां यत् स्यात् प्रभूणां परभागभावः ॥२५५॥
नृपो न्यगादीद् भवता मृगेन्द्रं विनिघ्नता पौरुषमाहृतं मे ।
किञ्चेदमाकर्ण्य जनश्च वृत्तं क्लीबं परिज्ञास्यति मामशेषः ॥२५६॥
स स्माह नाहं त्वपरस्य कस्याप्यसुं प्रवक्ष्यामि हतं स्वयं यत् ।
हतं त्वया प्रत्युत देव ! वक्ष्ये तथा जनः स्तोष्यति देवमेव ॥२५७॥

इतीरितैरस्य गिरां विलासैरपत्रपां भूमिपतिर्मुमोच ।
मध्येजनं राजपराक्रमं तं शुभङ्करोऽपि प्रथयाम्बभूव ॥२५८॥
सदाश्रितानामपि सिन्धुराणां किं वैरनिर्यातनमाततान ? ।
सिंहं विनिघ्नन् यदि वा नृपोऽयं स्वसारसामर्थ्यमदीदृशद् नः ॥२५९॥
इत्यादिशंसां मिथ एव पौराः प्रवर्तयन्तो नगरेऽखिलेऽपि ।
अतिप्रमोदेन हृदा वितेनुर्वर्धापनं सुन्दरमुत्सवेन ॥२६०॥
अन्तःपुरान्तः समुपेयिवांसं देवी नृपं विज्ञपयां तमास ।
मध्येपुरं तूर्यरवः प्रसर्पन् कमुत्सवं शंसति नाथ ! शंस ? ॥२६१॥
नृपोऽप्यवोचत् स्मयमानवक्त्रः सिंहो मया यन्निहतो मृगाक्षि ! ।
तेन प्रमोदातिशयेन पौराः कुर्वन्त्यखर्वं महमादरेण॥२६२॥
स्मित्वाऽथ देव्या जगदे स देव ! किमौचितीयं तव वीरतायाः ? ।
पारीन्द्रमेतं निहतं द्विजेन स्वयं हतं वक्षि यदग्रतो मे ॥ २६३ ॥
दध्यौ ततः क्षोणिपतिः स दक्षो विप्रब्रुवं धिग् धिगधार्मिकं तम् ।
देव्याः पुरो गोप्यमपि प्रकाश्य प्रपञ्च्य तद्येन विगोपितोऽस्मि ॥२६४॥
दरिद्रवत्ते न महीपतीनां जना लभन्ते भवने प्रवेशम् ।
स्वतोऽपि गोप्यं रभसा परेषां प्रकाशितं यैर्निधिवद् रहस्यम् ॥ २६५ ॥
षट्कर्मपाशेन तदेतकेन प्रकाशितं यावदिदं बहिर्न ।
आप्तैर्नरैस्तावदमुं विनाश्य कीनाशवेश्मातिथितां नयामि ॥ २६६ ॥
हृदा विमृश्येति पुरोहितस्य विनाशनाय न्यदिशद् नरान् स्वान् ।
तैः कैतवेन क्वचनापि नीत्वा स पञ्चतां प्राप्यत पापहीनः ॥ २६७ ॥
नृदेवमन्येद्युरुवाद देवी विसृज्य सर्वां परिहासकेलिम् ।
कदाचिदेवोरुगुणज्ञधुर्यः कथं पुरोधाः स न दृश्यते वः ? ॥ २६८ ॥
राज्ञाऽथ तथ्ये कथिते तयोचे राज्या महाराज ! कथं त्वया सः ।
ज्ञेनाविमृश्यत्वपरायणेन विनाश्यते स्म प्रवरः कृतज्ञः ? ॥ २६९ ॥
सैन्येन सार्धं नगराद् यदा त्वं सिंहं निहन्तुं निरगास्तदानीम् ।
सौधोपरिष्टाद्य कुतूहलेनाऽऽक्रान्ता समारूढवती विभोऽहम् ॥२७०॥
व्यालोकयं सप्तमभूमिभागे स्थिता स्वरूपं तव वस्तुवृत्त्या ।
गाम्भीर्यधुर्येण शुभङ्करेण निवेदितं किञ्चन मे न तेन ॥ २७१ ॥
द्विजोत्तमस्यास्य शुभङ्करस्य मुहुर्मुहुर्भूमिपतिर्गुणौघम् ।

स्मृत्वाऽनुतापानलहेतिजालैर्जाज्वल्यते साधिकमाशयेऽपि ॥ २७२ ॥
ततः पुरस्कृत्य जनाः ! विवेकविलोचनं चारुतरं तृतीयम् ।
सद्वस्तुतत्त्वप्रविलोकनाय सन्मार्गसञ्चारविधौ यतध्वम् ॥ २७३ ॥
इत्थं कथां दुर्लभराजकस्य धिया ब्रुवाणस्य विबोधहेतोः ।
द्विजस्तदा वादयति स्म तारं तारं त्रियामीं घटिकानिकेते ॥ २७४ ॥
तस्मिन् समुत्तस्थुषि राजशिष्ट्या तुर्ये समाजग्मुषि कीर्तिराजे ।
नृपोऽथ दध्यौ कथमेतकाभ्यां विलम्बितं कर्मणि मेऽप्युभाभ्याम् ?॥२७५॥
ध्यात्वेत्यवादीद् नृपतिस्त्वमेकं वचो ममाधास्यसि कीर्तिराज ! ?।
इत्युक्त ऊचे स विभो ! त्वदुक्तं जिजीविषुः को न करोति नाम ?॥२७६॥
ईदृक् तदुक्तं विनिशम्य राजा जगाद मौलिं लघु देवराजम् ।
छित्त्वा समानीय नयस्व चक्षुःपथं महाभाग ! ममागसार !॥ २७७ ॥
पौरस्त्यवत् सोऽपि विचिन्त्य किञ्चित् क्षणं विलम्ब्यैव बहिः समेतः ।
सहोदरं जाग्रतमेवमुक्त्वा दृष्टान्तमाचष्ट नृपाग्रतोऽमुम् ॥ २७८ ॥
महापुरं नाम पुरं समस्ति श्रिया परिष्वक्तमुपेन्द्रवद् यत् ।
शत्रुञ्जयस्तत्र बभूव भूमान् पुण्यर्द्धिशत्रुञ्जयशैलराजः ॥ २७९ ॥
सर्वासु दिक्षूदयमादधानो वारुण्युपश्लेषमुपेक्षमाणः ।
प्रोत्सारयन्नस्तमतीव दूरं यस्य प्रतापस्तपनं जिगाय ॥ २८० ॥
प्रियाङ्गसन्तापमपाकरोद् या निजाङ्गसच्चन्दनपङ्कसेकैः ।
अतुल्यसौभाग्यगुणोज्ज्वला सा प्रियङ्ग्वभिख्या समभूत् प्रियाऽस्य ॥
भूपे सभाऽऽकाशशशाङ्करूपे कश्चित्तुरङ्गीयवणिक् कुतोऽपि ।
अन्येद्युरागाद् विदितो विनम्य भूमीपतिं व्यज्ञपयद् विनीतः ॥ २८२ ॥
मया समानीतमुपायनेऽस्ति तुरङ्गरत्नं नरदेव ! तुभ्यम् ।
तद्वाहकेल्या गमनेन मेऽथ सद्यः प्रसादं विदधातु देवः ॥ २८३ ॥
तदैव तद् वीक्षितुमश्वरत्नं स रत्नगर्भापतिरप्युदस्थात् ।
विराजितो राजभिरभ्रजातैर्निशीथिनीनाथ इवोरुकान्तिः ॥ २८४ ॥
अद्यापि भूयः परिभूतिमुत्सन् जवेन यस्यावजितो गरुत्मान् ।
लक्ष्मीपतिं नूनमनूनशक्तिं निषेवते वाहनकैतवेन ॥ २८५ ॥
उच्चैःश्रवस्त्वेन निजेन नाम्ना सदूषणं स्वं परिभाव्य भेजे ।
उच्चैःश्रवा नाकिपतिं नु दृष्ट्वा यं शालिहोत्रोदितलक्षणाऽऽढ्यम् ॥२८६॥

तुरङ्गमाः सप्त रवेर्विमाने क्षमं समालोक्य यमेकमेव ।
अपारलज्जाभरमन्थराक्षाः खेऽदृश्यभावं प्रतिपद्य तस्थुः ॥ २८७ ॥
किमष्टमोऽयं रविवाहनानामेकादशः किं शशिवाहनानाम् ?।
तुरङ्गमाणामिति यं विलोक्य व्यतर्कयन् ज्ञाः, तमपश्यदीशः ॥२८८॥
॥ चतुर्भिः कलापकम् ॥

अपश्रमं शेषमहं करोमि धृत्वा महीभारमहो ! इतीव ।
विदारयन्तं वसुधां खुराग्रैः समारुरोह क्षितिनायकस्तम् ॥ २८९ ॥
ऋजुत्वगत्यैव चचाल सोऽश्वस्ततः क्षणं क्षोणिपतिप्रणुन्नः ।
ऋजुत्वमुत्सृज्य नरोत्तमानां किञ्चित्परं संवननं न चेति ॥ २९० ॥
कृष्ट्वेव कृष्ट्वेव नृपः स वल्गां परिक्षरद्रक्तकरो बभूव ।
तुरङ्गमोऽपि प्रययौ जवेन क्ष्मामस्पृशन् साधुरिव स्त्रियं सः ॥२९१॥
यता यता तेन तुरङ्गमेण दुर्गाटवीं भूपतिरापितोऽयम् ।
कुपथ्यसंबन्धपरिप्लुतेनाशनेन भुक्तेन रुजामिवाज्ञः ॥२९२॥
तं वामशिक्षाकलमाकलय्य श्लथीचकार क्षितिपोऽपि वल्गाम् ।
समं तयैव श्लथमाततान प्रकाशयन् प्रीतिमिवैष यानम् ॥२९३॥
क्षुधातृषाभ्यामतिबाधितोऽयं क्लान्तो ललाटन्तपतापनेन ।
पथा परिश्रान्ततरः स बाढं तत्पृष्ठतः क्ष्मापतिरुत्ततार ॥ २९४ ॥
यावत्तमश्वं भ्रमणीविलासैरपश्रमं भूमिपतिः करोति ।
श्वासाकुलः पल्ययनावतारादत्याजि जीवेन स तावदाशु ॥ २९५ ॥
न चञ्चलं पिप्पलपत्रमाहुर्न चञ्चलं कुञ्जरकर्णतालम् ।
देहस्य सम्बन्धमधिश्रितस्य यथैव जीवस्य बुधाः स्वरूपम् ॥२९६॥
शुष्यन्मुखः सोऽपि नृपाऽतिवेलमन्वेषयन्नम्बु महाटवीं ताम् ।
परिभ्रमन्नेकत ऐक्षतैकमभ्रंलिहानोकहमुच्चशाखम् ॥२९७॥
शाखासमाकीर्णतदेकशाखामूलात् समालोक्य जलस्य बिन्दून् ।
अनाविलान्निष्पततः स दध्याविति स्वचित्ते नृपतिः प्रहृष्टः ॥२९८॥
अद्रेरिवेदं सलिलं कुतोऽद्रेरितो विनिर्याति सितावदातम् ।
वर्षाभवं नूनमवश्यमेतत् स्थितं च शाखाविवरे गभीरम् ॥२९९॥
क्षणं विचिन्त्येति तदीयशाखादलानि लात्वा पृथुलानि भूपः ।
पुटं विनिर्माय निवेश्य चाधः प्रपूरयामास जलेन तेन ॥३००॥

यावत्तदम्भः पिवति क्षितीशः शाखाप्रदेशादुपगत्य तावत् ।
एकः खगः पक्षतिचालनेन तत् पातयामास पुटं जवेन ॥३०१॥
अपीपतन् सोऽपि पुटं पतत्री पुनः प्रपूर्ण सलिलैस्तथैव ।
तृषाविशुष्यत्तरवक्त्रपद्मो दध्यौ ततः क्षोणिपतिर्विलक्षः ॥३०२॥
अहो ! खगः कीदृगयं ममापि निष्कारणारातिरजातहार्दः ? ।
हठाद् द्वितीयामभिसृत्य वेलां पाणेः पुटं पातयते य एवम् ॥३०३॥
तृतीयवेलाऽऽक्रमणेऽपि पाथश्चेद् भ्रंशयिष्यत्युपगृह्यमाणम् ।
पतत्रिणं प्रेतपतेर्निशान्तं संप्रापयिष्यामि तदाऽमुमेव ॥३०४॥
नृपः पुनः पूरयति स्म तृष्णक् पुटं पयोभिः सितिमानमात्रैः ।
विचिन्तयामास विहङ्गमोऽयं कृती निसर्गोपकृतिप्रवृत्तौ ॥३०५॥
विस्रंसमाने च पतत्रघातात् पाथः पिपासत्ययमुर्व्यधीशः ।
विपत्स्यते हा ! भुवनोपकर्ता कथं त्रिलोकीतिलकस्तदाऽऽव्यः ? ॥३०६॥
विस्रंसयिष्यामि पुटं पुनश्चेद् व्यापादयिष्यत्यचिरेण तद् माम् ।
मया मृतेनाप्यमृतेन वा किं ममापि तज्जीवतु जीवितेन ? ॥३०७॥
इति प्रवद्धादर एव भूत्यै विस्रंसयामास पुटं पुनः सः ।
कशाप्रहारेण नृपस्तु रुष्टस्तं ताडयामास यथा ममार ॥३०८॥
अस्मिन् विपन्ने नृपतिः प्रयत्नाद् दधौ पुनः पत्रपुटं स तत्र ।
तच्छारिकायाश्च जलं तदाशाप्रस्पर्धयेवाऽगमदप्रतोऽस्मे ॥ ३०९ ॥
न सांप्रतं पत्रपुटेऽपि पाथः पतत्यदः पातुकमेव कस्मात् ? ।
ध्यायन्निति व्याकुलितस्तृपाऽपि मूलाज्जलोत्पत्तिमवैक्षताऽयम् ॥३१०॥
सुप्तोत्थितं तत्र शनैश्चरन्तं महाभुजङ्गं नृपतिर्ददर्श ।
तदाननादेव विनिस्सरन्तीरधिप्रकारा गरलच्छटाश्च ॥३११॥
व्यचिन्तयद् भूमिपतिः स्वचित्तेऽप्यहो ! खगोऽयं परकृत्यनिष्ठः ।
स्वप्राणितं नाशमवाप्य येन मत्प्राणितं रक्षितमात्मनैव ॥३१२॥
अहं जलभ्रान्तिवशादपास्यमपास्यमेतद् गरलं यदीह ।
न राज्यमम्पत्प्रभवं सुखं मे न नाकिलोकस्य रमाऽभविष्यन् ॥३१३॥
इति स्मरंस्तस्य महोपकारमदत्त नेत्राञ्जलिभिर्जलानि ।
सहोदरस्येव नृपः कथं वा तादृग्वियोगः कुरुते न दुःखम् ? ॥ ३१४ ॥
इत्युद्भवद्दुःखममाकुलेऽस्मिन्नृपे पताकिन्यपि साऽऽपपात ।

राजर्षेरथ सूरयश्चतसृणां ख्यातिस्पृशामुज्झिता-
मुख्यानां प्रवराभनागतकथामेतां वधूनां जगुः ॥ ३३८ ॥
क्षेत्रेऽस्मिन् भरते समस्ति मगधे देशे प्रसिद्धं पुरं
श्रीमद्राजगृहं प्रशस्यकमलस्रोतस्विनीवार्द्धिभम् ।
सौजन्यार्जुनहेमभूधरसमः क्ष्मापालसंमानना-
सामान्यैकधनो धनोऽप्यभिधया तस्मिन् महेभ्योऽवसत् ॥३३९॥
तज्जायाऽजनि धारिणी शुचियशःसन्दोहविस्तारिणी
शीलालङ्कृतिधारिणी मधुरवाग् मिथ्यात्वसंहारिणी ।
चत्वारस्तनयास्तयोः समभवन् पालोऽथ देवस्तथा
गोपो रक्षित एव पूर्वगधनध्वानास्त एवं श्रुताः ॥ ३४० ॥
तेषां वध्वः क्रमश इमिका उज्झिता भोगवत्या-
ख्या विख्याता प्रथितविनया रक्षिता रोहिणी च ।
यासां रूपं नयनपदवीं संनिधायेन्द्रदारा-
गाढाभ्यासान्नयनविषये जज्ञिरे निर्निमेषाः ॥ ३४१ ॥
दध्यौ सोऽपि धनोऽन्यदा चरमके यामे रजन्या इति
प्राज्ञैः कार्यमनागतं दृढतरं गेहस्य सूत्रं स्वयम् ।
बध्वा वर्त्स्यति मन्दिरं मम कया सम्यक् चिरं सेन्दिरं ?
निर्णीतं तदनागतां विरचयाम्यासां परीक्षां स्वयम् ॥ ३४२ ॥
इत्थं ध्यायत एव तस्य रजनी क्षीणा खलप्रीतिवत्
प्रातःकृत्यमयं वितत्य सुजनान् सर्वांस्ततो मेलयन् ।
भोज्यैर्मोदकखाद्यकप्रभृतिभिस्तान् भोजयित्वांशुकैः
सत्कृत्य प्रवरैरजूहवदयं ता उज्झिताद्या वधूः ॥ ३४३ ॥
तासां व्रीहिकणान् प्रदाय सुमतिः पञ्चापि पञ्चोचिवा-
नित्येवं भवतीभिरेष ममक न्यासो वरं रक्ष्यताम् ।
ज्येष्ठाऽचिन्तयदेष नाम विकलः पश्यत्सु लोकेषु यः
पञ्च व्रीहिकणान् ददाति यदि वा दूष्यं सतां वार्द्धकम् ॥३४४॥
व्रीहीनेष यदा पुनर्मृगयिता दत्तान् कदाचिद् निजा-
नन्यानेव तदाऽवदातधिषणा वृद्धाय दास्याम्यहम् ।
ध्यात्वेति श्वशुरस्य मानरसिका दृष्टेस्तिरोधाय सा

तान् पञ्चापि समुज्झति स्म महसाऽऽत्मानं च लक्ष्मीपदान् ॥३४५॥
दध्यौ भोगवती न कारणमृते तातः सुबुद्धिस्स्वयं
दत्ते व्रीहिकणान् कथञ्चन ततो नैतांस्त्यजामि स्फुटम् ।
सन्तानाय भवन्ति मे किल पुरा पूज्यार्पिता एतके
ध्यात्वैवं निजनामसान्वयतया तान् कुक्षिसान् साऽकरोत् ॥३४६॥
तार्तीयिकतया मिता विमृशति स्मैवं न पूज्यार्पिताः
सन्त्याज्याः स्युरिमे न चापि कथमप्याम्वादनीया मया ।
रक्ष्याः किन्तु पिशाचराक्षसभयोच्छित्त्यै भविष्यन्ति मे
बुद्ध्यैवं परिभाव्य साऽपि सुचिरं तान् पेटिकायां न्यधान् ॥३४७॥
त्वी बन्धुभ्योऽर्पयित्वा रहसि सपदि तान् वापयामास काले
तैरासीत् प्रस्थमात्रं फलभरकलितैर्मागधं सुप्रसिद्धम् ।
उप्त्वा वर्षे द्वितीयेऽप्यजनिपततरां कुम्भकास्ते प्रभूताः
प्रत्यब्दं चोप्यमानाः क्रमश इति तके पल्यलक्षा बभूवुः॥३४८॥
अथाहूय श्रेष्ठी प्रथममिव ताः स्वाः प्रियवधू-
र्ययाचे स्वन्यासं मधुमधुरवाणीसमुदयः ।
तदुक्त्या तेषां च त्यजनघासिसद्वृद्धयवगमान्
स्थितिं चक्रे तासामिति तदुपचारैरनुगुणाम् ॥ ३४९ ॥
आद्या पुञ्जोज्झनाद्येष्वशनविरचने तेन चक्रे द्वितीया
कोशागारे तृतीया निजगृहपरमैश्वर्ययोगे च तुर्या ।
दृष्टान्तस्यास्य साधोरुपनयनमथ श्रूयतां राजसाधो !
सर्वार्द्धिस्थानराजोपपदगृहपुरं पुम्भवेनाऽऽप्तसाम्यम् ॥३५०॥
ज्ञेयास्तत्र वधूचतुष्टयानिभास्ते भव्यजन्तुव्रजा-
यच्छन् पञ्चमहाव्रतीं गुरुसमस्तेषां धनो धीधनः ।
एतान्येव महाव्रतानि सुमुने [1] ते व्रीहयः पञ्च च
श्रीसङ्घः स्वजनव्रजप्रतिकृतिः सौजन्यमुन्मीलयन् ॥ ३५१ ॥
औज्झत् तानि य उज्झितावदधमः स प्राप्नुयाद् नो सुखं
धत्ते पञ्च महाव्रतानि सुतरां यो लिङ्गमात्रेण च ।
भव्यं भोगवतीव भोगनिरतो भक्तादि विन्देत स

---

१ त्वराब्दस्य अन्यशब्दपर्यायतया त्वा अन्या इत्यर्थः, चतुर्थीति यावत् ।

क्ष्मापं निरीक्ष्याक्षतगात्रलक्ष्मीसमन्वितं हर्षमवाप चाऽरम् ॥३१५॥
जलं जलाध्यक्षवरोऽपि सूदाध्यक्षोऽपि भोज्यानि मनोहराणि ।
उपानयद् भूमिपतिश्च वक्त्रं प्रक्षाल्य वाः शीतमपात् सुगन्धि ॥३१६
तथास्थिते पक्षिणि पक्षिमुक्ते साश्रं क्षिपन्नक्षि विचक्षणेन ।
क्षोणीपतिर्व्यज्ञपि सैन्यपेन स्वामिन्! विषादः किमकाण्ड एषः?॥३१७
प्राग्वृत्तकाख्यानपुरस्सरं स प्रोचे गिरा गद्गदया नरेन्द्रः ।
मया कृतघ्नेन विनाशितोऽयं यो जीवितं मे विततार सारम् ॥ ३१८ ॥
स्वर्जीवितव्यव्ययतः पतन् मामवन्नयं पुण्यवतां वतंस ।
अहं पुनः पापवतां पुरोगो हन्ताऽस्य हन्ता मम का गतिस्तत् ?॥३१९
इत्यात्तशोकं वसुधासुधांशुं सेनापतिः प्राह शुचं नुनुत्सुः ।
गते मृते वाऽतिगते न शोकः कार्यः स्वयं वेत्त्यद एव देवः ॥ ३२० ॥
संस्कारमाधाय तदस्य दत्त्वा जलाञ्जलिं चैव सहोदरस्य ।
देवोऽथ नित्यं वितनोतु कृत्यं, कृत्यं विना यन्न हि जीवलोकः ॥३२१
युक्तं तदुक्तं नृपतिः समस्तं व्यधाद् विमुञ्चन् शुचमाप्तवाक्यैः ।
पौरैः कृतारात्रिकसंविधानः क्रमादविक्षच्च समुच्चसौधम् ॥ ३२२ ॥
प्रशासतोऽपि क्षितिमण्डलस्याऽऽधिपत्यमाखण्डलपौरुषस्य ।
तत्पक्षिनिर्यातनमेव चित्तं दुनोति तच्छल्यमिवाथ तस्य ॥ ३२३ ॥
कृत्यावलीशैवलिनीमपारां समुत्तराद्भिः पुरुषैस्ततश्च ।
ज्ञेया कथञ्चित्कुपरीक्षतोग्रस्फुरन्महावर्तविवर्तगर्ता ॥ ३२४ ॥
इत्थं कथां कीर्तयतस्तदाऽस्य श्रीकीर्तिराजस्य नृपाङ्गजस्य ।
प्राभातिकानामुरुतूर्यकाणां श्रोत्राध्वनि ध्वानततिर्बभूव ॥ ३२५ ॥
आयामिनीमापदमत्यपास्य पद्माकरान् बोधयितुं पटिष्ठः ।
असौ समुद्गच्छति देव ! सूरः प्रद्योतिताशस्त्वमिवाग्र्यधामा ॥३२६॥
वैतालिकस्योक्तमिदं निशम्य प्राभातिकं कृत्यमसौ वितत्य ।
सिंहासनं भूभृदलंचकार यथैव पूर्वाचलसानुमर्कः ॥ ३२७ ॥
ततः सभाऽपूर्यत सभ्यमन्त्रिसामन्तसेनापतिमुख्यलोकैः ।
वनीव जम्बीरकबीजपूरनारङ्गजम्बूप्रमुखैर्द्रुमौघैः ॥ ३२८ ॥
विचिन्तयामास ततः क्षितीशस्ते वत्सराजप्रमुखास्त्रयोऽपि ।
जग्मुर्ममादेशमसाधयित्वा कथं महाकैतववृत्तिभाजः ?॥ ३२९ ॥

अन्यं तदर्थं विनियोजयामीत्येवं स्वचित्ते परिचिन्तयंश्च ।
विज्ञप्त एषोऽपि समागतेन श्रीदेवराजेन नृपो नतेन ॥ ३३० ॥
हो भूतसम्भूतगिरेश ! मया तवापद सम्पदधिश्रयस्य ।
शय्यागृहाभ्यन्तर एव जाग्रच्चक्रे द्विधा सर्पमहं निशायाम् ॥ ३३१ ॥
अवेक्ष्य देवीहृदयोपरिष्टाद् रक्तं च तस्मात् पतितं जवेन ।
तत् प्रोञ्छयन् पाणितलेन देव्या ज्ञातो न वेत्येतदवैमि नैव ॥ ३३२ ॥
इत्युक्त्वा राडनिदेशाद् विषधरशकलद्वन्द्वमानीय मध्ये-
संसत् प्रादीदृशत् स प्रकृतिपरहिताभ्युगमे बद्धकक्षः ।
तद् दृष्ट्वा भूमिभर्ता स्म वदति विभवद्विस्मयोत्तानचित्तो-
ऽहो ! कीदृक्षं ममैषां नरजनुपि समेऽप्यीक्ष्यते त्वन्तरं वै ? ॥३३३॥
अरक्षद् मत्प्राणानयमगणितस्वात्मविलयः
कृतघ्नोऽहं त्वस्य प्रशमनविधौ बद्धधिषणः ।
निषिद्धोऽधादेतत्कदनकरणाद् यैरहमहो !
न किं ते वत्साद्या दधति मम सोदर्यसमताम् ? ॥ ३३४ ॥
प्राणान् यः प्रददाति तस्य न पुमानानृण्यमास्कन्दति
प्रायः कोऽपि च, जीविताधिकमहो ! यन्नास्ति किञ्चित् क्वचित् ।
प्राणेभ्यो मम लक्षकोटिगुणितां तां वल्लभां रक्षतो-
नास्याऽऽनृण्यमुपैमि तच्छृणुत मेऽमात्या ! यथार्थां गिरम् ॥३३५॥
विद्वांसस्तान्यपत्यान्यभिदधतितमां दुर्गतिं नो पतन्ति
संजातैः पूर्वजा यैरसमगुणमहारत्नमाणिक्यशैलैः ।
तद् व्युत्पत्त्याऽनया मे पतनविहननान् नूनमेतेऽप्यपत्या-
न्येतं तद्देवराजं नयविनययुतं राज्यभारेऽधिरोप्य ॥ ३३६ ॥
पुर्नेऽह स्वं कृतार्थं सुकृतकरणतो वः समक्षं विरक्त-
इत्युक्त्वाऽमात्ययुक्तो नरपतिरकरोत् स्वे पदे देवराजम् ।
सार्धं पौरैरमात्यैः परिवृढवचनाद् संभृतैस्तीर्थतोयैः
सामन्तैः सोऽभ्यषेचि प्रमदजलपरिप्लुक्तनेत्रारविन्दैः ॥ ३३७ ॥

(युग्मम्)

राज्ञा तेन विनिर्मितोत्सवभरः श्रीदत्तसूरिप्रभा-
म्भोजान्ते व्रतमग्रहीन मुमुदयैर्वैराग्यरङ्गो नृपः ।

प्राप्नोत्येव हि सर्व एव भुवने कर्मानुरूपं फलम् ॥ ३५२ ॥
योऽवेत् पञ्चमहाव्रतीं च निरतीचारां यथावस्थितां
दिव्यर्द्धिं स तु रक्षितावदनघः प्राप्नोति कीर्त्या समम् ।
यो वा पालयति स्वयं हितधिया दत्ते परेभ्योऽपि यः
सौख्यानां किल रोहिणीव स इहामुत्रापि पात्रं भवेत् ॥३५३॥
दृष्टान्तो भरते भविष्यति महावीरस्य तीर्थे परं
सिद्धान्तादधिगम्य संप्रति मयाऽऽख्यातस्तवायं मुने ! ।
तत् त्वं धर्मपरां वधूमनुहरेस्तुर्यामवार्योदया-
मित्यादिश्य कथां यथार्थरुचिरां मौनं मुनीशोऽकृत ॥ ३५४ ॥
सोऽथ श्रीजितशत्रुसाधुतिलकस्तप्त्वा तपो दुष्करं
गत्वा द्यामवतीर्य मानुषभवे निर्वाणमाप क्रमात् ।
इत्याख्याय कथाप्रपञ्चममृताऽऽस्रक्ष्मापमुख्यावनी-
शक्राणामथ देशनामशमयत् क्षेमङ्करस्तीर्थकृत् ॥ ३५५ ॥
इत्थं तीर्थकृतो निपीय सरसं धर्मोपदेशामृतं
संसारस्थितिबाधनं त्रिजगतां कल्याणसंसाधनम् ।
नत्वा भक्तिपुरस्सरं जिनपतेः पादारविन्दद्वयं
स्वं स्वं धाम विसारिधामविसरा वज्रायुधाद्या ययुः ॥३५६॥
आसीत् श्रीगुरुगच्छमौलिमुकुटश्रीमानभद्रप्रभोः
पट्टे श्रीगुणभद्रसूरिसुगुरुश्चारित्रभाजां गुरुः ।
तच्छिष्येण विनिर्मितेऽत्र दशमः श्रीशान्तिवृत्ते महा-
काव्ये श्रीमुनिभद्रसूरिकविना सर्गो विशालो ययौ ॥ ३५७ ॥

॥ इति श्रीशान्तिनाथचरिते दशमः सर्गः ॥

अर्हम्

अथ एकादशः सर्गः ।

यत्रैव संवेदनतारतम्यं विश्रान्तिमापन् किल तारतम्यात् ।
ज्योतींषीव मानाभिनतारतम्यं शान्तिप्रभुर्वः स मुदे मनोज्ञः ॥ १ ॥
यत्प्रभावेण महोदयेन राट् पार्श्वतोऽपास्तगृहाश्रितेन ।

वज्रायुधोऽभ्यर्चनमाचचार चक्रस्य शक्रस्य बलानि जिष्णुः ॥ २ ॥
अन्यानि रत्नान्यपि तस्य सेनान्यादीन्यभूवन् भुवनेश्वरस्य ।
पुण्ये समाक्रामति विस्तरं हि किं किं न सान्निध्यमुपैति पुंसाम् ?॥३॥
धातोरिव प्रागुपसर्गवर्गश्चक्रस्य पश्चात् स चलन् बभासे ।
षट्खण्डके चक्रयपि मङ्गलावत्याख्ये सशैलं विजयं जिगाय ॥ ४ ॥
छायां जयन्तं कुसुमायुधस्य पुत्रं सहस्रायुधमिद्धबुद्धिम् ।
न्यस्योप्रशौर्यं स च यौवराज्ये भुङ्क्ते स्म सौख्यानि निरन्तरायम् ॥५॥
अन्येद्युरास्थानमलञ्चकार चक्री महीन्द्रैः परितः परीतः ।
शक्रः सुधर्मामिव रत्नभूपादीप्रप्रभानिर्मथितान्धकारः ॥ ६ ॥
व्योम्नस्तदा कश्चन कम्पमानक्षेत्रो भृशं व्योमचरो युवैकः ।
वज्रायुधं तं शरणं जगाम, केषां महान्तः शरणं न वा स्युः ? ॥ ७ ॥
आगात तस्यानुपदं पदार्हा काचिच्च विद्याधरवल्लभैका ।
देवाङ्गनेवाद्भुतरूपधेया बिभ्रत्यसिं खेटकमुत्कटं च ॥ ८ ॥
एकस्तु विद्याधरवंशकेतुर्विद्याधरस्तामनु चाजगाम ।
बिभ्रद् गदां वैरिवलावलेपप्रध्वंसने विश्वकृतप्रतीतिम् ॥ ९ ॥
तं स्त्री बभाषे नृपमौलिमौले ! दुष्टं निकृष्टं विसृज त्वमेतम् ।
दुर्न्यायशाखिप्रभवं यथाऽस्य प्रादुष्करोमि प्रसभं फलं च ॥ १० ॥
विद्याधरः स्माह च सार्वभौममाकर्ण्यतामस्य सकर्ण ! वृत्तम् ।
एषाऽप्यहं येन निहन्तुमेतं हन्ताऽऽगमाव द्विषतां निहन्तः ! ॥ ११ ॥
अस्यान्तरीपस्य विदेहकेषु श्रीवल्लिकच्छे विजये सुकच्छे ।
वैताढ्यशैले परिमुक्तशुल्कं नाम्ना पुरं शुक्रपुरं समस्ति ॥ १२ ॥
तत्रैव विद्याधरनायकोऽभूत् श्रीशुक्रदत्तः प्रसृतप्रतापः ।
प्राणप्रिया तस्य यशोधराख्या देवी सदौचित्ययशोधरार्हा ॥ १३ ॥
तन्नन्दनोऽहं पवनप्रभाख्यः सन्मानसानन्दनबुद्धिसीमा ।
अभ्यस्तनिःशेषकलाकलापस्तारुण्यमासादितवानितश्च ॥ १४ ॥
तत्रैव शैले जिनसद्मरम्येऽभूदुत्तरश्रेणिललामभूते ।
क्ष्मापः पुरे किन्नरगीतनाम्नि विद्याधरेन्द्रः किल दीप्तिचूलः ॥ १५ ॥
विद्याधरीचित्रकचन्द्रकीर्तिकुक्षिप्रसूता रतिरम्यरूपाम् ।
तस्याङ्गजां पर्यणयं कलाभिः कान्ता सुकान्तामभिधानतोऽपि ॥ १६ ॥

तत्कुक्षिजाता मम पुत्रिकेयं शीलोज्ज्वला शान्तिमती मतीड्या ।
युष्मत्पुरो याऽस्ति निरस्तदोषा दोषाकराऽऽस्या करजेयपद्मा ॥ १७ ॥
प्रज्ञप्तिसंज्ञामपरेद्युरेषाऽभूत् साधयन्ती यतिनैव विद्याम् ।
स्थाने मणीनां मणिसागराद्रौ विद्याधरत्वं कथमन्यथा स्यात् ? ॥१८॥
आलोक्य विद्याधरपाश एष एतां तथाभूतसमाधिभावाम् ।
व्योमन्युदामाऽऽस तदैव चास्या विद्याप्रसिद्धिः सुकृतानुभावात् ॥१९॥
अस्या अयं किञ्चन कान्दिशीको भ्राम्यंस्ततो निर्गमितार्थवच्च ।
आयातवांस्त्वच्चरणारविन्दच्छायां शरण्यावनिपालतात ! ॥ २० ॥
प्रज्ञप्तिपूजारचनाय विज्ञ ! प्राग्वत् समादाय बलिं जगाम ।
तस्मिन् महीध्रे तु निजाङ्गजां तां नाद्राक्षमक्षुद्रचरित्रचित्राम् ॥ २१ ॥
आभोगिनीसंगवशादवेत्य वृत्तान्तमेतं सविधं तवाऽऽगाम् ।
न्यायोपदेष्टः ! तदमुं च मुञ्च दुष्टत्वमेतस्य यथा हरामि ॥ २२ ॥
वज्रायुधश्चक्रयवधेर्विबुद्ध्य सर्वं तदीयं चरितं बभाण ।
विद्याधराधीश्वर ! पूर्वजन्मप्रेमाऽस्य पुत्र्यां भवतस्तथाहि ॥ २३ ॥
जम्बूमहाद्वीपकमध्यवर्तिक्षेत्रोत्तमैरावतमध्यभागे ।
आसीत् पुरे विन्ध्यपुरे धरेन्द्रः श्रीविन्ध्यदत्तोऽवधिर्ऋद्धिभाजाम् ॥२४॥
तत्प्रेयसी लक्षणलक्षिताङ्गी कृत्येषु दक्षाऽऽस सुलक्षणाख्या ।
पुत्रस्तयोस्तर्जितमीनकेतुः स्वाङ्गश्रियाऽभून्नलिनादिकेतुः ॥२५ ॥
तस्मिन् पुरेऽजायत धर्ममित्रः सन् सार्थवाहो भुवनैकमित्रम् ।
श्रीदत्तया तत्प्रियया प्रसूतस्तस्याङ्गभूर्दत्त इति प्रसिद्धः ॥ २६ ॥
प्रभङ्करी तस्य बभूव जाया निर्धूतमाया कनकाभकाया ।
प्रालेयभूमीधरपुत्रिकाऽसौ संभाव्यते यद्गगिनीव दृष्टा ॥ २७ ॥
अन्येद्युरुद्यानमियाय सार्द्धं वध्वा वसन्तेन विभूषितं स. ।
उच्चैरधिष्ठाय रथं निधीशः सूनुर्यथा चैत्ररथं रथीनः ॥ २८ ॥
राज्ञः कुमारोऽपि वने तदानीं तत्र प्रयातः सुभगत्वमारः ।
दत्तस्य जायां समवेक्ष्य जज्ञे मारेपुलक्ष्यं विकसद्विकारः ॥ २९ ॥
एषा मृगाक्षी यदि मानुषी स्यात्तन्मानुषत्वं धिषणाधनानाम् ।
लोकेषु सर्वेषु विवर्गनीयं यन्नेदृशी लोकयुगे श्रुताऽस्ति ॥ ३० ॥
लावण्यसम्बन्धसमन्वितं तत् सौभाग्यमस्या न करोति कस्य ? ।

लोकोत्तरं भोज्यमिवोपनीतं नानारसैरङ्गरुचिं जनस्य ॥ ३१ ॥
इत्यादि तद्वर्णनमादधानः सौभाग्यमाणिक्यनिदानभूताम् ।
कन्दर्पमद्याऽरमपाहरन् तां दर्पं भजन् स्वौजसि राजसूः सः ॥ ३२ ॥
उद्यानलेखासु मनोहरासु गम्भीरभूमीधरकन्दरासु ।
दौगन्दुकामर्त्य इवाविरामं चिक्रीड सार्द्धं स तया कुमारः ॥ ३३ ॥
हा प्रेमशाले ! दयिते ! क चासि कासीति बाढं विलपन् समन्तात् ।
बभ्राम तद्रूपमवेक्षमाणस्तादृग् वियोगो न दुनोति कं वा ? ॥३४॥
बम्भ्रम्यमाणेन जवेन तेन दत्तेन कुत्रापि वने मुनीन्द्रः ।
आलोकि देवैरभिवन्द्यमानः स ज्ञानयोगात् सुमनोऽभिधानः ॥ ३५ ॥
दत्तोऽपि तत्पादसरोजयुग्मे भृङ्गायमाणः श्रुतवागऽतापः ।
दानं समाराध्य चिरं स्वमायुः शेषं व्यतीयाय समाधिनिष्ठः ॥ ३६ ॥
आकर्णयेतश्च नभःप्रचार ! प्राच्ये विदेहे विजये सुकच्छे ।
वैताढ्यशैलेऽस्ति पुरं सुवर्णपूर्वं प्रसिद्धं तिलकं समृद्धम् ॥ ३७ ॥
तत्राभवद् विक्रमनामधेयो विद्याधरेन्द्रः स महेन्द्रपूर्वः ।
यद्विक्रमं वीक्ष्य परं महेन्द्रः स्वाराज्यदम्भादभजद् विदेशम् ॥ ३८ ॥
देवी तदीयाऽनिलवेगिकेति सौन्दर्यलक्ष्म्या रतिरेव जज्ञे ।
तत्पुत्रतामाप स दत्तजीवः संसिद्धविद्योऽजितसेननामा ॥ ३९ ॥
याते दिवं विन्ध्यपुराधिनाथे श्रीविन्ध्यदत्तेऽथ तदीयपुत्रः ।
राजा नयज्ञो नलिनो बभूव श्रीवासभावाद् नलिनं विधुन्वन् ॥ ४० ॥
प्रासादमन्येद्युरुदारचेता देव्या महाऽऽरोहदरोहदंहाः ।
धाराधरं शृङ्गमतीव तुङ्गं धाराधरश्च्चञ्चलया यथाऽमा ॥ ४१ ॥
व्योम्न्यञ्जनाद्रीनिव लब्धवृद्धीन् सान्द्रान्धकारानिव निर्विपक्षान् ।
शम्पाममालिङ्गितमन्निवेशानुद्दामवास्तोष्पतिचापभाजः ॥ ४२ ॥
अत्यूर्जितं गर्जितमादधानान् स्निग्धाञ्जनश्यामगजानिवाऽयम् ।
आकस्मिकाभ्युन्नतवारिवाहान् दृष्ट्वा महीन्द्रो मुमुदे हृदन्तः ॥ ४३ ॥
(युग्मम्)
तांश्च क्षणादुद्धतमारुतेन विश्रास्यमानानिव तूलपूलान् ।
मत्वाऽऽत्ममालोकयति स्म राजा दुर्दैवपाशैरिव नुद्यमानान् ॥ ४४ ॥
धाराधरांस्तान क्षणमात्रतोऽपि जातान् विपन्नांश्च विलोक्य सम्यग् ।

दध्यौ ततोऽसौ नलिनः क्षितीशो नीरन्ध्रवैराग्यसमृद्ध एवम् ॥ ४५ ॥
एषां यथोत्पत्तिरहो ! विपत्तिर्जाता क्षणादेव पयोधराणाम् ।
अस्याप्यसारस्य तथाविसारिसंसारिवर्गस्य विचारितस्य ॥ ४६ ॥
एतत् समस्तं क्षणदृष्टनष्टं सौदामनीदामवदीक्ष्यमाणम् ।
ध्यात्वा सुपुत्रे विनिवेद्य राज्यं क्षेमङ्कारान्ते व्रतमाददे सः ॥ ४७ ॥
एकावलीमुख्यतपोविधानैर्निर्माय कर्माण्यपुनर्भवानि ।
संप्राप्य विज्ञानमनन्तभावं प्रापत् पदं नित्यमनन्तसौख्यम् ॥ ४८ ॥
प्रभङ्करी साऽपि ऋजुस्वभावा श्रीसुव्रतार्यापदपद्मपार्श्वे ।
चान्द्रायणं नाम तपो वितन्द्रा चन्द्रावदाता विदधे विधिज्ञा ॥ ४९ ॥
सम्यक्त्वसम्बन्धमृतेऽपि सापि काले समासादितकालधर्मा ।
साम्याश्रिता तत्तपसो महिम्ना जज्ञे सुता शान्तिमती तवेयम् ॥ ५० ॥
एतेन तेनाऽजितसेनकेन प्राग्जन्महार्दातिविमोहितेन ।
एषाऽप्युदक्षेपि तदत्र किं ते रोषो मनःशोषणपोषणाय ? ॥ ५१ ॥
तस्मात् कषायप्रचयाऽनुबन्धमेतं परित्यज्य परं दुरन्तम् ।
अन्योऽन्यमेव क्षमयध्वमङ्ग ! यस्माद् भवस्यैव निदानमेषः ॥ ५२ ॥
इत्युक्तिसंबोधवशात् सुसत्त्वास्ते त्यक्तवैराः क्षमयाम्बभूवुः ।
अन्योन्यमासन्नमहोदयाशा नैवोपदेशा महतां मुधा स्युः ॥ ५३ ॥
प्रोवाच भूपोऽपि स सार्वभौमः क्षेमंकरार्हत्सविधेऽचिरेण ।
दीक्षा त्रयाणामपि वो भवित्री दुष्कर्मकक्षोषणजातवेदाः ॥ ५४ ॥
रत्नावलिं नाम तपो विधाय शान्ताशया शान्तिमती ततोऽसौ ।
प्राणान् विहायाऽनशनेन लब्धेशानेन्द्ररूपत्वमुदीर्णभोगा ॥ ५५ ॥
मत्वाऽथ विज्ञानवशात् तदैव स्वं केवलज्ञानविभासिनोऽर्चाम् ।
मानाऽनुरूपं महिमानमादावागत्य निर्मास्यति चाङ्गपूजाम् ॥ ५६ ॥
ईशानदेवाधिपतिस्ततश्च च्युत्वा समासाद्य परं नरत्वम् ।
सर्वार्थसाक्षात्कृतिसंविदं च कैवल्यमाप्स्यत्यपि स क्रमेण ॥ ५७ ॥
कालत्रयोद्बोधविबोधशुद्धं वज्रायुधस्योक्तमिदं निशम्य ।
सर्वेऽपि ते सभ्यजनैः सहैव विस्मेरतामापुरपेतदर्पाः ॥ ५८ ॥
तेऽपि त्रयोऽपि प्रणिपत्य भक्त्या तं सार्वभौमं बहुधा प्रशस्य ।
आपृच्छ्य गत्वा जगृहुर्जिनेन्द्रक्षेमङ्करान्ते व्रतमेकचित्ताः ॥ ५९ ॥

शाणासमुत्तीर्णकृपाणधारादेश्यं व्रतं ते चिरमाचरंश्च ।
मृत्वा क्रमाच्छान्तिमती शुभा तेष्वीशानदेवाऽधिपतित्वमाप ॥ ६० ॥
विद्याधरर्षी च बभूवतुस्तावध्वंसविज्ञानयुजौ तदैव ।
ईशानजिष्णुः स दिवः समेत्य तज्ज्ञानपूजां स्वतनोश्च चक्रे ॥ ६१ ॥
च्युत्वा द्वितीयत्रिदिवान् क्रमेण सम्प्राप्य मर्त्यत्वमनुत्तमं सः ।
सिद्धस्य लक्ष्मीमवहद् महात्मा तस्मिन् भवे तौ तु मुनी विमुक्तौ ॥६२॥
सूनौ सहस्रायुधनाम्नि चक्री क्ष्माभारमारोप्य सुपं बभाज ।
प्राकाम्यमव्याहतमङ्गजानां पुण्यात्मनां पुण्यवशेन यस्मात् ॥ ६३ ॥
श्रीमत्सहस्रायुधवल्लभाऽथ सुप्ता रजन्यां जयनाऽभिधाना ।
स्वप्ने समालोकत हेमशक्तिं कान्त्या समुद्द्योतितसप्रदेशाम् ॥ ६४ ॥
स्वप्नानुभावेन निवेदितेन भर्त्रा सहस्रायुधवल्लभा सा ।
गर्भं बभार प्रवरं तदैव स्वप्नात् सुपुण्यात् किमु दुर्घटं स्यात् ? ॥ ६५ ॥
स्फूर्जद्गुणश्रेणिविभासमानं विश्वम्भरानायकभूषणार्हम् ।
मुक्ताफलं शुक्तिरिवाऽथ काले साऽजीजनत् सूनुमनूनरूपम् ॥ ६६ ॥
तस्याऽऽदधे नाम च हेमशक्तिस्वप्नाऽनुसारेण पितामहेन ।
ख्यातेन राज्ञामपि हेमशक्तिरित्यार्यभूमीन्द्रपितामहेन ॥ ६७ ॥
उत्क्रान्तबाल्यो लिपिचक्रविद्यापारङ्गमो यौवनसङ्गचङ्गः ।
कन्यां महामन्दिरपत्तनेशश्रीमेरुमालिक्षितिपालकस्य ॥ ६८ ॥
मल्लाप्रियाकुक्षिभवां भवानीरूपामुपायंस्त स शस्तबुद्धिः ।
विद्यागृहं यौवनशालिकायां नाम्नाऽङ्ककान्त्याऽपि च हेममालाम् ॥ ६९ ॥
(युग्मम्)

किञ्चाऽजनिष्टाऽत्र मशक्यसारद्रङ्गे महेन्द्रोऽजितसेननामा ।
तस्य प्रियाऽभूत् प्रियसेनिकाख्या पुत्री तयोरास वसन्तसेना ॥ ७० ॥
तां यौवनोद्भेदविशेषकान्तां तातः समीक्ष्य प्रजिघाय मङ्क्षु ।
श्रीहेमशक्तेरनुरूपरूपां सौभाग्यभाग्यैकपात्रिवरां च ॥ ७१ ॥
तां पर्यणैपीज्जनकाऽनुमत्या श्रीमान् सहस्रायुधराजसूनुः ।
एतद्विवाहाद् वितताम रोषं तस्याः पितुर्जामिसुतो दुरात्मा ॥ ७२ ॥
आराममन्येद्युरधिष्ठितेन क्रीडां विचित्रा अनुतिष्ठता नौ ।

१ पुरुष॰ ।

उत्पातपातौ विदधद् व्यलोकि कश्चित् सहस्रायुधनन्दनेन ॥ ७३ ॥
प्रोचे कुमारस्तमहो ! किमेवमुत्पत्य शक्तो निपतस्यऽकस्मात् ? ।
त्वं भद्रपक्षीव विलूनपक्षो नाऽगोप्यमेतद्यदि मे तदाऽऽत्थ ॥ ७४ ॥
प्रत्याह ना सोऽपि भवादृशानां नास्त्येयमप्यस्ति किमङ्ग ! धीमन् ! ।
युष्मादृशः सन्ति परेङ्गितज्ञास्तेष्वेव गोप्यं जडतां व्यनक्ति ॥ ७५ ॥
वैताढ्यशैलात् क्वचनाऽपि कार्ये विद्याधरोऽहं पुरतोऽपि गत्वा ।
व्यावर्त्तमानोऽतिकुतूहलेनोद्यानेऽत्र तस्थौ क्षणमद्भुतेन ॥ ७६ ॥
एतस्य सौन्दर्यमदृष्टपूर्वं दृष्ट्वा निवृत्तोऽहमितोऽपि यावत् ।
तावद् ममाप्यम्बरयानसिद्धविद्यापदं विस्मृतमात्मपापात् ॥ ७७ ॥
उत्पातपातद्वितयेन तेन प्रद्युम्नमूर्त्ते ! निविडं विडम्ब्ये ।
एतत् तदुक्तं विनिशम्य सम्यग् भूयः कुमारोऽभिदधे तमेवम् ॥ ७८ ॥
विद्याधरेयं यदि नाम विद्याऽन्यस्याग्रतस्ते पठनोचिताऽस्ति ।
तत् पठ्यतां शाठ्यमपास्य मेऽग्र इत्युक्त एषोऽपि तमभ्यधत्त ॥ ७९ ॥
विद्या न विद्याकर ! पठ्यतेऽसौ पापात्मनामग्रत एव पुंसाम् ।
युष्मादृशानां तु नरोत्तमानां देया ततः किं नु निवेद्यते न ? ॥ ८० ॥
तां विस्मृतार्द्धैकपदामथास्मै विद्याधरः स प्रयतो बभाषे ।
भूमीन्द्रपुत्रोऽपि पदानुसारिबुद्ध्या पदं विस्मृतमाविराधात् ॥ ८१ ॥
सर्वामसौ प्राप्य ततोऽतिहृद्यां विद्यां तु विद्याधर आदरेण ।
तामेव तस्मै वितताार दक्षो यद्दक्षिणामर्हति नाऽपरां सः ॥ ८२ ॥
विद्याधरे जग्मुषि तत्र नप्ता वज्रायुधस्यापि यथाविधानम् ।
विद्यामनिन्द्यामथ साधयित्वा विद्याधराग्रेसरतां बभार ॥ ८३ ॥
रुष्टस्तदा सोऽपि वसन्तसेनाबीजिस्वसुः सूनुरमुं ते निमित्तम् ।
तस्मिन् कुमारे किल हेमशक्त्याविणो मृगाधीश इवाऽभिमानात् ॥ ८४ ॥
तस्यापकारं करणीयरूपं निर्मातुमेवाऽप्रभुरात्तलज्जः ।
त्यक्ताग्रनो मृत्युमवाप्य देवो दिव्यर्द्धिरासीद्धिमचूलनामा ॥ ८५ ॥
(युग्मम्)

ताभ्यां प्रियाभ्यां सममासमुद्रं क्ष्माचक्रवालं विचरन् समस्तम् ।
संसिद्धविद्यो भ्रमति स्म सोऽपि श्रीमत्सहस्रायुधराजसूनुः ॥ ८६ ॥
यातोऽपरेद्युर्हिमवन्महीध्रे दृष्ट्वाऽभ्यवन्दिष्ट मुनिं निरीहम् ।

धर्मं दिशन्तं विपुलादिमलाख्यं चारणं पापनिवारणं सः ॥ ८७ ॥
तस्मात् समासाद्य च धर्मलाभं संसारकक्षोपदवानलाभम् ।
सार्धं प्रियाभ्यां सुकृतोपदेशं शुश्राव स श्रावकवर्गनागः ॥ ८८ ॥
बुद्धः प्रबुद्धः स च हेमशक्तिर्देवीद्वयं तत् प्रविहाय तादृक् ।
तादृग्महर्द्धि च तदंह्रिमूले चारित्रमादत्त विरक्तचित्तः ॥ ८९ ॥
सत्यः स्वपत्युः स्थितिमाचरन्तीत्येवं स्वचित्ते परिभाव्य दीक्षा ।
तत्प्रेयसीभ्यामपि तन्मुनीन्द्राभिख्यार्यिकायाः सविधेऽभ्युपेता ॥ ९० ॥
अन्येद्युराचार्ययुतो धरित्र्यां कुर्वन् विहारं मुनिर्हेमशक्तिः ।
भेजे गिरौ सिद्धिपदे सुदैकरात्रिप्रमाणां प्रतिमां क्षमावान् ॥ ९१ ॥
एतं समालोक्य समाधिभाजं देवाधमः पूर्वभवद्विपन् सः ।
आरादुपद्रोतुमढौकताऽरं पद्माकरं वाजिरिपुर्यथैव ॥ ९२ ॥
तत्राऽऽगता व्योमचराः सलीलं दृष्ट्वा महात्मानमुपद्रवन्तम् ।
शक्त्या दुरात्मानमनीनशंस्तं नैदाघदाघं जलदा इवाऽऽशु ॥ ९३ ॥
प्रत्यूषकाले परिपूर्णयित्वा स्वाभिग्रहं कुग्रहनिग्रहेण ।
तां राजधानीं स्वपितामहस्य धन्यो ययौ सोऽपि विहारवृत्त्या ॥९४॥
तस्यां वने शूरनिपातसंज्ञे वासं मुनिः पूर्ववदाऽऽचचार ।
बाधाचिकीर्षुस्तत्र सुराधमोऽपि भूयः समागादविमुक्तवैरः ॥ ९५ ॥
ज्ञानं तदापाऽप्रतिपाति साधुस्तत्पूजनाय त्रिदशाः समेयुः ।
तेभ्यः स भीतस्त्रिदशाधमोऽपि पादांस्तदीयान् शरणं जगाम ॥ ९६ ॥
वज्रायुधोऽप्यस्य मुनेः प्रभावं श्रुत्वा समानं महिमानमाधात् ।
तद्देशनावागमृतं निपीय वेश्मन्यगात् सोऽपि सुपर्वभावः ॥ ९७ ॥
क्षेमङ्करस्तीर्थकरोऽत्र पुर्यां विश्वत्रयक्षेमकृदन्यदाऽऽगात् ।
पुण्यानुभावेन महाजनानां किं किं समालिङ्गति नैव सिद्धिम् ? ॥९८॥
वज्रायुधं चक्रिणमभ्युपेत्याऽऽयुक्ता नराः स्वामिसमागमेन ।
तं वर्धयित्वा परितुष्टिदानं सम्प्राप्य तावत् स्वगृहाणि जग्मुः ॥ ९९ ॥
रोदोऽन्तराले वसुधामिवान्यां सैन्योत्थितै रेणुभिरादधानः ।
नन्तुं जिनाधीशमियाय सोऽथ तं त्रिः परीय प्रणनाम चायम् ॥१००॥
स्थित्वा यथास्थानमनन्यकर्मा धर्मोपदेशं विनिशम्य चक्री ।
तीर्थाधिनाथं पुनरेव नत्वा स्वाकूतमाख्यच्च महामहेच्छः ॥१०१॥

एतादृशः शारदशर्वरीशभास्वद्गुणग्रामनिवासभूमिः ।
अन्यः किमस्तीति जगत्त्रयेऽपि बभ्राम यत्कीर्तिरविभ्रमेण ॥१३०॥
(चतुर्भिः कलापकम्)
तस्य प्रियाऽभूत् प्रियमत्यभिख्या ज्येष्ठा कनिष्ठा च मनोरमाख्या ।
श्रीनाभिसूनोरिव वित्तिलक्ष्मीमूर्तेः सुनन्दा च सुमङ्गला च ॥१३१॥
ग्रैवेयकायुः परिपूर्य जन्तुर्वज्रायुधस्याऽपि महाशयस्य ।
कुक्षिं महिष्याः प्रियमत्यभिख्याख्यातिं दधत्या अधितिष्ठति स्म ॥१३२॥
स्वप्ने तदा पश्चिमरात्रयामे देव्या निजास्ये प्रविशन् व्यलोकि ।
धाराधरो गर्जितमादधानो वृष्टिं च शम्पासहितः समन्तात् ॥१३३॥
राज्ञी प्रभाते जगतीश्वरस्य स्वप्नं जगौ सोऽपि जगाद तथ्यम् ।
शस्यप्रसूतिः परतापभेत्ता भावी सुतो मेघ इवानघे ! ते ॥१३४॥
श्रुत्वा स्वभर्तुर्वचनं प्रहृष्टा ध्वानं मयूरीव घनाघनस्य ।
देव्युच्चगोच्चस्थितिमादधाना गर्भं दधाना दिवसानतैर्षीत् ॥१३५॥
च्युत्वा सहस्रायुधराजजीवो ग्रैवेयकादायुषि भुक्तशेषे ।
कुक्षौ स देव्याः सुमनोरमायाः पुण्यस्थितेर्गर्भतयोदपादि ॥१३६॥
स्वप्ने तयाऽपि प्रविशन् मुखान्तस्तस्यां समालोकि दृढो रथश्च ।
उन्नादिजाम्बूनदकिङ्किणीको वातप्रकम्प्रध्वजराजमानः ॥१३७॥
सोपायना साऽपि नृपाय सद्यः प्रोचे स्वयं सेवधिलाभवत् तम् ।
हर्षप्रकर्षाद् नृपतिस्तदर्थमाख्यच्च भावी तव देवि ! पुत्रः ॥१३८॥
ते द्वे अपि प्रीणितविश्वविश्वौ पुत्रौ किलाऽजीजनतां सुलग्ने ।
उच्चेषु केन्द्रेषु च सद्ग्रहेषु पुंरूपमेताविव पुष्पवन्तौ ॥१३९॥
कृत्वोत्सवं वाञ्छितदानपूर्वं स्वप्नानुसारेण नृपोऽकृताऽऽख्याम् ।
ज्येष्ठं सुतं मेघरथं बभाषे पश्चाद् द्वितीयं च दृढं रथान्तम् ॥१४०॥
धात्रीभिरेतौ परिपाल्यमानौ वृद्धिं गतौ शिक्षितवेद्यविद्यौ ।
पुष्पेषु लीलोपवनं क्रमेण तौ यौवनं प्रापतुरेककालम् ॥१४१॥
श्रीमन्दिराख्यस्य पुरस्य भर्तुर्द्वेधा हतारेर्नृपतेर्नियोगात् ।
मन्त्री समागादपरेद्युरुद्यद्बुद्धिप्रशस्यः खलु शस्यबुद्धिः ॥१४२॥
आवेदितो वेत्रभृतां वरेणाऽमात्यः प्रणम्यावनिवासवं तम् ।

---
१ प्रासौ ।

सुक्षत्रनक्षत्रसुधांशुबिम्बं बद्धाञ्जलिर्व्यज्ञपयद् विधिज्ञः ॥१४३॥
गङ्गा पवित्रं भुवनं करोति चेतश्चमत्कारकरं न चैतत् ।
त्वत्कीर्तिगङ्गा तु महेश्वराणां मौलिस्थिता देव ! करोति चित्रम् ॥१४४॥
स्वामिन् ! मम स्वाम्यपि ते सखा प्राक् प्रीतिं बिभर्तीति च पौनरुक्त्यम् ।
तिस्रः सुतास्तस्य गुणाधिवासाः साधोर्यथा गुप्तय एकशीलाः ॥१४५॥
दत्त्वोभिके मेघरथाय चैकां तस्याऽनुजायैव महारथाय ।
प्रेमाणमुत्तेजयितुं सतेजाः सम्बन्धतो वाञ्छति विश्ववन्धो ? ॥१४६॥
युक्तं तदेतद्यदि राजराज ! तल्लग्नमुद्वाहमहोत्सवाय ।
ज्योतिर्विदाऽऽवेदयत प्रसद्य प्रत्युत्तरं यच्छत वा ममाऽपि ॥१४७॥
एतत् तदुक्तं हृदये निधाय दैवज्ञमाकार्य तदैव भूपः ।
लग्नं कुमारागमवासरं च निर्दिश्य सत्कृत्य विसृष्टवांस्तम् ॥ १४८ ॥
कैश्चिद् दिनैर्मन्त्र्यपि पत्तनं स्वं संप्राप्य संप्राप्तविशिष्टमानः ।
कार्यस्य सिद्धिं विनिवेद्य हृद्यां संतोषयामास धराधिनाथम् ॥१४९॥
प्रस्थापयामास वितीर्य शिक्षां क्षोणीपतिर्मेघरथं कुमारम् ।
तेनाऽनुजेनाऽथ समं समीरः पुष्पं च गन्धेन यथा पुरं तत् ॥ १५० ॥
सामन्तसेनापतिमन्त्रिपुत्रसेनावितानेन नियोजितेन ।
सार्धं कुमारौ चलतः स्म भम्भावाद्यप्रणादेन पुराकृतेन ॥ १५१ ॥
यातोस्तयोर्वर्त्मनि राजसून्वोर्यैः प्राभृतं सम्भृतमानिनाय ।
तद्दत्तदीनारकदम्बकैः स दारिद्र्यमुद्रां प्रलयं निनाय ॥ १५२ ॥
आमोदयन्तौ कचनाऽपि देशाद्ध्यक्षकान् न्यायनिरीक्षणेन ।
संमानयन्तौ कचनाऽपि भट्टान् सौवर्णभूषावसनप्रदानैः ॥१५३॥
आलोकयन्तौ कचनाऽपि किञ्चिद् रम्यं विनोदादवलोक्यमानम् ।
संलापयन्तौ कचनाऽपि वृद्धान् प्रश्नप्रवृत्तिं वदतोऽनुयुक्तान् ॥१५४॥
इत्थं प्रयान्तौ प्रतिवासरं तौ कैश्चित् प्रयाणैर्विगलद्विलम्बैः ।
विक्रान्तभूमीन्द्रसुरेन्द्रदत्तदेशस्य सीमान्तिकमभ्यगाताम् ॥१५५॥
(त्रिभिर्विशेषकम्)

क्ष्मापेण तेन प्रहितोऽथ दूत एत्याऽवदद् मेघकुमारमेवम् ।
स्वामी द्विधा मेऽस्ति सुरेन्द्रदत्तो हर्यक्षवत् शौर्यनिवासभूमिः ॥१५६॥
किञ्चित्तिरस्कारमदृष्टपूर्वी सत्त्वावलिप्तः सुकुमार ! स त्वाम् ।

संसारसिन्धौ निपतन्तमस्मिन् प्रोद्यन्महामोहजलैरगाधे ।
दीक्षातरण्या शुभवातयोगात् त्वं मां जगत्तारक ! तारयाऽऽशु ॥१०२॥
आकर्ण्य विज्ञप्तिमिमां तदीयां तीर्थप्रभुर्वाचमुवाच सारम् ।
हित्वा प्रमादं स्वमनीषितं द्राक् कुर्या यतः स्युः सुकृतेऽन्तरायाः ॥१०३॥
ईदृक् तदाकर्णनहृष्टचेता राज्ये सहस्रायुधमात्मजातम् ।
न्यस्यैत्य दीक्षां जिनपादमूले जग्राह वज्रायुधसार्वभौमः ॥ १०४ ॥
कोटीरभाजो वसुधाधिपाला देव्यो मिताश्चापि चतुःसहस्त्या ।
पुत्राः पुनः सप्तशतीप्रमाणाः प्राव्राजिषुस्तं प्रभुमन्वगेव ॥ १०५ ॥
संगृह्य शिक्षां द्विविधां विधिज्ञश्चूडामणिः सोऽपि तपोधनानाम् ।
वज्रायुधः सिद्धयभिधानशैलमेको ययौ शैलसमानसारः ॥ १०६ ॥
तत्रोपसर्गेषु सहिष्णुबुद्धिः स्तम्भे स वैरोचननामधेये ।
निर्मेघवैरोचनधामधामा वर्षप्रमाणां प्रतिमां चकार ॥ १०७ ॥
ध्यानं समालम्ब्य स यावदास्ताऽश्वग्रीवपुत्रौ दुरितप्रणुन्नौ ।
तावच्च नाम्ना मणिपूर्वकुम्भकेतू परिभ्रम्य भवं चिराय ॥ १०८ ॥
किञ्चित्तमां बालतपो विधायाऽहङ्कारकाराविनिविष्टचित्तौ ।
प्राप्ताऽसुरत्वौ कुतुकाद् भ्रमन्तौ तत्रागतौ तं मुनिमैक्षिपाताम् ॥१०९॥
(युग्मम्)
तस्मिंश्च जीवेऽमिततेजसः प्राक् तौ बद्धवैरावनिरुद्धरूपौ ।
क्रोधादुपद्रोतुमढौकिपातां तं बाढमर्थात्मभुवौ वे धर्मम् ॥ ११० ॥
पारीन्द्रदन्तावलकालकालव्यालाग्न्यवेतालकरालरूपैः ।
क्लप्तैः स्वयं तौ बहुधा मुनीशे यावत् खल्वुपप्लवमाधिपाताम् ॥१११॥
तावद् वलारेः प्रियवारवध्वस्तीर्थङ्करं वन्दितुमिद्धरागाः ।
संभूय रम्भाप्रमुखाः प्रचेलुः, को वाऽमृतं वाञ्छति नाऽच्छबुद्धिः? ॥
अद्राक्षुरक्षुद्रतरस्वभावाः क्षुद्रावमुद्रावसुराधमौ ताः ।
तस्मिन् मुनीन्द्रे विविधोपसर्गान् सम्पादयन्तावदयं दुराशौ ॥११३॥
हा ! हा ! किमारब्धमनात्मनीनावस्मिन् मुनीन्द्रेऽत्र समाधिनिष्ठे ? ।
एवं ब्रुवाणा अवतेरुरेता विष्णोः पदाद् विष्णुरथातिवेगाः ॥ ११४॥
आलोक्य तास्तत्र समाव्रजन्तीस्तौ तत्क्षणादेव पलायिषाताम् ।

---

१ औपम्येऽव्ययम् ।

मिथ्यात्वमोहप्रसरो हि तावद् यावन्न जैन्यः प्रसरन्ति वाचः ॥११५॥
अग्रे मुनीन्द्रस्य सुरेन्द्रपत्न्यस्ता नाटकं चक्रुरुदारभावाः ।
वज्रायुधपि प्रणिपत्य भक्त्या जग्मुर्यथास्थानमथ प्रहृष्टाः ॥ ११६ ॥
संपूर्य तां स प्रतिमां क्रमेणान्यत्र व्यहार्षीत् सुपवित्रगात्रः ।
पृथ्वीं सहस्रायुधपार्थिवोऽपि न्यायश्रिया पालयति स्म तद्वत् ॥११७॥
अत्रापरेद्युः परपौरभाग्यभङ्ग्या प्रणुन्नाः पिहिताश्रवाख्याः ।
सूरीश्वराः कलमषपङ्कजातशोषक्रियायां तपना इवाऽऽगुः ॥ ११८ ॥
गत्वा सहस्रायुधभूमिपालस्तान् वन्दते स्म प्रणिधानपूर्वम् ।
पीयूषबन्धोर्गुरुदेशनाया जग्राह तत्त्वं च तदन्तिकस्थः ॥ ११९ ॥
निर्वेदमासाद्य भवोत्थसौख्यादाकार्य पुत्रं शतबल्यभिख्यम् ।
राज्ये निवेश्य व्रतमादिताऽसौ तेषां गुरूणां सविधे नरेन्द्रः ॥१२०॥
साधुः सहस्रायुधनामधेयोऽन्येद्युर्विहारं विदधद् धरिज्याम् ।
वज्रायुधस्य व्रतिपुङ्गवस्य पद्माकरस्येव मिमेल हंसः ॥१२१॥
युक्तौ मुनी रूपरसाविवैतौ द्रव्याश्रयं चित्रमनाश्रयन्तौ ।
भूयस्तरं कालमतीयतुस्तौ पृथ्वीं विहारेण पवित्रयन्तौ ॥१२२॥
तुङ्गं समारुह्य महीध्रमीषत्प्राग्भारसंज्ञं यतिनौ व्यधत्ताम् ।
तत्पादपोपानशनं विलीनस्थामाङ्गमास्थाय समाधिमेतौ ॥१२३॥
व्यापत्तिमापद्य ततस्तृतीये ग्रैवेयके तावहमिन्द्रभूयम् ।
आसेदतुः सञ्चितपञ्चविंशत्यब्ध्यायुषा सङ्कलितं दिवसञ्च ॥१२४॥
प्राग्द्वीपके पूर्वविदेहमध्ये सीतामहानद्युपकण्ठ एव ।
आस्ते विशालः किल पुष्कलावत्याख्यो महीयान् विजयः प्रतीतः ॥१२५॥
तन्मण्डनं मध्यमखण्डमध्ये पूः पुण्डरीकिण्यभिधाऽस्त्यखण्डा ।
आखण्डलश्रीजयकृत् समृद्धया श्रीपुण्डरीकाक्षजनाधिवासा ॥१२६॥
आसीद् नृपस्तत्र धनो रथान्तः शश्वद् गुणश्रेणिविभूषितात्मा ।
गीर्वाणगीर्वाणविरोधिवृन्दसंसेव्यमानक्रमपद्मयुग्मः ॥१२७॥
यस्य प्रतापेन समं दिनेशः साम्यं समाक्रामति नैव किञ्चित् ।
आशासु सर्वासु नवोदयेन पूर्वोदयः काव्यविवर्णनेन ॥१२८॥
अर्थं दधे यः परदौस्थ्यभित्त्यै कामं च यः सन्ततिकामनायै ।
विश्वम्भरानर्थनिवर्तनाय धर्मं च यो धर्मवतां पुरोग. ॥१२९॥

वक्त्रेण मे वक्त्यद एतकेनाऽऽगम्यं त्वया नैव पथा कथञ्चित् ॥१५७॥
सैन्येन याता तव मामकीनदेशोपसर्गः क्रियते परत्वात् ।
मद्देशसीमानमपास्य तत् त्वं वर्त्माऽपरं संश्रय मङ्गलाय ॥१५८॥
एष्यत्यथो यद्यमुनैव मानाद् गोमायुयूथस्य दशां पुरा तत् ।
पारीन्द्रविभ्राजितकन्दरान्तं सावेगमायातवतः प्रयासि ॥१५९॥
इत्युद्धतां तस्य निशम्य वाचं प्रोवाच मेघोऽपि सधैर्यमेनम् ।
नैवेश्वराणां न च किङ्कराणां माहात्म्यमालोकितमस्ति दूत ! ॥१६०॥
सोऽपि त्वदीयः प्रभुरात्मगेहे शौर्यं वदन् स्वस्य कथं निषेध्यः ?।
किं वा न दृष्टाः स्वमठे निविष्टाः स्वं स्वं मतं दर्शनिनो वदन्त ?॥१६१॥
गेहे समायान् विनिवार्यते न कश्चिद् महद्भिः किमु वापि देशे ? ।
अस्मान् निषिध्यन् स तु दूरतोऽपि यत् सात्त्रिकोऽवाचि स पक्षपातः ॥
देशस्य सीमामपि संस्पृशन्तो ये चोपसर्गं रचयन्ति तेऽन्ये ।
स्वाभासमन्यं खलु मन्यमाना यद्वा खलाः क्वापि न विश्वसन्ति ॥१६३॥
न क्षत्रियाणां तनयाः परेऽपि पन्थानमूरीकृतमुत्सृजन्ति ।
राजाधिराजस्य वयं तु पुत्रास्त्यक्तुं किमुत्साहमपि प्रकुर्मः ? ॥१६४॥
एतेन मार्गेण समाव्रजामस्तात्सिंहवृत्तेः ममवेक्षणाय ।
दूतस्त्ववध्यस्त्वमहो ! प्रयाहि वृत्तान्तमेतं प्रवदाऽऽशु तस्य ॥१६५॥
इत्युद्धतां तस्य निशम्य वाचं प्रोवाच दूतः स तदैव गत्वा ।
स्वस्वामिने मानमुन्नताय कुत्राऽपि दूता न हि वञ्चकाः स्युः ॥१६६॥
तत्सर्वमाकर्ण्य सुरेन्द्रदत्तक्ष्मापोऽपि तस्मात् प्रतिघाऽरुणाक्षः ।
संवर्मयामास तदैव सैन्यं योद्धुं पुनः प्रास्थित वाद्यनादैः ॥१६७॥
सैन्योत्थितान्यभ्यधिकं रजांसि विन्यासयन् मूर्धसु सैनिकानाम् ।
शान्तप्रतापानलधूमभानि संग्रामभूप्राङ्गणमासदत् सः ॥१६८॥
अभ्यापतत् सैन्यमवेक्ष्य शत्रोः सुत्रामसैन्यस्य जये समर्थः ।
आरूढवान् मेघरथो रथं स्वं सार्धं बलाढ्येन निजाऽनुजेन ॥१६९॥
सैन्यद्वयस्याऽपि महाभटास्ते स्वस्वामिनिर्देशभृतेऽपि बाणान् ।
अन्योन्यविध्वंसनमानसाः स्म सावेगहुङ्कारभृतः क्षिपन्ति ॥१७०॥
अभ्यापतन्ती पतितारिमुक्ता बाणावली मेघरथस्य वीरैः ।

---

१ गच्छता ।

दूराद् विलूना निशिते क्षुरप्रे स्वस्वामिकार्याऽकरणादिवाऽरम् ॥१७१॥
वाणेन भिन्नो हृदि कश्चनाऽपि वैरिप्रणुन्नेन ममार वीर ।
नैवाऽसिना कश्चन मस्तकेऽपि कर्माऽऽहतास्तेन विदुर्बलीय ॥१७२॥
पृथ्वीभुजो मेघरथस्य सैन्ये प्रत्यर्थिवैरैर्निहता पृथिव्याम् ।
केचिद् निपेतु परिरम्भवृत्त्या प्रख्यापयन्त प्रियतामिवैके ॥ १७३ ॥
सैन्यं विलोक्याऽऽकुलित स्वकीय तौ वैरिसैन्येन तत कुमारौ ।
जन्याय सामर्षमुदस्थिपाता यद् द्रु सहो वैरिपराभवोऽत्र ॥ १७४ ॥
सादी प्रसादी न बभूव कश्चित् कश्चिन्निपादी न तथा विषादी ।
कश्चित् पदातिर्विपदाऽतिरिक्तस्तथौ तयोर्य पुरतो भटोऽपि ॥१७५॥
निर्वासित सैन्यमवेक्ष्य सर्व सर्वसहाधीशसुरेन्द्रदत्त ।
तावभ्यधावद् युवराट्समेत किं वा न कुर्वन्त्यसमानमाना ?॥१७६॥
साक कुमारेण महाबलेन नानायुधैरेष ततान युद्धम् ।
तस्यानुजेनाऽपि सम तदीय सूनु प्रसूनायुधरूपधेय ॥१७७॥
वाढ शराशर्यमितोऽपि खड्गाखड्गि प्रकृष्ट च भुजाभुजीदम् ।
तेषा चतुर्णामपि तत्र तत्र वृत्त न यत् तद्व्यवहारभाजाम् ॥ १७८ ॥
ताभ्या चिर राजकुमारकाभ्या तौ खेदयित्वेति रणानभिज्ञौ ।
सन्मार्गभङ्गप्रवणाविर्तीव सम्रापितौ बन्धनकष्टकर्म ॥ १७९ ॥
देशे तदीयेऽपि नियोगिन स्वानावास्य सद्वासितकीर्तिवासौ ।
श्रीमन्दिर पत्तनमीयतुस्तौ प्रोत्तुङ्गसौधावलिमालित तत् ॥ १८० ॥
श्रीमन्दिराभिख्यपुराधिनाथ श्रुत्वा पुराऽभ्यर्णमुपागतौ तौ ।
प्रत्युज्जगाम प्रसरत्प्रमोद सैन्यार्मिभि सिन्धुरिवेन्दुवृद्धौ ॥१८१ ॥
तावर्थकामाविव पुण्ययोगाद् न्यायप्रतापाविव मूर्तिबद्धौ ।
प्रावीविशत् तोरणराजिराजि क्ष्मावासव स्वीयपुर सपौर ॥१८२॥
पुत्र्योर्द्वयोर्मेघरथेन पाणिमग्राहयद् भूमिपति सुलग्ने ।
प्राग्वत्सलाया प्रियमित्रिकाया किञ्चित् ततोऽस्याश्च मनोरमाया १८३
तस्याऽनुजन्मा सुमर्ति द्विधाऽपि कन्या कनिष्ठा कनकावदाताम् ।
शस्तामुपायस्त गुणैर्विचित्रै रामानुजन्मोर्मिलिकामिवाऽऽर्य ॥१८४॥
दत्त्वा दुकूलानि विभूषणानि राज्यस्वभूतानि गजाश्वकानि ।
त्रीणि प्रयाणान्यनुगम्य चाथ जामातरौ तौ विससर्ज भूप ॥१८५॥

पुत्रान्वितं तं च सुरेन्द्रदत्तं व्यापार्य तन्नीवृति निर्वृतौ तौ ।
तां राजधानीं जनकस्य पुण्यैः क्षेमेण संप्रापतुरृद्धिऋद्धौ ॥१८६॥
लोकोत्तरं तातपदारविन्दमेवाफलं वैषयिकं सुखं तौ ।
ताभिः प्रियाभिः सह संश्रयन्तौ कालं चिरं निन्यतुरेकचित्तौ ॥१८७॥
ज्येष्ठा प्रिया मेघरथस्य पुत्रं सूते स्म काले किल नन्दिषेणम् ।
अन्या पुनः सज्जनचित्ततापमेघप्रभं मेघमुपान्तसेनम् ॥ १८८ ॥
भार्या क्रमात् तस्य कनीयसोऽपि प्रासूत सूनुं रथसेनसंज्ञम् ।
जाम्योस्तयोः स्वस्य सुतोपपत्त्या प्रद्योतयन्तीव तृतीयभावम् ॥१८९॥
अन्तःपुरान्तर्गतशालिकायामन्येद्युरासीनमिलाकलारिम् ।
पुत्रैः कलत्रैः सह नप्तृभिश्च ताराभिऋक्षैरिव चन्द्रमभ्रे ॥१९०॥
नत्वा सुसेनापणसुन्दरी तं सेनासमाक्रान्तचतुर्दिगन्तम् ।
पाणौ दधाना कृकवाकुमीदृक् चित्रं मुदा विज्ञपयाम्बभूव ॥१९१॥
(युग्मम्)
स्वामिन् ! मदीयः कृकवाकुरेष नो जीयतेऽन्यैः कृकवाकुचक्रैः ।
श्येनः कदाचिच्चटकैरिवोर्मिर्बलाद् द्विजिह्वैरिव वैनतेयः ॥१९२॥
एतं मदीयं यदि ताम्रचूडमन्यस्य कस्याऽपि हि ताम्रचूडः ।
उद्दामसारस्तु पराजयेत दीनारलक्षं वितरामि तस्मै ॥१९३॥
अत्राऽपि कस्याऽपि जनाधिनाथ ! यद्यस्ति शक्तः कृकवाकुरङ्ग ! ।
एतं प्रतिज्ञापणमुद्धतं मे बुद्धिप्रसक्तः स पराकरोतु ॥१९४॥
एतत् समाकर्ण्य दृढस्य मात्रा प्राणेश्वरक्रोडनिविष्टयोचे ।
एतेन निर्दिष्टपणेन तन्मे स्वं कुक्कुटं योधय कुर्कुटेन ॥१९५॥
ओमेति राज्ञाऽभिहिते प्रसन्ना देवी ततः सा सुमनोरमाख्या ।
स्वं वज्रतुण्डं चरणायुधं तमानाययामास तदैव दास्या ॥१९६॥
संतुष्टया वाहनतोऽपि किञ्चित् पद्मावतीदेवतया वितीर्णम् ।
मूर्ध्ना प्रतापं प्रवरप्रसादं शोणाभचूडोपधिना दधानौ ॥१९७॥
आनीतमात्रावपि तत्र चैतौ पदैर्विचित्रां गतिमादधानौ ।
स्फारैर्नखैरुच्छ्रितकेसराग्रौ क्रोधोद्धतौ युद्धमहो ! व्यधत्ताम् ॥१९८॥
(युग्मम्)
व्योम्न्युत्पतन्तौ सुतरां पतन्तौ भूमौ चिरं सङ्गरमाधिषाताम् ।

कौतूहलं विश्वदृशां दिशन्तौ धात्रा प्रयुक्ताविव कन्दुकौ तौ ॥१९९॥

अन्योन्यचञ्चुक्रमघातनिर्यद्रक्तौघसंरक्तमभूच्छरीरम् ।
सिन्दूरसंवासनकेलिकर्म कुर्वाणयोरेतकयोरिवाऽत्र ॥२००॥

एतं जयश्रीरधुना वृणीते भूयस्तमां प्रोचुरिदं जनौघाः ।
माध्यस्थ्यमास्थाय तयोरतिष्ठद् युद्धातिरागादिव साऽपि भीता ॥२०१॥

महाविवैतावतियुध्यमानौ वीक्ष्याऽवदद् भूमिभुजां पुरोगः ।
नैवेतयोरेकतरोऽपि जेता विभ्राणयोः सारमिवैकतुल्यम् ॥२०२॥

नीत्वा वचः कर्णपथे सकर्णस्तातस्य तद् मेघरथो बभाण ।
किं कारणं नाथ! न चैतयोर्यत् कस्याऽपि भङ्गोऽत्र जयो न चाऽपि?॥

राजा ततो वित्त्रितयाश्रयोऽसौ प्रोचे जनाः! प्राग्भववृत्तवृत्तम् ।
आख्यायमानं मयका यथावत् कृत्वाऽवधानं शृणुतेदमीयम् ॥२०४॥

प्राग्द्वीपगैरावतवर्षमध्येऽस्त्याढ्यं पुरं रत्नपुरं समृद्धया ।
तत्रातिहार्दौ वणिजावभूतां दत्तस्तथाऽन्यो धनवस्वभिख्यः ॥ २०५ ॥

दाहज्वरार्ताविव तावशान्ततृष्णौ पुरग्रामसुगोकुलेषु ।
संभृत्य पण्यैः शकटाननेकैर्लाभार्थिनावभ्रमतामजस्रम् ॥ २०६ ॥

तृष्णाबुभुक्षापरिभूयमानान् श्रान्तान् परिक्लान्तियुजोऽतिभारैः ।
तौ सौरभेयान् दृढयष्टिघातसङ्घातनैर्वाहयतः स नित्यम् ॥ २०७ ॥

उच्छूनपृष्ठानि तपोपतापाद् भारातिरेकाच्च गवामपुण्यौ ।
निस्सार्य रक्तं निशितक्षुरेण ससायमा तापयतः स हा! धिक् ॥२०८॥

मध्याह्नकालेऽप्यविमुक्तिखिन्नांश्छायाभिगांस्ताडयतः स गाढम् ।
क्रूराशयौ स्वेन वहत्स्वनैस्सु प्मातः स वालाविव कस्य एव ॥२०९॥

(युग्मम)

कूटैस्तुलानाणकमानमुख्यैः कं वञ्चयेते स्म न तौ विमूढौ ? ।
मिथ्यादृशौ निष्करुणौ व्यधत्तां तावन्यदाऽर्थाय मिथो युधं च ॥२१०॥

तावित्थमध्यानपरौ मिथोऽपि युद्ध्वा पुनः शैलटिर्भीतटान्ते ।
मृत्वा च तत्रैव सुवर्णकूटानद्याः प्रतीरे करिणावभूताम् ॥ २११ ॥

नाम्ना पुनः काञ्चनताम्रपूर्वौ श्याम्ना लसन्तौ कलभौ भ्रमन्तौ ।
याहच्छिकौ स्वस्वकयूथयुक्तावन्योऽन्यमालोकयतां मदान्धौ ॥ २१२ ॥

---

१ महिषी । २ शानतरगन् । ३ नरन्देषु ।

प्राग्जन्मवैरात् कुपितौ नितान्तं प्रध्माततात्राभविलोचनौ तौ ।
अम्भोदवद् गर्जितमाचरन्तावधावतां महक्षु मिथो वधाय ॥ २१३ ॥
दन्तैः कराभ्यां च परस्परेण स्थामानुमानेन चिरं प्रहृत्य ।
क्षीणायुषौ युग्मभवाविदेभौ कीनाशवेश्मोपगताविताश्च ॥ २१४ ॥
जम्बूमहाद्वीपगमुख्यवर्षे साकेतसंज्ञे नगरे बभूव ।
श्रीनन्दिमित्रो वणिजो वणिज्याव्यापारभारार्जितऋद्धिपात्रम् ॥२१५॥
तस्याऽश्वविद्वेपिकलत्रयूथे तौ वाहशत्रू भवतः स्म पुष्टौ ।
दुग्धं पिबन्तावुचितं चरन्तौ तारुण्यमासेदतुरेककालम् ॥ २१६ ॥
साकेतशत्रुञ्जयराजदेवनन्दाङ्गजौ श्रीधरनन्दिषेणौ ।
आलोक्य तौ योधयतः स्म बाढं मृत्युं यथा प्रापतुराप्तवैरात् ॥ २१७॥
तत्रैव पुर्यां सममप्यभूतां तौ मेषकौ प्रौढतराङ्गसारौ ।
एकस्तयोः काल इति प्रसिद्धो नाम्ना महाकाल इति द्वितीयः ॥२१८॥
तौ दैवयोगाद् मिलितौ कदाचिदेकत्र वित्रस्तभयौ बलेन ।
युद्ध्वा तथैवोपगतौ गतौ च जन्मान्तरं कुक्कुटभूयमेतौ ॥२१९॥
प्राग्वजयो भाव्यनयोर्न नाऽपि सारेण तुल्येन पराजयोऽपि ।
जन्मान्तराभ्यासवशेन जन्तोः स्यातां जयश्चाऽपि पराजयश्च ॥२२०॥
वैज्ञानिको मेघरथो न्यगादीज्जन्मान्तरावर्जितमेव वैरम् ।
नैवैतयोः, किन्तु निबोध नाथ ! विद्याधराधिष्ठितवर्ष्मजं च ॥२२१॥
तस्यैव तातोऽपि तमादिदेश भ्रूसंज्ञया ज्ञातविशेषतत्त्वः ।
कृत्वाऽञ्जलिं सोऽपि च सप्रपञ्चं वक्तुं वचः प्राक्रमतेदमेवम् ॥२२२॥
जम्बूमहाद्वीपगमुख्यवर्षे वैताढ्यभूमीधर एव वर्ण्यम् ।
श्रेणेः सदाभूषणमुत्तरस्या आस्ते पुरं नाम सुवर्णनाभम् ॥२२३॥
तत्र क्षितीशो गरुडादिवेगः संवेगरङ्गप्रसरत्त्रयश्रीः ।
देवी तदीया धृतिपेणिकाऽभूत् सौभाग्यभङ्गीकमनीयकान्तिः ॥२२४॥
आस्यप्रवेशोन्मुखचन्द्रसूरस्वप्नोपलम्भानुमितस्वरूपौ ।
सा चन्द्रसूरोपपदावसूत सूनू सरूपौ तिलकाभिधानौ ॥२२५॥
तावन्यदा साधितसाधुविद्यौ विद्याधरक्ष्मापसुतौ वयःस्थौ ।

---

१ अश्वविद्वेषी महिषस्तस्य कलत्रम्, महिषी' इति यावत् । २ महिषौ ।
३ प्रामवन्तौ ।

मेरुं गतौ शाश्वतचैत्यनामं निर्माय तच्छायमवेक्षमाणौ ॥२२६॥
कुत्राऽपि सौवर्णशिलातलस्थं चन्द्रप्रभं चन्दनसागराख्यम् ।
दृष्ट्वा मुनिं चारणमिद्धभक्ती नत्वाऽर्हतः शुश्रुवतुः सुधर्मम् ॥२२७॥
(युग्मम्)

तद्देशनान्ते च मुनिं विनम्य तौ प्राञ्जली प्रोचतुरेकतानौ ।
विज्ञानदारिद्र्यपराभवार्तैः पुण्येन सर्वज्ञ इवासि लब्धः ॥२२८॥
तन्नौ प्रभो ! प्राच्यभवाभिधानात् कारुण्यसर्वस्वनिधे ! प्रसीद ।
ज्ञानं यतो ज्ञानवतां परार्थं गाम्भीर्यभाजां सरसामिवाम्भः ॥२२९॥
साधुस्ततोऽभापत धीरभापः सद्धातकीखण्डमहान्तरीपे ।
पौरस्त्यभागैरवताख्यवर्षे नाम्ना पुरं वज्रपुरं समस्ति ॥२३०॥
तत्राऽवनीशोऽभयघोषनामा दत्ताभयः शत्रुपु शङ्कितेपु ।
तस्य प्रियोत्तप्तसुवर्णवर्णा स्वर्णादिशब्दा तिलकाह्वयाऽभूत् ॥२३१॥
तस्याः सुतावस्तसमस्तदोषौ निर्व्याजतारुण्यविराजमानौ ।
ज्येष्ठस्तयोः श्रीविजयो बभूव कान्तः कनीयानपि वैजयन्तः ॥२३२॥
किञ्चात्र वर्षेऽस्ति पुरं वरीयः स्वर्णद्रुमाह्वं कविवर्णनीयम् ।
पृथ्वीपतिस्तत्र बभूव शङ्खः शुद्धोऽपि नान्तःकुटिलः परं यः ॥२३३॥
तद्वल्लभा नामत एव पृथ्वी जज्ञे तितिक्षागुणतोऽपि पृथ्वी ।
स्वप्नस्वप्रसंदर्शनसूचितेदंकन्या च पृथ्वीपदपूर्वसेना ॥२३४॥
नित्यं कलाभ्यामभिश्रयन्ती साऽपि क्रमाद् यौवनमाससाद ।
नान्यो वरोऽस्या इति चिन्तयित्वा राद् तां स्म दत्तेऽभयघोपराजे २३५
पृथ्वीपतिः सोऽपि तयैव सार्धं प्रीतिं दधानः परमामरंस्त ।
चित्ते विवेकं कलयन् प्रवेकं योग्यस्य को वा कुरुतामुपेक्षाम् ? ॥२३६॥
आवेदयन्ती सुरभिं समेतं मल्लीसुमानि स्वकरे वहन्ती ।
राजान्तिकं काऽपि समाजगाम चेटी कदाचिच्चतुरा वराऽऽस्या ॥२३७॥
ज्यायोमहिष्या समवेक्ष्य तां च प्राणेशिता व्यज्ञपि विज्ञवृत्त्या ।
सर्वर्तुकं नाम वनं नृदेव ! पुष्पाधिवासं सुममासवासम् ॥ २३८ ॥
तद् युज्यते तत्समवेक्षणाय गन्तुं महाराज ! विना विलम्बम् ।
उल्लासकः किं न वनस्पतीनां भूमीपतीनां खलु दृष्टिपातः ? ॥२३९॥
(युग्मम्)

शङ्खावनीनायकनन्दना सा पुष्पाणि पाणौ दधती स्ववासे ।
आशा समग्रा अपि वासयन्ती पत्यु समीप समुपैत् तदेव ॥ २४० ॥
आदाय तानि स्वकराम्बुजेन क्ष्मावासव समदमादधान ।
आरामसौन्दर्यविलोकनाय ताभ्या प्रियाभ्या सह नि ससार ॥२४१॥
पत्युर्नियोगाद् नृपशङ्खपुत्री स्वैर भ्रमन्ती वनवीक्षणाय ।
दन्ताभिधान मथनोत्तरस्थ साधु समालोकत लोकवन्द्यम् ॥ २४२ ॥
विज्ञानमुक्ताफलवारिराशिं हर्षप्रकर्षेण मुनिं विनम्य ।
तद्देशनाया परमार्थबोधाद् भर्तारमापृच्छ्य ललौ व्रत सा ॥ २४३ ॥
राजाऽपि तस्या जनन कृतार्थं जानन् स्वचित्ते जनतासमेत ।
पुण्यस्थिते स्व बहु मन्यमान स्वावासमाशिश्रियदिन्दुसौम्य ॥२४४॥
अन्येद्युरेषोऽभयघोषराज प्रासादवातायनसानुवर्ती ।
दिष्ट्या चतुर्ज्ञानमनन्तमीश द्वारे विशन्त सहसा ददर्श ॥ २४५ ॥
उत्तीर्य तस्मात् त्वरित नरेन्द्र पादान् ववन्दे परमेश्वरस्य ।
तद्भक्तदत्तै शुचिभक्तपानैश्चक्रे विभु पारणक तदैव ॥ २४६ ॥
आनन्दसन्दोहसमृद्धचित्तैराधायि देवैरपि पञ्चदिव्यी ।
अन्यत्र तीर्थाधिपतिर्विजह्रे यत्तादृशा स्थैर्यमिद विचित्रम् ॥ २४७ ॥
आसादिताऽनन्तचिदात्मभाव क्ष्मा पावयन् स्वैश्चरणारविन्दे ।
उद्यानके वज्रपुरस्य रम्ये तीर्थाधिनाथ समवासरत् स ॥२४८॥
श्रुत्वा समायातमनन्तसार्वमायुक्तपुम्भ्योऽभयघोषराज ।
तीर्थेशमभ्येत्य विनत्य शक्र स्थित्वाऽनुशुश्राव हितोपदेशम् ॥२४९॥
भूयस्तदन्ते प्रणिपत्य नित्यज्ञान जिन त निजगाद भूप ।
अस्मादृशा भाग्यभरेण युष्मत्पादा समायासिपुरत्र नूनम् ॥२५०॥
तिग्मांशुशुभ्रांशुबलाहकानामभ्युन्नतिर्नो जगता नितान्तम् ।
पुष्णाति सर्वज्ञ ! समीहितानि स्वामिन् ! यथा ते, समता कुतस्तत् ?॥
न्यस्याङ्गज दुर्नयशालमूलप्रोन्मूलने मत्तगज स्वराज्ये ।
यावत् समायामि जिनेश ! तावदेता भुव पावय पावन ! त्वम् ॥२५२॥
मा धा प्रमाद नृप ! वेश्मगस्त्वमि युक्तिमादृत्य जिनेश्वरस्य ।
राजा ययौ सद्म तत स्वपुत्रावाकार्य तौ स्वाभिमत विवव्रे ॥२५३॥
वत्स ! क्रमायातमिद स्वराज्यमादत्स्व स त्व विजयाऽतिसरत्र ! ।

स्व नेजयन्ताऽस्य च योवराज्य तेजोजयन्ताभ ! समाश्रयस्व ॥२५४॥
चरसावह सस्मृतिदु खभीतस्तीर्थङ्करानन्तपदाब्जमूले ।
दीक्षा समादाय तपासि तप्त्वा कर्माणि जित्वा च सुखीभवामि ॥२५५॥
ताभ्या सुताभ्या विहिताञ्जलिभ्या प्रोचे यथा तात ! मता तवेयम् ।
सातायं दीक्षा न तथैव किं नौ प्रायो हि पुत्रा जनकस्वभावा ?॥२५६॥
युष्मत्समीहानुपलम्भतोऽपि राज्ये सुख तात ! न तर्कयाव ।
मिष्ट विशालाम्रततीफलं चेद् गोपालबाला किमु तत् त्यजन्ति ?॥२५७॥
दीक्षासुख तात ! यथा तवेष्ट किं नावयोरेव तथा प्रतीतम् ? ।
रम्भाफलाना हि पचेलिमाना विज्ञो रस विन्दति किं न बाल ?॥२५८॥
दीक्षाऽऽवकाभ्या च तदभ्युपेया तस्या फले द्वे कलयाव एते ।
त्वत्पादपद्मद्वयपर्युपास्ति सप्रत्यमुत्राऽपि पर पद नौ ॥ २५९ ॥
तत्प्रोक्तमीदृग्घृदये निधाय प्रोवाच भूमीपतिरेव भूय ।
दीक्षोद्यमो यौवन एव वत्सो ! मृद्वङ्गयोर्वामतिदुष्करोऽयम ॥ २६० ॥
दीक्षा तपोभि सफला, तपासि कर्तु न शक्यानि मृदुप्रतीकैं ।
युष्मादृशैं, तद्वचसा ममाऽपि राज्य युवा पालयत चिराय ॥ २६१ ॥
बाल्ये विशिष्याऽध्ययन विधेय तारुण्यकाले पुनरर्थकामौ ।
धर्माय तस्यापगमे तपस्याऽप्येत क्रम सश्रयत श्रिये च ॥ २६२ ॥
श्रुत्वेदमीदृक् स्वपितुस्ततस्तौ प्रत्यूचतुस्तात ! निगम्यतेऽद्य ।
स्थाने समस्त, यदि धर्मराजो ब्रूयान् प्रसन्नोऽभयदानपात्रम ॥२६३॥
स न्याधिकाराऽप्रतिबन्धनस्तन् कस्याऽपि नाऽदाद् न च दास्यतीति ।
जाने प्रजानायक ! तादृशस्य दृष्टे श्रुतेश्चाविपर्ययोपपत्त्या ॥ २६४ ॥
तत्तात ! दीक्षाग्रहणेऽन्तराय मा धा महाधामधुतोष्णधामन् ! ।
उत्साहका एव महानुभावा धर्मप्रवृत्तौ न निवर्तका स्यु ॥२६५॥
इत्याग्रह भूमिपतिस्तदीय मत्वा व्रतादानविधौ विधिज्ञ ।
कस्याऽपि दायादतनूभवस्य विश्राणयामास तदेव राज्यम् ॥ २६६ ॥
ताभ्यामथ क्षोणिपति सुताभ्या सार्धं स गत्वा जिनसन्निधानम् ।
सस्तारनिस्तारनिबद्धकक्षा जग्राह दीक्षा जननण्र्यमान ॥२६७॥
आत्तव्रताभ्या सह सोऽपि ताभ्या शिक्षा द्विधाऽपि प्रतिपद्यमान ।
तद्विंशतिस्थानकवित्ततीर्थकृन्नामकर्माऽर्जयति स्म पुण्ये ॥ २६८ ॥

सचित्य भूयांसि चिरं तपांसि मृत्वा त्रयोऽप्यात्तसमाधिभावाः ।
ते जज्ञिरे द्वादशकल्पलोके देवोत्तमा भोगसमृद्धिभाजः ॥ २६९ ॥
अत्रान्तरेऽस्मिन् प्रथमेऽन्तरीपे पूर्वे विदेहे विजये समृद्धे ।
श्रीपुष्कलावत्यभिधे शुभेऽस्ति सा पुण्डरीकिण्यसमा श्रिया पूः ॥२७०॥
हेमाङ्गदः क्ष्मामघवा प्रशास्ति शास्ता सुवर्णैर्विविधैः पुरीं ताम् ।
यस्याऽरयो न्यायमवेक्ष्य भेजुर्द्रुर्गाणा इवाऽरण्यमपेतसाराः ॥ २७१ ॥
तद्व्रप्रमालिन्यभिधानदेवीकुक्षौ स जीवोऽभयघोषराजः ।
च्युत्वा ततो द्वादशदेवलोकात् पुण्यप्रकर्षादुदपादयनर्घ्यान् ॥ २७२ ॥
सप्तद्विरुक्ते प्रथितप्रभावे स्वप्नैः समावेदिततीर्थकृत्त्वम् ।
प्रासूत देवी समयेऽथ सूनुं प्राचीव सूरं द्युतिदीपिताशम् ॥ २७३ ॥
सर्वं समाकम्प्य घनैः रथाघैर्दिक्चक्रवालं भविता जयाढ्यः ।
इत्यप्रपुण्यप्रसरः पिता यं नाम्ना रथान्तं घनमभ्यधत्त ॥ २७४ ॥
राजव्रजः क्षीणवसुः समीपं यस्याऽऽप्य पूर्णः पुनरेति दूरम् ।
मन्दं द्विपन् मित्रसुहृज्जगत्या द्वेधा क्षमां सम्प्रति सोऽपि पाति ॥२७५॥
च्युत्वा तावपि वैजयन्तविजयौ विद्याधरौ वा क्रमा-
ज्जातावित्यभिधाय चारणमुनिर्मौनं समालम्बत ।
तौ तु द्रष्टुमिहागतौ श्रुतचरं प्राग्जन्मतातं त्वका
मेतत्कुर्कुटविग्रहे विदधतुः कौतूहलात् सक्रमम् ॥ २७६ ॥
एतावेव च भोगवर्धनगुरोः पार्श्वे प्रयातावितः
प्रव्रज्यां प्रतिपद्य केवलविदः लब्ध्वा शिवं यास्यतः ।
श्रुत्वैवं चरितं निजं प्रकटितात्मानौ ततस्तौ सुतं
मन्यौ मान्यनृपं विनम्य भवनं विद्याधरौ जग्मतुः ॥२७७॥
एतत् तावपि कुक्कुटावविकटं श्रुत्वा विरक्ताशया-
वेवं चिन्तयतः स्म धिग्धिगिमिकां दुःखास्पदं संसृतिम् ।
आवाभ्यां सुररत्नसोदरमिदं सम्प्राप्य मानुष्यकं
हाऽऽर्तध्यानकुकर्मभिः कथमहो ! निर्वासितं सर्वदा ? ॥२७८॥
ध्यात्वैवं चिरमूचतुर्निजगिरा तौ ताम्रचूडौ नृपं
कृत्वाऽनुमहमादिश त्वमधुना किं कुर्वहे स्वं हितम् ? ।
ज्ञानज्ञाततदीयगीर्घनरथोऽथोवाद देवो जिनः

साधुर्वा गुरुरस्तु केवलविदा प्रोक्तस्तु धर्मः सदा ॥२७९॥
इत्थं तौ प्रतिपद्य तद् घनरथादिष्टं पुनः कुक्कुटौ
स्वीकृत्यानशनं दिनैः कतिपयैर्मृत्युं समासेदतुः ।
भूतौ भूतपती विभूतिकलितौ तौ भूतरत्नाभिधा-
टव्यां स्वर्णकताम्रशब्दरुचितौ चूलाभिधानौ ततः ॥२८०॥
ज्ञात्वा प्राग्भवमात्मनोऽवधिविदा कृत्वा विमानं महत्
तौ श्रीमेघरथं परोपकृतिकृन्मूर्धावतंसं जवात् ।
अभ्येत्य प्रणिपत्य शुद्धविनयावेनं मुदा प्रोचतु-
र्देवौ भूतपती बभूविव भवद्दृष्टिप्रसत्त्याऽपि नौ ॥२८१॥
तिर्यग्योनिमहाकरालनरके दुःखप्रपञ्चाकुले
पापप्रायकुकर्मवैरिभिरलं क्षिप्तौ प्रसह्याऽपि नौ ।
कारुण्यामृतसागरप्रतिकृति स्वामिंस्त्वया बिभ्रता
चञ्चद्वागुपदेशलक्षणगुणेनाऽऽयामिनैवोद्धृतौ ॥२८२॥
तन्नावभ्युपपत्तिलब्धिपरयोरेतद् विमानं विभो-
ऽध्यारुह्य प्रतिपद्धिलोकितमिमं लोकं समालोकय ।
इत्थं प्रार्थित आहिताञ्जलितया ताभ्यां परीवारयुक्
तं श्रीमेघरथोऽध्यरोहदसमं दीप्रप्रभामण्डलम् ॥२८३॥
तद् व्योम्न्युत्पतति स्म भास्वरमणिप्रद्योत्यमानाम्बरं
देवावञ्जलिपूर्वमूचतुरिमं संपश्य संपश्य च ।
द्वीपक्षेत्रसमुद्रभूधरनदीस्वर्णाद्रितच्चूलिका-
वैताढ्याद्रिसनातनार्हतमहाचैत्यानि रम्याण्यपि ॥२८४॥
संख्यामानसमन्वितानि विदितान्यन्यानि सर्वाण्यलं
चित्ताश्चर्यविधायकानि बहुशः संदर्श्य संदर्श्य च ।
आनीय स्वपुरीं विमुच्य भुवने तौ तं प्रणम्याऽधिकं
वृष्ट्वा रत्नसमुच्चयं स्तुतिपरौ स्वं प्रापिधपातां पदम् ॥२८५॥
अन्येद्युर्वसुधापतिर्घनरथो लौकान्तिकैर्दैवतै-
रभ्येत्य प्रणिपत्य भक्तिकलितैर्विज्ञप्त आम्नायवशात् ।
तीर्थं तीर्थपते [1] प्रवर्तयतरामेवं विचिन्त्य स्थितिं
राज्ये मेघरथं निवेश्य तनयं तद्यौवराज्ये दृढम् ॥२८६॥

दानं वात्सरिकं प्रदाय जगतां वात्सल्यकृत्पुत्रयोः
शिक्षां च प्रकृतिप्रपालनविधावादाय दीक्षां विभुः ।
छद्मस्थः कतिचिद् दिनानि भगवान् निर्माय बाढं तपो-
दुष्कर्माणि निहत्य केवलविदा कैवल्यमाप क्रमात् ॥२८७॥
श्रीमान् मेघरथोऽनुजाश्रितपदः क्ष्मामण्डले पालय-
न्नन्येद्युः सपरिच्छदोऽवनिपतिर्भृत्योपरोधाद् गतः ।
क्रीडानां रचनाय देवरमणोद्याने महावञ्जुल-
द्रोर्मूले महिषीसखो व्यरचयत् संगीतकप्रेक्षणम् ॥ २८८ ॥
प्रादुर्भूय तदैव तस्य पुरतो भूताः परोलक्षकाः
संगीतं विदधुस्तरामभिनयैश्चित्रैर्विचित्रैरपि ।
जिह्वानामहिराट् सहस्रयुगलीमक्ष्णां च यद्वीक्षितुं
स्तोतुं च व्यधितेव सेवकतया प्रार्थ्यैव लक्ष्मीपतिम् ॥२८९॥
ते तारं विविधाकृतिस्वरभृतो यावद् व्यधुस्ताण्डवं
राट्प्रीत्यै दिवि तावदाविरभवच्चैकं विमानं महत् ।
तन्मध्ये ददृशेऽथ कश्चन नरो दृश्याकृतिः कान्तिमान्
पौलोम्येव पुरन्दरः प्रमदया युक्तः कयाऽप्येकया ॥२९०॥
क्ष्मापोऽथ प्रियमित्रया निजगदे देव्या समासन्नया
कोऽयं देव ! नरश्च का पुनरियं नारी किमत्रागतौ ? ।
भूमीशोऽभिदधे ततः प्रथमके द्वीपे प्रिये ! भारते
वैताढ्येऽस्त्यलका पुरी परमुदक्श्रेणेर्महाभूषणम् ॥२९१ ॥
श्रीविद्युद्रथखेचरप्रभुरलं तां पालयामासिवान्
देवी मानसवेगिका समभवत्तस्य प्रशस्याशया ।
नाम्ना सिंहरथस्तयोः समजनि प्रद्युम्नरूपः सुतो-
मात्रा प्रेक्षितसिंहयुग्यकरथस्वप्नप्रणीताभिधः ॥२९२॥
कन्यां वेगवतीं विवाहितचरोऽभाद् यौवराज्यश्रिया
क्रीडाभूधरदीर्घिकावनसरित्स्थानेषु सार्धं तया ।
रेमे सिंहरथश्च मन्मथसमः सौभाग्यभङ्ग्या युवा
विद्वांसः परिकीर्त्तयन्ति यदि वा क्रीडाफलं यौवनम् ॥२९३॥
बुद्ध्वाऽन्येद्युरसारमेव सकलं संसारमुर्वीपतिः

पुत्रं सिंहरथं निधाय निजके राज्ये विराजन्नयम् ।
प्रव्रज्यां प्रतिपद्य वन्द्यसुगुरोः पादारविन्दान्तिके
चारित्रं प्रतिपाल्य चारु सुचिरं लेभे क्रमाद् निर्वृतिम् ॥२९४॥
राजा सिंहरथोऽपि विक्रमनया विद्याधराधीश्वरान्
सर्वानेव विजित्य चक्रिकमलालीलास्पदं सोऽजनि ।
सौर्ये जाग्रति यस्य केवलमहो ! सूरे स्थिता सूरता
शून्ये व्योम्नि पलाय्य तस्थुषि तथा चाभ्रे लयं मेजुषि ॥२९५॥
भूमीन्द्रः स परेद्युर्विनिशि परं विद्राणनिद्राभरो-
दध्यौ निष्फलमेव मे गतमिदं जन्मेक्षुसूनं यथा ।
यन्नाऽऽनन्दिपि नाऽऽर्चयं जिनपतीन् नो केवलज्ञानिनं
काञ्चिन् काऽपि महाप्रमादजलधौ मज्जन्मनोमीनकः ॥२९६॥
तत् सम्प्रत्यपि भावतो जिनपतीन् नत्वा कृतार्थीकरो-
म्यात्मानं स कथं भवेन्न हि भटो नष्टोऽपि युध्येत यः ? ।
ध्यात्वैवं हरिधातकीशकल्के द्वीपे विदेहेषु सो-
ऽप्राचीनेषु च सत्रनाम्नि विजये सङ्केतगेहे श्रियाम् ॥२९७॥
सीतोदोत्तरतीरगे पुरवरे गत्वैव खड्गे पुरे
वन्दित्वाऽमितवाहनं जिनपतिं देव्या समं भक्तिभाक् ।
आकर्ण्याऽमृतसोदरामधिरसां तद्देशनां शर्मदां
भूयोऽपि प्रणिपत्य तं च ववले हृष्टः पुरीं स्वां प्रति ॥२९८॥
(युग्मम्)
अत्रोर्ध्वं व्रजतो जवादतितरामस्य प्रिये ! चस्खले
यानं मानपरिग्रहाद् विनयवद् वादाच्च सौजन्यवत् ।
एतस्य स्खलनं बभूव किमिति ज्ञातुं त्वधस्ताद् दृशः ?
यावत् प्रैरयदेष तावदपि मामत्र स्थितं प्रैक्षत ॥२९९॥
एष क्रुद्धिवशः समागमदथोत्क्षिप्तु चकोराक्षि ! मां
वामो वामकरेण नाम मयकाऽप्याक्रम्यते सैषकः ।
वीक्ष्यैतं विरसं रटन्तमियमप्येतत्प्रिया दैन्यभाग्
भीता मां शरणं बभाज रभसात् किंवाऽबला कुर्वताम् ? ॥३००॥
कारुण्येन मया व्यमोचि सुभगे ! तन्मुक्तमात्रं पुरः
शक्तिं मे कलयन् विकुर्व्य बहुधा भूतान् प्रभूतानिमान् ।

सङ्गीतं रचयाचकार चतुरः सङ्गीतकर्मण्ययं
भक्तिः का न विभावयन्ति यदि वा दत्ताभया: प्राणिनः ? ॥३०१॥
प्रोचेऽथ प्रियमित्रया पुनरिदं प्राणेश्वर ! प्राग्भवे
हार्यं किं कृतमेतकेन सुकृतं जातो यतोऽयं विभुः ?।
राजाऽप्याऽऽख्यदिदं च पुष्करवरद्वीपार्धके पूर्वगे
क्षेत्रे मुख्यतमेऽस्ति शङ्खपुरकं नाम्ना समृद्धं पुरम् ॥३०२॥
राड्गुप्ताह्वय आस नीतिविदुपः चूडामणिस्तत्र च
प्रख्यातः कुलपुत्रकः समभवद् दारिद्र्यविश्रामभूः ।
प्रेष्यत्वाधिगताशनः प्रतिदिनं तस्य प्रिया शङ्खिका
साऽपि स्वप्रियवत् परोदवसिते कर्माणि नित्यं व्यधात् ॥३०३॥
स्त्रीपुंसावपि सङ्खपर्वतगिरिं तावन्यदा प्रस्थितौ
नानाशाल्मसमाकुलं फलभरानानेतुमुत्कण्ठितौ ।
अद्राक्षं तत्र यदृच्छया विदधतौ धर्मोपदेशे रतं
वीक्षामासतुरात्मगुप्तिपरमं श्रीसर्वगुप्तं मुनिम् ॥३०४॥
विद्याभृत्कुलमध्यगं मुनिपतिं तौ तं स्फुरत्सम्मदौ
वन्दित्वा पुरतो निषेदतुरिलापृष्ठप्रतिष्ठासनौ ।
आचष्टेऽपि विशेषतः शुभमतिर्धर्मं तयोरार्हतं
दुःस्वादुः स्वकथाविशेषविलयाद् यत् साधवः स्युः समाः ॥३०५॥
दिष्ट्या धर्ममवस्थिते मुनिपतौ तावेवमाचख्यतु-
र्जातं जन्म च जीवितं च सफलं त्वद्दर्शनाद् नौ प्रभो !।
स्वेनैवोपकृतौ च यद्यपि कृती तत् त्वं तथाऽप्यर्थितो
दुःखोच्छेदनिबन्धनं समुचितं किञ्चित्तपो नौ दिश ॥३०६॥
तद्योग्यत्वमयं विचार्य भगवान् श्रीसर्वगुप्तस्तपो
द्वात्रिंशत्पदपूर्वकं च तकयोः कल्याणनामादिशत् ।
तत्तावभ्युपगम्य सद्मनि गतौ भावाच्चतुर्थैस्तपो-
द्वात्रिंशत्प्रमितैस्त्रिरात्रियुगलैनैतौ विधत्तः स्म तत् ॥३०७॥
द्वारं निक्षिपतः स्म यावदिमकौ दृष्टिं तपःपारणे
ऽभ्यायान्तं मुनिपुङ्गवं धृतिधरं द्वेधाऽपि तावद् गृहे ।
अद्राष्टां सुकृतस्य सञ्चयमिव प्रोन्मीलदानन्दतः
शुद्धान्नैः प्रतिलाभ्य शेषममृताहारं च तौ जक्षतुः ॥ ३०८ ॥

१ उदवसितं गृहम् ।

ग्रामादौ विहरन् कदाचिदभय श्रीसर्वगुप्तो गुरु-
स्तत्राऽऽगात् स च पुण्यरश्मिभिरिवाकृष्टस्तयोरायतै ।
गत्वा त प्रणिपत्य भक्तिकलितो पीत्वा पुनर्वाक्सुधा
वैराग्योपचयाद् विभिन्नकलुषो तावाददाता व्रतम् ॥ ३०९ ॥
आचामाम्लसतपदोपपदग तद्वर्धमानाभिध
गीतार्थ सुगुरोगिरा स विदधे शुद्ध तप शुद्धधी ।
प्रान्ते चानशन विधाय सुकृती स ब्रह्मलोके दिवे
देवत्व दशसागरस्थितिमित सप्राप पापक्षये ॥ ३१० ॥

सा मल्लिकाऽपि विहितोग्रतप प्रपञ्च-
सप्राप्तपञ्चमसुरालयलक्ष्मसौख्या ।
आयु स्वकीयमुपभुज्य दशाब्धिमान
प्राणप्रियाऽस्य समजायत दश्यरूपा ॥ ३११ ॥

एतद्रोप निज पुर परिगतो राज्ये निवेश्याङ्गज
मत्तातस्य पदान्तिके भवभिदे दीक्षामुपादास्यते ।
दुष्कर्माणि निहत्य तीव्रतपसा विज्ञानमासाद्य चै-
तस्मिन्नेव भवे सनातनसुख मोक्ष पुन प्राप्स्यति ॥ ३१२ ॥
इत्थ सिंहरथो निशम्य तदिद वैराग्यसम्पादक
श्रीमन्मेघरथोदित निजपुर गत्वा निधायात्मजम् ।
प्राज्ये राज्यभरे ततो घनरथाभ्यर्णे गृहीत्वा व्रत
निर्मायव तपासि निर्ममवर स्वर्लोकमासेदिवान् ॥३१३॥
नरपतिरय तत्रोद्याने स्वय प्रियमित्रया
सह दयितया क्रीडा कृत्वा चिराय वसन्तजाम् ।
नरपतिकुले सङ्गीतिक्षासविस्मयमानसै
प्रकटितपथ कल्याणेनाऽविशद् नगरीं निजाम् ॥ ३१४ ॥
आसीत् श्रीगुरगच्छमौलिमुकुटश्रीमानभद्रप्रभो
पट्टे श्रीगुणभद्रसूरिसुगुरुश्चारित्रभाजा गुरु ।
तच्छिष्येण कृतेऽत्र षोडशजिनाधीशस्य वृत्ते महा
काव्ये श्रीमुनिभद्रसूरिकविना सर्गोऽयमेकादश ॥ ३१५ ॥

॥ इति श्रीशान्तिनाथचरिते एकादश. सर्ग. ॥

अर्हम्

अथ द्वादशः सर्गः ।

सकलतारकमण्डलनायकः प्रबलमन्मथतापविनायकः ।
जिनपतिर्भवतात् सततं मुदे शुभवतां भवतां मृगलाञ्छनः ॥ १ ॥
अथ स मेघरथः श्रितपौषधः सदनमध्यगपौषधसद्मनि ।
समुपदेष्टुमुपाक्रमताऽन्यदा वैसुधियां सुधियां सुवृषं पुरः ॥ २ ॥
क्षितिभुजोऽस्य तदाङ्कतले पतत्कलरवो न्यपतत् सभयोऽवरात् ।
स्वमेव मामिति मर्त्यगिराऽवदत् स जगदे जगदेकनियोगिना ॥ ३ ॥
अयि ! विहङ्गम ! भीतिरपास्यतां निजकुलायवदत्र निवास्यताम् ।
इति नृपेण कृपारससिन्धुनाऽप्यभिहितेऽभिहिते स समाश्वसन् ॥ ४ ॥
अशनभूतमिमं मम भूपते ! झटिति मुञ्च च तद्वदुदीरयन् ।
इति तदैव शशादनपक्षवाननुपदं नु पदं ददताऽऽगमत् ॥ ५ ॥
नृपतिरेवमुवाच शशादनं कथमहं तवकैतकमर्पये ? ।
न खलु बाहुभवा गणनाङ्कके प्रददते ददते शरणागतम् ॥ ६ ॥
द्विज ! तवाप्युचितं न भवेदिदं यदपरासुमर्दनजाङ्गलैः ।
स्ववपुषः क्रियते परिपोषणं नयवताऽयवता च विगीयते ॥ ७ ॥
अदनगोचरतामुपपादितेऽपि पतगेऽत्र विनाशमवापिते ।
सुहितता क्षणिका तव सेत्स्यते जननमाननमाऽस्य तपस्विनः ॥ ८ ॥
असव एव न तेऽपि सनातनाः पिशितभक्षणलक्षणकर्मणा ।
खग ! भवांश्च भविष्यति निश्चितं कुगतिसङ्गतिसञ्चितदुःखभाक् ॥ ९ ॥
निरपराधशरीरिनिबर्हणं तदितजाङ्गलभक्षणनिर्मितिः ।
द्वयमिदं नरकाध्वनि सम्बलं निजगदुर्जगदुत्तमशेखराः ॥ १० ॥
भवति पिच्छविकर्षणतो यथा ननु तवाऽपि मुहुःमहद्वेदना ।
किमपरस्य तथा न विचिन्त्यतामनुभवो नु भवोत्तर एव तत् ? ॥ ११ ॥
वपुरिदं शरदभ्रचलाचलं विगणयंश्चपलाचपलं बलम् ।
इह परत्र च निर्वृतिमर्हतामतनुतां तनुतां वधमेव कः ? ॥ १२ ॥

---

१ वसुगंम्यता अर्था धियो गुणा शुभ्रादयो येषां तेषां, कारणे कार्योपचारात् ।
२ रवः । ३ समाश्वासनात् । ४ ईदृग्भाषी । ५ आगतवान् ।

तदपहाय शरीरिपरासनं पललभक्षणलोलुपतां तथा ।
खग ! दयापर एधि, यथेदृशी न भवता भवतां पुनराप्यते ॥ १३ ॥
अथ खगोऽपि जगौ जगतीपतिं तदुदितं विनिवेश्य हृदन्तरे ।
अवितथं तदिदं प्रतिपन्नवानशरणः शरणं यदयं त्वकाम् ॥ १४ ॥
परमहं क्षुधया परिपीडितः क्षितिपते ! शरणं कमधिश्रये ? ।
क्वचन नाभ्युपपत्तिविनिर्मितौ किमहता महतामविशेषता ? ॥ १५ ॥
इममहो ! परिपालयितुं यथा प्रयतसे न तथा कथमेव माम् ?, ।
क्षुदुपतापहतासुगणोऽपि मेऽस्मयते मयते च विदां पराम्[1] ॥ १६ ॥
सुकृतकिल्बिषतत्त्वविवेचनं भवति सौख्यवतामिह भूस्पृशाम् ।
विदधते किमकृत्यमहो ! न वा सुकृतिनः कृतिनश्च बुभुक्षिताः ?॥१७॥
तदमुना सुकृतेन कृतं प्रभोऽशनमिदं मम सांप्रतमर्पय ।
जगति पुण्यवतां समवृत्तितां सुमनसो मनसो ध्रुवतेतराम् ॥ १८ ॥
तदशने पतगस्य दुराग्रहं समवलोक्य जगाद धराधवः ।
कलय मे श्रुतशास्त्रविबोधतः सहृदयं हृदयं च दयाश्रितम् ॥ १९ ॥
फलरवेण समं तुलितं निजं पिशितमर्पयितुं भवतः क्षमे ।
न पुनरेतमहं करुणारसप्रसरवासरवाऽर्जितकीर्तिभृत् ॥२० ॥
तदुदिते मुदितेन पतत्रिणाऽभ्युपगते नृपतिः स तुलांशके ।
न्यधित पत्रिणमेकत एकतः स्वपललं पललम्भनलालसः ॥ २१ ॥
क्षुरिकया प्रविदार्य्य तनुं पलं क्षिपति तत्र नृपः स यथा यथा ।
अपि परं पतगोऽपि तथा तथा क्षितिभृतोऽतिभृतोऽजनि भारवान् ॥२२॥
खगमवेक्ष्य महाविवेषं नृपः स्वमपि तत्र पवित्रमतिर्न्यधात् ।
विततमात्तरसत्यमपेक्षयाऽप्यतुलया तुलया तुलयन्निव ॥ २३ ॥
समधिरूढचरं च ततस्तुलां जनपरम्परया विनिशम्य च ।
सचिवमुख्यजनाः समुपागताः सपदि संपदि संचितमूचिरे ॥ २४ ॥
भवति जीवति जीवति केवलं सकल एव जनोऽवनिनायक ! ।
स्फुरति देहिनि देहमधिश्रिते करणकारणकार्यसमुच्चयः ॥ २५ ॥
पतगमात्रकलेवरपालने प्रकृतिपालनकर्मणि कर्मठम् ।
न कथमिच्छसि जीवितमात्मनो वसुमती सुमतीशरताऽस्ति यत् ?॥२६॥

१ मंगारिता । २ किं न अदृता ? अत्रादिवदेवेत्तरपं । ३ विवर्धा भार ।

कपटनाटकसूत्रणसूत्रभृत् किमसुरो यदि वा सुर एषकः ?।
कचन भार इयान्न निरैक्ष्यत प्रवसतां वसतां च पतत्रिणाम् ॥ २७ ॥
बहुलमल्पकृते गमयन् जनो न विदुषां धुरि कीर्तनमाश्रयेत् ।
इति विमृश्य निजाऽसुपरिक्षयाद् विरम सारमसारमतः परम् ॥२८॥
उपकृतीः कुरुषेऽत्र परःशताः पुरुपरूपममुं परिपालयन् ।
सुकृतमर्जयसे सुतरां प्रभो ! मतिमताऽतिमताः क न नीतयः ?॥२९॥
इति ससंभ्रममभ्रमतो हिताः नरपतिं प्रति यावदवादिषुः ।
प्रकट एव च तावदभूत् पुरः सुरवरो रवरोपविनाकृतः ॥ ३० ॥
स नृपतिर्विमलामलकप्रमप्रवरमौक्तिकहारविराजिना ।
दलयता रुचिभिस्तमसां चयं सुमनसा मनसाऽभिदधे ततः ॥ ३१ ॥
तव समीक्ष्य गुणान् गणनातिगान् ध्रुवमुवाद कणादमुनिर्गुणान् ।
स्वसमये गुणसौरभवर्जितान् स्वमतिसंमतिसङ्कलितान् वयः ! ॥३२॥
वृषभवाहनदैवतनायकः समितिवर्णनमाधित तावकम् ।
अहमहो ! असहिष्णुरिहाऽऽगमं प्रभवतो भवतोऽथ परीक्षणे ॥ ३३ ॥
श्रितभवान्तरवैरविषावशौ युधमधिश्रयतः स्वरसादिमौ ।
समधिशय्य तनुं च तदेतयोर्वितत्तवांस्ततवाक् ! सुपरीक्षणम् ॥ ३४ ॥
इति निवेद्य विधाय धराधवं झगिति सज्जमियाय दिवं सुरः ।
नृपतिमन्त्रिजना अनुयुञ्जते स्म विनता विनतातनुभूरुचः ॥ ३५ ॥
वद विभो ! पतगावयि ! कीदृशौ प्रथमजन्मनि वैरनिबन्धनम् ।
किमनयोस्त्रिदशोऽपि च कीदृशोऽजनि भवे निभवेतनहृत् पुरा ?॥३६॥
नृपतिरभ्यधित प्रथमान्तरीपकशिरोमणिभूषणसन्निभे ।
अभवदैरवते किल पद्मिनीशकलकं कलकण्ठनरं पुरम् ॥ ३७ ॥
इह बभूव च सागरदत्तको वणिजवृत्तसितश्रुतिसागरः ।
वरमिदंगृहिणी जयसेनिका कमलयाऽमलया सदृशाकृतिः ॥ ३८ ॥
अभवतां तनयौ सनयौ तयोर्विनयिनौ धननन्दनसंज्ञकौ ।
स्वजनकाऽनुमतेन कदापि तौ स्वविषयं विषयं प्रति चेलतुः ॥ ३९ ॥
अमितपण्यभरोद्धुरसार्थिनौ कतिपयैर्दिवसैर्व्यवहारिणौ ।
पुरमवाप्य च नागपुरं स्थितिं धनवतां नवतां मणिमापतुः ॥ ४० ॥

१ आत्मानम् । २ वैनतेयवर्णौ इत्यर्थः । ३ पद्मिनीखण्डं नाम । ४ अन्यदेशम् ।

तदुपलब्धिविधावपि शङ्खिकाभिधनदीपुलिने मिथ एव तौ ।
कलहमादधतौ च तदन्तरे निपतितौ पतितौ मृतिमीयतुः ॥ ४१ ॥
अहह ! लोभविजृम्भितमेतकद् यदिमकौ सुहृदावपि सोदरौ ।
उपलरूपमणेरुपलब्धये सकलहं कलहंसगतौ मृतौ ॥ ४२ ॥
उपगतावथ तौ वणिजौ खगावभवतां भवताण्डवदर्शिनौ ।
प्रथमजन्मविरोधवशादिमौ कलयतो लयतोदपरौ स्म तत् ॥ ४३ ॥
नृप इतश्च शुभानगरीश्वरस्तिमितसागर आस गुणाकरः ।
अहमभूवमितो भवतो भवे तनुभवोऽनुभवोऽस्य च पञ्चमे ॥ ४४ ॥
अभिधया प्रथितोऽस्म्यपराजितो बलपदं सबलं कलयन् मुदा ।
दृढरथस्तु तदाऽपि ममाऽनुजो नगदया गदया समलङ्कृतः ॥ ४५ ॥
प्रतिहरिर्दमितारिरिति श्रुतः समभवद् दमितारिगणस्तदा ।
मदनुजेन रणे स हतः कृते प्रियतमाऽऽयतमाकनकश्रियः ॥ ४६ ॥
भवपथे कलुषात् सुचिरं भ्रमिं समनुभूय ततो भरतेऽत्र सः ।
निकृतिनामनदीपुलिने कृपारसमया समया स्फटिकाचलम् ॥ ४७ ॥
अजनि सोमभतापसनन्दनो विहितबालतपा मृतिमापिवान् ।
अथ सुरूप इति प्रथिताभिधो विबुधतां बुधतां च समासदत् ॥४८॥
(युग्मम्)
द्विमिततविपनायककल्पितं स मम वर्णनमात्रमसूयया ।
असहमान उपेत्य परीक्षणं व्यधित वाध्यतवाध्यतमोभरः ॥ ४९ ॥
इति निशम्य महीन्द्रनिवेदितं विदितपूर्वभवौ विरतौ भवात् ।
समधिगम्य विमूर्छनमूर्व्यधो न्यपततां पततां प्रवराविमौ ॥ ५० ॥
नृपतिभृत्यजनैर्व्यजनैरलं मलयजैरपि वीजितचर्चितौ ।
समुपलभ्य च चेतनितां खगाववदतां वदतां वरमेव तम् ॥ ५१ ॥
अघकथः खलु पूर्वभवं यथा नरपते ! निरपेक्षतयैव नौ ।
त्वमुचितं प्रतिपाद्य शुभं तथा निरयतो रयतोऽपि समुद्धर ॥ ५२ ॥
अवधियोधवशात् तदुदीरितं परिकलय्य नृपः पुनरादिशत् ।
निखिलदुःखविमोचनदर्शनं श्रयतमाऽऽयतमाय युवां खगौ ॥ ५३ ॥
अनशनं प्रतिपद्य विरागिणौ तदुपदेशवशेन च दर्शनम् ।

१ मृतौ । २ परस्परविरोधित्वम् ॥

समधिगम्य समाधिभरं मृतौ शुभवने भवनेऽभवतां सुरौ ॥ ५४ ॥
स नृपतिः परिपारितपोपधो नयपरः पृथिवीं परिपालयन् ।
विहगवृत्तमनुस्मृतिमानयन्नभजताऽभेजतापविरागताम् ॥ ५५ ॥
दुरुपसर्गपरीषहसंहर्तिं भृशविसोढुमना विभुरन्यदा ।
स्थिरतमोऽष्टमयुग्दिवसत्रयप्रतिमयाऽतिमया स्थितवान् स्वयम् ॥५६॥
वृषभवाहनदेवपतिस्तदाऽन्तरवरोधमवस्थितिमाश्रयन् ।
मम नमोऽस्तु त इत्यभिधाय तं विनतिमानतिमात्रमवन्दत ॥ ५७ ॥
तमनुयोक्तुमुपाक्रमताऽधिकं प्रियतया प्रियतन्महिषीजनः ।
दयित ! कस्य नतिस्त्वयकाऽधुना मघवताऽघवता व्यरचीव सा॥५८॥
सुरपतिर्वदति स्म हसंस्ततो घनरथस्य जिनाधिपतेः सुतः ।
नृपतिमेघरथो विहिताष्टमः प्रियतमायतमानतया स्थितः ॥ ५९ ॥
पुरि स पुण्डरिकिण्यभिधारुचि प्रतिमयाऽप्रतिमोऽत्र भविष्यति ।
भरत एव जिनः किल षोडशस्तमहमामहमाऽऽनममादरात् ॥ ६० ॥
अयि ! समाधिनिवेशितमानसं प्रबलदानवमानवनायकाः ।
अपि न चालयितुं प्रभविष्णवो न मरुतो मरुतोऽर्जुनभूधरम् ॥ ६१ ॥
अथ सुराधिपतेर्महिषीयुगं घनरथाङ्गजसत्त्वपरीक्षणम् ।
रचयितुं सहसा स्वतिरूपिकाभिधमगाधमगात गतोत्तमम् ॥ ६२ ॥
समुदयेन जयः प्रभवेदिति स्वमनसा परिभाव्य विकृत्य तम् ।
स्वसदृशं वनिताजनमेत्य चाऽविकलयाऽकलया तमुपासृजत् ॥ ६३ ॥
शृणु नरेश्वर ! पुण्यफलद्वयं यदिह राज्यममुत्र सुराङ्गनाः ।
तदधुना तव जातमतः कथं न सुखमासु खमामयमिच्छति ? ॥६४॥
त्रिदिवलोकविलोकनमादितः कलय निर्वृतिसङ्गमवर्णिकाम् ।
इति समेत्य च काऽपि तदग्रतो व्यवहिताऽवहिता स्वमदीदशत् ॥६५॥
(युग्मम्)
सुभग ! तावदिदं सुतरां तपो वितनुषे तनुखेदतिबन्धनम् ।
सविधगाऽस्मि न यावदिति त्वया प्रमदया मदयानभृता जगे ॥ ६६ ॥
अमृतकुण्डयुगं विधिना कृतं सुखनिधानयुगं यदि वाऽप्यदः ।

१ न बिभेतीति अभः कामो मनोभवत्वात्, तस्माज्जातः स चासौ तापश्च तेनैव विरागो रागाभावो यस्य स तथा तस्य भावस्तत्ता ताम् । २ अन्यया ॥

स्वकुचयुग्ममवेक्ष्य यदेकिका ध्वनिगदं निगदन्त्यपि चेदृशम् ॥६७॥
वपुरिदं मम संस्पृश तत्क्षणं जनयदेव महाशय ! निर्वृतिम् ।
वचसि मे प्रतिपत्तिमथाचरेति निजगे निजगेहवदेकया ॥ ६८ ॥
प्रतिवचोऽपि ददासि न नः कथं सकरुणं महतां हृदयं खलु ? ।
इति च पर्यनुयुञ्जत ता नृपं नरमणी रमणीव स किं वदेत् ? ॥ ६९ ॥
इति निशां सकलां विविधोक्तिभिर्विततभावविभावनयाऽप्यलम् ।
अचलसत्त्वमवेक्ष्य तमानमन् गुणवतो र्णवतो महनं क न ? ॥ ७० ॥
कुसुमकार्मुककार्मुकमेककं वयमहो ! भवताऽवजितं च तत् ।
सुभटता भुवनत्रितयेऽपि ते प्रकटतां कटतां कथमेतु ना ? ॥ ७१ ॥
प्रियतमेन यथा शतमन्युना तव सुसत्त्व ! विवर्णनमादधे ।
तदवलोक्य तथैव सविस्मयाः समुदिता मुदिताः परमास्महि ॥ ७२ ॥
इति विवर्ण्य विवर्ण्यतमं प्रभुं विकृतयौवतमप्यपहृत्य तत् ।
द्विमितताविपनायकनायिके स्वसदनं सदनह्नमुपेयतुः ॥ ७३ ॥
उपसि पारयति स्म स पौषधं प्रतिमया सह मेघरथो नृपः ।
अलभताऽधिकमेव विरागतां रजनिमाजनिमानमनुस्मरन् ॥७४ ॥
दयितवेदितवृत्तविभावरीचरितसंश्रवणात् प्रियमित्रया ।
भवसुरात् सुतरां निरवेद्यत प्रियमतं यमतन्त्रमतः स्त्रियाम् ॥ ७५ ॥
घनरथः समवासरदन्यदा जिनपतिर्भविकाब्जविबोधनम् ।
विरचयन् रविवन् पुरि तत्र स स्तुतमसां तमसां क्षयकर्मणा ॥ ७६ ॥

आदिष्टशिष्टपुरुषैः समुपेत्य विश्व-
विश्वम्भराधिपतिमेपरथाय तूर्णम् ।
विज्ञप्तिमित्यवहिताय तवेश वाह्यो-
द्याने जिनो घनरथः समुपागतोऽस्ति ॥ ७७ ॥

इत्याकर्ण्य क्षितीशः प्रमुदितहृदयोऽपास्य सिंहासनं तद्
गत्वा सप्ताष्टपादानवनितलमिलन्मौलिमौलिर्विनम्य ।
सम्यक् शक्रस्तवोक्तिप्रतिकृतिनिकृतिफलोत्प्रजातैरुदारैः
स्तुत्वा भूयोऽपि नत्वा त्रिभुवनविनतं भक्तितस्तीर्थराजम् ॥७८॥
पादैस्तैरेव सिंहासनमसमसमहारत्नकान्तिप्रतान-


१ ज्ञानवनः ।

भ्राजिष्णु स्फूर्तिजिष्णुः कृतसुकृतशताध्यासमध्यास्य हृष्यन् ।
पश्यंस्तानेव ताताऽऽगमकथकजनानग्रतो दौःस्थ्यभेदं
दत्त्वा कल्याणजातं व्यसृजदतितमां स्वस्य कल्याणमिच्छुः ॥७९॥

(युग्मम्)

आसीच्छ्रीगुरुगच्छमौलिमुकुटश्रीमानभद्रप्रभोः
पट्टे श्रीगुणभद्रसूरिसुगुरुर्विद्यावतां सद्गुरुः ।
तच्छिष्येण कृतेऽत्र षोडशजिनाधीशस्य वृत्ते महा-
काव्ये श्रीमुनिभद्रसूरिकविना सर्गोऽगमद् द्वादशः ॥ ८० ॥

॥ इति श्रीशान्तिनाथचरिते महाकाव्ये द्वादशः सर्गः ॥



अर्हम्

अथ त्रयोदशः सर्गः ।



वचः परास्तव्यभिचारभावाद् यस्याऽऽगमत्वेन बुधैरमानि ।
स केवलालोकविलोक्यलोकः शान्तिप्रभुर्वो ददतां प्रमोदम् ॥ १ ॥
अथाऽनुजेनाऽपि समं स मान्यः क्षोणीभुजां मेघरथः क्षणेन ।
जिनेश्वरं नन्तुमनन्तवेदं वव्राज रोजन् स्वपरिच्छदेन ॥ २ ॥
प्रदक्षिणीकृत्य जिनं यथावद् नत्वा नृपे मेघरथे निविष्टे ।
दिदेश धर्मं नरदेवतिर्यग्भाषाविसंवादकिरा गिराऽर्हन् ॥ ३ ॥
सुखैरनेकैरपि लालितोऽयं जन्तुर्न सन्तोषमुपैति किञ्चित् ।
अनुत्तरस्थानविलुप्तमानसामान्यसौख्यैरपि यद् न तृप्तः ॥ ४ ॥
प्रमादमुत्सार्य तदार्यचित्ताः! मानुष्यसामग्र्यकमप्यवाप्य ।
इदं च चिन्तामणिवद् दुरापं धर्मं विदध्वं प्रयता जनौघाः ! ॥ ५ ॥
प्रमादसन्दर्भविमर्दनेन यो धर्ममाराधयितुं यतेत ।
विपत्तयस्तस्य समापतन्त्यः संपत्तयः किं न समुद्भवन्ति ? ॥ ६ ॥
निदर्शनं शूरनृपोऽत्र विज्ञाः ! कृत्वाऽवधानं शृणुत प्रधानम् ।
तथाहि जम्बूपपदेऽन्तरीपे पूर्वेऽत्र वर्षे पुरमास्ति चित्तम् ॥ ७ ॥

१ राजे शतरि, शोभमान इत्यर्थः ।

क्षितिप्रतिष्ठं नगरप्रतिष्ठं नाम्ना समानन्दितसर्वशिष्टम् ।
मनुष्यधर्माणमुदाहरन्ते यद् धर्मवासेन बुधाः कुबेरम् ॥ ८ ॥
स तत्र दिग्व्यापकवीरसेनः श्रीवीरसेनः समभूद् रसेनः ।
यदीयकीर्तेः सितिमाऽवलोकाद् ह्रीणः शशाङ्कः क्षयितामधत्त ॥ ९ ॥
प्रिया तदीयाऽजनि धारिणीतिप्रख्यातनामा शुचिशीलधामा ।
तिलोत्तमा नैव तिलोत्तमा सा यद्रूपमालोक्य बुधैरवर्णि ॥ १० ॥
परेद्यविः सा शयिता सुखेन स्वप्ने महेन्द्रं पुरतः प्रयान्तम् ।
विलोक्य चोत्थाय तदैव देवी हृष्टा महेन्द्राय तमुज्जगार ॥ ११ ॥
धराधवोऽप्यभ्यधिताधिबुद्धिर्देवेन्द्रवत् ते भविता तनूजः ।
चलः स यत् प्रैक्षि चलाचलाक्षि ! जाने स तेनैव चलोऽचलोरु !॥१२॥
दिनं तदारभ्य बभार देवी गर्भं महापुण्यभरावदाता ।
प्रपूर्यमाणाखिलदोहदा सा राज्ञा सुखं सूनुमसूत राज्ञी ॥ १३ ॥
श्रितेऽत्र गर्भं समवेक्षि मात्रा यद्देवराजः पुरतो जिहानः ।
अतः पिता तं किल देवराजं धाम्ना विराजन्तमुवाच नाम्ना ॥ १४ ॥
कुमारवर्येऽत्र च पञ्चवर्षे जातेऽन्यदा सा महिषी नृपस्य ।
शरत्तडित्वत्प्रतिरूपरूपं स्वप्ने ककुद्मन्तमपश्यदुच्चैः ॥ १५ ॥
ततो दिनादेव नृदेवकान्ता गर्भं दधाना सुतरां बभासे ।
वसुन्धरेवाऽप्रतिमं निधानं दौर्गत्यविच्छेदकरं जनानाम् ॥ १६ ॥
अजीजनत् सा समयेऽथ पूर्णे सूनुं सुवर्णद्युतिवर्ण्यवर्णम् ।
महोत्सवेऽतीयुषि वत्सराजं स्वप्नानुसारेण नृपस्तमाह ॥ १७ ॥
शिशुत्वमारभ्य विवर्धमानं विद्याः समापेतुरमुं समस्ताः ।
रसातिरेकादिव शैवलिन्यो गम्भीरतायाः पदमम्बुराशिम् ॥ १८ ॥
ज्वरादिरोगैः परिताप्यमानो वैद्यैः परैरप्युपचर्यमाणः ।
अमात्यवृन्दैः परिचर्यमाणः क्षोणीपतिर्मृत्युदशां स चाऽऽप ॥ १९ ॥
इतश्च पौराः परितोऽपि कुण्डे कुण्डे भृशं साध्वसमाश्रयन्तः ।
विकाशिकाशप्रसराभकूर्चाः आलोचयन्नापणचत्वरेषु ॥ २० ॥
हहा ! वयं स्वामिनि नामशेषे जाते कथं नाम पुरा भवामः ? ।
विनैव ताराधिपतिं हि ताराः पुष्णन्ति तारा अपि किं प्रकाशम् ?॥२१॥

१ राजा ।

नृपाङ्गजो यद्यपि देवराजो ज्येष्ठः कथञ्चिद् वयसा तथाऽपि ।
अयं प्रजावत्सल एव वत्सराजस्तु नः संमत एव राजा ॥ २२ ॥
बुधा गुणैरेव विदुर्गुरुत्वं नागेन नो वा वयसो महिम्ना ।
निधीयते मूर्धसु राजलोकैः पुष्पं हि गन्धाद्, न दलं न शाखा ॥२३॥
प्रजानुरागं प्रचुरं चरेभ्यस्तस्मिन् कनिष्ठेऽपि गुणाऽकनिष्ठे ।
मुहुर्निशम्येति स देवराजो राज्यं जिघृक्षु चिन्तयति स्म चैवम् ॥२४॥
जनानुरागो ध्रुवमस्ति यस्मिन् संपत् तमाश्लिष्यति न भ्रमोऽत्र ।
हृदा विचिन्त्येति स मुख्यमेकं द्रव्यैरमात्यं स्ववशं चकार ॥ २५ ॥
मतङ्गजा जङ्गमदुर्गमेते राज्ञामितीवाऽऽदित तान् पुरा सः ।
ततस्तुरङ्गान् नृपरक्षिवीरान् व्यापाद्य जीवत्यपि राजताते ॥ २६ ॥
किमौचितीमञ्चति देवराजे राज्यप्रदानं सति वत्सराजे ? ।
परं प्रकुर्वे किमहं दुरन्तै रोगैरिदानीमभिभूतगात्रः ॥ २७ ॥
इति स्वचित्ते वसुधाधवोऽस्य ज्येष्ठस्य सूनोरविनीतभावम् ।
विदन् द्विरुक्तामयजाततापः सन्तापमन्तर्निदधद् ममार ॥ २८ ॥
(युग्मम्)

परे तु कृत्यानि नृपस्य चक्रुः श्रीवत्सराजेन सहाऽप्यमात्याः ।
श्रीदेवराजोऽपि शशास राज्यं तत्राऽनुरागं न दधुः प्रजाश्च ॥ २९ ॥
महीपतेस्तस्य च वत्सराजः सेवां चकारेतरवत् स नित्यम् ।
न चाग्रजत्वं हि न चानुजत्वं राज्ञां मतं सेवकतामपास्य ॥ ३० ॥
स एव मन्त्री नृपतेरपायं स्वस्याऽपि जानन्निव एव दुष्टः ।
रहस्यऽवादीद् नृपतिं, खला हि स्वस्यानुमानेन परं विदन्ति ॥३१॥
नृदेव ! सेवाप्रवणोऽपि तेऽयं नैवाऽनुजो वृद्धिमुपागतः सन् ।
क्षयाऽऽमयाऽऽकार इवाङ्गवद्धः स्यादायतौ क्षेमकरः कथञ्चित् ॥३२॥
नरेश्वरस्तस्य वचः स तथ्यं जानन् स्वचित्ते विगलद्विवेकः ।
विनाऽपराधं किल वत्सराजं निर्वासयामास तदैव देशात् ॥ ३३ ॥
न पत्तनग्रामनिवासमात्रत्यागं प्रकुर्वन्ति निषेविता ये ।
त एव केषां प्रभवोऽपि देशत्यागं, समर्थाः पिशुनास्तदत्र ॥ ३४ ॥
निरागसस्तस्य तथाऽपमानं माता समाकर्ण्य समं भगिन्या ।

२ महीतुमिच्छुः ।

निवार्यमाणाऽपि नृपेण वाढं व्यावर्तनायैव समन्वयासीत् ॥ ३५ ॥
गृहीतसर्वाभरणास्त्रयोऽपि क्षोणिभुजा दुर्जनवाक्यतोऽपि ।
अवन्तिदेशस्य विभूषणं तेऽवन्तीपुरीं प्रापुरतेऽपि यानम् ॥ ३६ ॥
न चिन्त्यते यद् मनसा कदाऽपि स्वप्नेऽपि यस्याऽनुपलब्धिरेव ।
न योगिनां यद्विषयः कदाऽपि दैवं पुनस्तत् सहसा करोति ॥ ३७ ॥
अपालयत् तां नगरीं नरेन्द्रः प्रध्वस्तशत्रुर्जितशत्रुनामा ।
द्विधाऽपि देव्या कनकश्रिया यो राज्यं मनः स्वं च वशीचकार ॥३८॥
पुरीसमीपं समुपेत्य शालच्छायां समालम्ब्य विलम्बभाजम् ।
भृशं श्रमार्ता विमलानुजैव तां धारिणीं व्याहरति स्म चैवम् ॥ ३९ ॥
क्षणं प्रतीक्षस्व महाशयेऽत्र यावत् पुरोऽभ्यन्तरमेव गत्वा ।
द्विधा स्थितिर्यत्र विधीयते तत् स्थानं समालोक्य न यामि पश्चात् ॥४०॥
इतीरयित्वा त्वरितं नगर्या मध्येऽपि गत्वा परतो गृहान् सा ।
विलोकयन्ती सहसा महेभ्यश्रीसोमदत्तस्य गृहं विवेश ॥ ४१ ॥
पुरःस्थितेनेभ्यवरेण साऽपि पृष्टा किमर्थं समुपागताऽसि ? ।
उवाच सा स्वच्छमहेच्छ ! मह्यं यच्छाऽऽश्रयं कञ्चिदनाश्रयायै ॥४२॥
स्वजामिजामेयसमन्विताऽहं तिष्ठामि यत्र त्वदुरुप्रतिष्ठा ।
स्थमास्व मद्भाटक एव किन्तु ब्रूहि स्वयं भाटकमग्रतो मे ॥ ४३ ॥
अपास्तलज्जं कृपणोपयुक्तं तेनोदिता सा पुनराह तात ! ।
त्वदालये कर्म पुरा विदद्ध्वो भोज्ये त्वया, भाटकमस्ति नान्यत् ॥४४॥
तथेति तेनाभिहिते त्रयोऽपि स्थाने प्रदत्तेऽस्थुरुरीकृतार्हाः ।
प्रतिश्रुतस्याऽत्रनमन्तरेण यद्वा सतां न व्रतमन्यदस्ति । ॥ ४५ ॥
निरुद्यमो वामपि नन्दनोऽयं सन्नन्दनस्तिष्ठति किं विकर्मा ? ।
निरन्तरं भोजयिताऽस्मि चैनं कृत्येन मत्तर्णकरक्षणेन ॥ ४६ ॥
इतीभ्यधुर्यस्य निवेदनेन ताभ्यां कथञ्चिद् भणितो हठेन ।
अनीदृमानग्रपया सकोपो वाढं ययौ तर्णकरक्षणाय ॥ ४७ ॥
(युग्मम्)
क्वचित् प्रदेशे विजने स तस्मिन्नाकस्मिकाकर्णिततारनादैः ।
स्वल्लरिकायां श्रममादधानान् ज्ञात्वा कुमारानगमत् कुमारः ॥ ४८ ॥
वितन्वतां तत्र कुमारकाणां शस्त्रश्रमं सम्यगवेक्षमाणम् ।

कृताङ्गघातेन मुदं वहन्तं तद्वयत्ययादास्यविकूणनं च ॥ ४९ ॥
विलोक्य तं लोकविलोकनीयस्वाकारसम्भावितबुद्धिधारम् ।
चमत्कृतस्तद्गुणकाम्ययैवाऽपृच्छन् कलाचार्य उदारचित्तः ॥ ५० ॥
अये! महाभाग! समागतोऽसि देशात् कुतः पुण्यतमप्रदेशात् ।
कयाऽऽख्यया ख्यातिमितोऽसि कीदृक् शस्त्रे श्रमस्ते वद मेऽमतस्त्वम् ? ॥
इति प्रतिश्रुत्य तदुक्तवाचमाचष्ट वाचस्पतिवत् कुमारः ।
अहं महाराष्ट्रमहाभिधानाद् देशात् समागां कुतुकेन चाऽत्र ॥ ५२ ॥
सचेतनः कः स्वत एव नाम ब्रूयाद् विदन् स्वं व्यवहारसारम् ? ।
विलोपतस्तस्य न किं भवेतां नु द्रव्यजीवद्वितयव्ययौ च ?॥ ५३ ॥
भवेत् परोक्षप्रतिपत्तिरेव नाम्ना न साक्षात् प्रतिभासवासः ।
अपेक्षतां को हि बुधोऽनुमानं प्रत्यक्षमाने व्यवतिष्ठमाने ? ॥ ५४ ॥
परिश्रमः कश्चन मेऽस्ति शस्त्रे संदृष्टमात्रोऽत्र भवत्प्रसङ्गात् ।
इति ब्रुवाणोऽर्पितबाणधन्वा स्वाभ्यासमेभ्यः समदीदृशन् सः ॥ ५५ ॥
अहो ! श्रुतार्थप्रतिपत्तिमत्त्वमेतस्य वक्तृत्वमहो ! महीयः ।
अहो ! धनुर्वेदविशेषवित्त्वमित्यात्तचित्रास्तमवर्णयंस्ते ॥ ५६ ॥
पुराद् नृपादेशवशात् पुरावत् सूदैस्तदाऽऽनीतमभुञ्जतान्नम् ।
कलाविदा तेन समं कुमारा मारानुकारं तमथूभुजंश्च ॥ ५७ ॥
ते तर्णका रक्षकमन्तरेण परत्रं सकालेऽपि ययुर्विचर्य ।
प्रदोषकालेऽखिलदोषमुक्तेः क्रीडां विधायाऽऽश्रयदाश्रयं सः ॥ ५८ ॥
चिराय किं वत्स ! समागमस्त्वं किं वत्सरूपाणि समागमन् प्राक् ?।
इतीभ्यवर्येण हितेन पृष्टः स प्राह किञ्चिन्क्लमितोऽस्मि तात ! ॥५९॥
ततः समायासिपुरेतकानि श्रान्तस्य निद्रा सुलभा स्वभावात् ।
इदं द्वितीयेऽह्नि पुनस्तृतीयेऽप्यस्योत्तरं जातमनुत्तरं च ॥ ६० ॥
स वत्सरूपाणि दिनोदयेऽपि लात्वा विमुच्यैव वने प्रयाति ।
कुमारकाणां सविधेऽस्त्रविद्यावैदग्ध्यमुत्तेजयितुं नतानाम् ॥ ६१ ॥
अनारतं तैरुपरोध्य भोज्यं प्राज्याज्यमीन्दर्यमभोज्यताऽयम् ।
गृहं प्रयातेषु च तर्णकेषु सायं समायाति स मुक्तमायः ॥ ६२ ॥
तमेवमाचरत्यतोऽदा ते मातृष्वसा माऽस्य तथा च माता ।
न वत्स ! किं रक्षसि वत्सकांस्त्वं गोपालवृत्तिं प्रतिपद्य हन्ताम ?॥६३॥

न मातरौ ! वत्सकरक्षणेन गोपालवृत्तिर्विदुषां मताऽस्ति ।
निरन्वयत्वाच्च तथापि युष्मन्निर्देशतोऽहृस्त्रितयं कृतं तत् ॥ ६४ ॥
अतः परं नैव पुनर्नियोज्यो नेदृग् विधातास्मि कथञ्चनाऽपि ।
असून् परित्यक्तुमपि स्पृहावान् स्यात् सज्जनो नाऽनुचितं विधातुम्॥६५॥
प्रति प्रभावं नृपनन्दनानां धाम्ना समुच्चैस्तरां स वत्सः ।
प्रबोधमापादयति स्म कञ्चित् पद्माकराणामिव भानुमाली ॥ ६६ ॥
स भोजनं तत्सविधे विधाय मध्यन्दिनादूर्ध्वमुपागतश्च ।
अभाणि ताभ्यामपरेद्युरेवं निश्चिन्तता वत्स ! तवाऽपि केयम् ?॥६७॥
न कष्टमस्माकमजातपूर्वं दृष्ट्वा सुखं स्थातुमिहोचितं ते ।
न सन्ति काष्ठान्यपि यद् गृहेऽस्मिन् यैः पच्यतेऽन्नं कृतकृत्यवित्तम्॥६८॥
इतीरितः सोऽपि कठोरधारं पाणौ कुठारं विनिवेश्य वत्सः ।
विहङ्गिकामंसतले निधाय काष्ठान्युपाहर्तुमगाद् वनान्ते ॥ ६९ ॥
वनाद् वनं वर्धकिवद् भ्रमन् स कान्तारमन्तः सहसा विवेश ।
ददर्श यक्षायतनं च तत्र प्रौढप्रभावोऽपहतोपसर्गम् ॥ ७० ॥
न तद् वनं कश्चन पाणिनाऽपि यक्षस्य निस्सीममहामहिम्ना ।
शशाक संस्प्रष्टुमपि ज्वलन्तं वह्निं यथा तापकृताभ्युपायम् ॥ ७१ ॥
स भाग्यवांस्तत्र परिभ्रमंश्चाऽपश्यद् महाचन्दनशालमेकम् ।
पयोदवृन्दैरिव शम्भुशैलं व्यालैः समालम्बितमूलपादम् ॥ ७२ ॥
अपास्य तान् पापचयानिवाऽयं हुम्नेन पुच्छेषु दृढं विधृत्य ।
स पर्शुना तस्य चकर्त शाखां सौरभ्यसंवासितदिग्गणस्य ॥ ७३ ॥
स खण्डशस्तां विरचय्य शाखां तच्छिक्ययुग्मं परिपूर्य सम्यक् ।
विहङ्गिकां न्यस्य निजांसदेशे आभीरवद्भीरहितश्चचाल ॥ ७४ ॥
समुत्सुको मन्दिरमायियासुर्यावत् पुरीद्वारमवाप वत्सः ।
दिनाधिनाथोऽस्तमियाय तावत् तत्कष्टमालोकितुमक्षमो व ॥ ७५ ॥
तदैव चारक्षजनैर्नियुक्तैः पुर्याः प्रतोल्यः सकलाः पिनद्धाः ।
तत्रोद्घटन्तेऽभ्युदिते दिनेशे राजीवकोशा इव ताः प्रवद्धाः ॥ ७६ ॥
अनाप्नुवंस्तत्र ततः प्रवेशं स ध्यातवान् चाप्यविहीनचित्तः ।
महीप्यते कश्चन चन्दनं मे निद्राममाश्रित्य तनोरिहेदम् ॥ ७७ ॥
विचिन्त्य चैवं विनिवृत्य यक्षगेहान्तरेऽनेन दृढं प्रदाय ।

कपाटयुग्मं स विहङ्किकां द्रोः शाखाप्रदेशद्वितयेऽवलम्ब्य ॥ ७८ ॥
निशीथकाले किल याममात्रं विद्याधरीवर्ग उपेत्य नृत्यम् ।
सदैव तस्यैलविलस्य चक्रेऽग्रे स्वर्गिकान्ताप्रतिरूपरूपः ॥ ७९ ॥
स्वकञ्चुकं काचन तत्र यान्ती स्थानं विसस्मार मणिप्रकाशम् ।
स कुञ्चिकानिर्व्यथनेन दृष्ट्वा निर्गत्य लात्वा च तदन्तरस्थात् ॥ ८० ॥
प्रभावती सा गुणतोऽपि नाम्ना विद्याधरी स्वालिजनं जगाद ।
गताऽर्धमार्गे स्मृतकञ्चुकाऽऽल्यो हा ! विस्मृतस्तादृशकञ्चुको मे ॥८१॥
प्रभावती वेगवती समेता व्यावृत्य तं प्रैक्षत तत्र साऽपि ।
अवीक्ष्य तं तत्र ततश्च ताभ्यां चित्ते व्यचिन्तीति सचेतनाभ्याम् ॥८२॥
मरुत्प्रणुन्नः स वनान्तरेऽगादुड्डीय कुत्राऽपि न वीक्ष्यते यत् ।
विमृश्य चैवं विपिनं भ्रमित्वा ताभ्यां समस्तं समवेक्ष्यताऽदः ॥ ८३ ॥
अवापि कुत्राऽपि स चाऽपि नैव दृष्ट्वा परं तत्र विहङ्किका सा ।
पुनर्व्यचिन्ति ध्रुवमस्ति कोऽपि यक्षस्य गेहे पुरुषः प्रसुप्तः ॥८४॥
विहङ्किका तस्य विलोक्यते यत् सम्भाव्यते नैव विनाऽऽश्रयं सा ।
अनेन नूनं स परं गृहीतो नान्यः समागाद् न गतोऽपि कश्चित् ॥८५॥
तदेनमेवात्र विभीषयावो द्वारं समुद्धाट्य यथाऽर्पयेत ।
न खेचराणामपि वस्तु भीतः कश्चिन् परित्रातुमलं यतोऽत्र ॥ ८६ ॥
हृदा विचिन्त्येति चिरं स ताभ्यां द्वाभ्यां स्वयं भीषितभीषितोऽपि ।
अधारयन् भीतिमवस्थितोऽन्तर्नोद्घाटयामास पुनः कपाटे ॥ ८७ ॥
भयान्न यक्षस्य निकेतनस्य द्वारं करेण स्पृशतोऽपि ते च ।
ततो मिथोऽमन्त्रयतामितीमे दूरेण तस्मादपसृत्य किञ्चित् । ८८ ॥
नरोऽत्र यः कश्चिदवस्थितोऽस्ति तस्यैव नूनं पितरावधृत्या ।
किमाविभातं विलपिष्यतो नैतस्यां क्षपायां विरहार्तिदूनौ ?॥ ८९ ॥
ततश्च सध्येनगरि प्रजित्वा श्रुत्वाऽस्य नामाद्युपेत्य चात्र ।
विलप्यते तद्ध्वनिना यथाऽयं द्वारं समुद्घाटयतेऽस्य भिन्नः ॥ ९० ॥
इतीदृशं ते लघु मन्त्रयित्वावन्त्यां गते मन्दिरमस्य बुद्ध्वा ।
सुदुःश्रवान् शुश्रुवतुर्विलापांस्तन्मातृमातृष्वसृदुःस्वजातान ॥ ९१ ॥
न देवराजं न च देवराजं चित्ते स्वभावोपचितं श्रियाऽपि ।
त्वदागया वासितजीवितव्ये तन्माननां नाऽजगणाव वत्स ! ॥ ९२ ॥

न काष्ठभारानयने निदेशं भूयः प्रदद्यास्तव वत्सराज ! ।
अजानतीभ्यां यदिदं निदिष्टं पुत्रावकाभ्यामपि तत् क्षमस्व ॥ ९३ ॥
न जीवितं तिष्ठति नौ विना त्वामित्युक्तिरेषा विफलाऽधुनाऽभूत् ।
इदं कथङ्कारमथाऽपि वाच्यमाशापिशाची प्रबला यदस्ति ॥ ९४ ॥
तथा न कान्तस्य वियोगदुःखं ज्येष्ठस्य पुत्रस्य न चाऽप्यवेदि ।
न देशसाम्राज्यमहापदस्य हा ! हा ! यथा ते सहचारिणोऽस्य ॥ ९५ ॥
उपर्युपर्येव वितत्य दुःखं दुःखस्य नौ दैवमवाप तृप्तिम् ।
यथा तरङ्गस्य तरङ्गमध्येऽर्णवस्यैव परं समीरः ॥ ९६ ॥
तयोरिदं ते परिदेवनं तच्छ्रुत्वा समागत्य तथा व्यधत्ताम् ।
अमन्यत च्छेकतयाऽप्यलीकं सर्वं स तच्चेष्टितमस्तदोषः ॥ ९७ ॥
निशावसाने निजमाश्रयं ते निर्विद्य विद्याधरवामनेत्रे ।
आगच्छतां, कः खलु धर्मराजात प्राणान् परित्याजयितुं क्षमः स्यात् ?॥
अथ प्रभाकृत्प्रसरत्प्रभाभिर्मत्वा प्रभातं प्रभया परीतः ।
विहङ्गिकां प्रागिव संनिधाय मात्रोर्मुदा सार्धमवाप सद्म ॥ ९९ ॥
ततः स विक्रीय मनीषितार्थैस्तच्चन्दनं मन्दिरसौष्ठवं च ।
प्रसूतियोगेन विधाय योग्यां राज्ञः कुमारैर्निचितां बभाज ॥१००॥
सहोदरादभ्यधिकं कुमारैः संमान्यमानः प्रथुमाननाऽर्हः ।
समं स तैरेव सदैव भुङ्क्ते कुत्राऽर्हणा यद् न गुणाधिकानाम् ?॥१०१॥
अथो कलाचार्ययुतान् महीन्द्रः पुत्रान् कलाकौशलशालमानान् ।
परीक्षितुं शस्त्रविशेषजाताभ्यासं समाजूहवदात्मभृत्यैः ॥१०२॥
अमी प्रणम्रा नृपतेः पुरस्तात् स्वाभ्यासकौशल्यमदीदृशन्नत् ।
तदन्तिकं वीक्ष्य च वत्सराजं पप्रच्छ तान् क्ष्मामघवाऽधवारः ॥१०३॥
कुमारकः कोऽयमपास्तमारः कान्त्या, सुतः कस्य किमाह्वयश्च ।
कुतश्च युष्माभिरनेन सङ्ग इत्येतदावेदयताऽङ्गजा मे ? ॥१०४॥
अवादि तैस्तात ! सदा सुरल्यामस्माकमस्यापि मिथोऽस्ति सङ्गः ।
इदं न विद्मः पुनरेष वीरः किंनामधेयस्तनयोऽपि कस्य ? ॥१०५॥
प्रदर्शयामास ततश्च शस्त्राभ्यासं नृपेणाभिहितः स वत्सः ।
पुनः सचित्रं परिपृष्ट एष तेन स्ववृत्तं प्रकटीचकार ॥१०६॥
अथो महिष्या कनकश्रियाऽसौ राज्ञः समीपस्थितया न्यगादि ।

मदीयजामेश्च मदग्रजाया सूनुं प्रसूनायुधसंनिभस्त्वम् ॥१०७॥
इतीरयित्वा परिरभ्य सा तं देवी निजाङ्के न्यधिताऽधिसातम् ।
स्वजामियुग्मं स्वयमानिनाय श्रीधारिणीश्रीविमलाह्वयं तत् ॥१०८॥
निदेशमासाद्य नरेश्वरस्य सौधे निजेऽस्थापयदेव ते सा ।
अजीहरस्ता मिलितास्तमोऽस्य तिस्रो यथा विष्णुपदीपदव्य ॥१०९॥
मनोवच कायसमुत्थचेष्टा साधोर्यथाऽभिन्नतया प्रसिद्धा ।
मिथो महाप्रेमरसानुवद्धास्तिस्रोऽनयस्ता समय सुखेन ॥११०॥
स धारिणेयो धरणीशमेत ग्रामादिक तोषभराद्ददानम् ।
अनाथदेव स्वमुखेन नाथ ! प्रेष्यस्त्वया सद्मनि सर्वदाऽहम् ॥१११॥
प्रमाणमित्याहतवाचि राज्ञि श्रीवत्सराजोऽपि न संनिधानम् ।
जहौ नरेन्द्रस्य यथैव चेत क्षेत्रज्ञनाम्न पुरुषस्य नित्यम् ॥११२॥
विसृष्ट एव प्रभुणा प्रयाति स्वेनाननेनैव निकेतनं स ।
सदा प्रतिज्ञाप्रतिपालकानामाद्य च त रञ्जयति स्म धीर ॥११३॥
तमप्रहित्यैव स सविवेश वासालये भूपतिरेकदाऽयम् ।
सचन्द्रहास स च चन्द्रहासस्तद्द्वारि तस्थौ स्थिरचित्तवृत्ति ॥११४॥
परास्नमागारमथार्धरात्रे राजा जजागार कथञ्चनाऽपि ।
तदैव कस्याश्चन दु खिताया शुश्राव नार्या परिदेवितं स ॥११५॥
विधेर्नियोगान् तव हाऽसि दूरे प्राणप्रिय ! प्रीतिरिय मुधा मे ।
विदीर्यते यद्धृदय न पाकिवालुङ्किवल्लीफलवद् ममेदम् ॥ ११६ ॥
विवर्ण्यता सैव न कौमुदी किं तस्या प्रकाश कथमेव माऽस्तु ? ।
अवाप्य जैवातृकमेव कान्त या त विना न क्षणमात्रमस्थात् ॥११७॥
नितम्बिनीपु प्रथम विवर्ण्या सौदामनी तप्तसुवर्णवर्णा ।
पयोधरे गर्जति वल्लभे या दृष्टा जनैर्नाऽपरथा कथञ्चित् ॥ ११८ ॥
इतीदमीदृग् विनिशम्य सम्यग् भूमीपति प्राहरिकानवादीन् ।
प्रमीलया तेऽपि निमीलिताक्षा सर्वेऽप्यभूवन् सुभटास्तदैव ॥ ११९॥
निद्राप्रदानेन ममाधुनाऽपि स्वामी प्रमाद विदधातु विद्वान् ।
अमी पुन प्राहरिकाश्च सन्तु निद्रामसाम्रातविलोचनाब्जा ॥१२०॥
इतीष्टविज्ञापनयाऽनयाऽपि श्रीवत्सराजस्य जगौ नरेन्द्र ।
कथ गतस्त्व भवन नवाऽद्य स प्राह यद् नाऽनुमतोऽस्मि पादै ?॥१२१॥

विलोकता तार्हि जवेन गत्वा का नव्यशोका परिदीन्यतीयम् ? ।
इति क्षितीशस्य निदेशमाप्य श्रीधारिणेय प्रचचाल नम्र ॥ १२२ ॥
करे कृपाण कलयन् स विद्युदुत्क्षिप्तनाम्ना करणेन शालम् ।
जवादतिक्रम्य पुरी जगाम शब्दानुसारेण विसारिसार ॥१२३॥
चिताज्वलज्ज्वालकृशानुजालवित्रासितोदग्रमहान्धकारम् ।
प्रलम्बवेतालभयानक स प्राप श्मशान भवन यमस्य ॥१२४॥
विलोक्य चोद्दम्बितमर्त्यपार्श्वे तत्र स्त्रिय काञ्चिदसौ रुदन्तीम् ।
अपृच्छदेता महताऽऽग्रहेण चार्वङ्गि ! किं रोदिषि सम्प्रति त्वम् ? ॥१२५॥
उवाच सा मे प्रवरो वरोऽयमेतादृशीं दुर्विषहामवस्थाम् ।
अवापितो भूमिभुजा खलोक्त्या वाच्य पर दुष्कृतमस्य यद्वा ॥१२६॥
तदेनमुद्बद्धमसिद्धपुण्य निर्माय भुक्त्यै घृतपूरपूरम् ।
समाहृत भोजयितु न शक्ताऽऽक्रन्दामि तेनव विलीनभाग्या ॥१२७॥
विबुध्य तस्या रुदिते निमित्त प्रोचे स यद्येवमिद यथार्थम् ।
स्वय समारुह्य मदीयमस सपादय स्वाभिमत तदाऽऽशु ॥१२८॥
इतीरणानन्तरमेव तेनाऽऽध्यारोपिता स्वासतले मृताङ्गात् ।
निशातया कर्तिकया चकर्त सा मासखण्डानि विमलखण्डा ॥१२९॥
प्रकुर्वती सा च तथा कथञ्चित् तत्स्कन्धदेशोपरि मासखण्डम् ।
तदैकक पातयति स्म दुष्टा वस्ताद्दृशीना यदि वा विवेक ? ॥१३०॥
तदीयदुर्वृत्तमिद विलोक्य यावत् स खड्ग सहसा चकर्ष ।
खमुत्पपात प्रति तावदेषा तामञ्चले सोऽपि चला दधार ॥१३१॥
घनादिपर्यन्तरथाभिधानमत्रान्तरे कोऽपि पुमानपृच्छत् ।
जिनाधिनाथ भगवन्न केय दुष्कर्म किं वा विदधाति चेदृक् ? ॥१३२॥
तत स तीर्थप्रभुराख्यदेषा क्षुद्राशया व्यन्तरवामनेत्रा ।
अनार्यलोकोचितमादधाति दुष्कर्म पुसा छलनापराऽत्र ॥१३३॥
सुराङ्गना अप्यमृतैकभोज्या किं मासमास्वादयितु यतन्ते ? ।
यदीदृग कर्म समाचरन्तीत्युक्त पुनस्तेन जगौ जिनेन्द्र ॥१३४॥
न जायते कावलिक सुराणामाहार ईदृक् क कदाचनाऽपि ।
इद परिक्रीडनमेव चास्या यज्जङ्गलोत्कर्तनमुख्यकर्म ॥१३५॥
धृताञ्चल तत्परिधानवस्त्र श्रीवत्सराजेन विहायसाऽगात् ।

विहाय सा मद्भक्षु ततः प्रभाते राज्ञे स तत्प्राभृतकं व्यधत्त ॥१३६॥
महीभुजा पृष्टचरः स नत्वा वृत्तं निशाया निजगाद वत्सः ।
स पट्टदेव्यै मुदितो नृदेवस्तद् दिव्यवासः प्रददौ सवासम् ॥१३७॥
तदैव देवी परिधाय देवीवासः प्रवासप्रदमाधिभङ्गया ।
न मानसे निर्वृतिमाततान तद्योगसत्कञ्चुकवस्त्वभावात् ॥१३८॥
स धारिणेयोऽप्यधृतां निरीक्ष्य देवीं च विद्याधरवल्लभायाः ।
उपानयन् कञ्चुकमेव दिव्यं तं भूभुजे यद् न सतामदेयम् ॥१३९॥
नृदेवदत्तं परिधाय देवी तं कञ्चुकं चाधिकमेव दुःखम् ।
बभार तद्रूपमहोत्तरीयाभावादसंतोषवतां न यच्छम् ॥१४०॥
समाध्यभावं महिषी दधाना नैषाऽपरेद्युर्बुभुजे कथञ्चित् ।
अमात्यधुर्यैरपि बोध्यमाना स्त्रीणां बलीयान् परमाग्रहो हि ॥१४१॥
भृशं तदालोकनतो नरेन्द्रं चिन्तापरिक्लान्तहृदं विचिन्त्य ।
कृताञ्जलिर्विज्ञपयाम्बभूव युक्तोपयुक्तं स च धारिणेयः ॥१४२॥
न युज्यते मातरयं विधातुं संकल्पमात्रेण कदाग्रहस्ते ।
प्रमाणपूर्वव्यवहारिणस्तं यस्माद् बुधा दूषणमुद्गिरन्ति ॥१४३॥
न शक्यते कारयितुं न कर्तुं यच्छक्तिशैलैरपि नाऽत्र खेदः ।
मनुष्यलोके सुकृतोद्भवेऽपि स्वर्वासिवासांसि न संभवन्ति ॥१४४॥
भवेदथैवं यदि मर्त्यलोकस्वर्लोकयोः केन कृतो विशेषः ।
परिश्रमं कः सुकृताय कुर्यात् को वा निवर्तेत तथा च पापात् ? ॥१४५॥
घुणाक्षरन्यायवशाद् द्वयं तत् सम्प्राप्तमेवाऽत्र विना प्रयत्नम् ।
भविष्यते तत्तव भाग्यभङ्ग्या तस्मादमुं मुञ्च मनोविषादम् ॥१४६॥
अपेक्षितं कैश्चन किञ्चनाऽपि बुद्ध्याऽपि शक्त्याऽपि न साधितं यत् ।
विधिः परापेक्षितभङ्गनिष्ठः स्वापेक्षितं केवलमादधाति ॥१४७॥
नृपो न भुङ्क्ते म्रियतापरस्ते तद्भक्तिकृद् नो सचिवादिलोकः ।
प्रजाऽपि ते गास्यति दुर्यशस्तच्चन्द्रे कलङ्को यदयं ग्रहस्ते ॥१४८॥
इतीदृशैरस्य च वाक्यजातैर्यावद् ग्रहं नैव मुमोच राज्ञी ।
स देवराजानुज एव तावच्चक्रे प्रतिज्ञामविचार्य कार्यम् ॥१४९॥
मनोरथं ते यदि नैव मातः ! षण्मासमध्ये परिपूरयामि ।

१ सुखम् ।

अहं तदा दारुणदारुभारैर्जाज्वल्यमाने ज्वलने विशामि ॥१५०॥
इदं प्रतिश्रुत्य सदःसमक्षं राजानमानम्य जगद्विनम्यम् ।
प्रसूं सजामिं च, चचाल वत्सः प्राप्याऽऽशिषं दुर्लभकार्यसिद्ध्यै ॥१५१॥
शुभैः प्रगुणैः शकुनैरनेकैर्जातां ब्रुवाणैरिव कार्यसिद्धिम् ।
भ्रमन् पुरग्राममहाकरेषु वीरो महाऽरण्यमसौ विवेश ॥ १५२ ॥
विशंस्तदन्तः स ददर्श चैकं क्षुद्रं पुरं क्षुद्रतया विमुक्तः ।
स चिन्तयामास समाधिहेतोः किं वेधसा निर्विजनेऽरचीदम् ?॥१५३॥
तदुच्चवप्रान्तरयं प्रविश्य क्षिप्रं दधद् विस्मयमस्मयं सः ।
लघिष्ठधामद्वितयोपलक्ष्यं प्रासादमभ्रङ्कषमाससाद ॥ १५४ ॥
तदन्तरध्यास्य सभानिविष्टं प्रैक्षिष्ट चैकं पुरुषं स शिष्टम् ।
अहो ! पुमान् कोऽयमिति प्रकृष्टः पृष्टः पुमांस्तेन च कोऽप्युवाच ? ॥
इतोऽस्त्यदूरे नगरं गरीयः सत्याभिधं भूतिलकाभिधानम् ।
विभूषणं यद् दधती धरित्री वैधव्यतां नो भजते कदाऽपि ॥ १५६ ॥
अशेषभूवल्लभमौलिलिह्श्रीवीरसिंहस्तदधीश्वरोऽभूत् ।
यदोजसा तर्जित एव सिंहः शङ्के त्रपावान् वनमध्युवास ॥ १५७ ॥
विशुद्धबुद्धिर्वसुधेशमान्यो दत्ताभिधस्तत्र महेभ्यकोऽस्ति ।
तदङ्गजा श्रीपदपूर्वदत्ता श्रीदेवकीकुक्षिभवा समस्ति ॥ १५८ ॥
मुदा पितृभ्यामुपलाल्यमाना साऽध्यापकाध्यापितसर्वविद्या ।
क्रमादसौ यौवनमाप बाला दृप्यन्मनोभूनृपरङ्गशाला ॥ १५९ ॥
तदैव तद्दुष्कृतसाहचर्याद् दोषोऽयमुन्मेषमवाप तस्याः ।
स पञ्चतां पञ्चजनः प्रयाति यो यामिकस्तां परिपाति तस्याम् ॥१६०॥
न रक्ष्यतेऽसौ यदि वा कथञ्चित् तत् पञ्चतां यान्ति जनाः प्रभूताः ।
किमायुषः मङ्क्षय एव मृत्युः किंवाऽन्यथा वेति जिनो विवेद ?॥१६१॥
अवेत्य वृत्तान्तमिदं जनोक्त्या राज्ञा स दत्तोऽभिहितः सुता ते ।
दुरक्ष्ये हेतुरभूत् मयादि तत्क्त्वा पुरं मे विपक्षान्तरं तत् ॥ १६२ ॥
इति क्षितीशस्य निदेशतोऽसौ तत्कालमागत्य वनेऽत्र तस्थौ ।
विधाय वप्राऽऽवृतमात्मसौधं पार्श्वे परीवारगृहद्वयं च ॥ १६३ ॥
तदीयनाम्ना सुतरां निवेशः ख्यातिं गतो दत्तपुराह्वयोऽयम् ।
न कोऽपि शेतेऽत्र परः क्षपायामेतत्परीवारकमन्तरेण ॥ १६४ ॥

विपद्यते चैकक एव मर्त्यः साधोः परीवारगतोऽस्य नित्यम् ।
अनामयं स्वस्य समीहसे चेत् तत्तूर्णमन्यत्र सखे ! प्रयाहि ॥ १६५ ॥
ततः कुमारोऽपि विहस्य किञ्चिद् दत्तेभ्यपार्श्वे दितभीर्जगाम ।
न सज्जनाः क्वापि भयं भजन्ते कर्मानुरूपं फलमामनन्तः ॥ १६६ ॥
अमुं समायान्तमवेक्ष्य सोऽपि पीठादुदस्थात् सह संभ्रमेण ।
असङ्गतानामपि दैवयोगाद् नैवौचिती भ्रश्यति सज्जनानाम् ॥ १६७ ॥
अगोपिताकारनिवेशशौर्यं वरासने तं विनिवेश्य पार्श्वे ।
महेभ्यदत्तोऽभ्यधित त्वमागाः कस्मात् पुराद् वत्स ! कुमारसार ! ? ॥
अहं समृद्धोज्जयिनीनगर्यां अभ्यागमं कार्यवशादिहापि ।
परिभ्रमन् ग्रामपुराकरेषु तातेति तं प्रत्यवदत् स धीमान् ॥ १६९ ॥
तनुश्रियाऽङ्गार इवाविकारप्रस्फारशृङ्गारधरोऽपि कृष्णः ।
पुमान् परिम्लानमुखस्तदैकस्तत्सन्निधौ मन्दपदः समागात् ॥ १७० ॥
स तं समीक्ष्योन्मनसं समेतमेतद् महेभ्यं स्फुटमभ्यधत्त ।
किमेष शृङ्गारविभासमानोऽप्यालम्ब्यते तात ! सुदुर्मनस्त्वम् ? ॥१७१॥
विमुच्य निःश्वासततिं स दीर्घां वृत्तं सुतायास्तमवोचदिभ्यः ।
अमुष्य च प्राहरिकस्य चाद्य मत्पुत्रिकारक्षणवारकोऽस्ति ॥१७२॥
बिभर्ति तच्छयामलमेष वक्त्रं पञ्चत्वभीतेर्विजितान्यभीतेः ।
स्वभावकारुण्यरसाम्बुराशिः श्रुत्वेति तं व्याहरति स्म वत्सः ॥१७३॥
व्रजामि तां रक्षितुमद्य तात ! तिष्ठत्वयं कातरवर्गतातः ।
विहस्य दत्तोऽप्यवदत् स एव चौरस्य घातः स्वसरेण किं न ? ॥१७४॥
अयं तु मत्तन्त्रतमो मदीयप्रासादिवासप्रवणः सदैव ।
प्रयातु तां पातुमयं ततस्त्वं निश्चिन्तचित्तः स्वपिहि स्वतन्त्रः ॥१७५॥
इति ब्रुवन्तं स महेभ्यदत्तं सद्वृत्तमापृच्छय महाऽऽग्रहेण ।
अगच्छदेतत्तनयाऽवनाय कीर्तिप्रियाकर्षणसाधनाय ॥ १७६ ॥
स्वकर्मनिर्माणविधौ प्रयत्नं कुर्वन्ति ये सन्ति गृहे गृहे ते ।
परार्थनिर्मापणनैपुणा ये सन्तः कियन्तः किल तेऽत्र सन्ति ? ॥१७७॥
अथापतन्तं तमवेक्ष्य धीरं शणाविनिर्धूतकृपाणपाणिम् ।
महेभ्यदत्तस्य सुता सुरूपं दध्यौ स्वचित्ते धृतविस्मया सा ॥ १७८ ॥
महः समादाय दिनाधिनाथाद् रूपं पुनः शम्बरवैरिणोऽपि ।

मृगेश्वराच्छौर्यमहो ! विधात्रा सृष्टोऽयमेकोऽत्र महाद्भुताय ॥१७९॥
अहं समग्रास्वपि सुन्दरीषु पापीयसी केवलमस्मि यस्याः ।
कृते नृरत्नं तु विनङ्क्ष्यतीदं ज्ञानं यथाऽस्या अविनीततायाः ॥१८०॥
अहं पुरस्तोद्विजनाय जज्ञे कण्डूरिव प्राक् प्रसरं श्रयन्ती ।
ततः परेषामपि, हा ! कुतो मेऽपुण्योदयादेव न तत्क्षयाशा ? ॥१८१॥
विचिन्तयन्तीमिति दत्तकन्यामभ्येत्य स प्राहरिकक्षितिस्थः ।
मनोहरालापविशेषसृष्ट्या तां रञ्जयामास कलाविदग्धः ॥१८२॥
गते रजन्याः प्रथमेऽथ यामे सुष्वाप सा दत्तमहेभ्यकन्या ।
विमुच्य शय्यां स गवाक्षस्तूला सृत्वाऽऽनयत् पुष्पितकाष्ठखण्डम् ॥१८३॥
विमुक्तमाच्छाद्य तदात्मतल्पे तेन प्रसर्पद्विपणाधनेन ।
स्वयं समाकृष्य स मण्डलाग्रं छायां प्रदीपस्य बिभीर्विभाज ॥१८४॥
क्षणाद् गवाक्षेण मुखं सुधांशुं संचूर्ण्य पूर्णं विधिनेव सृष्टम् ।
शनैः शनैः स प्रविशद् विलोक्य कृत्वाऽवधानं सविशेषमश्वात् ॥१८५॥
इतस्ततो वीक्ष्य गृहान्तरं तत्तेनापसस्रे वदनेन तूर्णम् ।
अथाविशत् पाणिरुपेतलज्जान् पद्मान् स्वरुच्या रचयन्निवाऽरम् ॥१८६॥
महौषधीयुग्ममुरुप्रभावं हस्तेऽस्ति तस्मिन् वलयाकृतिभ्राट् ।
विनिस्सरेदेकत एव धूमो घातव्यथाया विलयो द्वितीयात् ॥१८७॥
विनिर्ययौ फूत्कृतिमात्रतोऽपि धूमस्य राशिः प्रथमादुदग्रः ।
प्रसारिणाऽपूर्यत तेन तस्य पस्त्यं जलौघैरिव वारिराशिः ॥१८८॥
सविस्मयस्तत् समवेक्ष्य वत्सराजोऽपि तस्थौ स गवाक्षपार्श्वे ।
प्रविश्य च प्राहरिकीं स शय्यां पाणिः परामृक्षदितस्ततोऽपि ॥१८९॥
स्वचिन्तितं किञ्चन च प्रपञ्चं पाणिः स यावत् कुरुते पुरावत् ।
जवात् कुमारस्तरवारिणा तं क्रोधारुणस्तावदयं जघान ॥१९०॥
महाप्रहारव्यथितोऽपि तस्या दिव्योऽयमित्यत्रुटदेप नैव ।
अमानवानामिव मानवानां यस्माच्छरीराणि न पार्थिवानि ॥१९१॥
विनिर्गते तत्र करे बहिष्टाद्धा ! वञ्चिता केनचिदस्मि बाढम् ।
"आकर्ण्य तस्या इति वाक्यमुच्चैः पृष्ठे गवाक्षेण दधाव वीरः ॥१९२॥
पलायमानस्य जनस्य पृष्ठे धावेद्धयानिति सन्निवृत्तः ।
तदौषधीयुग्ममवैक्षताऽयं पाणेः प्रहारात् पतितं तदीयात् ॥ १९३ ॥

द्वयं तदादाय स जामदेव यावत् पुनस्तिष्ठति तावदेषा ।
महेभ्यकन्या रजनीविरामे मीलत्प्रमीला समभूत् सहेला ॥ १९४ ॥
अमुं समीक्ष्याऽक्षतकान्तिगात्रं हृष्टा भृशं चिन्तयति स्म सैवम् ।
अहो! अयं नाऽपि महाप्रभावो व्यालोक्यते लोकविविक्तसत्त्वः ॥१९५॥
अरक्षदेवं स्वमनन्तशक्तिर्यो यामिकत्वं प्रतिपद्य ह्यम् ।
नृरत्नविध्वंससमुद्भवाद् मां यो वा महापातकतः कृपालुः ॥ १९६ ॥
पराक्रमेणाऽर्जुन एप एव नित्यं यशोभिश्च समुन्नमद्भिः ।
पितुर्मदीयस्य गतां कलङ्काद् व्यावर्त्तयत् कीर्तिगवीं य एवम् ॥ १९७ ॥
विवेक्ष्यते चेदयमेव मां तद् मंस्ये सुखं वैपयिकं स्वतोऽपि ।
भवान्तरे चापरथाऽनुरूपं कान्तं विना किं सुखमस्ति यद्वा ? ॥१९८॥
तथाऽनुयुक्तः स च वत्सराजः स्माह स्वरक्षाचरितं यथावत् ।
विवर्णनीयं वरवर्णिनीयमाकर्ण्य तत् संमदमाससाद ॥ १९९ ॥
तदा जलाऽमत्रकरा भुजिष्या तत्राऽऽगमत् तत्करणीयनिष्ठा ।
तयाऽर्पितं साऽपि च दन्तकाष्ठं कृत्वा मुखं क्षालयति स्म तुष्टा ॥२००॥
निशम्य जीवन्तममुं महेभ्यो दासीमुखाद् विस्मित एत्य मङ्क्षु ।
निपद्य पीठे तनयावितीर्णे पप्रच्छ वत्सं तमुपांप्रबन्धम् ॥ २०१ ॥
स धारिणेयोऽपि यथास्थितार्थां रात्रिप्रवृत्तिं निजगाद तस्य ।
गिरं विसंवादपदप्रयोज्यां प्राणात्ययेऽपि प्रवदन्ति न ज्ञाः ॥ २०२ ॥
तमभ्यधाद् दत्त उदारचित्तः पुत्रीप्रबन्धेन विवर्धमानः ।
मदन्ववायस्य कलङ्कपङ्कस्त्वच्छौर्यगाङ्गेयजलेन मृष्टः ॥ २०३ ॥
इमां ततस्त्वं स्वगुणार्थशक्तिक्रीतां समादत्स्व महानुभाव ! ।
निमित्तमात्रेण मया प्रदाने संबन्धवृत्त्यैव भविष्यतेऽस्याः ॥ २०४ ॥
अवोचदेषोऽपि कथं कुलाद्यविज्ञाय मे तात ! ददासि कन्याम् ? ।
उपेक्षणीयाऽपि न चापरीक्ष्य देया तथा साऽपयशस्तनोति ॥२०५॥
भवादृशा नापयशःपदं स्युः पुण्याशया वृत्तविदां पुरोगाः ।
विना नयस्य प्रतिपत्तिमत्र केषां न केषामयशः प्रवृत्तम् ? ॥ २०६ ॥
अथाऽभिलापस्तव सत्क्रियायां सा किं न शक्याऽप्यपरोपचारैः ? ।
विधीयते तत् किल कर्म साधो ! सम्पादितं यच्च करोति सातम् ॥२०७॥

१ परिणेष्यते । २ रात्रिवृत्तम् ।

इतीरितं तस्य निशम्य हर्म्यी प्रोवाच वाचस्पतिवद् विदग्धः ।
कुलादिकं व्याहृतमेव वत्स ! युष्मद्गुणैः शौर्यविवेकमुख्यैः ॥२०८॥
उपेक्ष्यते चेत्तनया किमर्थं त्वां जन्मभूमिं स्वपुरं विहाय ? ।
पुरं क्रियेताऽत्र सदेकमर्त्यसंहारमप्याऽऽद्रियतां क एतम् ? ॥ २०९ ॥
विलोकनेनैव मणिप्रभाणां ये कुर्वते निर्णयमेकदृष्ट्या ।
नृरत्नमालोक्य विनिर्णयं ते कर्तुं जडाः किं किमुताथ मूकाः ?॥२१०॥
परोपकारप्रवणाशयत्वं लोकोत्तरं ते कुलमब्रवीद् मे ।
प्रभाकृतो यादृशमस्ति तेजः खद्योतपोते हि न तादृशं स्यात् ॥२११॥
त्वयैव संयोगमवाप्य पुत्री पुण्यैरमीभिर्न कथं यशांसि ।
कुलस्य मालिन्यविलोपनेन सम्प्रापयिष्यत्यचिरेण मैषा ? ॥ २१२ ॥
दुराग्रहं तस्य विबुध्य वत्सो व्याचष्ट यद्येवमहो ! पुरस्तात् ।
विधाय कार्यं समुपैमि पश्चात्तातस्य निर्देशमहं विधास्ये ॥ २१३ ॥
इति ब्रुवन्तं स महेभ्यदत्तस्तं गाढमभ्यर्थ्य निजां तनूजाम् ।
विवाहयामास महोत्सवेन पद्मालयां विष्णुमिवाम्बुराशिः ॥ २१४ ॥
तमस्विनीं तामतिवाह्य तत्र वृत्तं प्रतिज्ञाप्रतिपत्तिपूर्वम् ।
निजं समाख्याय महेभ्यपुत्र्यै प्रातःप्रतस्थे स्थितिमान् स वत्सः॥२१५॥
महाटवीं श्वापदसंकुलां तामेतां समन्तादपि पर्यटन् सः ।
विशालशालैः कलितं पुरस्तादेकं पुरं प्रैक्षत निस्तरङ्गः ॥ २१६ ॥
अचिन्तयच्चाद्भुतरत्नक्लृप्तप्राकारविभ्राजि पुरं किमेतत् ? ।
न दृश्यते यत्र चतुष्पदानां बौद्धे मते जातिरपि प्रवृत्ता ॥ २१७ ॥
विचिन्त्य चैवं घनपद्मजातिपद्माकरे क्षालितविग्रहोऽयम् ।
श्रमापनोदाय स पालिशालच्छायां समालम्ब्य मनाग् निषण्णः॥२१८॥
निरीक्ष्य नारीजनमेव तत्र नीरं घटैरेव समाहरन्तम् ।
पुनः पुनः पुण्यमतिः स चैकां रामां बभाषे रमणीयमूर्तिम् ॥ २१९ ॥
इयं पुरी का सुतनु ! प्रशास्ता को वाऽत्र गोत्राधिपतिर्द्विधाऽपि ।
भ्रदीयसीभिर्भवतीभिरेतद् भूयस्तमां वारि किमुह्यते वा ? ॥२२०॥
तदुक्तवाणीश्रवणोपलम्भरोमाञ्चिताङ्ग्या स तयाऽप्यभाणि ।
इमां पुरीं व्यन्तरवध्व एव भद्र ! व्यधुः स्वैरविहारहेतोः ॥२२१॥

१ माम् ।

इदं पुरीस्वामिपदं बभार या व्यन्तरीणां च तथा समासाम् ।
क्वचिद् गता सा व्यथिता सुतीक्ष्णखड्गप्रहारेण करारविन्दे ॥२२२॥
प्रसेदुषा व्यन्तरनायकेन तस्या वितीर्णं वलयाकृतीडयम् ।
यदौपधीद्वन्द्वमवाप्तबाधहस्तात् तदा तत् पतितं विहस्तात् ॥ २२३ ॥
समस्तशस्त्रोपनिपातघाततीव्रव्यथासंहरणाय चैका ।
प्रकुर्वती त्वा घनधूमपूरं सम्पद्यते लोकविमोहनाय ॥ २२४ ॥
न तत्प्रयोगेण विना तदीयपाणेर्व्यथा: शान्तिमधिश्रयन्ते ।
जलाभिषेकेण च किञ्चनापि तेनैव वारीणि वहामहेऽरम् ॥ २२५ ॥
नरागदङ्कारविचारसारप्राप्तप्रतिष्ठोऽस्मि मदौषधेन ।
करव्यथायाः प्रशमो यदि स्यात् तस्या निगाद्यं तदिदं भवत्या ॥ २२६ ॥
तदीरितं चेतसि सा निधाय देव्याः पुरस्तात् त्वरितं बभाषे ।
विलम्बमालम्ब्य न हि प्रवृत्तिः स्वस्वामिकार्याहितमानसानाम् ॥२२७॥
तमाह्वयामास तदैव देवी हर्षप्रकर्षाञ्चितनेत्रपद्मा ।
पुरा भिषग्विस्तरमाततान मायामधिष्ठाय स तन्निदेशात् ॥ २२८ ॥
सुरी परेद्युर्जलहारिणी साऽवादीत् कुमारं रहसि प्रसन्ना ।
करव्यथायाः शमनाद् ममैषा चेत् स्वामिनी तुष्यति भद्र! तुभ्यम् २२९
तदैव सौधोपरि वर्तमानं कन्यायुगं मन्मथरूप ! नाथेः ।
तथाऽश्वरूपाप्रतिरूपयक्षं पल्यङ्ककं कामितदानलक्ष्यम् ॥ २३० ॥
व्यथाऽपनोदाय ततश्च तस्या निर्माय निर्माय सविस्तरं तम् ।
तदौषधीयुग्ममपि प्रयुज्य तद्यातनां तां स निराचकार ॥ २३१ ॥
सुरीश्वरी व्यन्तरनायिका सा तोषाद् बभाषे तमपेतबाधा ।
इमं ममानर्थमजीजनस्त्वमामेति तेनाऽभिहिते त्ववादीत् ॥ २३२ ॥
त्वदाहितात् साहसतोऽस्मि तुष्टा किंचित्तदिष्टं मनसो वृणीष्व ।
इतीरितः सोऽपि तथैव धन्यः कन्यादिकं तत् प्रथमं ययाचे ॥ २३३ ॥
तमाह माहात्म्यनिधिः पुनः सा पुत्र ! ध्रुवं गेहभिदाऽत्र जज्ञे ।
सकर्ण ! कन्यादिजनिं ततस्त्वं मत्तः समाकर्णय चाप्रमत्तः ॥२३४ ॥
इहास्ति वर्षे कृतलोकहर्षे वैताढ्यभूमीधरभूषणं पूः ।
अभिख्यया या चमरादिचञ्चा चञ्चन्महाखेचरवेश्मरम्या ॥ २३५ ॥
प्रशास्ति तां शत्रुतृणौघगन्धवाहः क्षितीशः खलु गन्धवाहः ।

वधूद्वय तस्य सुवेगिकाऽऽख्या जज्ञे द्वितीया मदनादिवेगा ॥ २३६ ॥
तयो सुते द्वे क्रमशोऽप्यभूता श्रीरत्नचूला रमणीषु रत्नम् ।
परा प्रतीता कनकादिचूला रम्भाप्रतिद्वन्द्विलयेव सृष्टा ॥ २३७ ॥
सरस्वतीवार्धिसुते इव द्वे विद्याधराधीश्वरपुण्ययोगात् ।
गृहेऽवतीर्णे समवेक्ष्य कस्ते न प्राप्यभावादभवद् विलक्ष ? ॥२३८॥
पितु समालोकयतोऽपरेद्युस्ते यौवनोद्भेदविशेषरम्ये ॥
वरैकचिन्ताप्रसितस्य कोऽपि नैमित्तिक ससदमाससाद ॥ २३९ ॥
चिराय जीवेति कृताशिष त पार्श्वे निविष्ट स नृपोऽप्यपृच्छत् ।
वर कुमार्योरनयोर्ममाज्ञ ! को विज्ञ ! भावी विनिवेदयस्व ? ॥२४०॥
निमित्तवित् तद् विगणय्य सर्वं सर्वसहाऽधीश्वरमाललाप ।
महीपतीना पुरतोऽविमृश्य वक्तु न शक्य मतिशालिनाऽपि ॥२४१॥
इमे महीगोचर ! मारुरूपश्रीवत्सराजस्य कुमारकस्य ।
भविष्यतो द्वे अपि वल्लभे तच्चिन्तामपास्यं क्षितिपालराज ॥२४२॥
ततस्तमूचे नृपतिर्मयैते क्ष्माचक्रवालस्थितिशालिनेऽस्मै ।
स्थितेन वैताढ्यमहीधरेऽस्मिन् केनाभ्युपायेन सुते प्रदेये ? ॥२४३॥
बभाण नैमित्तिक एव भूयस्त भूमिभर्तस्तव सन्निधाने ।
अहो ! विवाहो भविताऽनयोर्न यज्जीवित ते किल माससमात्रम् ॥२४४॥
महीपते ! याऽवनिगोचरेण श्रीसूरराजेन तवैव जामि ।
विवाहिताऽभूज्जनकेन दत्ता सूरानुकल्पेन महौजसाऽपि ॥ २४५ ॥
स भूपति प्राग्भववातिहार्दात् काञ्चित् समालोक्य कनीं सुरूपाम् ।
विवाह्य चाशक्तिवशादरस्त सस्मार तस्यास्तु न नाममात्रम् ॥२४६॥
असूयया साऽपि तत सपत्न्या कृत्वा चिर बालतपो विपद्य ।
अजायत व्यन्तरदेवता स्राक् तादृक्तपोभि किमिवाप्रमेतन् ? ॥२४७॥
पराऽपि सूरस्य महीश्वरस्य प्राणप्रिया सा निधनत्वमाप्य ।
महेभ्यदत्तस्य तनूभवा श्रीदत्ताऽभिधानप्रथिता बभूव ॥ २४८ ॥
अगण्यलावण्यनिधानभूता सा वर्तते साम्प्रतमुर्वशीव ।
विशेषतो व्यन्तरदेवता सा विद्वेषमुर्व्याविदधाति तस्याम् ॥ २४९ ॥
विधास्यते यामिकभावमस्या यो यामिकोऽपि प्रियता विनाऽपि ।

१ लज ।

अवश्यमेव प्रकृतिप्रचण्डा तं प्रापयिष्यामि यमस्य वेश्म ॥ २५० ॥
इति स्वचित्तेऽवधिसंविदा तद्विद्वेषमन्तर्दधती विमृश्य ।
नरक्षयं सा कुरुतेऽद्यकल्ये तत्पार्श्वे एते प्रहिणुष्व तत्त्वम् ॥ २५१ ॥
महेभ्यदत्तस्य तनूभवायाः स्वीकृत्य स प्राहरिकत्वमीशः ।
भवत्स्वसुः पाणितलं प्रहृत्य दत्तस्य कन्यां परिणीय दत्ताम् ॥ २५२ ॥
विधाय सज्जं करमेव तस्या दासीभिरावेदितवैद्यविद्यः ।
नृमारणं तद्विनिवार्य देव्यां कन्ये विवोढा तव वत्सराजः ॥ २५३ ॥
(युग्मम्)
इतीदृशीं खेचरभूमिभर्ता ज्योतिर्विदो वाचमसौ निशम्य ।
मदन्तिके द्वे इमिके विमुच्य किञ्चित्तपो दुस्तपमाचचार ॥ २५४ ॥
विपद्य स व्यन्तरनायकोऽभूद् मासावसाने विशदाशयोऽपि ।
समं विदित्वाऽवधिनैव तेन पल्यङ्कयक्षादि ददे मुदा मे ॥ २५५ ॥
तदेतदङ्गीकुरु सर्वमेव दत्तं मया तेऽपि निरामयाय ।
सुरीश्वरी सा विरराम कन्यादुत्पत्तिमित्युक्तिपथं प्रणीय ॥ २५६ ॥
कनीयुगं तत्तयका प्रदत्तं पर्याप्तऋद्धयैव स पर्यणैषीत् ।
ददौतरां व्यन्तरनिर्जरी सा पल्यङ्कवाहादि च यौतके तत् ॥ २५७ ॥
सहाऽथ ताभ्यां प्रियवल्लभाभ्यां ज्योत्स्नाकलाभ्यामिव गौरधामा ।
निनाय कांश्चित् दिवसान् सकामो भुञ्जन् सुखं वैषयिकं स वत्सः ॥
महेभ्यदत्तस्य तनूभवां तां प्राणप्रियामस्य हृदा विचिन्त्य ।
समुज्झितप्राग्भववैरवारा पुत्रीमिवाऽमन्यत देवताऽपि ॥ २५९ ॥
निशावसाने स निजां प्रतिज्ञां संस्मृत्य दध्यावपरेद्युरेवम् ।
अहं कथं कुञ्जरवन्निमग्नो हा ! हाऽस्मि सान्द्रे विषयोग्रपङ्के ॥ २६० ॥
विभूषणं यत् पुरुषोत्तमानां विद्वद्भिरावेद्यत पाञ्चजन्यम् ।
यदृच्छया वद्गमितं मुधा तैर्येषां प्रतिज्ञा व्यभिचारिणी स्यात् ॥ २६१ ॥
सचेतनश्चेतसि चिन्तयित्वेत्यर्कोदये तां विनिवेद्य सन्धाम् ।
सुरीश्वरीं मातृपदप्रणत्या आपृच्छते स्म प्रतिपत्तिसारः ॥ २६२ ॥
तया विसृष्टः स समं प्रियाभ्यामारुह्य पल्यङ्कमपेक्ष्य यानम् ।
नभःपदव्या भुवनानि पश्यन् श्रीदत्तयाऽध्यासितमाप वेश्म ॥ २६३ ॥
स्ववासवेश्मोपरि वर्तमाना पल्यङ्कमालोक्य तुरङ्गयुक्तम् ।

अपेतनिद्रा प्रविधूततन्द्रा चित्ते चमत्कारमधारयत् सा ॥ २६४ ॥
मनुष्यपर्यङ्कमुख्यभावा अत्राऽऽपतन्त्येव न चित्रमत्र ।
तुरङ्गमस्त्वेष कथं समायाद् मायां विना सप्तमभूमिभागम् ? ॥२६५॥
किमीदृशं विश्रुतमिन्द्रजालं दृष्टेर्भ्रमो वाऽथ मतिभ्रमोऽयम ? ।
प्रकल्पयन्तीति मनोविकल्पान् पल्यङ्कपार्श्वे सहसा जगाम ॥ २६६ ॥
पटीं समुत्पाट्य निजं पतिं साऽपूर्वं द्वितीयाद्वितयोपगूढम ।
स्मरं रतिप्रीतियुतं वितर्क्य दृष्ट्वा परानन्दमविन्दताऽरम ॥ २६७ ॥
मनस्यसंमान्तमिव प्रमोदं वप्तुः पुरस्तं निजगाद साऽपि ।
ससंभ्रमः सोऽपि तदैव दत्तः सौधोपरिष्ठात् समुदापपात ॥ २६८ ॥
विलोक्य जामातरमागतं तं मघवकपाणिं कमलाधिवासम् ।
रसैरनेकैः फलितः प्रभाते श्रेष्ठी स रत्नाकरवत् तुतोष ॥ २६९ ॥
समाव्रजन्तं श्वशुरं समीक्ष्य पीठात् समुत्थाय ससंभ्रमस्तम् ।
ननाम, पृष्टः सरलं स्ववृत्तं पत्न्यैकया शंसयति स्म चैषः ॥ २७० ॥
शुभाशुभावान्तृतिवर्त्म नीत्वा जामातृवृत्तान्तमसौ महेभ्यः ।
सविस्मयः स्वं बहु मन्यते स्म कः 'स्वादानाद्' बहुमानवान् न ? ॥२७१॥
जनीत्रयेणैव विराजमानः शक्तित्रयेणेव स राजराजः ।
गते त्रियामाप्रथमांशयामे पल्यङ्कमारुह्य ययौ विशालाम ॥ २७२ ॥
अदत्त दिव्यं वसनं स देव्यै स्वमेव स्वमातुः कलधौतयेऽस्यै ।
अहर्मुखे यत् परिधाय साऽपि देवीमिवात्मानममंस्त भूस्थाम् ॥ २७३॥
प्रयच्छता दिव्यपटं ममेमं वत्स ! त्वया पूरयता प्रतिज्ञाम् ।
यश पटेनेन्दुसमुज्ज्वलेनैवेनाऽऽवृता, किं न दिशो दशापि ? ॥२७४॥
प्रशंसतीत्थं नृपवल्लभा सा पादारविन्दद्वितयं नमन्तम् ।
समुन्नतमुत्सङ्गगतं विधाय मूर्धारविन्दे भ्रमरीव जघ्रौ ॥ २७५ ॥
सुराङ्गिवर्दिदत्तमहोपदाभिः कान्ताप्रवालद्रुतपार्श्वपूर्णा ।
विनम्य तां मातरमादरेण मातृष्वसारं च समानसारम् ॥ २७६ ॥
विधाय सन्मानमहोत्सवानां देशान्तरागेशिनवानुरागाम् ।
निवेदनेन प्रमदं विनम्यैकोऽन्यनेकत्वमवाप मणगा ॥ २७७ ॥
(युग्मम)

स चम्पकाजस्मिन्नभि दिवाभिर्युक्तुत्रयो हर्मिवियाऽत्रभागे ।

प्रभूतभूत्याऽऽकलितः कलावहेरा दधानो वृषवाहनोऽपि ॥२७८॥
नृपप्रियाऽन्येद्युरभूत् सरोगा सा राजहंसीव पदाल्यरागा ।
प्रियेण हंसेन च पर्यहारि चित्रं स्थिरं प्रेम न दृश्यते वा ॥ २७९ ॥
कथाऽवशेषत्वमुपागतायां तस्यां परं सुभ्रुवि भूमिपालः ।
अधीरधीः शोकविसंस्थुलः संश्चक्रे विमुग्धः परिदेवितानि ॥ २८० ॥
प्रियेऽङ्ग ! सप्ताङ्गमिदं मदीयं राज्यं विभाति त्वयका विनैव ।
करक्रमाऽऽस्यश्रुतिलोचनेषु भास्वत्सु ना नासिकया विनैव ॥ २८१ ॥
सुधारसस्पर्धनवर्धितास्ता वाचः क्व ते काञ्चिविकूणितं च ? ।
युवाशयानङ्गविबोधनैतकं सारं द्वयं किं जगृहे यमेन ? ॥ २८२ ॥
त्वदङ्गसङ्गप्रभवं मृगाक्षि ! जाने सुखं किञ्चन नापरत्र ।
अवाप्यते पुण्यवशेन यद्वा पुंसाऽमृतं तत्समता क चास्तु ? ॥२८३॥
इति प्रकुर्वन्तमिलापतिं तं बाढं विलापान् स तु वत्सराजः ।
प्रबोधयामास सुभाषितौघैः शोकोपतापोपशमाम्बुसारैः ॥ २८४ ॥
भवादृशश्चेद् विदधाति शोकं गाम्भीर्यसन्तर्जितसिन्धुमुद्रः ।
ततो ध्रुवं वाडवपावकेन शोषः समुद्रस्य सुखं क्रियेत ॥ २८५ ॥
तडिल्लताकुञ्जरकर्णतालदम्भोलिभृत्कार्मुकसारभागैः ।
विधीयते यद् विधिनाऽतिलोलमायुःक्षये शोचति तस्य को ज्ञः? ॥२८६॥
न यौवनं स्वं स्थिरतां तनोति संवेदनं नापि न चापि सारम् ।
न जीवितं तद् नृपते ! किमर्थं क्षुद्रस्य शोकस्य वशंवदाः स्थ ? ॥२८७॥
इतीदृशैस्तस्य वचःप्रपञ्चैः शोकं मुमोच क्षितिपालसिंहः ।
बलाहके वर्षति वा समन्तात् तापं महीध्रा अपि किं दधन्ताम् ? ॥२८८॥
स चैकदा स्वाभिमतं कुमार आलोचयामास समं प्रियाभिः ।
प्रियाः ! स्वयं वोऽनुमतेर्निमन्त्र्य क्ष्मापं गृहे भोजयितुं समीहे ॥२८९॥
अवादिषुस्ताः प्रिय ! भूप्रियो नाऽऽनेतुं गृहे युज्यत उत्सवेऽपि ।
अथासि भूमीपतिसच्चिकीर्षेत् तत्रैव तस्यौचितमाचर त्वम् ॥२९०॥
जगौ स नो गौरवगौरता स्यादेवं प्रियास्तन्नृपतिं निमन्त्र्य ।
गृहे समाकार्य विकार्यवर्जं सत्कृत्य च स्वं चरितार्थयामः ॥ २९१ ॥
इदं यदि स्वान्तगतं तवेश ! तद् दर्शनीया वयमेव नाऽस्मै ।
इति प्रपद्योपनृपं गतस्तं स प्रार्थयामास निमन्त्रणेन ॥ २९२ ॥

महीमहेन्द्रस्तमुदाजहार वत्साऽऽहितं चैतदुपक्षयाय ।
कृतं प्रवृत्त्याऽप्यनयाऽथ मानप्रख्यापनं ते भविताऽन्यथाऽपि ॥२९३॥
न मानसम्भावनमन्यथाऽहं जाने जनाधीश ! विनाऽऽगमेन ।
उपक्षयं ते गणयन्ति येषां स्वामिप्रसादो न मनागपीह ॥ २९४ ॥
विलोकनं ते वदनस्य राजन् ! साक्षाद् महापद्ममवैमि सारम् ।
विकाशने स्वस्य न यद्यपेक्षा सूरोदयस्यापि कदाचनापि ॥२९५॥
विलोचने ते जयतः स्म पद्मं जाते यदेते भुवनोदयाय ।
व्यजेष्ट शङ्खं तव देव ! कण्ठो रेखात्रयं प्राप जगत्त्रयाद् यत् ॥२९६॥
त्वयाऽवधूतो मकरध्वजोऽयं यद् देहकान्त्या मकरोऽजितस्तत् ?।
क्षमाभरं धारयताऽनपेक्षं व्यक्तं जितः किं न स कच्छपोऽपि ? ॥२९७॥
श्रिया मुकुन्दादुपगत्य यत्त्वं स्वैरं श्रितस्तद् विधुतो मुकुन्दः ।
द्विजैरमीभिस्तव कुन्दकान्तिर्यत्तर्जिता कुन्दजयस्ततस्ते ॥ २९८ ॥
यशश्चयैर्विश्वविसृत्वरैस्ते नीलः पराभावि नितान्तगौरैः ।
नयागमे ते रसनाऽग्र एव चर्चा श्रिता तेन जितः स चर्चः ॥२९९॥
सतो निधीनां परमो नवानां त्वं राजराजत्वपदं दधानः ।
उपक्षयान्नाथ ! कथं बिभेषि मन्मन्दिरान्तःपदमादधानः ?॥३००॥
इति प्रक्लृप्तमहतो निमन्त्र्य क्षोणीपतिं वेश्मनि वत्सराजः ।
उपागतः स प्रियवल्लभाभिः प्राक्रंस्त ताभिः सह सारिखेलाम् ॥३०१॥
कियान् कृतः पाक उदात्तबुद्धेः श्रीवत्सराजस्य गृहेऽस्ति गत्वा ।
निभालयेति क्षितिपालधुर्यो दौवारिकाधीश्वरमादिदेश ? ॥ ३०२ ॥
स मङ्क्षु तद्वेश्म गतः कुमारस्याऽम्बां विनम्येति समन्वयुङ्क्त ।
कुमारनागः क्व, जगाद साऽपि वातायने खेलति खेलनीभिः ?॥३०३॥
समन्ततो वीक्ष्य गृहं समस्तं पृष्ट्वेति तत्कालमयं निवृत्तः ।
व्यजिज्ञपद् भूमिपतिं विनम्य धूमोऽपि तत्राऽस्ति न पाकचिह्नम् ॥३०४॥
विलोकयस्य प्रतिवेदिसद्मान्येतस्य गत्वा किल तेषु पाकः ।
विधापितः स्यादिति भूमिभर्ता भूयस्तमादिक्षददृष्टदोषः ॥ ३०५ ॥
अदर्शि पाकः प्रतिवेशिनीभिर्विधीयमानो न मनागपीति ।
पुनर्निरीक्ष्याऽऽगत एष भूपं दौवारिको विज्ञपयाम्बभूव ॥ ३०६ ॥
मयाऽपि साकं कुरुते कुमारः किं नाम हास्यं मनसाऽविमृश्यम् ? ।

महोपरोधेन निमन्त्र्य यन्मां पाकोऽपि नाऽकारि गृहेऽपि तेन ॥३०७॥
रूपं वितन्वन्निति चेतसाऽयं यावद् नृपस्तिष्ठति तावदागात् ।
ब्रुवन् कुमारोऽयमिति प्रसीद मन्मन्दिरं पावय पादपद्मैः ॥ ३०८ ॥
दधल्ललाटे भ्रुकुटिं ललामः क्षोणीभुजामेष तमेवमाह ।
न युज्यतेऽस्माभिरमा तवाऽपि शिष्यस्य विद्यागुरुणेव हास्यम् ॥३०९॥
प्रगे यदस्मान् विनिषेधतोऽपि शक्त्या निमन्त्र्योपगतेन सद्म ।
पराऽस्तु भोज्यस्य विशेषभङ्गी नैवाऽन्नपाको जनितस्त्वयाऽपि ॥३१०॥
वितन्वते केऽपि परेऽपि भृत्या न स्वामिपादैः सह देव ! हास्यम् ।
अहं महाराजपदोपजीवी तत्किं विनिर्मातुमपि क्षमोऽस्मि ? ॥ ३११ ॥
कदापि वाचि व्यभिचारिता मे निर्धारिता नास्ति यदि त्वयेश ! ।
तदा समागत्य गृहं पुनीहि देवोऽपि विज्ञास्यति तत्र सर्वम् ॥ ३१२ ॥
विधेयतां दर्शयताऽतितुच्छं विज्ञप्त इत्येष कुमारकेण ।
गजेन्द्रमारुह्य नरेन्द्रवर्यः सामन्तभृत्यैः सहितश्चचाल ॥ ३१३ ॥
अमात्यवर्येण वितीर्णबाहुस्तन्मन्दिरद्वारि जनाधिनाथः ।
सुवर्णरत्नाभरणावभासिस्तम्बेरमादुत्तरति स्म तूर्णम् ॥ ३१४ ॥
पुरस्सरीभूय ससम्भ्रमोऽथ श्रीवत्सराजः करकं गृहीत्वा ।
हिरण्मयं द्वारविभूषणाय क्षोणीभुजेऽभ्युक्षणमाश्वऽदत्त ॥ ३१५ ॥
भुजिष्यसज्जीक्रियमाणनागवल्लीदलाग्रेसरवीटिकौघम् ।
कचित् कचित् स्थापितपीठकोटिकोटिस्खलल्लोकपदप्रपातम् ॥ ३१६ ॥
कचित् कृतालेपनसिद्धधान्यस्थालीशताकीर्णमवाप्तशोभम् ।
गृहान्तरं चास्य विशन् नरेशो व्यालोकयामास सविस्मयः सन्॥३१७॥
(युग्मम्)

मुहुर्मुहुर्वाचमिमामुदीर्णां पदोऽवधानं रचयेति जल्पन् ।
स्वयं भुजालम्बमयं प्रदाय सौधोपरिष्टाद् नृपतिं निनाय ॥ ३१८ ॥
मसूरकैः सप्तभिरावृतं तत्क्षौमांशुकीयैस्तलिनैर्विचित्रैः ।
अलंचकार क्षितिपालसिंहः सिंहासनं तत्र चतुष्कभूमौ ॥ ३१९ ॥
ममाद्य तन्मौक्तिकमेव वृत्तं विश्वम्भराऽधीशघनागमेन ।
शुभार्जनस्वातिकतारयोगादित्यन्तरुद्भावयितुं प्रवृत्त. ॥ ३२० ॥

---

१ विनयस्थताम् ।

कराम्बुरुड्शुक्तिपुटं दधानः सामुद्रिकक्षेत्रकलक्षणोत्थम् ।
महीमघोनः पुरतो निविष्टः श्रीवत्सराजो गिरमुज्जगार ॥ ३२१ ॥
(युग्मम्)

भवादृशाः सद्मनि मादृशानां पुण्योत्तमाः पुण्यविवर्जितानाम् ।
कदापि नैवोपनमन्ति गौरा यद्राजहंसा न मरौ रसेच्छाः ॥ ३२२ ॥
समागतं यत् किल राजहंसैर्विस्फूर्जितं यत् कमलाकरैश्च ।
प्रसन्नमाशाभिरलं यदाभिः किं नो स मे पुण्यशरत्प्रकर्षः ?॥ ३२३ ॥
इतीदृशोक्तीरभिधाय हेमस्थालं महीयः स च मण्डयित्वा ।
अबूभुजत् तं परमान्नभोज्यं स्वादप्रतिध्वस्तसुधारसौघम् ॥ ३२४ ॥
वहुप्रकारं विनिवारितेन कान्तेन तेनैव नियोजितास्ताः ।
पतिव्रता अश्नति भूपतौ स्म दध्यादि सर्वं परिवेषयन्ति ॥ ३२५ ॥
मनोवचःकायविचेष्टितानि विद्धानि राज्ञः सममेव ताभिः ।
प्रदर्शयन्तीभिरलं स्वरूपं चित्रं नु भल्लीभिरिव स्मरस्य ॥ ३२६ ॥
तदेककेयं किमुतैकके द्वे तिस्रोऽथ निर्णेतुमयं न शक्तः ।
विचित्रनेपथ्यविभूषणानां पश्यन् विशेषं क्षणिकं स तासाम् ॥ ३२७ ॥
अहो ! स्मरव्याधपतेरिहापि कौशल्यमालोक्यत एव लोकैः ।
अवीक्षितं विध्यति हन्त ! पौष्पैर्वाणैर्मनोमत्तमतङ्गजं यः ॥ ३२८ ॥
किमेतदास्ते कटुकं किमेतत् तिक्तं किमेतत् मधुरं किमम्लम् ।
कषायभाक् किं लवणं किमेतदित्यादि वेद स्म तदा न सोऽपि ?॥३२९॥
स्वकुक्षिसात् सर्वमिवापि कुर्वन् साक्षात् पिशाचो बुबुधे स ताभिः ।
अयं नरत्वेऽपि सुपर्वभावं तन्वन् मनोभूः कथमस्तु वाच्यः ? ॥ ३३० ॥
नृपं कृताचामविधिं विधिज्ञः कोटीरहारादिविभूषणौघैः ।
अमात्यसामन्तभुजिष्यभृत्यैः प्रीतः स सर्वैः सह सच्चकार ॥ ३३१ ॥
धराधवः सौधमगात्तदैव पञ्चेषुपञ्चेषुभिराहतोऽयम् ।
विनाकृतस्तत्क्षणमेव रत्याऽमात्यानिति स्माऽऽह रहः स्ववृत्तम् ॥३३२॥
यदैव वत्सप्रियकामिनीनां लावण्यमेतद् मयका निपीतम् ।
तदा प्रभृत्येव विबाधते मां वंहीयसी तद्विषयेषु तृष्णा ॥ ३३३ ॥
तदत्र कश्चित् कुरुताऽभ्युपायं तासां यथा सङ्गमहं लभेय ।
विहाय युष्मान् न परे हि पृच्छ्याः सन्देहदोलायितमानमानाम्॥३३४॥

अमात्य एको निजगाद तत्त्वमस्मिन्नये ! जीवति वीरवर्ये ।
क्षमेत को नाम नरो ग्रहीतुं प्राणप्रियाः सिंहसटाच्छटा वा ? ॥३३५॥
सदःसमेतः स ततः कुमारः श्रीसिंहभूमीपतिपीठ एव ।
निपात्यते त्यक्तविषादभारस्तेनाऽऽप्यते मृत्युमुखं यथाऽयम् ॥३३६॥
इति प्रबन्धे विहितेऽपवादोऽप्यार्यस्य कश्चिन्न भवेज्जगत्याम् ।
परैरमात्यैरपि मन्त्र एष प्राशंसि मूर्ध्नः परिधूनयद्भिः ॥ ३३७ ॥
सदःश्रितः सोऽपि समैः सदस्यैः सिंहाभिधस्यावनिवासवस्य ।
निवेश्यते स्माऽऽसन एव पूर्वं मुक्ते व्यवस्थाप्य हतव्यवस्थम् ॥३३८॥
व्रजन्नसौ वेश्म नृसिंहसौधात् सिंहाङ्कितद्वारि कुमारसिंहः ।
अनुत्थितेन क्रुधया प्लुतेन श्रीसिंहराजेन युधे न्यरोधि ॥ ३३९ ॥
अरे ! वृथामानविडम्बितात्मन् ! मामप्यविज्ञाय ममासने त्वम् ।
निविश्य गन्तासि वराक ! कुत्र तार्क्ष्यं समाक्रम्य यथा भुजङ्गः? ॥३४०॥
निशम्य सिंहस्य वचःप्रपञ्चं शौर्येण सिंहः स कुमारसिंहः ।
युद्धं विधातुं ववले बलीयान् को वाऽपमानं सहतां समर्थः ? ॥३४१॥
नियुद्धमाविष्कुरुतः स्म किञ्चित्तौ दृग्विनोदाय विलोककानाम् ।
ततः कुमारोऽधिकलाघवेन सिंहं नरेन्द्रं सहसा व्युदासे ॥ ३४२ ॥
समन्ततोऽपि स्वशिरः ससिंहं विभ्रम्य विभ्रम्य रुषाऽक्षिपद् द्राक् ।
स्वपौरुषन्युञ्छनकर्मवाञ्छासाफल्यनिर्माणतयेव वीरः ॥ ३४३ ॥
पुरादवूरे पतितस्य तीव्रभूपातघातादसुभिः प्रयाणम् ।
अकारि सिंहस्य नरेश्वरस्य भूयोऽभिघातादिव जातशङ्कैः ॥ ३४४ ॥
गृहं गतः सोऽपि च खेचरीभ्यामाभाष्यते स्म प्रियभाषिताभ्याम् ।
पुरा निषिद्धोऽसि निमन्त्रयंस्त्वं प्राणप्रिय ! क्षोणिपतिं दुरागम् ॥३४५॥
कुमन्त्रितेन स्वविनिर्मितेन प्राप्तोऽसि किं जीवितसंशयं न ? ।
अवाप्स्यसेऽद्याप्यपरीक्षितत्वेरापाततोऽनर्थफलं विशालम् ॥ ३४६ ॥
परं च सिंहक्षितिपो विपेदेऽसद्भावतः स्थामसमाश्रयोऽपि ।
तथाऽऽर्यपुत्र ! प्रयतः प्रमादमुत्सार्य भूया इह सावधानः ॥ ३४७ ॥
नृसिंहसिंहं निहतं निशम्य श्रीवत्सराजेन महाभुजेन ।
महीभुजाऽऽकार्य वितार्य पीठान् भूयोऽपि पृष्टा व्यमृशन्नमात्याः ॥३४८॥
इतोऽमुना सिंहपराक्रमोऽपि सिंहः कथञ्चिद् बलवत्तमेन ।

अनेन तद् मानमहाधनेन व्याघ्रीपयः साम्प्रतमानयामः ॥ ३४९ ॥
अवश्यमेवाश्वचक्रवर्तीमां स्वामिशिष्टिं प्रतिपत्स्यते सः ।
चिरादुपायेन यमातिथिर्न संपत्स्यतेऽनेन विनिश्चयेन ॥ ३५० ॥
इति प्रयुक्तात् सचिवात् सुमन्त्रादन्येद्युरायातमिलाचलारिः ।
पयः समानेतुममुं विनीतं व्याघ्र्याः समादिक्षदनामयाय ॥ ३५१ ॥
महीशितुः शासनमभ्युपेत्य वेश्माऽऽगतः शासितशत्रुवर्गः ।
अभाषि ताभ्यामिति खेचरीभ्यां प्रापि प्रिय[1] क्षुद्रतरो निदेशः ॥३५२॥
इदं युवाभ्यामपि केन कान्ते ! वेगात् समागत्य निवेदितं तत् ? ।
अवादि ताभ्यामथ तं प्रतीदं तत्र स्थिते शुश्रुवहे स्वयं नौ ॥ ३५३ ॥
यदीश ! भूमीशसमागमस्य घस्त्रं समारभ्य कृताभिशङ्के ।
अदृश्यरूपे सततं भ्रमावोऽनु त्वाऽन्तरायप्रलयाय कान्त ! ॥ ३५४ ॥
निदेशसिद्ध्यै च वेजाऽतिभीमां यक्षाद्रमारुह्य महाटवीं त्वम् ।
समस्ति या तत्र पवित्रगात्रा क्षेत्राधिपाऽसज्जननीसरसी सा ॥३५५॥
अरण्यदेशेऽनिशमेव तत्र व्याघ्रीस्वरूपं दधती च साऽस्ति ।
तुरङ्गमेतं सहसोपलक्ष्य सा साधयिष्यत्यचिरात् तवार्थम् ॥ ३५६ ॥
इति प्रियोक्तं प्रनिपद्य सद्यः श्रीवत्सराजः प्रययौ स तत्र ।
पप्रच्छ तस्मा अमरी यथोक्ता सा स्वागतं दर्शनमात्रतोऽपि ॥ ३५७ ॥
किमागतोऽसीत्यनुयुक्त एप क्ष्मापालकार्यं तदुवाच सत्यम् ? ।
कृताभ्यनुज्ञस्तयका च कर्णे धृत्वा स तां राजसदः समागात् ॥ ३५८॥
यथेच्छमस्या निजदृक्समक्षमार्दयितां दुग्धमिति ब्रुवाणम् ।
इमामरण्ये लघु मुञ्च मुञ्च व्यावृत्य चेत्याह धराधवस्तम् ॥ ३५९ ॥
प्रशस्यमानः सुभटैः स नीत्वा व्याघ्रीं सुरीं सद्मनि दारयुक्तः ।
कृतोपचारस्त्वकृतापराधं स्वस्थानगत्यै व्यसृजद् विशङ्कः ॥ ३६० ॥
दिनेषु केष्वेव गतेषु भूयः सस्मार ताः स स्मरविह्वलाङ्गः ।
तुनोद तद्वाभकृते तथैव सर्वानमात्यांश्च नृपोऽविनोदः ॥ ३६१ ॥
प्रतिक्षणं सङ्गमशैलयुग्ममध्याऽम्बुजं तोयमवार्यवीर्य ।
अयं समानाप्यत इत्यमात्यैर्विज्ञप्त एपोऽपि तमादिदेश ॥ ३६२ ॥
ममाङ्गनेर्ग्व्यकृते कुमार ! युग्माद्रिकूपाम्बु समानयेति ।

1 मन्ध ।

स्ववाचया भूमिभुजा नियुक्तस्तन्मानयामास स मानधुर्यः ।। ३६३ ।।
तदस्ति कुत्रेत्यमुना नियुक्तास्ते मन्त्रिणो वाचमिमामवोचन् ।
महीधरौ तुङ्गतमौ च मध्येविन्ध्याटवि द्वौ प्रथिताविह स्तः ।। ३६४ ।।
क्षणेन चैतौ मिलतः स्वतोऽपि स्निग्धौ वयस्याविव सानुरागौ ।
मिथो विरक्तौ पिशुनाविवैतौ विश्लिष्यतस्तौ कठिनौ क्षणेन ।।३६५।।
तदन्तरेऽन्धुर्वसुधातलस्य वक्त्रानुकारी रससंभृतोऽस्ति ।
जलैस्तदीयैर्भिषजोपदिष्टैर्भावी रुजायाः क्षय एव नूनम् ।। ३६६ ।।
यदा वियुक्तौ स्त इमौ महीध्रौ कूपादुपादेयमरं तदाऽम्भः ।
इतीरितं तन्मुखतोऽधिगम्य स्थानं प्रियाऽलङ्कृतमासदत् सः ३६७।।
पुरेव विज्ञातमहीड्निदेशे भार्ये तमित्यूचतुरार्यपुत्र ! ।
विभूष्य वाहं व्रज तत्र देवी मातुः सखी नौ शिखरिद्वयेऽस्ति ।।३६८।।
निरन्तरं सा शकुनिस्वरूपसंस्थानभाक् स्थानमधिश्रयन्ती ।
विधास्यते तेऽपि समीहितं तत् संप्रत्यभिज्ञाय तुरङ्गमेतम् ।। ३६९ ।।
तुरङ्गमारुह्य स वत्सराजः शैलद्वये तत्र ययौ जवेन ।
जलं क्षणेनैव समानिनाय देव्या तयैवाऽर्पितमात्मनैव ।। ३७० ।।
यथापरीक्षं सचिवाधमैस्तद् पानीयमादायि विशेषदक्षैः ।
विरञ्चिना स्पृष्टमभङ्गुरश्रि भाग्यं तदस्येति विवर्णयद्भिः ।। ३७१ ।।
ततः प्रणुन्नाः पुनरेव राज्ञा सन्ताप्यमानेन मनोभवेन ।
उदीरयामासुरिमेऽप्यमात्या मन्त्रोऽपि नः स्फूर्तिमियर्ति नाऽत्र ।।३७२।।
बिभर्ति सर्वोत्तमपौरुषं यत् वाचस्पतिं न्यक्कुरुते धिया च ।
न शक्यते वञ्चयितुं तदेष वज्रेण वज्रं न हि विध्यते वा ।। ३७३ ।।
तथाऽप्युपायः खलु कार्यसिद्धेरालोच्यतां कश्चन मन्त्रिवर्याः ! ।
इति क्षितीशस्य निदेशमाप्य तैर्मन्त्र्यते स्मेति विचार्य मन्त्रः ।।३७४।।
विवाहसामग्र्यविधापनेन श्रीसुन्दरीनामकुमारिकायाः ।
विधीयतां भूमिपते ! नृपाणां दूतैः समाह्वानकमञ्जसाऽपि ।। ३७५ ।।
विधाप्यतां द्राग् दिशि दक्षिणस्यां श्रीदक्षिणाशाऽधिपतेर्निशान्तम् ।
प्रहीयतां तस्य निमन्त्रणाय श्रीवत्सराजोऽयमुदग्रबाहुः ।। ३७६ ।।
प्रशंसता साध्विति चातिवेलं मन्त्रं तदीयं वसुधाधवेन ।
विवाहसामग्र्यपि तत्प्रयुक्ता निर्देशमात्रेण विधापिता सा ।। ३७७ ।।

यदन्धकूपप्रतिरूपमारात् खात्वाऽभितः खातिकमिन्धनौघैः ।
भृतं तिलाद्यैश्च समिद्धवह्नि याम्यां यमागारमकारि तत्र ॥ ३७८ ॥
महीभुजाऽऽदिष्टतमः कुमारोऽप्यालोचयामास समं प्रियाभ्याम् ।
उपायमाधाय कमद्य कान्ते ! रक्षाम्यहं जीवितमस्वतन्त्रः ? ॥३७९॥
उदीरितं कान्तमभीति ताभ्यां युष्मत्प्रतिच्छन्दममन्दबुद्धिः ।
विधाय यास्यत्ययमेव यक्षस्त्वं शुभ एधि प्रिय ! मन्दिरान्तः ॥३८०॥
तदुक्तमङ्गीकुरुते स्म सोऽपि को वा हितं नाऽऽद्रियतां विदग्धः ? ।
व्यजिज्ञपद् भूपमुपेत्य यक्षस्तद्रूपतां प्राप्त इवाऽवतारात् ॥ ३८१ ॥
कृतान्तसद्माधिगतेन देव ! व्यावर्तनीयं दिवसैः कियद्भिः ? ।
मयेति तेनाभिहिते नरेन्द्रस्तं प्रत्यवादीद् वदतां पुरोगः ॥ ३८२ ॥
त्वया निवास्यं ननु मासमात्रमित्युक्त एषोऽवनिवासवेन ।
समेषु लोकेषु विलोकयत्सु कीनाशवेश्म त्वरितं विवेश ॥ ३८३ ॥
तदाऽऽप पद्माकरवत् स पद्मैर्हर्षं नृपस्तैः सचिवैः सहैव ।
कलानिधौ तत्र तिरोहितेऽपि लोकः पुनः कैरववद् मिमील ॥ ३८४ ॥
अदःप्रिया आनयताऽधुनैवेत्याज्ञापयद् मन्त्रिवरान् नरेशः ।
तमीदृशं व्यज्ञपयंस्ततस्ते पुष्पेषुमोहेन गलद्विवेकम् ॥ ३८५ ॥
समाहरिष्याम इमाः सलीलं लीलावतीः किन्तु समुत्सुकस्त्वम् ।
जहीहि, यन्नाथ ! जनापवादः स्फूर्जन् समस्त्यत्र सुदुर्निवारः ॥३८६॥
पृथुः स भावी भुवनान्तरालेऽकार्यं विधातुं त्वयि धावतीश ! ।
ततोऽवनीवासव ! मासमात्रं तद्दत्तमेवाऽऽगमयस्व कीर्त्यै ॥ ३८७ ॥
यशांसि येषां विमलानि नाथः कुर्वन्ति पीयूषमयूखबिम्बम् ।
बलेन तेषां किमनेन किं वा बुद्ध्याऽनया किं बत जीवितेन ? ॥३८७॥
समासहस्रेण समं स मासं भूपः स्मरार्तो गमयाम्बभूव ।
पुनः समानेतुमयं न्यदिक्षत् तद्वल्लभा मन्त्रिचतुष्टयं तत् ॥ ३८९ ॥
इतश्च तास्तं स्नपितं विलिप्तं कृत्वा कुमारं प्रविभूषितं च ।
समाननं व्यन्तरनायकं स्म यक्षेण दक्षेण समानयन्ति ॥ ३९० ॥
निवेद्य वृत्तान्तममुं यथार्थं स प्रार्थितः स्वाङ्गविभूषणानि ।
विभासमानानि महाद्भुतानि विश्राणयामास कुमारकाय ॥ ३९१ ॥
कुमारमारोप्य च यक्षतार्क्ष्ये हस्ताम्बुजस्थापितनालदण्डः ।

स्ववाचया भूमिभुजा नियुक्तस्तन्मानयामास स मानधुर्यः ॥ ३६३॥
तदस्ति कुत्रेत्यमुना नियुक्तास्ते मन्त्रिणो वाचमिमामवोचन् ।
महीधरौ तुङ्गतमौ च मध्येविन्ध्याटवि द्वौ प्रथिताविह स्तः॥ ३६४ ॥
क्षणेन चैतौ मिलतः स्वतोऽपि स्निग्धौ वयस्याविव सानुरागौ ।
मिथो विरक्तौ पिशुनाविवैतौ विश्लिष्यतस्तौ कठिनौ क्षणेन ॥३६५॥
तदन्तरेऽन्धुर्वसुधातलस्य वक्त्रानुकारी रससंभृतोऽस्ति ।
जलैस्तदीयैर्भिषजोपदिष्टैर्भावी रुजायाः क्षय एव नूनम् ॥ ३६६ ॥
यदा वियुक्तौ स्त इमौ महीध्रौ कूपादुपादेयमरं तदाऽम्भः ।
इतीरितं तन्मुखतोऽधिगम्य स्थानं प्रियाऽलङ्कृतमासदत् सः ३६७॥
पुरैव विज्ञातमहीड्निदेशे भार्ये तमित्यूचतुरार्यपुत्र ! ।
विभूष्य वाहं व्रज तत्र देवी मातुः सखी नौ शिखरिद्वयेऽस्ति ॥३६८॥
निरन्तरं सा शकुनिस्वरूपसंस्थानभाक् स्थानमधिश्रयन्ती ।
विधास्यते तेऽपि समीहितं तत् संप्रत्यभिज्ञाय तुरङ्गमेतम् ॥ ३६९ ॥
तुरङ्गमारुह्य स वत्सराजः शैलद्वये तत्र ययौ जवेन ।
जलं क्षणेनैव समानिनाय देव्या तयैवाऽर्पितमात्मनैव ॥ ३७० ॥
यथापरीक्षं सचिवाधमैस्तद् पानीयमादायि विशेषदक्षैः ।
विरञ्चिना स्पृष्टमभङ्गुरश्रि भाग्यं तदस्येति विवर्णयद्भिः ॥ ३७१ ॥
ततः प्रणुन्नाः पुनरेव राज्ञा सन्ताप्यमानेन मनोभवेन ।
उदीरयामासुरिमेऽप्यमात्या मन्त्रोऽपि नः स्फूर्तिमियर्ति नाऽत्र ॥३७२॥
बिभर्ति सर्वोत्तमपौरुषं यत् वाचस्पतिं न्यक्कुरुते धिया च ।
न शक्यते वञ्चयितुं तदेष वक्रेण वक्रं न हि विध्यते वा ॥ ३७३ ॥
तथाऽप्युपायः खलु कार्यसिद्धेरालोच्यतां कश्चन मन्त्रिवर्याः ! ।
इति क्षितीशस्य निदेशमाप्य तैर्मन्त्र्यते स्मेति विचार्य मन्त्रः ॥३७४॥
विवाहसामग्र्यविधापनेन श्रीसुन्दरीनामकुमारिकायाः ।
विधीयतां भूमिपते ! नृपाणां दूतैः समाह्वानकमञ्जसाऽपि ॥ ३७५ ॥
विधाप्यतां द्राग् दिशि दक्षिणस्यां श्रीदक्षिणाशाऽधिपतेर्निशान्तम् ।
प्रहीयतां तस्य निमन्त्रणाय श्रीवत्सराजोऽयमुदग्रबाहुः ॥ ३७६ ॥
प्रशंसता साध्विति चातिवेलं मन्त्रं तदीयं वसुधाधवेन ।
विवाहसामग्र्यपि तत्प्रयुक्ता निर्देशमात्रेण विधापिता सा ॥ ३७७ ॥

यदन्धकूपप्रतिरूपमारात् खास्वाऽभितः खातिकमिन्धनौघैः ।
भृतं तिलाद्यैश्च समिद्धवह्नि याम्यां यमागारमकारि तत्र ॥ ३७८ ॥
महीभुजाऽऽदिष्टतमः कुमारोऽप्यालोचयामास समं प्रियाभ्याम् ।
उपायमाधाय कमद्य कान्ते ! रक्षाम्यहं जीवितमस्वतन्त्रः ? ॥३७९॥
उदीरितं कान्तमभीति ताभ्यां युष्मत्प्रतिच्छन्दममन्दबुद्धिः ।
विधाय यास्यत्ययमेव यक्षस्त्वं गुप्त एधि प्रिय ! मन्दिरान्तः ॥३८०॥
तदुक्तमङ्गीकुरुते स सोऽपि को वा हितं नाऽऽद्रियतां विदग्धः ? ।
व्यजिज्ञपद् भूपमुपेत्य यक्षस्तद्रूपतां प्राप्त इवाऽवतारात् ॥ ३८१ ॥
कृतान्तसद्माधिगतेन देव ! व्यावर्तनीयं दिवसैः कियद्भिः ? ।
मयेति तेनाभिहिते नरेन्द्रस्तं प्रत्यवादीद् वदतां पुरोगः ॥ ३८२ ॥
त्वया निवास्यं ननु मासमात्रमित्युक्त एषोऽवनिवासवेन ।
समेषु लोकेषु विलोकयत्सु कीनाशवेश्म त्वरितं विवेश ॥ ३८३ ॥
तदाऽऽप पद्माकरवत् स पद्मैर्हर्षे नृपस्तैः सचिवैः सहैव ।
कलानिधौ तत्र तिरोहितेऽपि लोकः पुनः कैरववद् मिमील ॥ ३८४ ॥
अदःप्रिया आनयताऽधुनैवेत्याज्ञापयद् मन्त्रिवरान् नरेशः ।
तमीदृशं व्यज्ञपयंस्ततस्ते पुष्पेषुमोहेन गलद्विवेकम् ॥ ३८५ ॥
समाहरिष्याम इमाः सलीलं लीलावतीः किन्तु समुत्सुकत्वम् ।
जहीहि, यन्नाथ ! जनापवादः स्फूर्जन् समस्त्यत्र सुदुर्निवारः ॥३८६॥
पृथुः स भावी भुवनान्तरालेऽकार्यं विधातुं त्वयि धावतीश ! ।
ततोऽवनीवासव ! मासमात्रं तद्दत्तमेवाऽऽगमयस्व कीर्त्यै ॥ ३८७ ॥
यशांसि येषां विमलानि नाथः कुर्वन्ति पीयूषमयूखबिम्बम् ।
बलेन तेषां किमनेन किं वा बुद्ध्याऽनया किं बत जीवितेन ? ॥३८७॥
समासहस्रेण समं स मासं भूपः स्मरार्तो गमयाम्बभूव ।
पुनः समानेतुमयं न्यदिक्षत् तद्वल्लभा मन्त्रिचतुष्टयं तत् ॥ ३८९ ॥
इतश्च तास्तं स्नपितं विलिप्तं कृत्वा कुमारं प्रविभूषितं च ।
समाननं व्यन्तरनायकं स्म यक्षेण दक्षेण समानयन्ति ॥ ३९० ॥
निवेद्य वृत्तान्तममुं यथार्थं स प्रार्थितः स्वाङ्गविभूषणानि ।
विभासमानानि महाद्भुतानि विश्राणयामास कुमारकाय ॥ ३९१ ॥
कुमारमारोप्य च यक्षताक्ष्यें हस्ताम्बुजस्थापितनालदण्डः ।

स्वयं प्रतीहारवदग्रयायी स प्रास्थित व्यन्तरनिर्जरेशः ॥ ३९३ ॥
यदेष कीनाशगृहं गतोऽपि भूयः समागादसमानमानः ।
तदत्र नूनं प्रवितर्कयामः प्रोज्जागरं नागरभाग्यमेव ॥ ३९४ ॥
इति प्रमाणीकृतनागराणां शृण्वन् कथाः श्रोत्रसुखाः कुमारः ।
तुरङ्गसिंहादवतीर्य सिंहद्वारं प्रतीहारगिरा विवेश ॥ ३९५ ॥
प्रणम्य तस्मिन् पुरतो निषण्णे भूपस्य नानारससङ्करोऽभूत् ।
विलोकयत्स्वेव ममार योऽस्मासूज्जीवयामास कथं स्वमेषः ? ॥३९५॥
गतः कथं वाऽयमुपागतोऽत्राऽस्तीत्यद्भुतं नाम रसं दधानः ?।
प्रियास्मृतेस्तस्य च विप्रलम्भं प्राप्तेरभावाच्च पुनर्विषादम् ॥ ३९६ ॥
विलोकनात्तस्य च वीरभावं दम्भप्रकर्षात् करुणं स्पृशंश्च ।
मनोभवाग्नेरपि रुद्रचर्यां बीभत्सतां तद्व्यथयोपतप्तः ॥ ३९७ ॥
भयानकत्वं भिषजां कुलानां प्रोक्तोपचारव्यभिचारतोऽपि ।
समाश्रयन्नैकरसावकीर्णः स व्याजहाराऽवहितः कुमारम् ॥ ३९८ ॥
समस्ति मित्रं मम वत्सराज ! श्रीधर्मराजः स शिवेन कच्चित् ।
न वर्तते देवलिपिर्ब्रुवीति प्रीतः स किं किं मम संदिदेश ? ॥ ३९९ ॥
स वत्सराजोऽपि जगौ जगत्र ! राजन् ! प्रतीहारनिवेदितं माम् ।
अनामयं ते परिपृच्छ्य पूर्वं नम्रं सखा पर्यनुयुक्त चैवम् ॥ ४०० ॥
स्मृता वयं तेन सुहृत्तमेन वंहीयसो नेह स एव भव्यम् ।
अजर्यमस्माकमुपार्जितं यत् स्वर्णं सुमेरोरिव जीर्यते न ॥ ४०१ ॥
अकारि भूमीश्वर ! साम्वयत्वं सख्या स्वनाम्नः समवर्तिना ते ।
प्रदाय दिव्याभरणं विचित्रं भृत्योऽपि यत्ते त्वमिवार्चितोऽस्मि॥४०२॥
स्वकीयदौवारिक एष देव ! प्रत्यायनाय प्रहितोऽस्ति तेन ।
विलोकयामास ततश्च साङ्गोपाङ्गं नराधीश इमं निविष्टम् ॥ ४०३ ॥
व्यचिन्तयच्च स्पृशतः क्रमौ न क्ष्मां लोचने यन्न निमीलतोऽस्य ।
यदस्य न म्लायति पुष्पमाला तद् द्वाःस्थतामश्चति तस्य सोऽयम्॥४०४॥
स दम्भदौवारिक आललाप मत्स्वामिसंदेशमिमं शृणुष्व ।
अनाप्तनिर्देशतया मघोनस्त्वत्सन्निधौ नैव समागतोऽस्मि ॥ ४०५ ॥
निजप्रधाना भवता सदाऽत्र तत् प्रेषणीयाः प्रवराः पुमांसः ।

१ ज्यायः वयोहानौ, हीयत इत्यर्थः ।

सगे ! स्वदृष्ट्यापि कदापि चाहं संभावनीयस्त्वयका विशिष्य ॥४०६॥
यमावलोकोत्सुकतां दधानं व्यालोक्य तं मध्यमलोकपालम् ।
उवाच मायाप्रतिहार एष स्वामिन् ! यियासोपयमेऽस्ति ते किम् ?॥४०७॥
मनो दिदृक्षाप्रवणं ममाऽस्तीत्युक्ते नृपं सोऽपि पुनर्बभाण ।
ममानु यानं कुरु देव ! तर्हि तद्दर्शये वर्त्म यथा यथास्वम् ॥ ४०८ ॥
स वेत्रभृद् भूमिभुजाऽनुयातः प्रासादमासाद्य परेतभर्तुः ।
अदृत्त झम्पामपि पावकान्तस्तत्पृष्ठतस्ते ददुरप्यमात्याः ॥ ४०९ ॥
तदैव चत्वार इमेऽपि भूतास्ते भस्मसात् तेन धनञ्जयेन ।
प्रवर्तका दुष्कृतसंचयस्य यथा प्ररूढास्तपसा कषायाः ॥ ४१० ॥
अमूननु क्ष्मापतिरेव झम्पासंपातमाधातुमधीतयत्नः ।
बभूव यावत् सहसा स तावद् धृत्वा करे व्यञ्जपि वत्सकेन ॥ ४११ ॥
विशन् कथं जीवति देव ! कोऽपि जाज्वल्यमानज्वलनान्तराले ? ।
मम द्विपोऽमी सचिवाः समस्ताः क्षिप्ता मया तेन च विप्रतार्य ॥४१२॥
व्यधायि युष्माकमपीदमेवं यद्विप्रलम्भत्वमहो ! मयाऽपि ।
मम स्वपत्तैरपि सह्यतां तत् सर्वसहा यन् प्रभवो भवन्ति ॥ ४१३ ॥
नृपस्ततोऽचिन्तयदस्य नूनं विश्वत्रयीसारसुदग्रभाग्यम् ।
प्रयुज्यमाना प्रतिकूलताऽपि सर्वानुकूलत्वमियाय येन ॥ ४१४ ॥
अतः स्फुरत्पुण्यसमृद्धयेऽस्मै श्रीसुन्दरीनामसुतां सुरूपाम् ।
समर्प्य नैर्पत्यमिदं च द्रुतं सद्यस्तपस्यामि समाधिनिष्ठः ॥ ४१५ ॥
परप्रियासङ्गमकामतया यत् पापभागी विहितो निजात्मा ।
इतीद्धवैराग्यपरप्रकर्पाद् ध्यायन्नयं सद्म समाससाद ॥ ४१६ ॥
व्यवाहयत् तेन नृप. स्वपुत्रीं जीवौपधीकान्तवले विलग्ने ।
महोत्सवे स्फूर्जति यौतकेऽदाद् राज्यं गजेन्द्रादिसमन्वितं च ॥४१७॥
वने तपस्यां स्वयमादिताऽथ द्वेधा नरेन्द्रो जितशत्रुरेषः ।
नयप्रकर्षेण विराजमानः श्रीवत्सराजस्तु शशास राज्यम् ॥ ४१८ ॥
क्षितिप्रतिष्ठाख्यपुरात् परेद्युः प्रस्थापितो नागरमन्त्रिमुख्यैः ।
समर्पयामास नृपाय लेखं मर्त्यप्रधानः समुपेत्य कोऽपि ॥ ४१९ ॥
नृपः परिज्ञाय तदिङ्गितैः स्वव्यापारिणं पूरुपतोऽतिगुप्तम् ।

१ नृपते कर्म राज्यमित्यर्थः ।

अवाचयद् वर्णकभङ्गिचित्रं चित्रं विना लेख्यमिवागतं तम् ॥ ४२० ॥
तथाहि सस्वस्ति पुरीपराद्‌र्ध्याऽवन्त्याख्यपुर्यां समराजराजम् ।
समाश्रितश्रीपदवत्सराजं प्रौढप्रतापक्षतशत्रुजातम् ॥ ४२१ ॥
क्षितिप्रतिष्ठाख्यपुरादमात्याः पौरैर्युता योजितपाणिपद्माः ।
वसुन्धराप्रष्ठमिलल्ललाटा नत्वा स्वयं विज्ञपयन्ति चैतत् ॥ ४२२ ॥
यथा महाराज ! नरोत्तमेन श्रीदेवराजेन विबाधिताः स्मः ।
न देवराजेन सुरोत्तमेन स्वामिंस्तथा न्यायपराङ्मुखेन ॥ ४२३ ॥
प्रजा परिम्लानमुखी समस्ता चन्द्रोदये चक्रवधूरिवैषा ।
वियोगविध्वस्तमनोविलासा सूरस्य ते दर्शनमिच्छतीह ॥ ४२४ ॥
तदीशपादा विहितप्रसादाः सद्यः समागत्य तथा विधद्ध्वम् ।
इमे जना नैव यथा स्मरन्ति श्रीवीरसेनस्य रसेश्वरस्य ॥ ४२५ ॥
तदेवमाकर्ण्य नरेश्वरः स्वतातस्य लोकानतिदुःखितांस्तान् ।
स्वराज्यसन्तोषितमानसोऽपि भम्भां तदा वादयति स्म धीरः ॥४२६॥
चरैर्विदित्वा सबलं समेतं कल्लोलजालैरिव सिन्धुराजम् ।
विरोधितां पौरजनस्य चाऽपि गत्वा वने तापसतां ललौ सः ॥४२७॥
विवर्णभावं सहसा प्रपन्ने दोषाकरे तत्र कलङ्कराजे ।
अनन्तलीलाः कलयन् प्रविश्य प्रद्योतयामास पुरं स भास्वान् ॥४२८॥
प्रभाकरस्याऽभ्युदयेऽपि तस्य सच्चक्रचित्तानि दधुः प्रमोदम् ।
निलिल्यिरे क्वापि चकोरचौरा व्याधूततृष्णाः करतापभीताः ॥४२९॥
संसेविताङ्घ्रेः सुगुरोः कदाचित् सम्यक्त्वमूलं गृहिधर्ममाप्य ।
जिनालयैः पौषधमन्दिरैश्च भूमीपतिर्भूषयति स्म भूमिम् ॥ ४३० ॥

काले व्यतीयुषि कियत्यपि सद्गुरुः स
भूयः समागमदिदं नगरं गरीयान् ।
श्रुत्वाऽऽगतं तमवनीदयितोऽवनीशाद्
गत्वा विनम्य विनिशम्य शुभान्यपृच्छन् ॥ ४३१ ॥

ईदृशोऽस्मि शुभकर्मणा प्रभो ! केन जात इति कथ्यतां मम ? ।
संशयं नरपतेरपासितुं व्याजहार गुरुरेप तत्त्ववित् ॥ ४३२ ॥

जम्बूद्वीपगमुख्यवर्पतिलकश्रीमद्वसन्ते पुरे
राजा सूर इति श्रुतः समजनि प्रत्यर्थिशैलाशनिः ।

दाने यद्व्यसन स्वभावजनित तस्योदगात् तत् पुन
सत्पात्रेषु महादर विरचयद् भोग्य फल प्रापयत् ॥४३३॥
विद्याधरान्वयभवाऽजनि सूरवेगा
तस्य प्रिया नरपते रतिरूपरूपा ।
भोगास्तया सह यथारुचि भुञ्जतोऽस्य
कोऽप्यानयत् किल कनीं रतिचूलिकाख्याम् ॥ ४३४ ॥
ता क्ष्मापति स परिणीय तथाऽनुरक्त
स्वान्त पुर परिजहार पर प्रसक्त ।
तद्देव्यभूद् विहितबालतपा विरक्ता
सा व्यन्तरी स्वचरित गदित यया ते ॥ ४३५ ॥
शूर सूरनृपो विपद्य समभूद् दानप्रभावाद् भवान्
व्यापत्तावपि सम्पदा पदमल भूमीपतिर्भाग्यभू ।
स्मृत्वा प्राग्भवमात्मन स विरत श्रीशेखर नन्दन
राज्ये न्यस्य निज गुरोर्मुनिपतेर्जग्राह दीक्षा तत ॥४३६॥
तत्पत्न्यो व्रतमाप्य तद्व्रतिपतेस्तिस्रोऽपि तप्त्वा चिरं
पद्मादीनि तपासि नाकमगमन् सर्वे क्रमात् सत्क्रमम् ।
इत्थ मेघमहीमहेन्द्र ! भवत श्रोत्रातिथेयीकृत
श्रीसूरस्य कथानक वरमिद धर्मप्रभावप्रथम् ॥ ४३७ ॥
एता वाच त्रिभुवनगुरो पेयपीयूषदेश्या
श्रुत्वा मेघक्षितिपतिरुदूढ प्राञ्जलि प्रोच्चचार ।
साम्राज्याय स्पृहयति न मे मानस पापभीरु
त्वद्दत्तायाऽप्रतिकृतिसुखे किन्तु नाथ ! व्रताय ॥ ४३८ ॥
राज्य पुत्राय दत्त्वोपसचिवमधुनैवाऽऽगतोऽस्मि प्रभोऽह
राजन् ! मा गा प्रमाद सदनमुपगतस्त्व जिनेनेति चोक्त ।
आयातोऽसौ स्वसौध दृढरथकमुपस्व समाहूय भूप
प्रोवाचैव कुमार ! श्रय धरणिधुरा येन गृह्णामि दीक्षाम्॥४३९॥
आकर्ण्यैव स तु तदनुजो यौवराज्ये प्रशासद्
हृष्ट प्रोचे विनयविनतस्त्वादृशा युक्तमेतत् ।
सुभ्वस्यस्मिन् किमिति मतिमन् ! मा तु ससारकारे

पृथ्वीचिन्तापरिचयमहाशृङ्खलाभिर्निबन्ध्य ? ॥ ४४० ॥
लक्ष्मीः पण्यवधूरिव प्रकुरुते प्रीतिं न कुत्राऽप्यसौ
देहोऽयं मधुरै रसैरपि भृशं नाऽम्भोधिवत् तृप्यति ।
ओजोयौवनवन्धुमुख्यनिचयः सर्वोऽपि सिन्धूर्मिव-
चाञ्चल्यं वितनोति तन्मतिमतां क्लेशस्तदर्थे हि कः ? ॥४४१॥
सौहित्यं न हि विन्दते विषयजैर्जन्तुः कदाचित् सुखै–
र्नित्यं दानववैरिमानवभवेष्वेतैर्भृशं सेवितैः ।
तन्मन्ये परमाणुभिः स घटितः संतोषभार्गं विना
कार्यं कारणरूपमेव नियतं जल्पन्ति यत् तार्किकाः ॥४४२॥
स्वामित्वाद् मदमादधाति सुतमां तेनैव हिंसां जनः
प्रस्तौति प्रतिपादयत्यपि मृषाऽऽदत्तेऽप्यदत्तं खलु ।
अब्रह्माऽपि परिग्रहं च रचयत्युन्मत्तवत् कस्यचित्
वाक्यं नैव करोति तेन कलुषं कुर्वन् गमी दुर्गतिम् ॥४४३॥
विज्ञायेदृक् परिणतधिया क्षुद्रसंसारवृत्तं
स्वामिन् ! पादावहमपि तवाऽनु व्रजिष्यामि नूनम् ।
स्वामी सेव्यस्त्वमसि मम ते सेवकश्चाहमस्मि
व्यापार्यस्तत् सुकृतकरणे सर्वदा सर्वदातः ! ॥४४४॥
श्रुत्वा श्रीमद्दृढरथवचस्तादृशं मेघराजः
पुत्रं राज्ये न्यधित निजकं मेघसेनं रसेनम् ।
साराधारं दृढरथसुतं यौवराज्ये च सेनं
प्रद्युम्नाभं रथपदयुजं मन्त्रिपौरेषु सत्सु ॥ ४४५ ॥
स मेघरथभूपतिस्तनुजमेघसेनावनी–
भुजा विहितनिष्क्रमोत्सवभरोऽनुजेनाऽन्वितः ।
शतैश्च सह सप्तभिस्तनुभुवां सहस्रैश्चतु–
र्मितैः क्षितिभुजां व्रतं घनरथप्रभोरादित ॥ ४४६ ॥
अभ्यस्य द्विविधामिमौ गणधरोपान्ते च शिक्षां मुनी
नानाभिग्रहसंग्रहौ शमपरौ गुप्तौ च गुप्तेन्द्रियौ ।
सद्याम्भोधिविगाहनैककरिणावेकादशाङ्गोज्ज्वला–
वक्षोभ्यावुपसर्गकैरपि घनैः पृथ्वीं व्यहार्ष्टां चिरम् ॥४४७॥

अर्हत्सेवाप्रभृतिभिरथो स्थानकैर्मेघमाधु-
विंशत्या स्माऽर्जयति यतिराट् तीर्थकृन्नामकर्म ।
कुर्वाणो द्वा स्वयमपि तप सिंहविक्रीडिताख्य
सोऽतीचारैर्विकलमसृजन् सयम पूर्वलक्षम् ॥ ४४८ ॥
अध्यारुह्याऽम्बरतिलकमाभिरयशैल मुनीन्द्रौ
चक्राते तावनशनमतिश्रामकार्यौ तपोभि ।
सपूर्याऽऽयु समभवतका तप्तकल्याणकान्ती
देवौ दिव्यासमसुखमयौ तौ च सर्वार्थसिद्धौ ॥ ४४९ ॥
आसीन् श्रीगुरुगच्छमौलिमुकुटश्रीमानभद्रप्रभो
पट्टे श्रीगुणभद्रसूरिसुगुरुर्विज्ञानभाजा गुरु ।
तच्छिष्येण कृते त्रयोदश इत श्रीशान्तिवृत्ते महा-
काव्ये श्रीमुनिभद्रसूरिकविना सर्गोऽयमीक्ष्य सताम् ॥४५०॥

॥ इति श्रीशान्तिनाथचरित्रे त्रयोदशः सर्गः ॥

अर्हम्

अथ चतुर्दशः सर्गः ।

यदङ्घ्र्युगमेदनपुण्डरीकके श्रिता त्रिलोकी भ्रमरीयतेतराम् ।
मनोपित च मक्षु तनोतु म श्रिया निधि शान्तिजिनेश्वर सदा ॥१॥
युगादिनाथस्य तनूभुवा शत बभूव तन्मध्यग कुरु गुरु ।
पिता यमस्याऽदित देशमत्र स तस्य नाम्ना कुरुरेव पप्रथे ॥ २ ॥
भवन्ति धान्यान्यपि यत्र सन्तत स्पृहा प्रकुर्वन्ति सुपर्वणामपि ।
सपर्णमाने स्वपरोपवर्तने क्षमाणि दुर्भिक्षमपासितुं परम ॥ ३ ॥
प्रजेषु गावो विदुषामिवाऽऽसते हिमाद्रिवद् यत्र समुन्नतोज्ज्वला ।
विनेव यत्र परितापमाश्रिता महात्मना पुण्यभरै कृता इव ॥ ४ ॥
गोभ्रा यत्र विमानि गोभिरभितो नीरस्तटागा इव
मामा गोष्ठकुलैश्च यत्र नितरा नीरागणि पद्मैरिव ।
मार्गाश्च पुराणि निर्भरतर पद्मानि भृङ्गैरिवा-

१ सपद्य अन्यन्यत्र ।

ऽन्योन्यस्पर्धविवृद्धहुंकृतिभरैर्भृङ्गा इव श्रीः पुरैः ॥ ५ ॥

वत्सो वत्सलभावमाश्रयति नो संवर्ण्यमानः सतां
नाऽङ्गः किञ्चन चङ्गिमानमधिकं पुष्णाति तृष्णावहः ।
धत्ते मालवसत्त्वमेव सुतरां नो मालवस्तत्त्वतो
लाटश्चाटवपाटवं न तनुते यस्मिन् समालोकिते ॥ ६ ॥

देशं गूर्जरमेव जर्जरतमं प्राज्ञाः समाचक्षते
कर्णाटं न च कर्णगोचरगतं पीडाकरं कर्णयोः ।
वैयर्थ्यं सुमहापदोपपदयोर्नाम्नोः पुना राष्ट्रयो-
र्नूनं भ्रूणनिविष्टमेव कमलालीलागृहं वीक्ष्य यम् ॥ ७ ॥
(षड्भिः कुलकम्)

तदस्ति तस्मिन्गुरु हस्तिनापुरं पुरं सुराणामिव वासवासितम् ।
कवेर्बुधस्यापि गुरोश्च केवलं विरोधिता यत्र मिथो न दृश्यते ॥ ८ ॥
रसैरनन्तैः परिपूरितान्तरा विकाशिपङ्केरुहदीर्घलोचनाः ।
विभान्ति यस्मिन् द्विजराजराजिता बहिः सरस्यो ललनाश्च मध्यतः॥९॥
न धर्मराजस्य पुरी पराभवं निजश्रिया येन सलीलमापिता ? ।
पुनस्तिरस्कारपदानवाप्तये ध्रुवं न किं संयमिनी बभूव सा ? ॥१०॥
भवन् स यस्याः किल पारदारिकः पतिर्न सौन्दर्यकलामलीलवत् ॥
अनीदृशं रञ्जयता स्वनायकं न येन लङ्का समतामुपैति सा ॥ ११ ॥

भोगावत्यपि भोगिनामपि कुले रत्नांशुभिर्भासुरैः
संरुद्धापि न येन सार्धमधिकं स्पर्धा विधातुं क्षमा ।
सर्वानेव दुरात्मनो द्विरसनान्निर्वास्य लक्ष्मीश्रिता
पातालं विशति स्म तद्द्विरसनाधिष्ठानपापादिव ॥ १२ ॥
प्रायोऽमी अमरावतीं पुरममूं यद् वर्णयन्ते बुधाः
किं तेषां स कदाग्रहो व्यसनिता यद्वाऽविवेकात्मता ।
यस्मिन् सत्यपि धर्मशर्मजनके सत्कर्मनित्योत्सवे
किंचिन्नश्वरमेयसौख्यललितां पुण्यक्रियावर्जिताम् ?॥१३॥
(षड्भिः कुलकम्)

स तत्र भूमीपतितारतारकप्रभासमद्योतनतारकप्रभुः ।

१ मा लक्ष्मीस्तस्या लेशः ।

समग्रदिग्व्यापकविश्वसैन्यको बभूव भूवल्लभविश्वसेनकः ॥ १४ ॥
विभूषितो भूतिभिरात्मना विभुर्बिभर्ति यां मूर्ध्नि ललाटलोचनः ।
यदग्रतो देवसरस्वती जलं वहत्युपान्तस्थितिमास्थितैव सा ॥ १५ ॥
चतुर्भुजत्वं स्ववशश्रियाऽऽश्रयन् भुजं ददद् दक्षिणमात्मनो द्विपाम् ।
पुनः स्वजन्मप्रतिपत्तिमानिनामवाप यो न स्वरसाद् विहस्ततताम् ॥१६॥
विनिर्जितः शारदसारचन्द्रमा विरूत्वरैर्यस्य यशोभिरुज्ज्वलैः ।
दधौ हृदन्तर्यदशर्म तत् परं कलङ्करूपं कविभिर्विवर्ण्यते ॥ १७ ॥

यस्तापं तनुते समाश्रयति यस्तां वारुणीं रागवान्
द्वेषं यः कविना सह प्रकुरुते ख्यातेन काव्याख्यया ।
आलोकप्रकटीकृताखिलजगत् सामान्यमप्यास्थितो
नायं येन समानतामकलयत् सूरः स भास्वानपि ॥ १८ ॥

यः संकोचयति स्म कोशनिचयं पद्माकराणां करै-
र्यः सर्वत्र कलङ्कपङ्ककलनाद् दोषाकरो विश्रुतः ।
स स्फूर्जद्गुणरत्नरत्नगिरिणा न क्षत्रलक्ष्मीकृता
साम्यं येन समं समाश्रयदयं राजा कलावानपि ॥ १९ ॥

न्यायः संश्रित एक एव भुवने पुण्णाति कीर्तिं परां
संवद्धः स विसर्जनेन सह चेत् स्वर्णस्य तत् सौरभम् ।
तद् द्वैतं विनयेन भूषयति वा लोकोत्तरः कश्चने-
त्येतद्द्वैदुपवाक्यसंश्रवणतो येनाऽऽदृतं तत्त्रयम् ॥ २० ॥

विश्राणोऽप्यास्यविवरगता द्वे सहस्रे रसज्ञा
यच्छेषो यं द्विरसनपतिः स्तोतुमेवाप्रभूष्णुः ।
शौर्योदार्यादिकगुणगणं यस्य विश्वप्रसिद्धं
तस्थौ तेनावनितलमरं लज्जयेव प्रविश्य ॥ २१ ॥

(अष्टभिः कुलकम्)

महाशया तन्महिषी मनोहराऽचिराभिधाना चिरपुण्यसंचया ।
बभूव, कान्तेन महेशपार्वतीप्रपञ्चितप्रीतिमुदाजहार या ॥ २२ ॥
विलोक्य लोकोत्तरमेव रोहिणी यदग्न्यसौभाग्यमभङ्गुरं तपः ।
चकार सौभाग्यकृते नु रोहिणीतपः प्रसिद्धं तदिदं जिनागमे ॥२३॥

---

१ दानेन ।

आस्यं यस्या हसति सुतरां पौर्णमास्याः सुधांशुं
तेनैवायं प्रतिपदमितः प्रेक्ष्यते क्षीयमाणः ।
आलोकाय प्रकृतिमहसा सर्वथा व्यापृतानां
युक्तं चैतज्जगति महतां निर्जितानां परेण ॥ २४ ॥
आस्थानी रूपलक्ष्म्या भुवनविजयिनो राजधानी स्मरस्या-
क्रीडास्थानं गुणानां शरदिजशशिनः कौमुदीसन्निभानाम् ।
सौन्दर्यस्यैकपात्रं निरुपममहिमावज्रवज्राकरोर्वी
पौलोमी या द्वितीयाऽवनिभुवनगता वेधसाऽसर्जि नूनम् ॥२५॥
(चतुर्भिः कलापकम्)

दिवा वियोगः प्रथितश्चकोरयोस्तथा निशायामपि चक्रवाकयोः ।
अतो न ताभ्यामुचिता समानता तयोरजस्रं सुखसिन्धुमग्नयोः॥ २६॥
जगाम भोगानुपभुञ्जतोस्तयोः कियाननेहाः प्रियतानुरक्तयोः ।
परस्परप्रेमविनाकृतं बुधा विदुर्न किं जम्पतिसङ्गमं वृथा ? ॥ २७ ॥

जन्तुर्मेघरथस्य सोऽथ निखिलं स्वायुः प्रपूर्य त्रय-
स्त्रिंशत्सिन्धुमितं विमानकलितस्तस्माद् विमानाच्च्युतः ।
मासे भाद्रपदस्य सप्तमतिथौ कृष्णे भरण्यां विधौ
तस्याः कुक्षिमभूषयत् त्रिभुवनस्याभूषणाया विभुः ॥ २८ ॥
जात्याष्टापदवासवेश्मनि तदा मुक्तावितानोज्ज्वले
सा कृष्णागुरुसारधूपसुरभौ चित्रैर्विचित्रैः श्रिते ।
निद्रामुद्रितलोचनाम्बुजयुगा किञ्चित्प्रहृष्टा महा-
देवी सौख्यभृता चतुर्दश महास्वप्नानिमानैक्षत ॥ २९ ॥
हिमगिरिशिलाकायच्छायं यशः किल मूर्तिमत्
शुभशुभमयैरंशैर्दन्तैश्चतुर्भिरलङ्कृतम् ।
सुरभितदिशं श्च्योतद्दानाम्भसा शुचिसादिशो
वदनकमले सा शक्रेभं विशन्तमवैक्षत ॥ ३० ॥
शरदिजशशिज्योत्स्नागौरं शुभं तनुतां गतं
किल वसुमतीं शृङ्गाग्राभ्यामुदस्य धहत्तमम् ।
भुवमुपहृतं यानं स्वीयं द्वितीयमरुत्वता
तदनु वृषभं देव्यद्राक्षीद् दिवोऽप्यवतारिणम् ॥ ३१ ॥

वपुषि सितिमाऽद्वैतं स्फीतं वहन्तमकल्पितं
नयनकपिलज्योतिःपुञ्जैर्विधूततडित्प्रभम् ।
वलमदभृतो न्यक्कुर्वाणं रवैरपि दिग्गजान्
नयनपदवीमेणाधीशं ततो नयति स्म सा ॥ ३२ ॥

निरवधिमहासौन्दर्यैकक्रयाणकहट्टिका
सुमशरनृपस्वाम्योद्बोधाक्षरार्जुनपट्टिका ।
समुदितजगत्सुभ्रूरूपाभिमानविजित्वरी
प्रथमवदसौ देवी लक्ष्मीमवैक्षत विक्षताम् ॥ ३३ ॥

व्यजयत पुरा मोऽस्याः श्वासो मृदुत्वमिदं ततो
दधदतिशयं सर्वोत्कृष्टं पदौ शरणं श्रये ।
विविधकुसुमामोदाकृष्टप्रभूतमधुव्रता
सरससुमनोमाला तस्या इतीव मुखेऽविशत् ॥३४॥

वदनकमलेनैतस्याः प्राग् जितोऽस्मि यतो नभे
दिवससमये किञ्चिद् नैव प्रभा प्रभवत्यपि ।
अविकलकला मद् विभ्रत्याः कलाश्च चतुर्गुणा
इति शशधरस्तस्या वक्त्रे विवेश सिसेविषुः ॥ ३५ ॥

अयमपि विभुर्भव्यान् पद्माकरानिव भोत्स्यते
निजकमहसा सर्वानन्यान् प्रसह्य विजेष्यते ।
अहमिव जगच्चक्षुर्भावी भजाम्यमुमेव तद्
प्रथममिव तद्वक्त्रे भास्वानविक्षदवेक्षितुम् ॥ ३६ ॥

गिरिपदजुषो वंशस्याग्रेसरोऽहमिव प्रभुः
समधिकतरस्फूर्जत्प्रौढ्या सुपर्वकृताश्रियः ।
जगति भविता नानाकोटीश्वरालयभूषण
स्वयमिति कृतस्वान्तस्तस्या विवेश मुखे ध्वजः ॥ ३७ ॥

जलनिधिवदाकण्ठं पूर्णं जलैर्मधुरैः परं
विकचसुमनोमालाकीर्णं जिनेश्वरबिम्बवत् ।
उपहृतमिव स्वर्नाथेनाग्रतोऽपि निधिं नवं
कनककलसं कल्याणाप्तौ विलोकयति स्म सा ॥ ३८ ॥

---

१ माम्, देव्या । २ आकाशपर्यायोऽकारान्तो नभशब्दः ।

प्रतिनिधिमिव क्षीरोदस्याऽमृतैरमृतप्रभै-
विंशदविशदैरापाल्यन्तं गतैः परिपूरितम् ।
पतगमिथुनैर्नानारूपैरुपासितमाचितं
विकसिततरैः पद्मैः पद्माकरं च सकैक्षत ॥ ३९ ॥
प्रियतमतया क्रोडक्रीडत्सुतोपलसंविदा–
ऽवगणितमहारत्नज्योतिर्विभासितसैकतम् ।
पवनचलनोत्थास्तूर्मीणां सहस्रसमाकुलं
प्रमुदितमनाः पारावारं निभालयति स्म सा ॥ ४० ॥
प्रविशति तमो यस्मिन्नैव प्रभाकरमण्डलं
प्रतिरजनि चाऽऽदायाऽऽदायाऽऽहितं च विरिञ्चिना ।
सुखसमुदयान्मुक्तेः संवावदूकमलं सुरं
नृपतिदयिता वीक्षाञ्चक्रे विमानमनुत्तरम् ॥ ४१ ॥
इतरभवने जानात्यर्धं न कश्चन मामकं
कथमपि विदन् न स्वीकर्तुं दधाति समर्थताम् ।
इति जिनपतेः कर्तुं सेवामिव प्रगुणीभवन्–
महिमविधृतौ रत्नस्तोमं तदाननमाविशत् ॥ ४२ ॥
मम तनुभवा धूमेनेदं जगन्मलिनीकृतं
त्रिभुवनगुरो ! त्वं तत् सर्वं पवित्रय चित्रवाक् ! ।
इति जिनपतिं विप्सुः किं जनेश्वरवल्लभा–
मुखविधुमयं निर्धूमोऽग्निर्विवेश विभास्वरः ? ॥ ४३ ॥
यो ज्ञास्यते किल चतुर्दशरज्जुलोकं
विद्याश्चतुर्दश तथा च सुतस्तदीयः ।
रत्नानि पास्यति चतुर्दश दर्शनीयः
स्वप्नांश्चतुर्दश ददर्श च सा ततोऽपि ॥ ४४ ॥
खद्योतपोतप्रतिभाससन्निभो यस्मिन् परिस्फूर्जति दृश्यते रविः ।
विष्वक्तमःस्तोमपरासनोत्कटः कोऽपि प्रकाशः स महांस्तदाऽभवत्४५
जगत्त्रयोल्लासविधानलालसः क्षणस्तदा सौख्यमयो बभूव सः ।
सुधामयो नाम यथा सुधारुचिर्यथैव विज्ञानमयोऽयमङ्गवान् ॥ ४६ ॥
देवी सोत्थाय तल्पात् प्रमुदितहृदया मन्दमन्दं चलन्ती

गत्वा राज्ञः समीपं धृतकुसुमफला स्वप्नजातं जगाद ।
सोऽप्यूचे देवि ! पुत्रस्तव किल भविताऽसाम्यरूपः प्रकृत्या
श्रुत्वैवं तोषपूर्णा समुचितशकुनग्रन्थिमेषा बबन्ध ॥ ४७ ॥

विबुध्य विबुधेश्वरा अवधिरूपविज्ञानतः
स्वविष्टरविकम्पनप्रकृतिकारणादात्मनः ।
प्रमोदभरनिर्भरा समुपगत्य सर्वे तदा
दुरन्तदुरितक्षयप्रवणमेव चक्रुः स्तवम् ॥ ४८ ॥

अनुत्तरविमानकादपि विभो ! महीमण्डलं
समुन्नतमनुत्तरं त्वदधिवासतो मन्महे ।
तवात्र कथमन्यथाऽवतरणं यतः संभवेद्
दरिद्रसदने किमु द्विरदराजसंभावना ? ॥ ४९ ॥

मतिप्रमुखचित्त्रयीत्रिपथगातुषाराचल–
प्रभ ! त्रिभुवनश्रियः कुलवलोपचारप्रियः ।
मनोभवमहोरगोपशमवैनतेयस्थिते !
प्रकाशितसदागमव्यवहृते ! चिरं तज्जय ॥ ५० ॥

इति जिनपतिं नत्वा नुत्वा जिनस्य च मातरं
प्रमदनिचयप्रोल्लासैकप्रयोगनियन्धनम् ।
दिविषदधिपा यात्रां नन्दीश्वरे विरचय्य च
प्रहृतमहिम स्वं स्वं धामाऽगमन् महितर्द्धयः ॥ ५१ ॥

बुधैः सुपुत्रेण तिरश्च्यपि स्नुना परं किमन्याऽत्र विवेकशालिनी।
क्षमाभरं धारयता मुदुर्वहं न कच्छपी सा किल कच्छपेन किम् ?॥५२॥

अहं ममालोक्य जिनेन्द्रमातरं स्वमण्डलं पावयिताऽस्मि निर्भरम् ।
इतीव पूर्वाचलसानुमुन्नत रविः समारोहदनन्तरागभृत् ॥ ५३ ॥

परिपृष्टमिमं गर्भस्थानं विचिन्त्य विचेष्टितैः
प्रमदकलिना शौरेणा दिग्वधूभिरनुद्रुता ।
उदयगिरिसत्सूर्योस्रालीकुसुम्भमहाम्बरा
विहगविरुतव्याजेनोच्चैः स्वरा किल गायति ॥ ५४ ॥

प्रातःकृत्यमसौ विधाय विधिवन्नृविश्वमेनो नृपः
सामन्तैः सचिवैः महानिर्विनतैरध्यास्य सिंहासनम् ।

जानन्निन्द्रसमागमादपि जिनं गर्भावतीर्णं प्रिया-
प्रीत्यै स्वप्नविचारशास्त्रचतुरानष्टौ समाजूहवत् ॥ ५५ ॥
आयाता विनिवेशितेष्वपि पुरा भद्रासनेष्वासिता
दृष्टस्वप्नफलोदयं विनयतो राज्ञाऽनुयुक्ताः स्वयम् ।
तेऽप्यूचुर्नरदेवसिंह ! भविता ते धर्मचक्री सुत-
श्चक्रीवेति निशम्य हृष्टमनसा तेनाऽपि ते सत्कृताः ॥ ५६ ॥
रत्नस्वर्णविभूषणैर्बहुविधैर्देव्याऽपि ते पूजिता-
स्तुष्टा धाम ययुर्निजं जवनिकाऽन्तर्धानपीठश्रिताः ।
सामीप्यं समुपेत्य मानसमुदे सिंहासनादुत्थितः
स्वप्नार्थं कथितं श्रुतं च नृपतिस्तस्याः पुरो व्याकरोत् ॥५७॥
दधार सा गर्भमनन्तरं सती सतीव सौभाग्यगुणेन मानिनी ।
गुणोज्ज्वलं शुक्तिरिवाम्रसंवरा महाशया मौक्तिकवद् मनोहरम् ॥ ५८ ॥
रुग्मारिप्रमुखाशिवानि शतशः पूर्वं बभूवुस्तदा
प्राणघ्नानि शरीरिणां जनपदे तस्मिन् कुरौ सर्वतः ।
तन्नाशाय जनश्चकार विविधोपायान् समग्रान् परं
शाम्यन्ति स्म न तानि तैरपि खलैरब्धेरिवोर्वीग्नयः ॥ ५९ ॥
देव्याः कुक्षिमुपागते जिनपतौ सर्वाणि तान्यक्रमात्
तत्कालं विशरारुतामुपययुर्घर्मा इवेन्दूदये ।
ईदृग् यस्य महाप्रभावविभवो गर्भावतारेऽप्यभू-
ज्जातो दर्शनमात्रतः स भविनां किं किं न कर्ता सुखम् ? ॥६०॥
प्रपशमानेऽभ्युदयं जिनेश्वरे महार्घतां यास्यति जातिरेकिका ।
इतीव वर्षासु विकाशमासदद् गुणप्रकर्षेण व जातिरात्मनः ॥ ६१ ॥
द्विजिह्वभावं न सहिष्यते प्रभुः पुराऽपि तन्नाशमतो विदध्महे ।
इति द्विजिह्वक्षयबद्धविभ्रमाः कलापिनः प्रावृषि नेदुरुन्महाः ॥ ६२ ॥
जडाशयानां कलुषत्वशालिनां न दर्शनं तस्य विभोर्भविष्यति ।
इतीव तन्निर्मलतां प्रकुर्वती समाययौ हंसकनादिनी शरत् ॥ ६३ ॥
महः प्रभोर्यद्यपि भावि धाममं तथाऽपि वर्ण्यं मयका सदैव तत् ।
इतीव यस्यां ववृधे स्वतेजसा रविः प्रमोदातिशयादिवात्मनः ॥ ६४ ॥
अमुष्य पश्चादपि पर्युपासनां परे करिष्यन्ति जना अहं पुनः ।

भर्तृस्नेहवशंवदाभिरमलप्रज्ञाभिराबाल्यतः
सीमन्तोन्नयनं व्यदीधपदयं क्ष्मापालचूडामणिः ॥ ७५ ॥
जातिर्यत्र प्रकटयति न स्वं निलीनेव गूढं
पद्मानामप्यपचितिरभून्निःस्ववद् यत्र सत्यम् ।
माकन्दानां परिमलभरः स्मर्यते यत्र तत्र
कुन्दैरेभिर्विकसितमहो ! ही ! विचित्रैव सृष्टिः ॥ ७६ ॥
कन्दर्पस्य सदर्पकस्य जयिनः श्रीमद्वसन्तप्रभो !
त्याज्यं नैव कदाचनाऽपि सुहृदः साहाय्यमस्य त्वया ।
यस्माद् भाव्यचिराङ्गजः स बलवान् वैरीति पुंस्कोकिल-
स्येदृग्वाक्श्रवणादिवाऽथ सुरभिस्तूर्णं समाजग्मिवान् ॥ ७७ ॥
पात्राधीशस्त्रिभुवनगुरुस्तद्विमानं विमुच्य
देव्या गर्भे श्रयति वसुधामण्डलाऽऽभूषणायाः ।
पत्राणां नस्तदुपरिवृतां सत्यमाशातना स्या-
दित्यालोच्य क्षितिरुहचयाद् यत्र पत्राणि पेतुः ॥ ७८ ॥
(त्रिभिर्विशेषकम्)

कौशुम्भं वसनं च किंशुकसुमाभारच्छलाद् बिभ्रती
चञ्चच्चम्पकपुष्पकुङ्कुमघनालेपस्फुरत्पाण्डिमा ।
माकन्दप्रसवोत्पतद्बहुरजोवासा जिनं गर्भगं
रङ्गाद् यत्र वनस्थली पिकरवा गातुं समागादिव ॥ ७९ ॥
निरस्य जाड्यप्रसरं पराश्रितं समाश्रयन् धाम सुदुःसहं खलु ।
अथोग्रकर्मक्षयदारुणाशयः प्रवर्तयामास तपः स्वशासनम् ॥ ८० ॥
मयि प्रभोर्वत्सलता विलोक्यते जनुर्यदन्यत्र ऋतौ बभूव न ।
इतीव मल्लीसुमदम्भसद्यशा बभार तेजःप्रसरं तपागमः ॥ ८१ ॥
स्वनायकं सेवकवृद्धिसंक्षयौ सदाऽनुयातः, कथमन्यथा तपे ।
प्रवर्धमाने दिननायके दिनं प्रवर्धते चापरथा न किं हिमे ? ॥ ८२ ॥
सुरैर्मदीयानि फलानि तत्क्षणं जिनेन्द्रजन्मस्नपनोत्सवे कृते ।
कृतार्थनीयानि पुरो निवेशनादितीव चूता ननृतुः स्फुरद्दलैः ॥ ८३ ॥
दुष्पूरेष्वपि दोहदेषु तरसा संपूर्यमाणेष्वरं
शायं शायमनुक्षणं नृपतिना तस्याः सखीनां मुखात् ।

एवं मासु नवस्वितेषु दिवसैः सार्धं च सार्धाष्टमै-
ज्येष्ठे मास्यसिते त्रयोदशतिथौ तस्यां भरण्यां च भे ॥ ८४ ॥
उच्चेषु त्रिषु केन्द्रतामुपगतेष्वन्येषु सत्सु ग्रहे-
ष्विन्दुं माघवतीव दिक् स महिषी सूते मृगाङ्कं सुतम्।
पीयूषद्युतिमण्डले मलिनिमा प्राप्यः कलङ्काङ्कुरः
संपूर्णत्वमुपेयुषि प्रतिकलं वृद्धया न तस्मिन् परम् ॥ ८५ ॥
(युग्मम्)

वपुर्यथाऽऽभ्यन्तरदोषलक्ष्मणैर्मलैर्विमुक्तं परमेशितुस्तथा।
तदाऽवदातं बहिरप्यभूद् मलैर्जरायुदोषप्रमुखैर्विनाकृतम् ॥ ८६ ॥
तदा सुखं दुर्गतिवासिनामपि क्षणं महानन्दविवर्णिकाऽभवत्।
समुल्ललास त्रिजगत्प्रकाशकस्तदा प्रकाशः समभानुभूरिव ॥ ८७ ॥
दिशां दशानामपि संबभूव यः परः प्रकाशः स बुधैर्वितर्कितः।
न किंचिदन्यत् समवायिकारणं न्यवीविदत् स्वस्य जनुर्विनाऽर्हतः॥८८॥
दिवि स्वयं दुन्दुभयोऽनदंस्तमां तदा प्रणुन्ना इव पुण्यकर्मणा।
तथाऽनुकूलाः पवना ववुः परं निजां ब्रुवाणा इव कामरूपताम् ॥८९॥
विज्ञायाऽऽसनकम्पनादवधिना तीर्थेशितुः षोडश-
स्योत्पत्तिं वसुधातलादथ जिनान्ते दिक्कुमार्यस्तदा।
अष्टावेत्य जिनं जिनस्य जननीं चानम्य भोगङ्करा-
मुख्या निर्भयमित्युदीर्य च वयं जन्मोत्सवायाऽऽगताः ॥९०॥
क्वापि स्थास्यति नाऽन्तरं किल रजो जातेऽर्हतीतीव ता
यावद् योजनमाहृतेन मरुता संहृत्य भूमौ रजः।
व्याख्यानावनिमानमेव जगतां प्रख्यातुमेवाऽऽदृता
गायन्त्यो धवलान् जिनेश्वरगुणांस्तस्थुः समन्ताज्जिनम्॥९१॥
अष्टावेत्योर्ध्वलोकादथ विधिनियता मङ्क्षु मेघङ्कराद्या
दिक्कन्या भक्तिभङ्ग्या जिनपतिजननीं चापि नत्वा च नुत्वा।
स्वाऽऽयाने हेतुमुक्त्वा विकृतजलधराः पापमालिन्यगाढो
मेदिन्याः पावनार्थं ददुरधिकतरं गन्धवार्भिश्छटाम्ताः ॥९२॥
धृत्वा पुष्पाणि यावत् सुकृतभृतहृदस्ताः स्थितास्तावदेवा-
ऽष्टाऽन्याः पौरस्त्यपूर्वादिह रुचकाद् दिक्कुमार्यः समीयुः।

दृष्टा नन्दोत्तराद्या जिनजिनजननीपादयुग्मं प्रणम्य
सूनोस्ते चात्र रूपं परमिति सुमता दर्पणान् दर्शयन्त्यः॥९३॥
इमा गायन्त्योऽस्थुर्जिनपतिगुणान् प्राच्यककुभि
स्वयं दिक्कन्योऽष्टावथ सुमतयोऽपाच्यरुचकात् ।
समाहारामुख्याः करसजलभृङ्गारसुभगाः
प्रणम्रास्तद्वत् ता यमककुभि तस्थुः प्रमुदिताः ॥ ९४ ॥
दिक्कन्योऽथ पराः प्रतीच्यरुचकादष्टौ समागुर्मुदे-
लादेवीप्रमुखा महाव्यजनवद्धस्ताः प्रशस्ताऽऽशयाः ।
नत्वा देव्यचिरायुतं जिनपतिं ताः सिद्धिसङ्गाप्तये
कुर्वाणा गुणगानमन्तिकगतास्तस्थुः प्रतीच्यां दिशि ॥ ९५ ॥
अष्टोदग्रुचकात् समेयुरथ दिक्कन्यस्तथाऽलम्बुशा-
मुख्याश्चामरराजिपाणिकमलाः साम्राज्यजल्पोन्मुखाः ।
एतास्तीर्थकरं विनम्य मनसा तीर्थेशमात्रा समं
कौबेर्यां ककुभि स्थिता जिनगुणान् गायन्त्य एव स्थिरम्॥९६॥
दिक्कन्या अपरा विदिग्रुचकतोऽप्येयुश्चतस्रो जग-
द्दीपं तीर्थकरं वदन्त्य इव ता दीपं दधानाः करे ।
भक्त्या तीर्थकरं प्रणम्य कलितं मात्रा सुतेरामुरा
देव्यो गीतकलाविनिर्जितसुधाः स्थैर्यं विदिक्षु श्रिताः ॥९७॥
रूपाद्या अपि मध्यमैकरुचकादेताश्चतस्रोऽथ ता
वन्दित्वा चतुरङ्गुलस्थितिपरं छित्त्वैव नालं विभोः ।
भूमौ तद्विनिराय रत्ननिचयैरापूर्य तत्रोच्चकै-
र्दूर्वापीठमरोपयन् रविहयस्पर्धाविवृद्धादरम् ॥ ९८ ॥
याम्यां प्राच्यामुदीच्यामपि ककुभि च ता मूलसौधादकार्षुः
सम्यग् रम्भानिकेतत्रितयमपि चतुःशालसिंहासनभ्राट् ।
अभ्यङ्गोद्वर्तने ता यमककुभि चतुःशालमध्ये निपात्य
सत्तैलोद्वर्तनाभ्यां जिनजिनजननीगात्रयोस्तन्वते स्म ॥ ९९ ॥
चतुःशाले प्राच्ये मणिकनकसिंहासनजुषौ
विधाप्य स्वैरं तावपि भवनचार्चिक्यसुभगौ ।
ततो दिव्यैर्वक्रैर्व्यतनिषत ता मण्डिततनू

न तादृश्यः क्वापि क्रममपनयन्तीह यदि वा ॥ १०० ॥

नीत्वा ता द्वितयं तदुत्तरचतुःशाले विघृष्याऽरणे-
वर्ह्नौ पातिनदीपिते लघुहिमक्षोणीधरादाहृतैः ।
गीर्वाणैरभियोगिभिः सुरभिभिर्दिव्यैर्हुतैश्चन्दनै
रक्षापोट्टलिकां विधाय विधिवत् पाणौ बबन्धुर्द्वयोः ॥ १०१ ॥

हरित्कुमारीभिरबन्धि रक्षिका जिनस्य मातुश्च कराम्बुजेऽपि यत् ।
तदत्र जीतं भजते निदानतां न तस्य रक्षाऽखिललोकरक्षितुः ॥१०२॥

धराधरायुर्भव तीर्थनायकेत्युदीर्य कर्णद्वितयीतटे प्रभोः ।
इमाः स्वयं प्रस्तरगोलकद्वयं विशङ्कमास्फालितवत्य उद्धतम् ॥ १०३ ॥

अरिष्टमन्तः स्म नयन्ति ता जिनं समं जनन्या जनितप्रमोदया ।
अथैकपल्यङ्कगतौ विधाय तौ गुणोत्करोद्गानपराः स्थितिं श्रिताः ॥१०४॥

घण्टावादनपीठकम्पनमुखैश्चिह्नैर्जिनेशो जनिं
प्रज्ञातावधिना विबुध्य मुदितः सौधर्मभर्ताऽथ सः ।
नाट्यालोकमपास्य संभ्रमवशादुत्थाय सिंहासनात्
सप्ताष्टानि पदान्यभीत्य विदुरस्तुष्टाव तुष्टः प्रभुम् ॥ १०५ ॥

विमानमथ पालकं समधिरुह्य शक्रोऽभित-
श्चतुष्कगुणिताऽष्टकप्रमविमानलक्षैर्वृतः ।
अतीत्य तरसा बहून् विविधवारिधिद्वीपका-
नवाप परमेशितुर्जगति सूतिकामन्दिरम् ॥ १०६ ॥

प्रदक्षिणपुरःसरं जिनपतिं जनन्या समं
विनम्य परभक्तिलः प्रतिकृतिं विमुच्य प्रभोः ।
समं परिकरेण तां जिनपतेः पुनर्मातरं
निर्मीलितविलोचनां प्रविरचय्य निद्राभरैः ॥ १०७ ॥

जिनस्य सर्वोऽपि तनोति पूजनं स्वशक्तिमानेन जनो जगत्त्रये ।
इति स्वचित्ते विचिन्त्य वासवश्चकार शक्त्या किल रूपपञ्चकम्॥१०८॥

(युग्मम्)

सौरभ्योत्कटपाणिसंपुटगतं चक्रेऽभ्यनुज्ञाग्रहा-
देकेन प्रभुमातपत्रमधृत स्वाराट् तथैकेन च ।
द्वाभ्यामेव च चामरे पविमहो ! अन्येन धृत्वा ततः

स्वर्णाद्रावतिपाण्डुकम्बलशिलापीठं समासेदिवान् ॥ १०९ ॥
निजाङ्कपर्यङ्कविराजिनं जिनं वितत्य सौधर्मपतिः प्रमोदवान् ।
स्वदारपूर्वाभिमुखः स्वगौरवं प्रदर्शयंस्तत्र निषेदिवानयम् ॥ ११० ॥
द्वितीयकल्पाधिपतिस्त्रिशूलभृच्चतुर्गुणैः सप्तभिरावृतोऽमितः ।
विमानलक्षैर्वृषवाहनस्तदा समाययौ पुष्पकयानमाश्रितः ॥ १११ ॥
विमानलक्षै रविसंमितैर्वृतः सनत्कुमाराभिधकल्पवासवः ।
सुवर्णशैले सुमनोविमानगः समागमत् तत्र पवित्रिताशयः ॥ ११२ ॥
श्रीवत्साख्यविमानगः सुरगिरौ माहेन्द्रभर्ताऽऽययौ
लक्षैरष्टभिरावृतोऽथ विलसद्वैमानिकानां जवात् ।
नन्द्यावर्तविमानगोऽप्युपजिनं ब्रह्माधिपोऽथागमत्
स्वानन्देन विमानिनामुपजिनं लक्षैश्चतुर्भिः समम् ॥ ११३ ॥
लक्षार्धेन विमानिनां सममरं श्रीलान्तकाधीश्वरः
श्रित्वा कामगवं विमानमसमं स्वर्णाद्रिमेवागमत् ।
विंशत्या द्विगुणीकृतैर्दिविषदां युक्तः सहस्रैः श्रितो
यानं प्रीतिगमं स सप्तमदिवाधीशः सुरेन्द्रोऽपि च ॥ ११४ ॥
विमानिनां षड्भिरथो सहस्रकैः समं सहस्रारसुपर्वनायकः ।
विमानमास्थाय मनोरमं रयात् समाययौ स्वर्णमहीधरे मुदा ॥११५॥
अथाऽऽनतप्राणतकल्पनायकः शतैश्चतुर्भिः सहितो विमानिनाम् ।
श्रितो यथार्थं विमलं विमानकं सुमेरुशैलं रभसात् समासदत् ॥११६॥
शतैस्त्रिभिर्नाकसदां परावृतः प्रभाभृतामाऽऽरणकाच्युतप्रभुः ।
स सर्वतोभद्रविमानमाश्रितः समागमत् स्वर्णगिरौ मुदाऽञ्चितः ॥११७॥
अन्ये विंशतिरत्र मङ्क्षु भुवनाधीशाः समायासिषु-
र्द्वात्रिंशन् परमर्धिभारकलितास्ते व्यन्तराधीश्वराः[1]।
सूर्याचन्द्रमसौ द्विरुक्तमहसौ ज्योतिष्कनाथौ मुदे-
त्येवं संमिलिताश्च ते किल चतुःषष्टिः सुराधीश्वराः ॥ ११८ ॥
अथाच्युतेन्द्रस्य निदेशमात्रतः सुरा विचक्रुश्च निदेशकारिणः ।
सहस्रमष्टोत्तरमष्टधा तदा कैरिकाणां रजतादिवस्तुभिः ॥ ११९ ॥
क्षीराम्भोनिधिपुष्कराम्बुधिभवाः पद्मह्रदाद् भारत-

---

१ कल्पेशानाम् ।

क्षेत्रैरावतवर्षतीर्थनिवहात् पाथोजपाथोमृदः ।
सिद्धार्थांश्च महौपधीश्च सहसा क्षुद्राद्धिमाद्रेस्तथा
ते स्नात्राय सुमेरुकाननचयात् पुष्पाणि भक्त्याऽऽनयन् १२०

अथ व्यमुञ्चन् कुसुमाञ्जलिं पुरा सुरैः समं द्वादशकल्पवासवः ।
सुमैः स तैरेव सरोजमिश्रितैः प्रदग्धकृष्णागुरुधूपधूपितैः ॥ १२१ ॥

विस्फूर्जन्मुखपद्मकोशकलिताः संवीतदिव्यांशुकाः
पुष्पाभ्यर्चिततत्तदग्र्यकलशान् धृत्वा कराब्जेषु ते ।
सम्यग् दैवतदेवतासु सुतरां सर्वासु तूर्यत्रिक-
व्यग्रासु प्रयतेऽथ किन्नरगणे गानं वितन्वत्यपि ॥ १२२ ॥

तीर्थेशस्य गुणान् पठत्सु दिविषद्वैतालिकेपूच्चकै-
स्तीर्थाधीश ! जयेति चारणगणेपूच्चारयत्सु स्तुतिम् ।
कान्त्या शारदशर्वरीपरिवृढज्योत्स्ना जयन्तस्ततः
शक्रा अच्युतवासवप्रभृतयः स्नात्रं जिनेशो व्यधुः ॥ १२३ ॥
(युग्मम्)

ये पुष्पस्तवकन्ति मूर्धनि मुखे कर्पूरपूरन्ति ये
कण्ठे माणवकन्ति ये च हृदये श्रीखण्डलेपन्ति ये ।
सर्वाङ्गेषु यशश्चयन्ति च जयश्रीणां कटाक्षन्ति ये
वार्वाहाः कलशेभ्य एव पतिताः क्षीराम्बुधेस्ते प्रभोः ॥१२४॥

विभौ त्रिपष्ट्या स्नपिते सुरेश्वरैः परस्परालम्बितशुद्धसंवरैः ।
तदद्भुतं निर्मलतामवाप्य यद् शुचासिभिर्निर्वृतिरापि वैस्तदा ॥१२५॥

वपुश्च संमार्ज्य सुगन्धिवाससा विलिप्य गोशीर्षकदिव्यचन्दनैः ।
व्यभूपि पुष्पैरपि तैर्जिनस्य यन् तदद्भुतं यत् फलमापि तत्क्षणम् १२६

विधाय सम्यक् स्नपनार्चने ततः सुराधिनाथा जिननाथमानमन् ।
जगत्त्रयीनायकभावमग्रतो विभोर्ब्रुवाणा इव शैशवेऽपि ते ॥ १२७ ॥

सौधर्मप्रभुवद् विधाय तरसेशानप्रभुः पञ्चकं
रूपाणामकृतैककेन स जिनं स्वोत्सङ्गपर्यङ्कगम् ।
अन्येनातपवारणं विधृतवान् द्वाभ्यां सिते चामरे
शूलं प्रोल्लसयन् दधार पुरतोऽप्यन्येन मूलं श्रियाम् ॥ १२८ ॥

१ हारायन्ते । २ जलप्रवाहा ।

स्फटिकवृषभान् सुत्रामाऽथ व्यधत्त चतुर्मितान्
सुकृतदलिकाद् मूर्तिं प्राप्तानिवेशदिदृक्षया ।
सुरशिखरिणश्छाया येषु स्वयं प्रतिबिम्बिता
कनकमयतामेवाऽऽचष्टाऽक्षवृत्तिविबाधिनी ॥ १२९ ॥
तेषामुन्नतशृङ्गभागनिरयत्पीयूषविक्षेपका-
म्भोधाराभिरमर्त्यराड् व्यरचयत् स्नात्रं जिनस्याऽष्टभिः ।
अष्टानां ककुभां ध्रुवं परिवृढैः स्वच्छाम्बुधारामिषात्
संप्राप्तानि तदा यशांस्युपहृतान्येतानि मौलौ विभोः ॥१३०॥
प्रक्षिप्तं सुरनायकैः स्वशिरसि स्नानाम्बु कैश्चित् प्रभो-
रन्यैस्तद्विनिपातुकं नयनयोराधायि यत्नादपि ।
कैश्चिच्चन्दनपङ्कवद् विनिहितः स स्नात्रपङ्कोऽलिके
धन्यैरेव जनुः सहस्रकलुषोच्छेद्याऽऽप्यते तत्परम् ॥ १३१ ॥
सौधर्मेन्द्रस्त्रिभुवनगुरोर्वर्ष्म संमार्ज्य गन्ध-
काषाय्याऽथो मलयजरसैर्भक्तिपूर्वं विलिप्य ।
चक्रे पूजामवधिनियतां विश्रुतामष्टभेदां
बुद्धिस्तस्य स्खलति किमहो ! तादृशे वाऽपि कार्ये ?॥ १३२ ॥
गन्धैश्चन्दनचन्द्रकुङ्कुममुखैर्धूपैश्च कृष्णागुरु-
प्रोद्भूतैर्गरुडाक्षतैरविकलैः पुष्पैश्च नानाविधैः ।
दीपैः स्नेहदशासमृद्धिकलितैर्वर्यैर्विचित्रैः फलै-
र्नैवेद्यैश्च जलैरपीति सुकृती पूजां व्यधादष्टधा ॥ १३३ ॥
पुरन्दरोऽथाद्भुतरत्नपट्टकेऽष्टमङ्गलीं तन्दुलकैर्बभार च ।
दुरन्तकर्माष्टकभेदहेतवे प्रसिद्धसिद्धयष्टकलब्धये तथा ॥ १३४ ॥
आदर्शः परिदृश्य एव विदुषां भद्रासनं भद्रकृद्
याथार्थ्येन च वर्धमान उदितः श्रीपूर्णकुम्भस्तथा ।
वर्ण्यं मत्स्ययुगं समुज्झितजडं श्रीवत्सकस्वस्तिकौ
नन्द्यावर्त इतीरिता मुनिवरैः सा ज्ञानरत्नाकरैः ॥ १३५ ॥
ततोऽपसृत्यामरनायको मनाक् प्रपञ्च्य चाऽऽरात्रिकमुच्छलोच्छ्रयम् ।
सुमङ्गलं मङ्गलदीपकं विभोः सहर्षमुत्तारयति स्म भावतः ॥ १३६ ॥
प्रणम्य गीर्वाणगणाग्रणीस्ततः समं स गीर्वाणगणेन तत्क्षणम् ।

प्रचक्रमे स्तोतुमनन्तभक्तिभाग् जिनेश्वरं चित्त्रयभास्वरप्रभम् ॥१३७॥
जिनपते ! स्तवनं विदधे तव प्रतिपदा पदमाप्तुमनश्वरम्।
उपधिभावमपास्य निषेविता प्रददते प्रभवो हि समीहितम् ॥१३८॥
अनुपमा तव मूर्तिरियं मया ध्रुवमवैक्षि विभो ! न भवान्तरे।
अपरथा न ममाऽपि भवान्तरं कथमपि प्रभवेद् भवतो यथा ॥१३९॥
भवशताजितकल्मषसन्ततिर्भवदवेक्षणतो जिन ! नश्यति।
शममुपैति दवानलसहतिर्नवबलाहकवर्षणतो यथा ॥ १४० ॥
अमृतदीधितिदीधितिसन्निभैस्तव गुणैरसमानतया श्रुतैः।
सकललोकनिकामविसृत्वरैः किमु कणादमतं न हतं प्रभो ? ॥१४१॥
द्रुतसुवर्णरसेन तवाङ्गकं ध्रुवमिदं घटितं शुभकर्मणा।
विकचचम्पकपुष्परसेन वा विमलपीतसुगन्धगुणास्ततः ॥ १४२ ॥
जिन ! विमानमनुत्तरसज्ञकं न सुषमां दधते भवतो विना।
गृहमणौ भवनादपसारिते स्फुरति किं तिमिरं न निरर्गलम् ?॥१४३॥
हृदयवासमलंकुरु मे विभो ! परिभवन्तितमां न यथैव माम्।
कथमपि प्रतिपप्रमुखा द्विपस्तव परान्मकुण्ठितविक्रमाः ॥ १४४ ॥
कमपि कश्चन चेद् विनिषेवते न खलु सोऽपि कदाचन सीदति।
परमहं भुवनत्रितयप्रभो ! न सुखमेमि कथं तव सेवकः ?॥ १४५ ॥
समधिगम्य परं तव दर्शनं निखिलनास्तिकपक्षविघातनात्।
अनुभवागमसाधनबद्धधीर्विबुधराज्यमिदं चरितार्थये ॥ १४६ ॥
सुकृतवासनया तव सेवनं विरचयन् न कथं भववामनः ?।
भवति नैव कुकर्मविघातने तदहमारचयामि जिनेश्वर ! ॥ १४७ ॥
स्तवं वितत्येति सुपर्वनायको जिनेशमीशानवृषाङ्कतस्ततः।
करे समादाय स पञ्चरूपभागरिष्टवेश्मान्तरमाशु जग्मिवान् ॥१४८॥
हृत्वाऽवस्वापिनीं तां प्रतिकृतिमपि तामार्हतीमार्हतो द्राग्
मुक्त्वा मातुः समीपे जिनपतिमुपधौ कुण्डले दिव्यवस्त्रे।
न्यस्योल्लोचे च सारं विविधमणिमयं कन्दुकं लम्बमानं
यस्मिन् दृष्टिर्विनोदं भजति भगवतस्त्वस्य च स्याद् न दृष्टिः ॥१४९॥
जिनेश्वराः स्तन्यपिबा भवन्ति न क्रमं विजानन्निति नाकनायकः।
प्रभोः कराङ्गुष्ठतलेऽतिनिर्मले स्वभक्तिशक्त्या समचारयत् सुधाम् ॥१५०॥
(युग्मम्)

कोटीः षोडश रुक्मणां द्विगुणिता रूप्याणि रत्नान्यपि
प्रत्येकं च पृथक् पृथक् पृथुमतिर्नन्दासनानि क्रमात् ।
सद्भद्रासनयुग्मयुग्मचदसमं नेपथ्यवस्त्रादिकं
स्वर्नाथस्य निदेशतो धनपतिः श्रीविश्वसेनौकसि ॥ १५१ ॥

अर्हन्मातुरुतार्हतोऽशुभमहो ! यः किञ्चन ध्यास्यति
भेत्स्यत्यर्जकमञ्जरीव नियतं तन्मस्तकं सप्तधा ।
एवं तारतरस्वराः खलु सुरा आघोषयामासुराः !
शक्रादेशनिरूपणप्रणयिनो देवेषु सर्वेष्वपि ॥ १५२ ॥

धात्रीकर्मणि शर्मणि त्रिदशराड् मुक्त्वाऽप्सरःपञ्चकं
स्नानाभ्यञ्जनपालनापटु गतो द्वीपेऽथ नन्दीश्वरे ।
तत्राष्टाह्नमहोत्सवं विधिपराः संपाद्य शक्रायुतः
स्वं स्वं धाम मुदाऽञ्चिता ययुरथो सर्वे सुपर्वेश्वराः ॥१५३॥

अथ प्रभाते विकसत्प्रभाभरे व्यपेतनिद्रा समवैक्षताऽङ्गजम् ।
अरिष्टदीपस्य महांसि तेजसा विनिर्जयन्तं वसुधेशवल्लभा ॥ १५४ ॥
स सौविदल्लीभिरुपेत्य वर्धितः सुतप्रसूत्या वसुधासुधाकरः ।
ददद् वदान्यः परितुष्टमानसो न योग्यमेतद् भवतीति वेद न ॥१५५॥
सुतप्रभावं विनिशम्य नागरैः श्रुतप्रभावं पृथिवीपतेरथ ।
विनाऽपि निर्देशमकारि सोत्सवं विचित्रमञ्चैरपि तत्र पत्तनम् ॥१५६॥
जिनेन्द्रजन्मोत्सवतोपपूरितं पुरं तदानीमपि हस्तिनापुरम् ।
मरुत्समुद्धूतविलोलकेतनैर्मरुत्वतस्तर्जयति स्म पत्तनम् ॥ १५७ ॥

मुक्तास्वस्तिकसंचयः प्रतिगृहं रेजेतरां निर्मितः
सर्वाभिः पुरसुन्दरीभिरुदयद्दृहत्संमदाभिस्तदा ।
भव्यानां सुकृतप्रसाधनविधौ न्यस्ताशयानां ध्रुवं
जाते तीर्थकरेऽवदातयशसामुप्तानि बीजानि व ॥ १५८ ॥

त्वमेव नाथाऽक्षतपात्रमेककः परं गुणानामपि संपदामपि ।
इति ब्रुवाणा इव नागराङ्गनाः समीयुरत्राऽक्षतपात्रसंयुताः ॥ १५९ ॥
विभो ! विधातासि समानि मातृकामुखानि शास्त्राणि जिनेति पण्डिताः।
तदा पठन्छात्रकुलैरलंकृता अदीदृशन्नेत्य च सूतमातृकाः ॥ १६० ॥

---

१ इन्द्रस्य ।

दिनोदयेऽस्मै प्रभवे दिनेशिता दिने तृतीये जनकेन दर्शितः ।
प्रभाकरत्वेन समानयोरपि द्वयोर्विशेषं महसोः परीक्षितुम् ॥ १६१ ॥
अदर्शि तत्रैव दिने दिनात्यये सुतस्य पित्राऽस्य निशीथिनीपतिः ।
विलोकनादेव तवेश ! केवलं कलङ्किता दूषणमस्य यात्विति ॥ १६२ ॥

षष्ठीजागरणोत्सवं व्यरचयत् श्रीविश्वसेनो नृपः
स्वर्णालङ्कृतिपट्टसूत्रवसनैः सर्वांश्च संतोषयन् ।
गेहे यस्य समुद्गतो जिनपतिः कल्पद्रुमो जङ्गमः
को वा विस्मयमातनोति सुमतिर्दानेन तस्याऽधिकम् ?॥१६३॥
गर्भस्थेऽप्यशिवानि शान्तिमगमन् येनाऽत्र सर्वाण्यपि
प्रोचे तज्जनकेन सोऽपि भगवान् श्रीशान्तिरित्याख्यया ।
संबोध्यैव महाजनं निजगिरा नाम्नो विधानोत्सुकं
प्रत्याप्य स्वसुवासिनीजनमपि प्राप्ते दिने द्वादशे ॥ १६४ ॥

पिबन् निजाङ्गुष्ठमनारतं प्रभुर्बिडौजसा संक्रमितामितामृतम् ।
अनेकधात्रीभिरनेकखेलनैः प्रपाल्यमानो ववृधेतमां क्रमात् ॥ १६५ ॥
गुणैः प्रवृद्धोऽपि सुधांशुनिर्मलैः स बाललीलाः कलयन् व्यराजत ।
विचेष्टितं चित्त्रयभासिनोऽपि यद् विभासते तद् न परस्य वा कथम् ?॥

उत्तानो मणिपालने मुकुरवच्छेते कुमारः स तद्
यत् प्राप्नोति निरन्तरं किल पुमानुत्तानशायी बलम् ।
यद्वाऽऽवेदयतीव दुर्गतिरधः,क्षिप्ता मया मन्मुख-
प्रेक्षाकाङ्क्षणदक्षिणैकमनसां पुंसां स पुण्यात्मनाम् ॥ १६७ ॥

दिनाधिनाथोऽपि करप्रसारणं समाचरंस्त्रस्यति सैंहिकेयतः ।
इतीव विश्वत्रितयाभयप्रदः प्रबद्धमुष्टिः समजायत प्रभुः ॥ १६८ ॥
कदापि तिष्ठन् हृदयाऽऽस्यमस्तके पितुर्जनन्याश्च परिच्छदस्य च ।
विभूषणोद्भासकदेहकान्तिभृद् भवेऽपि कैवल्यसुखं ततान सः ॥१६९॥
कदाचिदाभाषित एव नोत्तरं ददावकिञ्चिज्ज्ञ इव स्थितः प्रभुः ।
कदाचन प्रौढविदग्धवद् गिरः प्रवर्तयामास सभाऽसुरञ्जिकाः ॥१७०॥
विभोः समासाद्य पदं वसुन्धरा न रत्नगर्भत्वमनर्थकं दधौ ।
त्रिविष्टपश्रीसुभगत्वगर्वहृद् बभूव सातेन च तेन किन्तु सा ॥१७१॥
न्यलोकि लोकैः किल काकपक्षभृद् यदा तदाऽप्युच्छ्वसितं स्वचेतसा ।

प्रभुः स च स्तूयत एव यः समो मरालपक्षेऽपि च काकपक्षके ॥१७२॥
यदेव यत् क्रीडनमैहत प्रभुः सुरेन्द्रशिष्टया त्रिदशैः समपि तत् ।
विचित्ररूपैरनिशं सुरव्रजो मनोऽनुरूपेण विभोर्विचेष्टते ॥ १७३ ॥

इति क्रीडाः कुर्वस्त्रिदशनिचयैः सार्धमुचिताः
पितृणामानन्दं प्रतिसमयमेवोपजनयन् ।
क्रमाच्चत्वारिंशद्धनुरनुगताङ्गप्रमितिमा-
नवापत् तारुण्यं त्रिभुवनगुरुर्मेरुमहिमा ॥ १७४ ॥

अपारसिन्दूरपरागपूरिते जगत्त्रयस्याऽपि रमा स्वमूर्धनि ।
न्यधत्त पादद्वितयं यदीशितुः रसात् तदा ताम्रतलं बभूव तत् ॥१७५॥
प्रणम्रगीर्वाणगणाग्रणीशिरोमणीमणीघर्षणतोऽरुणा नखाः ।
विभोर्दधन्ते स्म पदोर्दशाऽमला दिशां दशानामपि दर्पणश्रियम् ॥१७६॥

अङ्गुल्यो विबभुर्मृणालमृदुला नेतुर्दशांह्र्योर्द्वयोः
कल्पाधीशमरुत्वतां युगपदाऽऽनन्तुं समासेदुषाम् ।
संमानप्रतिपत्तये समतया संवाहनाय ध्रुवं
कॢप्ता इत्यपि तर्कयामि महतां सर्वत्र साम्यं यतः ॥ १७७ ॥

प्रमादभारेण भवाम्बुधौ पतद्गृहस्थनिर्ग्रन्थजनद्वयस्य सत् ।
अजस्रमालम्बनमेव तत्परं पदाम्बुजद्वन्द्वमभूज्जिनेशितुः ॥ १७८ ॥
प्रकाशभावं कलयिष्यति प्रभोरहो! चतुर्धा समुदायसन्ततिः ।
इतीव तद्गुल्फचतुष्टयं स्वयं निगूढभावं बिभराम्बभूव च ॥ १७९ ॥
अभूव भूवल्लभवन्द्यसत्पदाऽऽश्रयौ क्रियावत्यतिसारसारतः ।
इतीव जङ्घे पृथुले जिनेशितुः शुभे सुवृत्ते सुभगे बभूवतुः ॥ १८० ॥
भुजिक्रियाऽनन्तरमेव नौ स्पृशन् प्रियं समासादयते न चान्यथा ।
इतीव गुप्ते स्वसमाधिमास्थिते जिनस्य भातः स्म सदैव जानुनी ॥१८१॥

रम्भास्तम्भा न हि जिनपतेः साम्यमूर्वोः श्रयन्ते
संसाराब्धेस्तरणकरणव्यापृतस्य स्वतोऽपि ।
निश्चैतन्यात् सुकृतविहितौ विस्फुरच्छीतकत्वाद्
निःसारत्वात् परिमितफलार्थप्रभूतित्ववृत्तेः ॥ १८२ ॥

अहं कलत्रं सहचारि सर्वदा यथा कलत्राण्यपराणि नो तथा ।
इति स्वसंबद्धमहाभिमानतः प्रभोः कलत्रं पृथुतामगाद्दत ॥ १८३ ॥

गुणाश्रयं नौमि न पूर्वकायकं कथं कथं वोत्तरकायकं तथा ?।
यथार्थवाद्व्ययचिन्तया प्रभोरितीव मध्यः कृशतां समाश्रयन् ॥१८४॥
अपायि लावण्यरसो वधूजनैर्न नाभिकूपस्थित एव यैः प्रभोः ।
अपायि तेषां न यदङ्गतृष्णयोचितं तदेवाद्भुतमन्यथा परम् ॥ १८५ ॥
इमानि रोमाणि न भर्तुरङ्कके विभान्ति किं नाम नु संविदङ्कुराः ।
कषायसंवासितमातृमानसप्रसङ्गतः श्यामलकान्तिभागिनः ?॥१८६॥
विशालवक्षःस्थलकैतवस्फुरत्कपाटविन्यासनसंनिबन्धनात्।
सनातनं विस्तिरमानिकेतनं जिनाधिनाथस्य मयाऽनुमीयते ॥ १८७ ॥
अगण्यकारुण्यरसौघसंभृते विवेकविभ्राजितहंससंश्रिते ।
समुन्नतेऽस्मिन् जिनहृत्सरोवरे कराक्षिवक्त्राम्बुरुहाणि रेजिरे ॥१८८॥
विजित्य कन्दर्पमदर्पकं विभुः स्वरूपलक्ष्म्यैव यममहीज्झषम् ।
स एव सामुद्रकशास्त्रकोविदैः करे समग्रैरपि वीक्षितो जनैः ॥ १८९ ॥
प्रभोर्भुजाभ्यां विजितानि लीलया ध्रुवं मृणालानि न तानि चान्यथा ।
निलीय मन्दाक्षभरादिवानिशं जलाशयान्तःस्थितिमेव चक्रिरे॥ १९० ॥
आस्यं पीयूषसिन्धुः सुवचनममृतं मौक्तिकानि द्विजाली
बिम्बाभौष्ठप्रवालव्रततिकिशलयौ श्मश्रु तालीवनानि ।
शुण्डादण्डानुकारा शमसलिलगजस्यैव नासा विराज-
च्चक्षुर्वीचीप्रपञ्चो जयति जिनपतेर्हास्यडिण्डीरपिण्डः ॥१९१॥
समग्रजैवातृकगोत्रमण्डले जिनस्य जाने मुखचन्द्रमुद्गतम् ।
अवाप्तसाम्राज्यपदं, किमन्यथा कपोलचन्द्रौ कुरुतोऽस्य सेवनम्?॥१९२॥
यदर्धचन्द्रेण ललाटपट्टकं ससर्ज धाता जिनचक्रवर्तिनः ।
कदापि तेनैव न पूर्णमण्डलः शशी समालोक्यत एव चैषकः ॥ १९३ ॥
श्रीवत्सः पुरुषोत्तमत्वमुरसि स्वास्तुः समावेदय-
त्याज्ञामात्रवशीकृताखिलजगत् श्रीशान्तिनाथप्रभोः ।
उष्णीषोऽप्युपरिस्थितश्च शिरसो देदीप्यमानः श्रिया
पुण्यानामुदयेन किं न महतां बीजं प्रसिद्धेर्भवेत् ?॥ १९४ ॥
दृष्ट्वा शान्तेर्निरुपममिदं केशपाशं चमर्यः
संभाव्यैतद् व्यपगतफलं स्वस्य बालप्रियत्वम् ।

१ अपेतम् ।

लज्जाऽऽक्रान्ता हिमगिरिभुवं संश्रयन्ते स्म नूनं
युक्तं स्त्रीत्वे व्यवसितमिदं मानिनी सा हि जातिः ॥ १९५ ॥
सुदुर्जयं वाडवजातवेदसा प्रतापराशिं दधतोऽपि यद्वपुः ।
जिनेशितुः स्वेदलवैर्विवर्जितं विचित्रमन्यत् किमिवाऽभिधीयताम् ? ॥
वपुर्जिनेन्द्रस्य सुवर्णकेतकीपलाशसारैर्मृदुभिर्विनिर्ममे ।
ध्रुवं गृहीतैः शुभकर्मणाऽन्यथा सुगन्धि पीतं मृदु नैव तद् भवेत् ॥१९७॥
हृदि स्फुरन्निर्मलबोधसङ्गमादिवाऽवदाते अपि मांसशोणिते ।
जिनस्य कण्ठोत्पलगन्धवासनाश्रयादिव श्वासभरोऽतिसौरभः ॥१९८॥
रोगा वैद्यविशारदैर्निगदिताः सर्वेऽप्यजीर्णोद्भवा
यद्वाहारभवं तदेव स तु नाऽऽहारः समालोक्यते ।
नीहारोऽपि न यस्य चर्मनयनै रोगाः कुतस्तत्प्रभो-
र्यद्वा विस्मयमादधाति चरितं सर्वं हि पुण्यात्मनाम् ॥१९९॥
इति त्रिलोकीवनिताविलोचनोन्मदिष्णुरोलम्बकुलाम्बुजप्रभम् ।
अगण्यलावण्यनिवेशसेवधिर्बभूव रूपं समताऽतिगं विभोः ॥ २०० ॥
वसुन्धराधीशसुता यशोमतीमुखाः सुमुख्यो जनकोपरोधतः ।
महोत्सवेऽतुच्छतमे प्रसर्पति प्रभुः प्रभूताः प्रथिता व्यवाहयत् ॥२०१॥
समासहस्रेष्वथ पञ्चविंशतिप्रमेषु यातेषु निमेषवत् सुखम् ।
न्यधत्त राज्ये नृपविश्वसेनकः प्रतापदिक्चक्रविभासकं विभुम् ॥२०२॥
तवोत्तमाङ्ग ! क्रमवन्दनात् प्रभो ! ममोत्तमाङ्गस्य सदोत्तमाङ्गता ।
अजायतैवेति विमृश्य राट् तदा निजोत्तमाङ्गं नमयाम्बभूव सः ॥२०३॥
स विश्वसेनोऽवनिपालपुङ्गवः समाचचार स्वहितं ततः स्वयम् ।
न हि प्रमादं परलोकसाधने बुधाः प्रकुर्वन्ति कदापि तादृशाः ॥२०४॥
शुभेषु कार्येषु नृणां विहस्तता बभूव रोमाञ्चगतोऽथ कण्टकः ।
स भीमरूपः शिव एव विश्रुतः प्रभौ भुवं शासति शासितद्विषि॥२०५॥
दृढस्य जीवः सरथस्य विच्युतो यथार्थसर्वार्थमहाविमानतः ।
स चक्रकस्वप्ननिवेदितागमो यशोमतीकुक्षिमभूषयत् ततः ॥ २०६ ॥
अजीजनत् सा तनयं नृपप्रिया महौजसं लक्षणलक्षिताङ्गकम् ।
प्रभोः प्रतिच्छायिकयेव निर्मितं प्रदीपतो दीपमिवाऽतिभासुरम् ॥२०७॥
गर्भाधानं भजति भगवत्यत्र मात्रा निरैक्षि

स्वप्ने चक्रं समुदितविभाचक्रकान्तावभासम् ।
अस्माच्चक्रायुध इति सुतस्याऽस्य नामाभिधानं
श्रीमान् शान्तिर्व्यधित विधिवल्लोककल्पद्रुकल्पः ॥ २०८ ॥

कलाः समभ्यस्य कलागुरोः कलाः कलाविदां मानसमापयन् मुदम् ।
ततः समासादितमुक्तशैशवः क्रमात् स तारुण्यभरं समासदत् ॥२०९॥

नरेन्द्रकन्या रतिरूपसंपदः परार्ध्यसौभाग्यसमृद्धिशालिनम् ।
स तं धनुर्वेदनिवेद्यकौशलं विवाहयामास पिता प्रभूत्तमः ॥ २१० ॥

वसुन्धरामण्डलमस्य शासतः सतः प्रभोः शान्तिमहामहीशितुः ।
समासहस्रा व्यतिचक्रमुर्नृपैरुपास्यमानस्य च पञ्चविंशतिः ॥ २११ ॥

अथाऽऽयुधागारिक एत्य सत्वरं व्यजिज्ञपत् तं प्रणिपत्य कृत्यवित् ।
त्वमायुधागारविभासिना त्विषां चयेन चक्रेण नरेन्द्र ! वर्ध्यसे ॥२१२॥

सहस्रभानुस्तव शस्त्रसद्मनि स्फुरत्सहस्रारकचक्रकैतवात् ।
प्रविश्य सान्निध्यमवाप्य सांप्रतं किमु स्वयं राहुमयं जिगीषति ?॥२१३॥

स चक्ररत्नस्य नृरत्नमात्मना व्यदीधपत् पूजनमष्टवासरान् ।
न किं विजानन्तितरां हि संविदां त्रयेण विद्योतितचेतसोऽथवा ?॥२१४॥

अष्टाह्निकाविरमणे सति तच्च चक्रं
व्योम्ना चचाल हरितं प्रति वासवस्य ।
तेनैव वासरमणेर्ध्रुवमेकचक्रः
ख्यातो रथः सविधदेशविवर्तिनाऽपि ॥२१५॥

यक्षैरधिष्ठितमधिष्ठितवित्तरक्षै-
स्तत् संततं दशशतीप्रमितैः सलक्षैः ।
सैन्योत्थितेन रजसा ककुभां विभागा-
नाच्छादयन्ननु ययौ जिनचक्रवर्ती ॥ २१६ ॥

पुरस्कृताः संप्रति मन्दगामिनोऽप्यनेन भर्त्रा वयमेव केवलम् ।
इतीव वेगेन गजाः प्रतस्थिरे क्षरन्मदप्लावितरेणुसंचयाः ॥२१७॥

हिरण्मयैः पल्ययनैर्विराजितास्तुरङ्गमा नैकविधास्ततोऽचलन् ।
प्रभञ्जनः खञ्जित एव यैर्ध्रुवं जवेन न स्याद् मृगवाहनोऽन्यथा ॥२१८॥

ददौ त्रिलोकीपतिरात्मनः पदं सनातनं नः प्रमना जगत्त्रये ।

---

१ तत् चक्रम्, अन्विति संबन्धः ।

इतीव चीत्कारमिषाद् निजस्तवं विनिर्मिमाणैश्चलितं रथोत्तमैः ॥२१९॥
प्रभोः प्रचेलुर्विजयश्रियोद्भटा भटाः समग्राग्रहणैकलम्पटाः ।
अनेकशः प्रासकृपाणपाणयः प्रति प्रतीकं रचिता इवौजसा ॥ २२० ॥
मृदङ्गढक्कादिकवाद्यनिस्वनै रवे रथाश्वेषु पलाय्य यत्सु च ।
तुरङ्ग एकः क्वचनापि यद् ययौ तदत्र ते पत्रथिरे न सप्त किम् ?॥२२१॥
तदा जगन्नाथचमूमहाभराद् महीतले न्यञ्चति भोगिनां पतिः ।
फणासहस्रं धृतये विजज्ञिवान् मणिप्रभावादगणितोरुयातनः ॥ २२२॥
चमूसमुत्पातरजोभरैः प्रभोर्वितायमाने सति दुर्दिने घने ।
न राजहंसाः परदेशमैयरुश्चमूचराणां किमयं न विस्मयः ?॥ २२३ ॥

गत्वा योजनमात्रमशक्तिनियते श्रीचक्ररत्ने स्थिते
स्वामी द्वादश योजनानि शिबिरं न्यास्थद् व्यवस्थापरः ।
नास्मार्षीद् निजवेश्मनामपि जनः कश्चिश्च सेनाचर-
स्तिष्ठन् वार्धकिरत्ननिर्मितगृहस्तोमेषु रम्येष्वलम् ॥ २२४ ॥

गच्छन्नेवं प्रतिदिनमविच्छिन्नरूपैः प्रयाणै-
र्विश्वोत्तापं व्यपगमयितुं प्राप्तविस्तारसारः ।
पूर्वाम्भोधिं सुकृतविदुषां वन्दनीयोऽमराणां
प्राप स्वामी रसमय इव स्वःस्रवन्त्याः प्रवाहः ॥२२५॥

सरस्वतीनामविनश्वरं पदं स्वबन्धुवत् सद्गुणरत्नसश्चयम् ।
समीरणप्रेरितवीचिबाहुभिः समालिलिङ्गेव विभुं पयोनिधिः ॥२२६॥
अथो निविष्टः स च सिंहविष्टरे स्वयं प्रभुर्मागधतीर्थसंमुखम् ।
जिनेन्द्रचक्रिद्वयवृत्तवर्तिनां ललामभूतः कमनीयविग्रहः ॥ २२७ ॥
अवस्थितो द्वादशयोजनान्तके स्वकीयसिंहासनकम्पनादनु ।
समुत्पतत्क्षोभसमाकुलाशयो व्यचिन्तयद् मागधतीर्थनायकः ॥२२८॥

मत्सिंहासनकम्पमाप यदिदं निष्कम्पमेवान्वहं
तत्किं मे च्यवनं किमद्भुतमहो ! विघ्नोऽपि भावी किमु ?।
शत्रोरेव विचेष्टितं किमथवा कस्यापि चैतन्मम
ध्यात्वैवं स च संशयापहृतये प्रायुङ्क्त बोधं निजम् ?॥२२९॥

अवेत्य तं षोडशधर्मचक्रिणं समागतं पञ्चमचक्रवर्तिनम् ।
व्यधारयद् मागधतीर्थनायकः स्वचेतसैवं पुनरर्द्धचेतन. ॥ २३० ॥

अहो ! धिगज्ञानमिदं ममाधुना प्रभुत्वमेतद् धिगपि प्रसृत्वरम् ।
विजृम्भणाद् यस्य न शान्तिमागतं कथञ्चिदज्ञासिषमेव नायकम् ॥२३१॥
उपासनामल्पितकल्पशाखिनः प्रकुर्वते यस्य च कल्पवासिनः ।
प्रभोः सपर्यामपि तस्य कीदृशीमहं करिष्यामि तनिष्ठऋद्धिकः ?॥२३२॥
स्वसंपदोऽस्याऽप्यनुसारतः प्रभोस्तथापि भक्तिं वितनोमि सांप्रतम् ।
महात्मनां कार्मणकर्मणि स्फुटं विहाय भक्तिं न परं हि साधनम् ॥२३३॥
इदं विनिश्चित्य निजेन चेतसोपदां समादाय समेत्य सत्वरम् ।
पदारविन्दद्वितयं पुरः प्रभोर्ननाम नक्षत्रपथे कृतस्थितिः ॥ २३४ ॥
न्यजिज्ञपच्चाभयदानदक्षिण ! त्वया विभो ! मत्पदमायता स्वयम् ।
सुरेषु रेखा मम नैव केवलं निवेशिता किन्तु सुरेश्वरेष्वपि ॥२३५॥
सुरेश्वराणां न कदापि यत्पदं स्वपादपद्मैस्त्वयका पवित्रितम् ।
पवित्रितं देव ! ममैव तत्परं कृतः कृतार्थोऽस्मि निकृत्यपासिना ॥२३६॥
अतः परं ते विनियोगवर्तिनां पुरस्सरोऽस्म्येष विशेषवेदितः ।
निदेशदानेन यदा कदाचन प्रसादनीयः स्मृतिपूर्वकं त्वया ॥ २३७॥
इतीरयित्वा प्रणिपत्य निस्तगीः सुरस्ततोऽस्मै मणिभूषणाऽञ्चितम् ।
उपायनं सन्निधिमानुपानयद् न तादृशां रञ्जनमन्यदस्ति यत् ॥२३८॥
विसर्जितः सत्कृतिपूर्वकं सुरः प्रसादभाजा स च शान्तिचक्रिणा ।
ययौ निजस्थानमनाहतक्रमं समुल्लसत्तोषपरीतमानसः ॥ २३९ ॥
ततः क्षणाद् दक्षिणवार्धिरोधसि स्थितः स्थिराधीशनतक्रमाम्बुजः ।
असाधयद् मागधवत् समागधः सुरं स्वशक्त्या वरदामनायकम् ॥२४०॥

सैन्यं पश्चिमवारिधेरनुतटं विन्यस्य शान्तिप्रभु-
दत्तानर्घ्यमणीविभूषणगणं शिष्टिप्रतीष्टिव्रतम् ।
संमान्यप्रतिभासमानममरं तं च प्रभासेश्वरं
वाताधीशदिगध्वना चलितवान् श्रीसिन्धुदेवीं प्रति ॥२४१॥

स्वामी सैन्यं न्यधित सुमतिः सिन्धुसिन्धोः प्रतीरे
वामे वामे सविधसविधे सिन्धुदेवीगृहस्य ।
यस्मिंस्तार्णं न च जलमपि प्रायशो धन्वनीव
सैन्यानर्हे वदनरदनश्रोत्रकाश्मल्यभित्त्यै ॥ २४२ ॥

शान्तिं स्वाभिमुखं जगत्त्रयपतिं सिंहासनस्थायिनं

विज्ञायाऽवधिनोपदाभृतकरा श्रीसिन्धुदेवी मुदा ।
आगत्य प्रणिपत्य विज्ञपयति स्मैवं प्रभुं प्राञ्जलि-
र्धन्याऽहं तव दर्शनादिह विभो ! स्थास्नुर्निदेश्या सदा ॥२४३॥
इत्यालप्य समर्प्य भास्वरतरं दिव्यं विभूषाचयं
जात्याष्टापदभूरिरत्नसवनद्रोणीघटान् सा समान् ।
विश्वेशः प्रतिपद्य शिष्टिममरीं सत्कारमाप्याऽगमत्
स्वस्थानं वृषभध्वजस्य च दिशा वैताढ्यशैलं प्रभुः ॥२४४॥
ज्ञात्वा स्वामिनमागतं सप्रतनं वैताढ्यशैलप्रभु-
र्द्रागाऽऽगत्य विनत्य चाऽऽदित विभोः शिष्टिं कृतोपायनः ।
चक्री चक्रमनुव्रजंश्च सबलः प्राप्तस्तमिस्रां गुहा-
मासीनः कृतमालकाभिधसुरं चक्रे सहेलं वशम् ॥ २४५ ॥
आज्ञप्तः प्रभुणा चमूपतिरथो सिन्धुं नदीं चर्मणा
प्रोत्तीर्य स्ववशंवदं व्यरचयत् तन्निष्कुटं दक्षिणम् ।
तामिस्रं विहिताष्टमः स च जवादुद्धाटयामासिवान्
द्वारं स्वामिनिदेशतः पृथुमतिर्दण्डेन रत्नेन तत् ॥ २४६ ॥
प्रविश्य बाष्पोपरमे तदन्तरे महेभमारुह्य चमूपरिष्कृतः ।
निवेश्य कुम्भे मणिमेव दक्षिणे दरीतमश्छेदयति स्म चक्रभृत् ॥२४७॥
तद्भित्त्योरपि मण्डलानि विलिखन्नेकोनपञ्चाशतं
काकिन्या मणिना प्रभुः स पुरतोऽयासीत् प्रयासं विना ।
चक्री वर्धकिना निबद्धसरणिः क्षिप्रं निमग्नाभिधो-
न्मग्नाख्यं द्विनीद्वयं परमवागारीत् तदन्तःस्थितम् ॥२४८॥
तदाऽऽत्मनैवोद्घटितं तदोत्तरं महागुहाद्वारमुपागते विभौ ।
न चात्र चित्रं प्रतिभासते सतां शुभात्मनां यत् सकलं सुसंभवम्॥२४९॥
विजेतुमेवोत्तरभारतं पृथुं कुबेरदिग्द्वारिकयैव निःसृतम् ।
ससैन्यमायान्तमवेक्ष्य चक्रिणं सहासमापातशका मिथो जगुः ॥२५०॥
अरे ! चतुर्धा बलमानशालितः क एष निःशङ्कमुपैति गर्वितः ? ।
बलावलेपेन परोपवर्तनं महीतुकामः क इवाभिवर्ण्यताम् ? ॥ २५१ ॥
चलाबलं स्वस्य परस्य वा बुधो विचार्य कार्यव्यवसायमाश्रयेत् ।
विचारमुत्सृज्य गृहीतपौरुषः पराभवं विन्दति यद्‌ महानपि ॥ २५२ ॥

गजैः किमेभिर्महिषैरिवाऽमदैः खरैरिवोच्चैस्तुरगैरथापि किम् ? ।
नरैरमीभिः किमु वानरैरिव प्रवर्तमानैः परदेशलिप्सया ? ॥ २५३॥
महाबलैः किं यदि वा महाबलैस्तुरङ्गमैः किं यदि वा तुरङ्गमैः ? ।
महारथैः किं यदि वा महारथैर्न सांयुगीना यदि ते महाभटाः? ॥२५४॥

शाणाजीवानिवैतान् निशितबहुविधाऽस्त्राणि पाणौ दधाना-
नस्माकं देशसीमां समुपनिपततो धिग् मुमूर्षून् सुमूर्खान् ।
एते चोपेक्ष्यमाणा व्यसनजननवद् नाऽऽयतौ शर्मणे स्युः
पञ्चत्वं प्रापयामः सुकृतपरिणतेः शक्तितस्तद् विमूढान् ॥२५५॥

विचार्य चैवं शकवीरमण्डली विचित्रधौताऽऽयुधजातमण्डिता ।
पुरस्थसैन्येन च चक्रवर्तिनः प्रचक्रमे योद्धुमनुक्रमेण सा ॥ २५६ ॥
चमूपतिर्वीक्ष्य पराङ्मुखीकृतान् किरातवीरैः प्रभुसैनिकानिमान् ।
क्रुधाऽसिरत्नं परिगृह्य संमुखोऽश्वरत्नमारुह्य दधाव तान् प्रति॥२५७॥
विभासमानेन च तेन तत्क्षणं रराज रत्नत्रितयेन सा चमूः ।
यथैव शक्तित्रितयेन राजता यथैव गुप्तित्रितयेन साधुता ॥ २५८ ॥
रणाङ्गणे तस्य पताकिनीपतेर्न कोऽपि तस्थौ पुरतोऽभिधावतः ।
तमिस्रसंभार इवोष्णदीधितेर्गरुत्मतः सर्प इवाऽभिसर्पतः ॥ २५९ ॥

शालूरा इव केचनाऽपि सरसि त्रस्ता ममज्जुर्भटा
भुञ्जाना इव केचनाऽपि वदने न्यास्थन् स्वहस्ताङ्गुलीः ।
स्वप्राणान् परिरक्षितुं वृषभवत् तस्मिंश्च केचित् तृणं
केऽपि क्वाऽपि निलिल्यिरे सलिलवद् दुग्धे विदग्धाशयाः॥२६०॥

अनीकिनीनायकरत्नसायकप्रभिन्नलक्ष्यस्य विलोकनादिति ।
विलक्षतामाप्य दिशो दिशं ययुः किरातवीरा मरुतेव पांशवः ॥२६१॥
अतीत्य ते भूमिमनेकयोजनामवाप्य चोच्छ्वासमलुप्तचेतनाः ।
विलज्जमाना मिलिताः परस्परं विमर्शमेतादृशमाशु चक्रिरे ॥ २६२ ॥

कुकर्मपरिपाकतः सुकृतसंक्षयोऽजायत
ध्रुवं सपदि नः परं, कथमुपैति चात्राऽन्यथा ।
तमिस्रभरकन्दरं गिरिमतीत्य वैताढ्यकं
पराक्रममहानिधी रिपुरनेकसैन्योत्करः ? ॥ २६३ ॥

मानान्धैर्विदधे मृधं विगणनां निर्वास्य सर्वात्मना

प्राप्तोऽस्माभिरहो ! न चापि विजयो भूयान् निकारोऽर्जितः ।
खड्गप्रासक्षुरीशरासनशराभ्यासोऽभवद् निष्फल-
स्तस्माद् नो मरणं विहाय शरणं नैवास्ति किञ्चित् परम् ॥२६४॥
धिग् नः पौरुषमेतदस्तु सुभटंमन्यात्मनां वर्णनां
संप्राप्याऽस्तमियाय यच्च समये सूरोदये चन्द्रवत् ।
न श्लाघ्यं बत ! जीवितं परिभवे मानोत्तमानां नृणां
दृष्ट्वा योऽपि पराभवं स्थिरतरं तिष्ठेत मानः स किम् ?॥२६५॥
हुताशनान्तर्विशनात्मघातनाऽद्रिसङ्गसंपातविषाऽशनादिभिः ।
म्रियामहे तद् रुचिरं चिरं भवेद् न पत्तिमात्रस्य पराभवे स्थितिः ॥२६६॥
अथाऽस्ति दुर्वारविरोधिसाधने महानुपायो निरपायसंश्रयः ।
सदा समाराध्य कुलैकदेवता घनाघनाराधनसाधुसाधनम् ॥ २६७ ॥
पर्यालोच्येति सर्वे सविधमुपगता रोधसः सिन्धुसिन्धो-
र्नग्नत्वोत्तानशायिव्रतविधृतिपरास्तस्थुरेकाग्रचित्ताः ।
तुष्टास्तद्गोत्रदेव्यः सपदि जलमुचोऽथाष्टमान्ते समेयु-
र्यद्वा नो दुष्करं स्यात् किमपि च तपसां भावनाभावितानाम् ॥
देवा मेघमुखा दिवि स्थितिभृतः प्रोचुः किरातानिदं
वत्साः ! सेवनवत्सलाः ! स्थलमृते किं कारणं नः स्मृतौ ?।
ते बद्धाञ्जलयः प्रणम्रशिरसस्तानेवमावेदयन्
वैताढ्याद्रिमवीत्य कश्चन महाधामा समागादिह ॥२६९॥
अनेकपस्येव महामहीरुहान् समूलमुन्मूलयतः किरातकान् ।
तदीयपत्तेर्वयमुद्धृताः परं कथञ्चनाऽपि प्रबलस्य देवताः !॥२७०॥
प्रसद्य तद् रक्षत सद्य एव नः स्वसेवकान् दीनमुखान् कृतार्थनान् ।
पराभवात् पान्ति निजाश्रितं न ये बलेन तेषां प्रबलेन किं श्रिया ?॥२७१॥
निशम्य विज्ञप्तिमिमां तदीरितामुदाहरन् मेघमुखा दिवौकसः ।
यदंह्रिपूजाप्रवणा बिडौजसो न कोऽपि तत्राऽपकृतिक्रियाक्षमः ॥२७२॥
तथापि युष्मत्कुलदेवता वयं भवत्समाराधनतोषिताशयाः ।
अमुष्य विघ्नाचरणेन निश्चितं प्रकुर्महेऽरं भवतां समीहितम् ॥२७३॥
इति प्रपन्ने सति तैः पदानतैः पयोदवृन्दं गगने विकृत्य ते ।
पयोददेवाः किल चक्रवर्तिनस्तदैव सैन्योपरि वृष्टिमादधुः ॥२७४॥

जिनेन्द्रमाहात्म्यमनन्तमद्भुतं सुरैर्विजानद्भिरपि स्वरूपतः ।
जलानि वर्षद्भिरनेकशस्तदा जडाशयत्वं प्रकटीकृतं न किम् ? ॥२७५॥

सैन्यप्लावनवासनाव्यवसितं पूरं समीक्ष्याऽम्भसां
पुंरत्नेन करेण सत्त्वकरुणापाथोजिनीभानुना ।
स्पृष्टं द्वादश योजनानि ववृधे चर्मास्यरत्नं तदा
श्लाघ्यः किं न महात्मनां हि महिमा विश्वत्रयोद्द्योतकः ?॥२७६॥

तत्रारुरोह चतुरङ्गसमग्रसैन्यं
शान्तिप्रभोः समधिगम्य नियोगमाशु ।
तद् वारिपूरमुपरि स्थितिमाततान
यत् तर्क्यते प्रवहणं वरुणोपनीतम् ॥ २७७ ॥

द्वादशप्रमितयोजनायति च्छत्ररत्नमपि चर्मरत्नवत् ।
स्पृष्टमात्रमथ चक्रिपाणिना सैन्यचक्रमुपरि स्थितं स्थिरम् ॥ २७८ ॥

मयि प्रभौ जाग्रति मा बहिष्ठ्नं तमोऽपि बाधिष्ट जनं कदाचन ।
इतीव चक्री मणिरत्नमुन्नताऽऽतपत्रदण्डोपरि तत्क्षणं दधौ ॥२७९॥

गेहरत्नकरणेन रसोप्ताः शालयो दिनमुखे सति तत्र ।
घस्र एव फलिता गलितार्धे सैनिकैर्बुभुजिरे प्रतिघस्रम् ॥२८०॥

वारिपूरतरदद्भुतचर्मरत्नमध्यमधिशय्य ससैन्यः ।
वासरान् गमयति स्म स सप्त तारयन्निव जनं भवसिन्धोः ॥२८१॥

ततो भ्रकुटिभीषणा विधृतहेतयो यक्षकाः
सुरानिदमवादिषुः प्रभुजुषो प्रजित्वा द्रुतम् ।
अरे ! घनकुमारकाः ! किमिदमात्मबोधे जडाः !
भवद्भिरसुरैरिव व्यवसितं प्रभावच्युते ? ॥२८२॥

विधीयमाना दुरनर्थकारणं महात्मभिः सार्धमहो ! विरोधिता ।
तथाहि पक्षक्षतिमापिरेऽद्रयो महाविरोधेन हरेः प्रवादिवत् ॥२८३॥

वहन्ति मालामिव यस्य शासनं निजेन मूर्ध्नाऽखिलपाकशासनाः ।
अनन्तवीर्यप्रचयेन चक्रिणा सुधीर्विरोधं विदधाति तेन कः ? ॥२८४॥

वयं न मन्तुं भवतामतः परं सुराः ! सहिष्यामह एव भासुराः ।
इतीरितास्तैः समहार्षुरापिला वलाहकानां पटलं तदैव ते ॥ २८५ ॥

सार्वभौमपरभागवर्णनाकौमुदीप्रकटनेन ते ततः ।

म्लेच्छमानसनिवासनिश्चलं मानतापमपनिन्युरञ्जसा ॥ २८६ ॥
अथो किराता मणिकाञ्चनोत्करैरनर्घ्यचित्राभरणैरपि प्रभुम् ।
भृशं लुठन्तः पदपद्मयोः पुरो वितेनिरे प्रीतमरीणभक्तयः ॥ २८७ ॥

संमान्यैतानुपहृतनयः पृष्ठहस्तप्रदाना–
चक्री सेनापरिवृढमहारत्नसंप्रेषणेन ।
लोकान् पुत्रानिव विगणयन् साधयामास सिन्धो–
रौदीच्यं श्रीगृहमविकटं स्वौजसा निष्कुटं तम् ॥ २८८ ॥

एवं क्षुद्रहिमाद्रिनामकगिरिं कुर्वन्तमूर्ध्वापगा-
सिन्ध्वोरन्तरमाकुलं कलकलैः सेनासमूहोद्भवैः ।
रत्नैः पद्मनदाम्बुभिर्विभुमसौ गोशीर्षकैश्चन्दनैः
संतुष्टो हिमवत्कुमार उरुधीरभ्यर्चयामासिवान् ॥ २८९ ॥

स्वामी जवादृषभकूटमहामहीध्रे
गत्वैव काकिणिमणिं परिगृह्य धीरः ।
शान्तिश्चिरं जयति पञ्चमचक्रवर्ती–
त्येताल्लिँलेख स निजेन करेण वर्णान् ॥ २९० ॥

विस्माययन् सकलसैनिकमानसानि
भास्वत्प्रतापकलितेन पराक्रमेण ।
भूमीभृतः प्रतिनिवृत्य रथस्थ एव
वैताढ्यमाप पुनरेप ततः क्रमेण ॥ २९१ ॥

तत्र प्रमोदपरिपूरितचित्तवृत्ति–
विद्याधराधिपतिभिः स्वयमभ्युपेतम् ।
संपूज्य चैनममराचलचूलिकायां
वैताढ्यभूमिभृदमानि समुन्नसानुः ॥ २९२ ॥

चक्री गङ्गातटमुपगतः सेवितो भक्तिपूर्वं
गङ्गादेव्या विरचितमहाप्राभृतप्राज्यभङ्गया ।
सेनान्याऽथ प्रथितयशसाऽसाधयत् साधुधाम्ना
गाङ्गं रङ्गद्भटपरिवृतो निष्कुटं चोत्तरं सः ॥ २९३ ॥

श्रीशान्तिप्रभुरोजसामधिनिधिः खण्डप्रतापाभिध-
दर्यां नायकनाट्यमालममरं कृत्वा वशे स्वस्य च ।

सेनान्याऽतिविभासिदण्डमणिनोद्घाट्याऽविशत् तां गुहां
तेजोऽस्यर्यम चक्ररत्नमनु यान् न्यायं नृणां दर्शयन् ॥२९४॥

काकिणीमणिनिदानमण्डलैः संहरंस्तिमिरमण्डलं विभुः ।
तेजसा मणिभवेन पूर्ववत् संचचार स च तत्र कन्दरे॥ २९५ ॥

उत्ततार तरसा स निमग्नोन्मग्ननामसरितौ सह सैन्यैः ।
पद्यया प्रथमयाऽप्यनवद्यः सर्वमेव महतां सुघटं यत् ॥ २९६ ॥

आत्मनोद्घटितदक्षिणलक्ष्मीद्वार एव निरगात् स गुहायाः ।
चन्द्रमा इव तमांसि निहन्ता पूर्वभूमिधरदीर्घगुहायाः ॥ २९७ ॥

गङ्गातीरनिवासिनः समभवन् नैसर्पमुख्याः प्रभो-
र्गङ्गाऽऽस्यस्थितिशालिनोऽपि निधयो वश्याः प्रसिद्धा नव ।
गाङ्गं दक्षिणनिष्कुटं स पृतनाधीशेन शिष्टिश्रिता
म्लेच्छाकीर्णमसाधयद् बलवतां स्वेयां ततो दुर्जयम् ॥२९८॥

षट् खण्डानि विभुर्विजित्य भरतस्यैवं प्रतापानल-
ज्वालाजालसमुच्चयेन सकलं प्लुष्ट्वाऽभिमानं द्विषाम् ।
व्यावृत्तः स्वपुरं विवेश विलसत्पौराङ्गनाभिर्मुदा
लाजोत्क्षेपनिरुच्छनेषु सरसं व्यातन्यमानेष्वयम् ॥ २९९ ॥

केतनैः पवनचञ्चलभागैर्नागरैर्विनिहितैः प्रतिहट्टम् ।
तर्जयत् सुरपुरं यदिवाऽभात् सोऽविशद् गजपुरं तदधीशः ॥ ३०० ॥

सुरासुरैस्तस्य च चक्रवर्तितापदाभिषेको विधिवद् विनिर्ममे ।
नृपैः समं संमदपूर्णमानसैरशेषतीर्थोपहृतैर्मृदम्बुभिः ॥ ३०१ ॥

संवत्सरा द्वादश जग्मुरेषकां भव्याभिषेकोत्सवमेव कुर्वताम् ।
आसीत् पुरं तावदमन्दसंमदं शुल्केन दण्डेन करेण चोज्झितम् ॥३०२॥

यक्षाणां समभूत् सहस्रयुगलं वद्धोद्यमानां प्रभो-
रङ्गानामवनस्थितौ निरुपमं सौन्दर्यमाक्रामताम् ।
रक्षाव्यापृतिलालसा न हि परे तस्य श्रुतास्तादृशः
प्रोक्ता चक्रभृतः स्थितिः पुनरियं षट्खण्डभूमीशितुः ॥३०३॥

एकैकेन सहस्रकेण परितः प्रत्येकमाभासितै-
र्यक्षाणामधिपश्चतुर्दशभिराभाति स्म रत्नैर्विभुः ।
रागादेत्य सरस्वतीभिरचलाश्लेषं श्रिताभिर्मुहुः

पारावार इवाऽपरार्थविभवो मर्यादयाऽऽलम्बितः ॥ ३०४ ॥
निधिभिर्नवभिः समाश्रितः प्रभुरङ्गैरिव दृक्सुखावहैः ।
अथवा महतामुपासनाद् गुरुतां प्राप्तुमतन्द्रिता न के ?॥३०५॥
अन्तःपुराणां च सहस्रकैश्चतुःषष्टयाऽऽश्रितः संश्रितकल्पपादपः ।
नागैर्हयैश्चापि रथैर्मदोद्धतैः कोट्याऽऽवृतः षोडशलक्षहीनया ॥३०६॥
ग्रामाः षण्णवतिप्रमाः समभवन् कोट्यः प्रभोः पत्तिवद्
द्वात्रिंशच्च महीभुजामिव सहस्राणि ध्रुवं नीवृताम् ।
सूदानां च शतत्रयं गुणवतां जज्ञे त्रिषष्ट्युत्तरं
तस्य श्रेणिपदप्रसिद्धिविभृतः प्रश्रेणयोऽष्टादश ॥ ३०७ ॥
अष्टादशाङ्कगुणिताब्धिसहस्रसंख्या–
न्यासन् प्रभोरनुपमानि महापुराणि ।
द्रोणादिभूतपदकानि मुखानि लक्षं
न्यूनं पुनर्भवति तद् दशभिः शतैश्च ॥ ३०८ ॥
श्राद्धव्रतैर्गुणितवार्धिसहस्रकाणि
नेतुर्बभूवुरपराण्यपि पत्तनानि ।
तावन्ति कर्बटमडम्बकवाच्यनाम्नां
संमीलितान्यपरिमेयसमृद्धिभाजाम् ॥ ३०९ ॥
जाग्रत्प्रभाप्रसररत्नमुखाकराणां
स्वामी स पालयति विंशतिमा सहस्रान् ।
विज्ञातशक्तिरपि षोडश खेटकानां
संबन्धकीर्तनभृतां च चतुर्दशाऽपि ॥ ३१० ॥
षट्पञ्चाशतमन्तरोदकगिरां स्वामी शशास स्वयं
राज्यानां कुलवासिनां पुनरयं चैकोनपञ्चाशतम् ।
षट् खण्डानि यथावदेव भरतस्यैवं प्रभुः पालयं–
श्चक्रित्वे गमयाम्बभूव समयं राज्यास्थिवद् भोगभृत् ॥३११॥
ते लोकान्तिकनामविश्रुतिमिताः सारस्वताद्याः सुरा
मत्वाऽथाऽऽसनकम्पतोऽवधिविदा दीक्षाक्षणं स्वामिनः ।
एत्य व्यज्ञपयन् प्रणम्य च विभुं सर्वीयमाज्ञापरा–
स्तीर्थं तीर्थपते ! प्रवर्तयतरामित्याश्रितप्रीतयः ॥३१२॥

सुरेषु विज्ञाप्य गतेषु तेष्वथ प्रदाय सांवत्सरिकीं तथाऽऽहितिम् ।
न्यधत्त चक्रायुधमादिमं सुतं महेन राज्ये जगतीपतिर्निजम् ॥३१३॥

गीर्वाणैरिन्द्रमुख्यैर्मनुजपरिवृढैश्चारुचक्रायुधाद्यै-
र्दीक्षास्नानं प्रकृत्याऽप्यमलतमतनुः कारितस्तीर्थतोयैः ।
श्रीश्रीखण्डैर्विलिप्तो वरमणिशिविकां रत्नसिंहासनाङ्कां
सर्वार्थाख्यां समर्थः प्रतिघमुखरिपुच्छेदनेऽध्यारुरोह ॥३१४॥

प्रथममवहंस्तामानन्दाद् नरा बहुमानत-
स्तदनु विबुधाधीशाः सादिक्रमेण यथाक्रमम् ।
त्रिदिवसदना दैत्यास्तार्क्ष्या भुजङ्गकुमारका
न हि विदधते सन्तः केऽपि क्रमव्यतिलङ्घनम् ॥ ३१५ ॥

मृदङ्गनादानपि नागराङ्गनाः श्रवःपथेऽभ्यापततोऽभ्युपेत्य ताः ।
समुत्सुकाः स्वामिनमीक्षितुं रयात् समाययुः स्वस्वगवाक्षमालिकाम् ३१६
प्रतिपन्ने क प्रभुरेष सांप्रतं सुरेन्द्रदैत्येन्द्रनरेन्द्रसंवृतः ? ।
निगद्यतामालि ! मदग्रतः कयाचिदेवमुक्ता न्यगदत् सखी ततः ॥३१७॥
विहाय रत्नानि चतुर्दश प्रभुर्निधीन् नवाऽन्तःपुरमुत्तमश्रियः ।
सखि ! स्वयं सिद्धिसुखाय चेष्टते सनातनं शर्म तदस्ति यत्परम् ॥३१८॥
सखि ! प्रजाः स्वाश्चिरकाललालिता विमुञ्चतो मानसमस्य निष्ठुरम् ।
वितर्कयामीत्युदिता सखी जगौ महात्मनां नो ममता मता क्वचित्॥३१९॥
विवर्णनीया वरवर्णिनीषु सा किमालि ! नैवास्ति च सिद्धिवर्णिनी ।
जगत्त्रयस्याऽऽप्यपहाय वर्णिनीरियं प्रभुर्या परिणेतुमुद्यतः ॥ ३२० ॥
अपक्षपातित्वविशेषदर्शनात् प्रभुत्वमेतस्य सखि ! प्रशस्यते ।
नरेन्द्रचक्रित्वरमाङ्गभोगवद् व्रतश्रियं यः परिरप्स्यते प्रभुः ॥ ३२१ ॥
इतीदृशीः पौरमृगीदृशां कथा नयन् श्रुतौ श्रोत्रसुखाः सुराश्रयः ।
सदाफलैः शाखिभिराकुलं विभुर्वनं सहस्राम्रवणं समासदत् ॥३२२॥
(षड्भिः कुलकम्)

भाते गायदिवोरुकोकिलकुलैर्यत् पञ्चमोद्गारिभि-
र्वातान्दोलितवल्लरीचलदलैर्नृत्यत् प्रमोदादिव ।
मल्लीपुष्पविलोचनैर्विकासितैर्व्यालोकितुं स्वामिनं

१ दानम् ।

दृर्यारूढसहस्रलोचनतुलां धर्तुं व्यवस्यद् ध्रुवम् ॥ ३२३ ॥
ततो वनान्तः शिबिकाऽवरोहणं वितत्य विश्वैकविभूषणप्रभुः ।
प्रति प्रतीकं स विभूषणस्रजं मुमोच रोमाञ्चमधिश्रयन् स्वयम्॥३२४॥
कृष्णज्येष्ठचतुर्दशीतिथिदिनप्रान्ते यमर्क्षे सति
स्वामी सिद्धनमस्क्रियाप्रथमकं षष्ठं प्रपन्नस्तपः ।
कन्दान् मोहमहातरोरिव कचांस्तान् पञ्चभिर्मुष्टिभि-
र्मूलात् संसृतिकूलमाश्रित इव प्रोन्मूलयामासिवान् ॥ ३२५ ॥
प्राव्राजीत् प्रभुमन्वगेव वसुधेशानां सहस्रं तदा
प्रापुर्नैरयिका अपि प्रियसुखाऽऽस्वादं तदा च क्षणम् ।
सुत्रामा सिचयाञ्चले विमुकचानादाय दायादव-
त्क्षिक्षेप क्षणमात्रकेण सुकृती क्षीराम्बुराशौ स्वयम् ॥ ३२६ ॥
लोकानां तुमुलेऽतुलेऽथ हरिणा स्वीयाङ्गुलीसंज्ञया
व्यासिद्धे विधिवद् विभुः स विदधे सामायिकोच्चारणम् ।
स्यूतं चन्द्रकरैरिवातिविमलं सूक्ष्मं महाकोमलं
स्कन्धांशे विबुधेश्वरः स निदधे श्रीदेवदूष्यं प्रभोः ॥ ३२७ ॥
क्षौरभ्यूहितमेव तद्विनिहितं स्कन्धे प्रभोस्तार्किकैः
किं पुण्याभ्युदयो यशःसमुदयो ध्यानं सितं वा किमु ? ।
मत्यादित्रयसंजिगीषु किमिदं तुर्यं मनःपर्यय-
ज्ञानं वाऽभ्युदितं चिराद् बहिरिवाऽप्राप्तप्रवेशं स्थितम् ?॥३२८॥
दीक्षामक्षयसौख्यदानरसिकां स्वीचक्रुषोऽस्य प्रभो-
र्गीर्वाणप्रभवो ललाटविलुलद्धस्तप्रशस्ताम्बुजाः ।
चक्रुः स्तोत्रमशेषविघ्नविपिनप्लोषक्रियोर्पर्बुधं
कैवल्यामृतवार्धिवर्धनविधौ पीयूषरोचिःप्रभम् ॥३२९॥
नो शक्नोति तव स्तवं रचयितुं सुत्राममन्त्री गुरु-
र्दैत्यानां गुरुरप्ययोपकलितः काव्यप्रकाशे तव ।
चापल्यं रसनाऽपि नः प्रथयति त्वद्वर्णने यत् प्रभो-
र्भक्तिस्तत्र जिनाऽपराध्यतितरां त्वत्पादपद्माश्रया ॥ ३३० ॥
चक्रित्वेऽधिगते नवस्वपि निधिष्वेतेषु रत्नेष्वलं
संप्राप्तेषु चतुर्दशस्वपि गृहे वृद्धिं विलोक्याऽखिलाम्[१] ।
आजन्मप्रकृतिप्रपन्ननिवसन्मत्यादिवित्तित्रय !

---

१ मद्धिम् ।

न्यूनत्वापगमाय नूनमभजश्चारित्रमेतत् प्रभो ! ॥ ३३१ ॥
हिंसाऽपासनमात्रमारचयितुं मिथ्यावचः सर्वथा
त्यक्तुं पालयितुं परस्वविषयव्यावृत्तलौल्यं मनः ।
निःशेषं च परिग्रहं निरसितुं दीक्षेश ! कक्षीकृता
चेष्टन्ते न निरर्थकं कथमपि प्रायो हि युष्मादृशाः ॥ ३३२ ॥
प्रव्रज्या भवताऽऽदृता जिनपते ! जानीमहे सर्वतः
शौर्यं स्वस्य जगत्त्रयेऽपि विदितं कर्तुं च लोकोत्तरम् ।
कन्दर्पः प्रविहाय दर्पमखिलं संसेवनीयं सदा
तं च स्वं जनकं मनः क्वचन यद् युष्मद्धिया लीयते ॥३३३॥
साम्राज्यं प्रविहाय जीर्णतृणवद् युष्मादृशस्तादृशो
चारित्रं प्रतिपद्यते यदनघः संसारपारं गमी ।
क्षेत्रज्ञं प्रतिपेदुधुमक्षमतमो युक्तेरभावादसौ
तल्लौकायतिकः करोतु किमघं लोकं परं वा विदन् ? ॥३३४॥
दृष्ट्वा माध्यमिको भवन्तमपि किं नो जाज्वलीति क्रुधा
त्वत्सेवाऽप्रतिबद्धशुद्धमनसोऽप्यस्मान् समालोक्य वा ? ।
सिद्धान्तप्रतिपत्तिसक्तहृदयो नैव प्रमाणप्रमा-
मुख्यां स्वीकुरुते प्रवृत्तिमपि यो दुष्कर्मभिर्लोलितः ॥३३५॥
ज्ञाने मौनमिति न्यगादि विदुषा केनाऽपि शक्तौ क्षमा-
ऽपीत्येतद्द्वितयं त्वयि प्रथमतः साक्षाच्च साक्षात्कृतम् ।
यद्वा कानि भवन्ति नैव बहुधा रत्नानि रत्नाकरे
तेषां स्यादुपयोग एव महतां नानासमृद्धिस्पृशाम् ॥३३६॥
अस्माकं नयनानि नाथ ! सफलीभूतानि भूयांस्यपि
प्राप्तानल्पसमाधियोगिसुलभत्वद्रूपसंप्रेक्षणैः ।
ज्ञाने केवलमाप्य दुर्लभतमं धर्मोपदेशामृतैः
सत्यं पावयितासि तात ! सकलश्रोत्राणि नस्त्वं कदा ? ॥३३७॥
इत्थं सर्वे सुरपरिवृढाः शान्तिनाथं जिनेन्द्रं
नुत्वा नत्वा प्रमदकलितास्तेऽथ नन्दीश्वरेऽपि ।
गत्वा कृत्वा बहुतरमहाष्टाह्निकामृद्धिपूर्वं
भातं स्थानं निजनिजमयुर्नित्यकल्याणभाजः ॥३३८॥


आसीत् श्रीगुरुगच्छमौलिमुकुटश्रीमानभद्रप्रभोः
पट्टे श्रीगुणभद्रसूरिसुगुरुर्विज्ञानभाजां गुरुः ।
तच्छिष्येण कृते चतुर्दश इतः श्रीशान्तिवृत्ते महा-
काव्ये श्रीमुनिभद्रसूरिकविना सर्गोऽयमीक्ष्यः सताम् ॥३३९॥

इति श्रीशान्तिनाथचरिते चतुर्दशः सर्गः समाप्तः ॥



अर्हम्

अथ पञ्चदशः सर्गः ।



सद्बुद्धिप्रमुखैर्विभासितो विज्ञानैः स चतुर्भिराश्रितैः ।
सौधर्मेऽडिव लोकपालकैः श्रीशान्तिप्रभुरस्तु वः श्रिये ॥ १ ॥
स्वाम्यैर्यापथिकीं ततः श्रयन्नव्राजीद् दिवसे द्वितीयके ।
श्रीमद् मन्दिरनाम पत्तनं प्रालेयाचलतुङ्गमन्दिरम् ॥ २ ॥
अस्माकं भवनानि पारणं कृत्वाऽयं यदि पावयेदिति ।
स्वस्वागारवहिःस्थिताः सदा पौरा मार्गममार्गयन् प्रभोः ॥ ३ ॥
सर्वांस्तानतिपत्य स प्रभुः सौधं प्राप सुमित्रभूपतेः ।
आकृष्टस्ततपुण्यसंपदा कल्पद्रुः परमस्य जङ्गमः ॥ ४ ॥
आयान्तं समवेक्ष्य तं नृपोऽभ्युत्थायाऽभ्युपगत्य संभ्रमात् ।
त्यक्तच्छत्रपवित्रचामरः प्राणंसीत् परमेश्वरं मुदा ॥ ५ ॥
प्राप्यं वित्तमनेकपुण्यतश्चित्तं श्रेयसि तत्र कस्यचित् ।
पात्रं पात्रमहो ! गुणश्रियां संपन्नं त्रितयं ममाधुना ॥ ६ ॥
तद् धन्योऽहमिति स्वचेतसा संचिन्त्योत्पुलकः प्रमोदतः ।
तीर्थेशं प्रतिलाभ्य पायसैर्भूपः कारयति स्म पारणम् ॥ ७ ॥
प्रोच्चैः शारदकौमुदीसितक्षैरेयीभृतपाणिसंपुटः ।
इत्यावेदयति स्म वा जिनः शुक्लध्यानमिदं करे मम ॥ ८ ॥
तारं दुन्दुभयोऽनदन्नथ प्रावृट्कालवलाहकस्वनाः ।
पुण्यौघं भुवनेषु विश्रुतं कुर्वाणा इव मित्रभूपतेः ॥ ९ ॥

गीर्वाणाः परितुष्टमानसा रत्नानां किल वृष्टिमादधुः।
सौधे तस्य महार्घतामिवाऽतुल्यां प्रापयितुं तदा ध्रुवम् ॥ १० ॥
सौधं तद् महनीयमादराद् देवानामपि यत्र तीर्थकृत्।
एतीति त्रिदशास्तदङ्गणे कुर्वन्ति स्म सुमौघवर्षणम् ॥ ११ ॥
संतापो भवपातसंभवो मा भूदस्य मनस्विनः परम्।
इत्युर्वीन्द्रनिकेतनं सुराः सिञ्चन्ति स्म सुगन्धवारिभिः ॥ १२ ॥
अस्माकं भवदात्मवासनाः संक्रामन्तु महीन्द्र ! कर्हिचित्।
अस्वप्नाः प्रभुपारणक्षणे चेलोत्क्षेपमितीव चक्रिरे ॥ १३ ॥
इत्यानन्दपरीतनागरात् तस्माद् मन्दिरपत्तनादयम्।
संतोषेण विधाय पारणामन्यत्र व्यहराज्जिनेश्वरः ॥ १४ ॥
आक्रान्ता जिनपादपङ्कजैर्नोल्लङ्घ्याऽस्तु धरा नृणामियम्।
इत्याधायि नृपेण पारणाभूमौ तत्र च रत्नपीठकम् ॥ १५ ॥
धर्मः कुत्रचन प्रवर्तते कस्मिन् नाप्युपवर्तते न्विति ?।
विज्ञातुं व्यहरद् विभुर्भुवं विज्ञानां न मुधा प्रवृत्तयः ॥ १६ ॥
निद्रां नैव बभाज कर्हिचिज्जानन् मौनमसेवत प्रभुः।
निःसङ्गो निषसाद न क्वचिद् निन्ये वत्सरमेवमेककम् ॥ १७ ॥
राज्यं चक्रिपदं ततो व्रतं तुर्यं ज्ञानमिदं समाप्नदम्।
यस्यां जन्मभुवीत्यवेत्य स प्रापत् तामथ हस्तिनापुरम् ॥ १८ ॥
साहस्राम्रवणाभिधे वने तस्मिन् नन्दितरोस्तलेऽमलम्।
शुक्लध्यानमधिश्रितस्तपः षष्ठं चापि विघातिकर्मकः ॥ १९ ॥
पौषे मासि सिते तिथौ नवम्याख्याते भरणीगते विधौ।
ज्ञानं पञ्चममाप केवलं लोकालोकविभासकं विभुः ॥ २० ॥
(युग्मम्)
आलोकेन विसर्पिणाऽभितः सर्वा एव दिशश्चकासिरे।
वाता वान्ति सुगाः स्म तत्क्षणं प्रापुः शर्म च नारका अपि ॥ २१ ॥
पीठानि प्रचकम्पिरे तदा शक्राणां सुखलालितात्मनाम्।
शाङ्के पञ्चमवित्प्रभावनाप्रस्थानेऽवियोगशङ्कया ॥ २२ ॥
मैन्द्रास्तत्र सुराः समागमन् दर्पोत्कर्षभृतोऽथ वाहनैः।
जात्याष्टापदतुल्यलोचनभ्राम्यष्टापदसिंहगोमुखैः ॥ २३ ॥

देवास्तत्र मरुत्कुमारका हर्षाद् योजनमात्रभूतले ।
धन्यंमन्यहृदः समन्ततः पुण्यानामुदये रजोऽहरन् ॥ २४ ॥
सिञ्चन्ति स्म सुगन्धिवारिभिस्तां भूमिं जलभृत्कुमारकाः ।
पुंसां तत्र निषेदुषां ध्रुवं संतापाऽपनिनीषयाऽभितः ॥ २५ ॥
एतां व्यन्तरनिर्जरास्ततोऽवध्नन् रत्नसुवर्णराजिभिः ।
आत्मानं सहसा व्यमोचयंस्ते बुद्ध्यैव कुकर्मबन्धतः ॥ २६ ॥
पुष्पाण्यत्र ततः प्रचिक्षिपुर्याबद्वर्णमयानि ते सुराः ।
विश्वार्च्यं नमतां जिनेश्वरं सिद्धानीव फलानि भाषितुम् ॥ २७ ॥
प्रेङ्खद्वन्दनमालिका व्यधुर्देवास्तोरणमालिकास्तके ।
प्रत्याशं विलसत्कपायकश्रीणां दुर्धरपाशरज्जवः ॥ २८ ॥
उच्चस्तम्भकशालभञ्जिका रेजुस्तासु महाद्भुतश्रियः ।
विद्याधर्य इवाऽऽगताः पुरा श्रोतुं तीर्थकरस्य देशनाम् ॥ २९ ॥
तासूर्चैर्मकरावली तथाऽभाद् गारुत्मतरत्नमय्यसौ ।
जानानेति जिनस्य देशनापीयूषाम्बुनिधौ न भीर्मम ॥ ३० ॥
तस्या ऊर्ध्वविभागमाश्रिता रेजे च्छत्रचतुष्टयी भृशम् ।
संघस्याऽपि चतुर्विधस्य यत् स्थास्याम्यूर्ध्वमिदंमदादिव ॥ ३१ ॥
उद्धूता मृदुना नभस्वता रेजुस्तोरणमूर्धसु ध्वजाः ।
पापं वेक्ष्यति नात्र केवलं संज्ञां दातुमिवोद्यता इति ॥ ३२ ॥
अष्टौ माङ्गलिकानि तोरणाऽधस्तादुच्चधरासनोच्चये ।
प्रत्येकं विदधुर्दिवौकसः सिद्धीरासयितुं श्रुता इव ॥ ३३ ॥
क्ष्मापीठेऽथ समुन्नते व्यधुः शालं कल्पनिवासिनोऽमराः ।
रत्नैरच्छतमैर्जिनेशितुर्भक्त्या शक्तिवशादिवाशयैः ॥ ३४ ॥
तस्मिन् सा कपिशीर्षमण्डली नानारत्नमयी व्यराजत ।
देवानां स्वसमीक्षणे ययाऽक्लेशं दर्पणमण्डलायितम् ॥ ३५ ॥
ज्योतिष्का वरणं च तद्बहिश्चक्रुः स्वर्णमयं द्वितीयकम् ।
तीर्थाधीश्वरपर्युपासनारागैरेव हृदां विनिर्मितम् ॥ ३६ ॥
तत्राऽभात् कपिशीर्षसन्ततिर्भास्वद्रत्नमयी तमो घ्रती ।
सर्वद्वीपदिनेशमण्डली हर्तुं यद् मिलिताऽपि नाऽशकत् ॥ ३७ ॥
आवेने भवनाधिपैर्बहिर्वप्रो रूप्यमयस्तृतीयकः ।

शक्ति प्राप्तुमिनात् क्षमाधृतौ शेषः कुण्डलनामिवाऽऽगतः ॥ ३८ ॥
विभ्रेजे कपिशीर्षसंहतिस्तस्मिन् हेममयी महाद्युतिः ।
ताराणामुपवेशनाय या पीठश्रेणिरिवातिभास्वरा ॥ ३९ ॥
द्वाराणि प्रतिवप्रमावभुश्चत्वार्येकसमानि मानतः ।
अत्र द्वादश पर्षदः सुखं वेक्ष्यन्तीति कृताऽऽकृतीरिव ॥ ४० ॥
ये लक्षेष्वथवाऽपि कोटिषु द्रव्येष्वेव भवन्ति हर्म्यिणाम् ।
तैरुद्वासितमूर्तयो ध्वजै रेजुस्तेषु विचित्रतोरणाः ॥ ४१ ॥
स्फूर्जद्धूमसमूहदम्भतो मेघाडम्बरमम्बराङ्गणे ।
तन्वाना नवधूपसंभृता गर्गर्यो विबभुस्तदग्रतः ॥ ४२ ॥
वाप्यः स्वर्णसरोरुहाः प्रतिद्वारं निर्ममिरेऽमरैस्ततः ।
स्नायं स्नायममी जना जिनं पद्मैरत्र महेयुरित्यथ ॥ ४३ ॥
देवच्छन्दममन्दभक्तयो विश्रामाय सुरा जिनेशितुः ।
ऐशान्यां मणिभिर्वितेनिरे मध्येऽष्टापदवप्रमुत्तमैः ॥ ४४ ॥
प्राक्प्राकारसहस्रनेत्रदिग्द्वारे स्वर्णविभाविभासिनौ ।
द्वौ वैमानिकनाकिनौ प्रतीहारत्वं दधतुर्महौजसौ ॥ ४५ ॥
शुक्लध्यानविवर्णिकामिव प्रादुष्कृत्य निदर्शयत्तमौ ।
मुक्तौ व्यन्तरनिर्जरावपाग्द्वारे द्वारपतित्वमूहतुः ॥ ४६ ॥
ज्योतिष्कावतिकिंशुकद्युती द्वाःस्थत्वं कलयाम्बभूवतुः ।
प्रत्यग्द्वारि सुरौ प्रवेक्ष्यतां लोकानामिव रागधित्सया ॥ ४७ ॥
द्वारे चोत्तरदिग्व्यवस्थितौ नीलाङ्गौ भुवनेश्वरौ सुरौ ।
वेत्रित्वं विभराम्बभूवतुः को वा युक्तमुपेक्षते कृती ? ॥ ४७ ॥
रैवप्रस्य ततश्चतुर्ष्वपि द्वारेषु प्रथमक्रमेण च ।
देव्योऽस्थुर्विजया जयाऽजिता तुर्या श्रीविजयाऽपराजिता ॥ ४९ ॥
एताः पाशसृणी करद्वयेऽन्यस्मिन्निर्भयमुद्गरौ तथा ।
बिभ्राणास्तुहिनांशुपद्मरैफुल्लेन्दीवरपीवरत्विपः ॥ ५० ॥

(युग्मम्)

द्वारेषु स्थितवांस्तृतीयकप्राकारस्य चतुर्षु तुम्बुरुः ।
खट्वाङ्गीनरमुण्डमालितः कोटीरोरुजटाविभूषितः ॥ ५१ ॥
प्राकारप्रथमस्य मध्यतोऽकार्षुश्चैत्यतरुं वनामराः ।

विंशत्यूनधनुर्महाव्रतसंख्याख्यातशतोच्छ्रयं पृथुम् ॥ ५२ ॥
चैत्यद्रोरध एव पीठकं नानारत्नमयं च चक्रिरे ।
गीर्वाणाधिपकार्मुकोच्चयं संगृह्येव च नैकवर्णभम् ॥ ५३ ॥
तेनुश्छन्दकमा वनामरास्तस्योपर्यमलैर्मणिव्रजैः ।
त्रैलोक्याक्षिपदंहिनीरजच्छायं कान्तिनिरस्तभास्करम् ॥ ५४ ॥
तस्यान्तर्मणिभिर्व्यधुः सुरा रत्नैः प्राङ्मुखसिंहविष्टरम् ।
श्रीवत्साङ्कितविग्रहेव सा भूमिर्येन बभौ विभाविता ॥ ५५ ॥
तस्याधः पदपीठमद्भुतैर्माणिक्यैर्विरराज निर्मितम् ।
श्रीसिंहासनराजनायकस्याऽग्रे यद् युवराजतां दधौ ॥ ५६ ॥
त्रैलोक्यप्रभुतामिव प्रभोर्दृष्ट्वाऽनन्तरमेव बोधयत् ।
तत्राऽऽपूर्णसुधांशुमण्डलं छत्राणां त्रितयं व्यभासत ॥ ५७ ॥
रेजाते सुतरां प्रकीर्णके हस्तस्थे वटवासिनोः श्रिते ।
साधुश्रावकवर्गयोर्ध्रुवं धर्मौ तन्मिषतः पुरास्थितौ ॥ ५८ ॥
स्वर्णाब्जस्थितधर्मचक्रकं द्वारे पातकघातकं बभौ ।
शेषं यत्करणीयमत्र तत् सर्वं व्यन्तरनिर्जरा व्यधुः ॥ ५९ ॥
श्रीशान्तिर्भगवांश्चतुर्विधैः कोटाकोटिभिरावृतः सुरैः ।
आप्तोऽथो समवादिमे स्तुतिस्थाने प्रास्थित स स्थितिं विदन् ॥ ६० ॥
अग्रे शान्तिविभोर्विकुर्वते स्माऽथ व्यन्तरनिर्जरा नव ।
हेमाब्जानि विकस्वराणि नु द्रष्टुं साम्यमिवाऽङ्घ्रशोभया ॥ ६१ ॥
तेष्वंह्री न्यधित द्वयोर्द्वयोरादावेव चलन् जगद्गुरुः ।
सप्तान्यानि पुरः पुरः सुरा भक्त्याढ्याः समचारयन् रयात् ॥ ६२ ॥
स्वर्णाब्जानि पदोरधःस्थितान्यालोक्य ब्रुवते स्म निर्जराः ।
निर्ग्रन्थाऽऽलिशिरोऽवतंसकः स्वर्णाधःकरणादभूद् विभुः ॥ ६३ ॥
राजन् सोऽतिशयैरुदित्वरैर्नित्यज्ञानविभासुराकृतिः ।
प्राग्द्वारा समवादिमं स्तुतिस्थानं प्राविशदाऽऽश्रयः श्रियाम् ॥ ६४ ॥
चैत्यद्रुं स ततः प्रदक्षिणीकृत्याऽर्हन् शमतैकदक्षिणः ।
श्रीतीर्थाय नमो नमः सदेत्यूचे भाद्रपदाम्बुदध्वनिः ॥ ६५ ॥
नाथेऽथाऽमरनाथदिग्मुखं सत्येव श्रितसिंहविष्टरे ।
देवैर्दिक्ष्वपरासु तेनिरे भर्तुर्मूर्तिसमास्त्रिमूर्तयः ॥ ६६ ॥

देहैर्व्यन्तरनिर्मितैः स तैर्व्यद्योतिष्ट विमुश्चतुर्वपुः ।
व्याख्यातुं युगपच्चतुर्विधं धर्मं संघमथैव शासितुम् ॥ ६७ ॥
तत् स्थानं न विवर्ण्यते कथ दृश्यं यत्र विरोधनाम न ? ।
चित्रं पश्यत देवदानवास्तस्थुः प्रीतिभृतो वयस्यवत् ॥ ६८ ॥
देशत्यागमिव प्रवर्तयन्नन्तर्वैरिगणस्य पाप्मनः ।
आकाशे प्रणनाद दुन्दुभिः स्वाम्यैश्वर्यमिव प्रकाशयन् ॥ ६९ ॥
व्यभ्राजिष्ट सुरेश्वरध्वजः प्राकारत्रितयीपुरःसरः ।
कीर्तिस्तम्भ इवोपसर्पतां भव्यानां सुकृताधिवासिनाम् ॥ ७० ॥
स्वर्वासिप्रमदाः प्रमोदतः प्राग्द्वारेण कृतप्रवेशनाः ।
दत्त्वा त्रित्वमिताः प्रदक्षिणास्तीर्थं तीर्थपतिं प्रणम्य च ॥ ७१ ॥
आग्नेय्यां दिशि तस्थुरूर्ध्वका मुक्त्वा साधुजनार्यिकास्थितिम् ।
तन्मध्येऽवधिबोधबन्धुराः किं जानन्ति न तादृशाः खलु ? ॥ ७२ ॥
(युग्मम्)

शेषं तच्च निकायनायकस्त्रैणं याम्यदिशा प्रविश्य च ।
सर्वं पूर्वविधिं यथास्थितं कृत्वा चास्थित नैर्ऋते क्रमात् ॥ ७३ ॥
ज्योतिष्का भवनाधिपास्तथा सर्वे व्यन्तरनिर्जराः पुनः ।
प्रत्यग्द्वारकृतप्रविष्टयो वायव्यां स्थितिवेदिनः स्थिताः ॥ ७४ ॥
कौवेर्या ककुभा प्रवेशनं कृत्वा तीर्थपतिं विनम्य च ।
देवाः कल्पनिवासिनो नरा नार्यश्चेशदिशि स्थितिं व्यधुः ॥ ७५ ॥
नासीदत्र भयं न दुष्कथा मात्सर्यं न च किञ्चन कचित् ।
आबाधाऽपि न नो नियन्त्रणा तीर्थाधीशमहाप्रभावतः ॥ ७६ ॥
वप्रस्याऽऽद्यपरस्य मध्यतः पारीन्द्रद्विरदादयोऽखिलाः ।
तिर्यञ्चोऽपि यथासुखं मिथस्तस्थुः प्रेमभरोद्धुराशयाः ॥ ७७ ॥
अन्तःप्रान्तिमवप्रमासत क्ष्मापालामरदेवविद्विषाम् ।
यानान्यक्षतकानि संकटेऽपीड्योऽयं महिमा महेशितुः ॥ ७८ ॥
श्रीचक्रायुधभूपुरन्दरं वेगादेत्य वनाद् वेनाऽवनाः ।
त्रैलोक्यप्रभुनित्यकेवलोत्पत्त्याऽथ प्रयता व्यवर्धयन् ॥ ७९ ॥
सत्कृत्याऽवनिपालपुङ्गवस्तान् सर्वांश्च वनीपतीनथ ।

१ वनरक्षका. ।

दष्टास्ते ननु पुण्यजीवितं निर्मूलं पुनराप्नुवन्ति न ॥ १०९ ॥
ये पुण्यं परलोकसाधनं मन्यन्ते मनुजा विवेकिनः ।
ते मायां क इव प्रकुर्वतां पापं यत्परविप्रतारणे ?॥ ११० ॥
मायामार्जवमन्तरेण यो निर्जेतुं क्षमते महामतिः ।
आदत्ते खलु पन्नगागिनीं विद्यां जाङ्गुलिकीं विनैव सः ॥ १११ ॥
हिंसामातनुतेऽनृतं वदत्यादत्ते स्वमदत्तमेव ना ।
अन्यस्त्रीमयते परिग्रहं पापं किं न करोति लोभतः ? ॥ ११२ ॥
लोभं दुःखनिदानमेककं मत्वा प्रोज्झत सिद्धिसिद्धये ।
संतोपं सुखकारणं बुधाः ! सत्यं स्वीकुरुतात्र तद्विदे ॥ ११३ ॥

जन्मस्थानमहीध्रविन्ध्यविरहो रेवाजलक्रीडना-
ऽभावः प्रेमवशंवदाशयवशासंयोगभोगक्षयः ।
यत्तीक्ष्णाङ्कुशताडनं दृढतरायःशृङ्खलाबन्धनं
तत्सर्वं करिणां दुरन्तविषयाऽऽकाङ्क्षासमुत्थं फलम् ॥ ११४ ॥
शृङ्गारप्रभवस्य केतनतया यः ख्यातिमालम्बते
नीरक्षीरविवेककौशलकला यस्यास्ति सा हंसवत् ।
योऽस्ताघे सलिलाशये विचरति स्वच्छे सतां चित्तव-
ज्जालान्तर्विनिपत्य मृत्युमयते मत्स्यः स लोलोत्कटः ॥११५॥
माल्त्याः कुसुमं विकाशि सरसं संत्यज्य गन्धोद्धुरं
तत् तादृक्सहकारकोरकरसप्राग्भारमुत्सृज्य च ।
मातङ्गस्य कपोलके विनिपतन् गन्धातिलोभादलि-
र्नित्यं चञ्चलकर्णतालनिहतः प्राप्नोति मृत्युं जवात् ॥११६॥
पादा यस्य विरिञ्चिना विरचिताः पट् पक्षिमर्त्यानडु-
ज्जातिभ्योऽभ्यधिकाश्चिरं विचरणव्यापारसंपत्तये ।
पक्षा यस्य विपक्षलक्षविहतौ चत्वार एवावनौ
रोलम्बः स विपत्तिमेति नियतं हा ! गन्धलोभादयम् ॥ ११७ ॥
(संदानितकम्)

चक्षुर्दूपणमेतदेव यदि नो जायेत चाऽऽजन्मनो
यत्प्रेक्षारसिकत्वमुत्सुकतया यद् विभ्रमाऽखण्डनम् ।
तत् किं पक्षपरिग्रहेऽपि सबले दीपं सुवर्णात्मना

जानन्नेव निपत्य मङ्क्षु शलभः पञ्चत्वमेवाप्नुयात् ?॥११८॥

विद्वांसः प्रवदन्ति यं किल जगत्प्राणस्य यानं परं
स्वप्राणानवितुं सुधांशुमभजन् पीयूषलिप्सुश्च यः।
नेत्राणामबलाजनस्य समता यल्लोचनैर्वर्ण्यते
गीताकर्णनलोलकर्ण इह स व्याधैः शरैर्हन्यते ॥ ११९ ॥

एकैको विषयस्ततोऽतिनिधनं चैवं समालिङ्गितः
पञ्चत्वाय भवन्ति पञ्च न कथं संसेवितास्ते समम् ?।
तस्मात् संयमरत्नतस्करनिभानेतान् विजेतुं जनाः !
संस्थाप्यैव विवेकयामिकमहो ! कैवल्यमालम्ब्यताम् ॥१२०॥

करणनिकरस्वैरीभावप्रवर्तनसंमिल-
द्विषयविमुखं चेतो यावद् बुधाः ! न विधास्यथ।
कुगतिगमनं रोद्धुं शक्तं जिनेश्वरभाषितं
कथमपि सितं तावद् धर्मं स्फुटं किमवैप्यथ ? ॥ १२१ ॥

नेत्रत्रयेणैव हिमांशुमौलिः शक्तित्रयेणैव महीमहेन्द्रः।
गुप्तित्रयेणैव महाव्रतीड्यो धर्मोऽपि रत्नत्रितयेन भाति ॥ १२२ ॥

संवेदनं सम्यगथापि दर्शनं चारित्रमेतानि शिवस्य पद्धतिः।
रत्नत्रयत्वेन जिनैरुदाहृतान्युद्भूतपापक्षयसंनिबन्धनम् ॥ १२३ ॥

निर्वान्ति स्म विमुक्तरागविषया निर्वान्ति चान्ये तथा
निर्वास्यन्ति जना जिनोदितमहारत्नत्रयाराधनात्।
तस्मात् सम्यगिदं विबुध्य भविकाः ! ध्यानैकतानं मनः
कृत्वैवाचरतोग्रकर्मनिहतौ ब्रह्मास्त्रकल्पं बुधाः ! ॥ १२४ ॥

इत्याकर्ण्य सकर्णमौलिमुकुटालङ्कारहीरप्रभः
श्रीचक्रायुधभूपतिर्जिनपतेर्वाचं सुधासोदराम्।
विज्ञो विज्ञपयाम्बभूव भगवन् ! मोहान्धकारच्छिदा-
धाने शारदमूर्धमरुचिभं देहि व्रतं मे प्रभो ! ॥ १२५ ॥

राजंस्त्वं मा प्रमादीरिति स भगवतोदीरितः सद्म गत्वा
पुत्रं राज्ये निधाय प्रकटितविनयं भूरि भूरि प्रदाय।
हस्त्यारूढः समेत्य प्रणतगुरुपदस्तात ! निस्तारयेति

१ भूमिं च धनं च।

नन्तुं तीर्थपतिं रयादयाज्ञः को वा सुकृते प्रमाद्यति ? ॥ ८० ॥
औदीच्यं सुकृतालयस्य तद् द्वारं प्राप वसुन्धरापतिः ।
कृत्वा वैनयिकीं क्रियां स्वयं पञ्चैवाऽभिगमांश्च सोऽविशत् ॥ ८१ ॥
सर्वज्ञ ! त्वदुपासनां विना भ्रान्तोऽहं कुगतित्रये पुरा ।
भूपालः कथयन्निति प्रभोस्तिस्रः स प्रददौ प्रदक्षिणाः ॥ ८२ ॥
आनन्दं परमं निरत्ययं संप्राप्स्यामि जिनेशदर्शनात् ।
किं मेऽनेन विचिन्त्य चेतसेत्यानन्दाश्रु लुलोप पार्थिवः ?॥ ८३ ॥
स्वर्णाथोऽवनिनाथकुञ्जरोऽप्येपोऽथ प्रणिपत्य भक्तितः ।
निर्मायाऽञ्जलिमात्ममूर्धनि स्तोतुं प्राक्रमतैवमीश्वरम् ॥ ८४ ॥
जीवस्येव मतिर्न यद्यपि स्वामिन् ! मे रसनासहस्रकम् ।
शेपस्येव मुखे, तथाऽपि ते कांश्चित् स्तौमि गुणांस्त्वदाश्रितः ॥ ८५ ॥
कर्माण्यष्ट जिनेन्द्र ! सर्वथा नीतानि प्रशमं त्वयौजसा ।
तार्क्ष्येणेव कुलानि भोगिनां नित्यानन्दनिवर्तकान्यलम् ॥ ८६ ॥
मोहोऽयं भवता विनिर्जितः सर्वत्राऽस्खलितोरुविक्रमः ।
प्राकाम्यं यदिवा बिभर्ति नो शार्दूलः किमु सिंहनिर्जये ? ॥ ८७ ॥
वाणी ते भुवनोपकारिणी गङ्गेवाऽधिरजोऽपहारिणी ।
आसाद्याऽचलमुत्तमं पदं भव्यान् श्रौतपथाद् निवर्तते ॥ ८८ ॥
श्रीशान्ते ! तव नाम कामितं भव्यैः संस्मृतमातनोति यत् ।
चित्रं तत्र न यत् सुरद्रुमो देवानामपि तद् विचेतनः ॥ ८९ ॥
ब्रह्मादिष्वपि दैवतेपु मे चित्तं त्वत्पदपद्मसेवने ।
रोलम्बस्य यथैव मल्लिकापुष्पौघेष्वपि मालतीसुमे ॥ ९० ॥
सेवन्ते तव येङ्घ्रिपङ्कजं ते स्युः श्रीगुणभद्रसूरयः ।
ये ध्यायन्ति भवन्तमादरात् तेपां किञ्चन नास्ति दुर्लभम् ॥ ९१ ॥
राज्यं शान्तिजिन ! त्वदर्थये नाहं चक्रिपदं च तादृशम् ।
स्वाराज्यं त्रिदशस्तुतं च नो त्वत्सेवामनिशं भवे भवे ॥ ९२ ॥
इत्याध्याय सुरेन्द्रपार्थिवौ भर्तुः संस्तवनं गुणोज्ज्वलम् ।
मूर्ध्नः स्वस्य तदोत्तमाङ्गतां भूयः कर्तुमिव प्रणेमतुः ॥ ९३ ॥
उद्धर्तुं भविकान् भवाम्बुधेः पोते सत्यपि मज्जतो भृशम् ।
पञ्चत्रिंशदहार्य्यगीर्गुणां प्रारेभेऽथ स धर्मदेशनाम् ॥ ९३ ॥

संपद्वर्धनहेतुदक्षिणावर्तं शङ्खमिवातिनिर्मलम् ।
चिन्तारत्नमिवेप्सितप्रदं मानुष्यं परमस्ति दुर्लभम् ॥ ९५ ॥
लब्ध्वा तत् सुकृतेन भूयसा सर्वार्थप्रतिपत्तिसाधनम् ।
संसारभ्रमसंनिबन्धनं भव्याः ! संत्यजत प्रमादकम् ॥ ९६ ॥
रे !, त्वं याहि कुरु प्रयोजनं निर्दिष्टं मयका यदस्ति ते ।
ईदृग्वाक्श्रवणं प्रमादतः केषाञ्चित् सदृशेऽप्यहो ! भवे ॥ ९७ ॥
प्रेष्यत्वं परकर्मवृत्तिता दौर्विध्यं परितोऽपमानता ।
दौर्भाग्यं प्रियविप्रयोगताऽनिष्टं किं न भवेत् प्रमादतः ? ॥ ९८ ॥
कैवल्यस्य सुखानि कस्य न स्वायत्तानि भवेयुरङ्गिनः ? ।
यद्येतेऽत्र चतुर्गतिप्रिया रुन्ध्युर्वर्त्मनि नो कषायकाः ॥ ९९ ॥
संसारस्य महानियोगिनश्चत्वारः प्रबलाः कषायकाः ।
क्षान्त्यादिप्रमुखैर्महाभटैर्जित्वैतान् जन एति निर्वृतिम् ॥ १०० ॥
पूज्यं नो पितरं न मातरं ज्येष्ठं भ्रातरमेव नाङ्गजम् ।
नैव स्वामिनमेव मन्यते क्रोधावेशवशंवदः पुमान् ॥ १०१ ॥
प्रीतिं यश्चिरकालपालितां प्रध्वंसं नयति क्षणादपि ।
स्वर्भानुः शशभृत्कलामिव क्रोधं तं विदधीत कः सुधीः ? ॥ १०२ ॥
सर्वाण्येव तपांसि भस्मसात् कर्तुं यस्य पुनः प्रगल्भता ।
दारूणीव कृपीटजन्मनः कस्तं क्रोधमपाकरोतु न ? ॥ १०३ ॥
ज्ञानं यत्र न चावभासते निःशेषार्थविबोधनक्षमम् ।
भास्वद्बिम्बमिवाम्बुदोदये मानं कः सुकृती तमाश्रयेत् ? ॥ १०४ ॥
राज्ये स्थापितमुत्तमैर्गुणैरागत्य स्वत एव रञ्जितैः ।
निःशङ्को विनयं निहन्ति यस्तं मानं वितनोतु को बुधः ? ॥१०५॥
आरूढः किल गर्वपर्वतं सर्वं खर्वमवेक्षते परम् ।
नाभ्युत्थानकथां करोति नाऽभ्यागते गुरुबान्धवेऽपि यः ॥ १०६ ॥
मानं यस्तनुते स माननां राजादेर्न कदाऽपि विन्दति ।
दुःखान्येव हि दुर्गदुर्गतो शोचन् संविनयं विना मृतः ॥ १०७ ॥
मायां मुग्धजनानुरञ्जिकां पण्यस्त्रीमिव दूरतोऽपि ये ।
नोज्झन्त्यैहिकपारलौकिकस्वार्थं ते गमयन्ति निश्चितम् ॥ १०८ ॥
माया कुण्डलिनीव यैः परिस्पृष्टा दृष्टिविषा दुराग्रहा ।

प्रोच्चैः प्रोच्चार्य वाचं सुकृतकृतमना राडुपादत्त दीक्षाम् ॥१२६॥
पञ्चत्रिंशत् तदानीं वचनमिव विभोः सद्गुणा भूमिपाला
राजर्षि दीक्षया तं शिवपदसुहृदोऽनु प्रजन्ति स्म धन्याः ।
तेषां चक्रायुधादिप्रवरगणभृतां शान्तिरुत्पादनाश-
ध्रौव्यप्रख्यातरूपं त्रितयमथ विभुर्व्याचचक्षे पदानाम् ॥१२७॥
षट्त्रिंशद्गुणधारिभिर्गणधरैस्तस्यानुसारेण च
प्रोद्दामप्रतिपत्तिशालिहृदयैस्तैर्द्वादशाङ्गी कृता ।
शान्तिस्वाम्यनुयोगमेव सगणं तेषामनुज्ञातवान्
योग्यानामुचितोपचारविधये यद्वा स्थितिस्तादृशाम् ॥ १२८ ॥
वैराग्याऽऽपूर्णचित्ता व्रतमथ जगृहुर्मानवास्तीर्थनाथाद्
मानव्यश्च प्रभूताः कतिचन विधिवत् श्राद्धधर्मं सधर्माः ।
देवच्छन्दं ततः स प्रभुरलमकरोत् पूर्तिमायातवत्यां
पौरुष्यामादिमायां श्रमपरिमथनं कर्तुमेष क्रमो हि ॥१२९॥
तीर्थाधीशांह्रिपीठं प्रथमगणधरोऽध्यास्य चक्रायुधोऽपि
व्याचक्रे धर्ममेकं प्रभुरिव भविकक्लेशविध्वंसनाय ।
पौरुष्यां यातवत्यां द्विकपरिगणनाविश्रुतायां जनौघाः
सर्वे स्वं स्वं निकेतं ययुरथ सुकृताऽऽकर्णनेन प्रहृष्टाः ॥१३०॥
पाणिभ्यां बीजपूरं कमलमपि दधद् दक्षिणाभ्यामुभाभ्यां
वामाभ्यामक्षसूत्रं नकुलमपि तथा पोत्रिवक्त्रेण राजन् ।
भाद्राम्भोवाहमूर्तिः करिरथगमनः शान्तिनाथस्य तीर्थे
जज्ञे यक्षः स दक्षो गरुड इति जगत्ख्यातचारुप्रभावः ॥१३१॥
पाण्योर्दक्षिणयोः सदैव दधती सत्पुस्तकं चोत्पलं
पद्मं चाऽपि कमण्डलुं भगवती वामार्चिता वामयोः ।
निर्वाणी प्रथिताऽऽख्यया सितवपुः पद्मासनाभासिता
देवी शासनदेवता जिनपतिश्रीशान्तितीर्थेऽजनि ॥ १३२ ॥
ताभ्यां नित्यमधिष्ठितो गुरुबुधोपास्यः प्रणिघ्नंस्तमः-
स्तोमं सोमकलानिधिं रविरिव क्षीणं समुल्लासयन् ।
पादैरेव भुवस्तलं विमलतामापादयन्नन्यतः
श्रीशान्तिर्विजहार भव्यकमलप्रोद्बोधकल्याणकृत् ॥ १३३ ॥


आसीत् श्रीगुरुगच्छमौलिमुकुटश्रीमानभद्रप्रभोः
पट्टे श्रीगुणभद्रसूरिसुगुरुश्चारित्रभाजां गुरुः ।
तच्छिष्येण कृतेऽत्र पञ्चदशकः श्रीशान्तिवृत्ते महा-
काव्ये श्रीमुनिभद्रसूरिकविना सर्गः सुवृत्तोऽगमत् ॥ १३४ ॥

इति श्रीशान्तिनाथचरिते पञ्चदशः सर्गः समाप्तः ॥



अर्हम्

अथ षोडशः सर्गः ।



प्रतीयते यत्पुरुषोत्तमत्वं संवेदनेनैव सनातनेन ।
अनन्यसामान्यभृता श्रिया च स शान्तिनाथस्तनुतां मुदं वः ॥ १ ॥
अथान्यदा हास्तिननामधेयं पुरं जिनेशः समवासरत् सः ।
जगत् पवित्रं रचयन् स्वपादैर्दिनेशवत् तामसभूतिभेत्ता ॥ २ ॥
आयुक्तपुम्भ्यो जिनसार्वभौमं श्रुत्वा समेतं कुरुचन्द्रभूपः ।
प्रदाय हर्षात् परितुष्टिदानं प्रभुं प्रणन्तुं सहसा जगाम ॥ ३ ॥
प्रदक्षिणानां त्रितयं विधाय जिनं नमस्कृत्य गणेश्वरांश्च ।
असौ यथास्थानमलञ्चकार भूमण्डलं भूमिभुजां पुरोगः ॥ ४ ॥
नृपे निविष्टे जिनचक्रवर्ती स देशनां धर्ममयीं ससर्ज ।
परोपकाराय सतां हि बोधः सरोवराणामिव वारिपूरः ॥ ५ ॥
अवाप्य चिन्तामणिवद् दुरापं मानुष्यमेतद् भविकाः ! कथञ्चित् ।
प्रमादमुत्सार्य्य विचार्य्य तत्त्वं धर्मं विदद्ध्वं शिवशर्महेतोः ॥ ६ ॥
न द्वेषिहालाहलनाहलानां भयं प्रकुर्वन्ति बुधास्तथाऽत्र ।
लोकद्वयस्वार्थविनाशकस्य यथा प्रमादस्य दुरन्तकस्य ॥ ७ ॥
मैरेयपाणं विषयातिसक्तिः कषाययोगः शयनाभिषङ्गः ।
पुण्यद्रुभङ्गो विकथाऽनुरङ्गः प्रोक्तः प्रमादः स च पञ्चधा तैः ॥ ८ ॥
तत्राऽपि मुख्यो मदिरोपभोगो यत् सेवनादर्थपरिक्षयोऽत्र ।
परत्र दुःखं नरके यथाऽऽपत् स स्कन्दिलो ना कुलपुत्रवाच्यः ॥ ९ ॥

तथाहि याम्ये भरते समृद्धिप्रथिम्नि पृथ्वीतिलके पुरेऽभूत् ।
चन्द्रः पृथिव्या इव नाम पृथ्वीचन्द्रः प्रजाऽऽनन्दकरो नरेन्द्रः ॥ १० ॥
देवी तदीया सुरसुन्दरीति ख्याता गुणौघैः सुरसुन्दरीव ।
यद्रूपमालोकितुमेकचित्तः सहस्रनेत्रो मघवा बभूव ॥ ११ ॥
तत्रैव वित्तः कुलपुत्रकोऽस्ति श्रीचन्द्रराजः श्रितराजमानः ।
तस्य प्रियाऽजायत चन्द्रकान्ता तदङ्गजः स्कन्दिलनामधेयः ॥ १२ ॥
मातापितृभ्यां परिणायितः स स्कन्दश्रियं नाम वधूं वयःस्थः ।
क्रमात् स पञ्चत्वमवाप चन्द्रप्रशस्यकीर्तिः किल चन्द्रराजः ॥ १३ ॥
तस्यान्यदा भाग्यविपर्ययेण मद्यैकपानव्यसनं बभूव ।
पुंसः कुकर्मोदयसंविधानात् संजायते यद् व्यसनं दुरन्तम् ॥ १४ ॥
स स्निग्धवाक्यैः प्रियया प्रयत्नाद् निवार्यमाणो विरराम नैव ।
तस्योग्रमेतद् व्यसनं विबुध्य जनैरनेकैः सुजनैरिवाऽयम् ॥१५॥
अजीगमत् तद्व्यसने प्रसक्तः सर्वं सुवर्णं स निरङ्कुशः सन् ।
धान्यानि धेनूरपि गोकुलानि कुलामयः स व्ययति स्म पश्चात् ॥१६॥
दूरीकृतस्तत्सुजनैः स्वपङ्केरूरीकृतः कैश्चन नैव पापः ।
तथाऽपि किञ्चिद् धनमर्जयित्वा मद्यं पपौ स व्यसनोग्रचित्तः ॥१७॥
अन्येद्युरेतस्य दुराशयस्य निपीतमद्यस्य पथि प्रयातः ।
भूमीपतिः संमुखमाजगाम लीलाविहारेण वनं प्रयातः ॥ १८ ॥
भूपालमान्यैः पुरुषैः पुरोगः क्षीवः स इत्येवमवादि भो भोः ! ।
अयं समभ्येति विभुस्ततस्त्वं स्थानादितो द्रागपसृत्य तिष्ठ ॥ १९ ॥
नाकर्णयामास यदा नराणां मत्तोऽपसारप्रवणाः स वाचः ।
बाहौ तदैकेन धृतो नरेन्द्रवाङ्भ्यभाजा पुरुषेण रोषात् ॥ २० ॥
छुरीं समाकृष्य सितां स तेन न्यघानि मत्तेन रुषाश्रितेन ।
वृत्तान्तमेतं विनिशम्य राज्ञा व्यापादितः स प्रहतो नयेन ॥ २१ ॥
विपद्य जातो नरके दुरन्ते दुःखानि भूयांस्यनुभूय कामम् ।
ग्रामे स धान्ये तिलकावसाने श्रीशङ्खदत्तस्य कुटुम्बिमौलेः ॥ २२ ॥
गौर्माधवीमाधविकातनूभूर्वसन्तनामा समभूदपुण्यः ।
स मद्यपानव्यसनं तदेव तत्रैव जन्मन्यपि नो मुमोच ॥ २३ ॥
(युग्मम्)

तद्ग्रामनाथः पथि चाऽऽजिहानस्तेनान्यदाऽदृश्यत दृश्यमूर्तिः ।
गालिप्रदानेन च मद्यपेन तस्य क्रुदाऽऽधीयत मानभाजः ॥ २४ ॥
प्रोल्लासितसेन स मङ्क्षु तिर्यग्योनिष्वनेकासु चिरं भ्रमित्वा ।
नृत्वं प्रपन्नः पुनरेव देवदत्ताभिधस्तद्व्यसनं बभाज ॥ २५ ॥
स मद्यपानव्यसनेन तेन प्रवर्धमानेन विनीतसारः ।
विवेश कस्याऽपि महेश्वरस्य निकेतने चौर्यकलासुधैर्यः ॥ २६ ॥
आरक्षकेण भ्रमताऽर्धरात्रे विनिर्गतो लोप्त्रकरः स दृष्टः ।
समग्रलोकस्य सपत्नभूतो घाताय दत्तो नृपतेर्निदेशात् ॥ २७ ॥
दुर्ध्यानभावेन महाककुद्मान् भूत्वा ततः पृष्ठवहप्रतिष्ठः ।
भारं वहंस्तीव्रतृषाक्षुधाभ्यां कदर्थनाः स प्रचुरा विषेहे ॥ २८ ॥
ततो विपन्नो वटकूपनाम्नि ग्रामेऽभिरामे विततोर्वराभिः ।
स शेषराजस्य कुटुम्बिनोऽभूद् नेदाङ्गजः सोम इति प्रतीतः ॥ २९ ॥
तद् मद्यपानव्यसनं दुरन्तं तत्राऽपि तत्याज न सोऽपि सोमः ।
विकारमन्तर्निहितं खलो वा भुजङ्गमः क्ष्वेडमिवापमन्त्रः ॥ ३० ॥
श्रीमालिकां नाम स शूरगेहपतेः सुतां सूरस्थादिदैवताम् ।
कुकर्मनिर्माणसुकर्मशूरः क्षीबोऽन्यदाऽऽलिङ्ग्य बलादभुक्त ॥ ३१ ॥
स मेहनच्छेदनपूर्वमेव कदर्थयित्वा बहुधा नृपेण ।
समेषु चाकार्य्य निवेशितेषु जनेषु पश्यत्सु विनाश्यते स्म ॥ ३२ ॥
भ्रमिष्यतीत्थं स भवांश्चिराय दुरन्तदुःखानुभवं प्रकुर्वन् ।
तद् मद्यपानव्यसनं पुमांसः ! समुज्झताऽन्यव्यसनापहत्यै ॥ ३३ ॥
चन्द्रानन ! श्रीकुरुचन्द्रराज ! विन्दन्ति दुःखं भवचारकेऽस्मिन् ।
न जन्तवः के विषयाभिधानप्रमादसेवापरतन्त्रचित्ताः ? ॥ ३४ ॥
जडैकबुद्ध्या प्रथमाभ्युपेतान् विज्ञाततत्त्वा मृगतृष्णिकावन् ।
त्यजन्ति केचिद् गुणवर्मनामकुमारवत् तान् विषयांस्तथाहि ॥ ३५ ॥
जम्बूमहाद्वीपगमुख्यवर्षे पुरोत्तमं शौर्यपुरं समस्ति ।
ध्वजैर्गृहाणामनुमीयते श्रीर्यस्मिन् पयोजैः सरसामिवाम्भः ॥ ३६ ॥
प्रौढप्रतापो दृढवर्मनामा भूवल्लभस्तत्र बभूव धीमान् ।
रणाङ्गणे यस्य समीक्ष्य शौर्य्यं हता विपक्षाः सहसा बभूवुः ॥ ३७ ॥
श्रीशीलशालिन्यभिधा तदीया जाया बभूवान्वयशुद्धनागा ।

मनोहरं रूपमवेक्ष्य यस्या मुमोच कान्तं न कदाऽपि लक्ष्मीः ॥ ३८ ॥
मुरप्रवेशोन्मुरसौम्यकान्तिर्मृगेश्वरस्वप्नविबुद्धजन्मा ।
तयोः कुमारो गुणवर्मनामा धर्मस्थितिः शर्मकरो जनानाम् ॥ ३९ ॥
विनीतमध्यापकसङ्गमेन कलास्तमाशिश्रियुरेककालम् ।
भागीरथीशैवलिनीवलेन रत्नाकरं नद्य इवातिवेलम् ॥ ४० ॥
विलासिनीचञ्चललोचनालिरोलम्बसंवासनपद्मरूपम् ।
शास्त्रेषु शस्त्रेषु च लब्धपारः क्रमादसौ यौवनमाससाद ॥ ४१ ॥
गुरुं बुधास्तं कलयाम्बभूवुर्मृगीदृशो मन्मथरूपमेतम् ।
प्रजा जयन्तप्रतिरूपमाराद् वनीपकाः कल्पतरुं वितश्च ॥ ४२ ॥
पुरे वसन्तोपपदेऽस्ति भूमानीशानचन्द्रः प्रविभूतचन्द्रः ।
विनिर्जितो यस्य यशोभिरीशो भूत्वा वपुः स्वं विशदीकरोति ॥ ४३ ॥
तत्कन्यकोत्तप्तसुवर्णवर्णा विवर्णनीयाऽप्सरसां रुचौभिः ।
यन्नाम पूर्वं कनकं वतीतिवर्णावलीद्योति पदं ततोऽन्त्यम् ॥ ४४ ॥
आकारिता दूतमुखेन राज्ञा रम्याः कुमाराः स्वपरिच्छदेन ।
स्वयंवरोद्वाहमहे तदीये पुरं तदेव त्वरितं समेयुः ॥ ४५ ॥
कुमारकः श्रीदृढवर्मराजनिदेशमासाद्य स सद्य एव ।
स्वयंवरस्थानमवाप दूताहूतस्तदिद्धं गुणवर्मनामा ॥ ४६ ॥
ईशानचन्द्रेण महीभुजा स प्रत्युद्गतः सङ्गतवत्सलेन ।
गन्धर्ववैतालिककल्पवृक्षः प्रदत्तसौधे दिवसान् निनाय ॥ ४७ ॥
कुतूहलालम्बिमना कुमारस्तमन्यदा प्राप जनाश्रयं सः ।
आदातुमभ्युत्सुकतां वितन्वन् विलोचनानां फलमात्मनैव ॥ ४८ ॥
अनेकमूर्तिः स विचित्ररत्नस्तम्भेषु संक्रान्तवपुर्बभासे ।
स्वयंवराडम्बरसुन्दरत्वावलोकनायेव नरेन्द्रसूनुः ॥ ४९ ॥
रूपप्रपञ्चातिविचित्रसारपाञ्चालिकाभिः प्रविलोकनीयम् ।
विलोकमानस्य तदा तमस्य सेशानभूपालसुता समागात् ॥ ५० ॥
सा तारताराभिरिवेन्दुलेखा विभ्राजमाना परितः सखीभिः ।
विद्योतयन्ती ककुभः स्वभासा विलोकयामास जनाश्रयं तम् ॥ ५१ ॥
ईशानचन्द्रक्षितिपालकन्या मान्या स्वरूपेण रतेरपीयम् ।
निध्याय तं तत्र नरेन्द्रपुत्रं स्मरेषुविद्धेव चिराय दध्यौ ॥ ५२ ॥

महेशजन्मा किमयं कुमारः स्वामी महासेनतया श्रुतो यत् ? ।
श्रीनन्दनोऽयं किमु कामरूपो, नासत्यबन्धुः किमु वा तृतीयः ? ॥५३॥
एतादृशी मूर्तिरसाम्यरूपा सुरेषु चेत् स्याद् यदि वाऽसुरेषु ।
महाकवीनामपि वर्णनायां श्रूयेत द्रव्यार्थविवर्णकानाम् ॥ ५४ ॥
मर्त्येषु चेदेष विशेषवेदी कश्चिद् विपश्चित्तमशंसनीयः ।
स्वर्गेण तत् किं करणीयमस्ति किमर्थमायास्यत एव चात्मा ? ॥ ५५ ॥
घुणाक्षरन्यायवशादवश्यं ससर्ज धाताऽपि नृरत्नमीदृक् ।
अन्यत्र चेदृक्षमवेक्ष्यते न यद्रूपमाकर्ण्यत एव नैव ॥ ५६ ॥
परिश्रमः स्यात् सफलो विधातुस्तदा जगन्निर्मितिनिर्मितोऽयम् ।
संयोक्ष्यतेऽनेन समं यदा मामनन्यसामान्यकलङ्ककेन ॥ ५७ ॥
एतं परित्यज्य कदाचिदन्यं भर्तारमार्ताऽपि न संश्रयिष्ये ।
इति स्वचित्तेन विचिन्तयन्ती प्रसह्य साऽऽलीभिरनायि सौधम् ॥५८॥
सा राजकन्याऽपि नरेन्द्रसूनोर्हृत्वाऽप्यहो ! मानसराजहंसम् ।
नालक्षि केनाऽपि गृहं व्रजन्ती ह्यशिक्षितं कौशलमेतदस्याः ॥ ५९ ॥
कस्यापि शापेन मुनेः शचीयं दिवोऽवतीर्णा यदि वोर्वशीयम् ? ।
इति स्वचित्ते दधदूहमेष राजाङ्गजोऽपि प्रविवेश सौधम् ॥ ६० ॥
पञ्चेषुणा पञ्चभिरेव बाणैः प्रक्षोभमाणानि निजेन्द्रियाणि ।
पञ्चाऽपि रक्षन् दृढवर्मसूनुस्तस्याः स्मरन्नेव दिनान् निनाय ॥ ६१ ॥
यातेऽथ यामे प्रथमे रजन्या वृद्धस्त्रियं स्वीयभुजिष्ययाऽमा ।
प्रस्थापयामास तदन्तिके सा रागं दधाना हृदयेऽसमानम् ॥ ६२ ॥
निवेदिता वेत्रिविशेषकेण कुमारसामीप्यमवाप्य साऽपि ।
उपायनं तस्य करे चकार चित्राऽऽस्पदं चित्रितपट्टिकाङ्कम् ॥ ६३ ॥
विचित्रवर्णक्षितिराजमानां पुरीमिवैक्षिष्ट स तत्र हंसीम् ।
अत्युज्ज्वलश्लोकविगाढदिक्क एकं पुनः श्लोकमधश्च तस्याः ॥ ६४ ॥
अहो ! प्रियालोकनकाल एव जाताधिरागा कलहंसिकेयम् ।
खिन्नाऽपि तस्यानवलोकनेन समीहते दर्शनमेव भूयः ॥ ६५ ॥
विज्ञाय विज्ञापनयैव दास्यास्तस्या अभिप्रायमसौ कुमारः ।
तद्रूपमालिख्य च राजहंसं श्लोकं ततस्तादृशमालिलेख ॥ ६६ ॥
प्रवृद्धरागप्रचयं प्रियाया हंसोऽप्यसौ तत्क्षणवीक्षणेन ।

नित्यं प्रियाप्रेक्षणमेव कामं सुखोपलब्ध्यै परमिच्छतीह ॥ ६७ ॥
आदाय तां चित्रितपट्टिकां साऽप्येषा जरत्स्त्री नृपनन्दनाय ।
ताम्बूलपुष्पादिविचित्रवस्तु व्यश्राणयत् तत्प्रहितं च तस्मै ॥ ६८ ॥
स्वयं समादाय नृपाङ्गजोऽपि प्राणप्रियाप्रेषितमित्यदस्तत् ।
कृतार्थयामास कृती समस्तं निजाङ्गसङ्गेन सरागचित्तः ॥ ६९ ॥
तस्यै कुमारोऽपि ददौ स्वहारं तच्चित्तवृत्तेः परितोषहेतोः ।
सा स्पष्टमाचष्ट रहस्तवैव कन्यावचः किञ्चन कथ्यमस्ति ॥ ७० ॥
स्वरूपमारेण कुमारकेण भ्रूसंज्ञयोत्थापित एव लोके ।
व्यजिज्ञपत् सा जरती समस्तं संदिष्टमिष्टाय तया निविष्टा ॥ ७१ ॥
रसज्ञया देव ! मया द्विधाऽपि राजाङ्गजा वक्ति भवन्तमेवम् ।
हृत्वा पुरा रक्षक ! चित्तरत्नं ममाऽसि यातः प्रथमे क्षणेऽपि ॥ ७२ ॥
नियन्त्रयिष्यामि ततो भवन्तं शक्ता स्वयं श्वो वरणस्त्रजैव ।
परं न यावत् परिपूर्यते सा प्राज्ञ ! प्रतिज्ञा मम काऽपि चात्र ॥ ७३ ॥
तावद् न किञ्चिद्भवताऽपि वाच्या वाच्योज्झिता भोगसमर्थनार्थम् ।
तथेति तेन प्रतिपादिता सा स्वस्थानमायातवती विमाया ॥ ७४ ॥
ईशानचन्द्रक्षितिचन्द्रकन्या वरिष्यते पुण्यनिधिं कमद्य ? ।
इति स्वयं द्रष्टुमिवोदयाद्रिशृङ्गं दिनेशोऽथ बभाज तुङ्गम् ॥ ७५ ॥
महीपतीनां सकलाः कुमाराः शृङ्गारसंसर्गमनोज्ञरूपाः ।
मञ्चेषु कैलाससमुन्नतेषु तस्थुर्नु पञ्चेषुमिवावजेतुम् ? ॥ ७६ ॥
उदारशृङ्गारविभासमानो विभाऽसमानः स पुनः कुमारः ।
अध्यास्य सिंहासनमात्ममञ्चे पूर्वाद्रिशृङ्गे स्थितवानिवेन्दुः ॥ ७७ ॥
भूमीन्द्रकन्याऽप्यथ याप्ययानारूढा प्ररूढाऽऽत्मभवाङ्कुरा सा ।
वृता सखीभिः सरसानपश्यद् राज्ञां कुमारान् शुचिरूपसारान् ॥७८॥
तद्गोत्रनामानि विवर्णितानि चित्रं प्रतीहारिकयैकयैव ।
आकर्ण्य सा सुप्रपकर्ण्य बाला पार्श्वं कुमारस्य समाजगाम ॥ ७९ ॥
चित्रावदानानि पुरातनानां पुरावदेतस्य च शंसितानि ।
श्रुत्वा निचिक्षेप कुमारकण्ठे सोत्कण्ठचित्ता वरमालिकां सा ॥ ८० ॥
ईशानचन्द्रो महता महेन लग्ने प्रशस्ते गुणवर्मणा ताम् ।
विवाह्य माहादि वितीर्य सारं कृतार्थयामास नृपो द्विधा स्वम् ॥८१॥

मनोरथान् मार्गणमानसानां वाञ्छाऽतिरिक्तैर्द्रविणप्रदानैः ।
संपूर्य स क्ष्मापतिना विसृष्टो वध्वा समं स्वं नगरं जगाम ॥ ८२ ॥
राज्ञा महेच्छेन महोत्सवेन प्रवेशिता पत्तनमात्मजेन ।
समं वधूः सा श्वशुरेण हर्षात् सौधे प्रदत्ते स्थितिमाततान ॥ ८३ ॥
कदाचिदस्या भवनं समेतः सखीसमाजेन समाश्रितायाः ।
प्रहेलिकाभिः सुचिरं स रेमे प्रश्नोत्तरैश्चापि नरेन्द्रसूनुः ॥ ८४ ॥
सौधं पुनः स्वं समुपागतोऽयं भुजिक्रियापूर्वविलेपनं च ।
कृत्वा सभां संप्रतिपद्य तिष्ठन् दौवारिकेणैवमवादि नम्रा ॥ ८५ ॥
कश्चित् परिव्राड् नियतः कुमार ! द्वारि स्थितस्त्वां स दिदृक्षुरस्ति ।
प्रवेश्यतां तर्हि स शीघ्रमेवेत्युक्तस्तथा सोऽपि चकार विद्वान् ॥ ८६ ॥
तत्सन्निधानं गुणसन्निधानं प्राप्तः परिव्राड् विकृताकृतिः सः ।
आशीर्गिराऽनन्तरमेव तेन भद्रासने भद्रतमेऽपि दत्ते ॥ ८७ ॥
उपाविशत् तत् प्रविहाय वृष्यां समाहृतायां सममात्मनैव ।
पृष्टस्त्वभाषिष्ट गुरुप्रतिष्ठः समागमस्याऽपि निदानमेवम् ॥ ८८ ॥
(युग्मम्)
आह्वानहेतोर्भवतः कुमार ! श्रीभैरवाचार्यगुरुर्गरीयान् ।
मां चेह शिष्यं प्रजिघाय विद्मं न वेद हेतुं पुनरत्र कञ्चित् ॥ ८९ ॥
तत्रागमिष्यामि मुने ! प्रभात इतीरयित्वा विससर्ज तं सः ।
अत्रान्तरे कालनिवेदनोत्को वन्दी पपाठेदमपापशापः ॥ ९० ॥
तमो निहत्याभ्युदयं प्रपन्नः सर्वत्र दीप्तिप्रकरं वितत्य ।
मन्दायमानद्युतिरेप देव ! प्रद्योतनः सांप्रतमस्तमेति ॥ ९१ ॥
इदं समाकर्ण्य समुद्यमं स क्ष्मापाङ्गजः सान्ध्यविधौ व्यधत्त ।
विसृज्य भृत्यानपि सन्निधिस्थान् निद्रासुखं संश्रयति स्म किञ्चित् ॥ ९२ ॥
अहर्मुखे मङ्गलतूर्यतारनादेन पद्माकरवद् विबुद्धः ।
आकर्णयन् मङ्गलपाठकेन प्रपठ्यमानं मधुरं स चेदम् ॥ ९३ ॥
भास्वानसावभ्युदयं तनोति विश्वोपकारप्रवणस्वभावः ।
तमो विनिघ्नन् परितः प्रसर्पद्भवानिवाऽव्याहतगोप्रचारः ॥ ९४ ॥
एतन्निशम्योज्झिततल्पकल्पः प्रभातकृत्यं प्रवितत्य तूर्णम् ।
अभैरवाकारपरार्धरूपः स भैरवाचार्यसमीपमाप ॥ ९५ ॥

प्रत्युद्गतं दर्शनमात्रतोऽपि जटाधरं सोऽपि तमाननाम ।
जटी प्रदायाशिषमाप्रहर्षः स्वचर्मपीठार्धकमुत्ससर्ज ॥ ९६ ॥
नैवाऽऽसनार्धे च गुरोर्ममाऽपि युक्ता स्थितिः स्यादिति स ब्रुवाणः ।
निजस्य वण्ठस्य वसुन्धरायां पटे विमुक्ते निषसाद धन्यः ॥ ९७ ॥
आलापमाधाय मुहूर्तमात्रमौचित्यसंभावितमुज्जगार ।
स भैरवोऽभ्यागतराजपुत्र ! कां सत्क्रियां ते वितनोमि चाहम् ? ॥९८॥
यद् बाल्यमारभ्य मया धनस्य परिग्रहो नैव मनाग् व्यधायि ।
विना न तेनैव कदाचनाऽपि लोकव्यवस्था घटनामुपैति ॥ ९९ ॥
न गौरवं क्वापि गुणा लभन्ते कर्म प्रसिद्धिं भजते न चापि ।
न चापि सामान्यविशेषसिद्धिर्द्रव्यं विना नो समवाय एव ॥ १०० ॥
कान्तेन कान्तेन विशा कलत्रं जलेन मिष्टेन यथा तडागः ।
जिनेन देवेन यथैव चैत्यं तथैव दानेन धनं विभाति ॥ १०१ ॥
पूजा गुरूणां यदि वा सुराणां संमाननं सज्जनमार्गणानाम् ।
प्रेमप्रथा भक्तिविकाशनं च नैतानि दानेन विना भवन्ति ॥ १०२ ॥
धनं विना नैव कदापि दानं संपद्यते तत् सुकृतं विना न ।
तदेव लोके विनयं विना न स चापि मानापगमं विना न ॥ १०३ ॥
निशम्य चेदं न्यगदत् कुमारः कुमारशौर्यप्रतिघातिसारः ।
भवादृशां दर्शनमेव मानः सत्कार एवेश ! निदेशनं मे ॥ १०४ ॥
प्रसद्य तद् ब्रूत निदेशमेकं कुर्वे यथार्हं तव किङ्करोऽस्मि ।
इतीरिते तेन स भैरवोऽद्धा योद्धाऽस्य कार्यं निजमाचचक्षे ॥ १०५ ॥
संवत्सरानष्ट मया कृतोऽस्ति सन्मन्त्रजापस्य परिश्रमस्तत् ।
एकां निशां यावदपप्रमादस्त्वं संश्रयस्वोत्तरसाधकत्वम् ॥ १०६ ॥
महाप्रसादोऽयमयि ! प्रजल्पन्नित्यभ्यधत्ताऽथ पुनः कुमारः ॥
कस्मिन् दिने कुत्र पवित्रगात्राः ! साहाय्यमेतत् क्रियतां मयाऽपि॥१०७॥
जटी जगौ खड्गवता श्मशाने श्यामे चतुर्दश्यभिधानधुर्ये ।
तिथौ निशायाः प्रहरे द्वितीये त्वया समागम्यमगम्यधाम्ना ॥ १०८ ॥
त्रिभिर्जनैः सार्धमतन्द्रितात्मा स्थास्यामि तत्राहमकम्प्रवृत्तिः ।
ओमित्युदीर्य प्रतिपन्नसारं स राजसूनुर्निजसौधमागात् ॥ १०९ ॥
समागतायां क्रमशोऽथ तस्यां तिथौ विसृज्याऽनुचरमजं सः ।

विनिर्ययौ स्वीकृतवण्ठवेषः प्रदोषकाले हृतदोषजालः ॥ ११० ॥
पाणौ कृपाणं निशितं दधानः कुम्भीन्द्रकुम्भस्थलभेदशक्तम् ।
संकेतितं स्थानमयं श्मशाने प्राप प्रतापक्षतचित्रभानुः ॥ १११ ॥
तं भैरवाचार्यकमात्मतुर्यं तत्र व्यलोकिष्ट विलोक्यभक्तिः ।
सोऽपि क्षमानायकनन्दनं तं जटाधरः पादनतं बभाषे ॥ ११२ ॥
शिष्यत्रयेणान्वितमात्मबोधप्रागल्भ्यशालीव हृदि श्मशाने ।
त्रायस्व मां साध्वससंकुलेऽस्मिन् नेत्रत्रयेणेव ललाटनेत्रम् ॥ ११३ ॥
आमेति तस्मिन् परिभाषमाणे भूपालपुत्रे स जटाधरोऽपि ।
अमण्डयद् मण्डलमीक्षितं प्राक् तदन्तरे द्राग् मृतकं च रौद्रम् ॥११४॥
तदाननान्तर्ज्वलने प्रणीतप्रज्वालितेऽनेन जटाधरेण ।
कर्तुं समारभ्यत मन्त्रजापपुरःसरं होमविधिर्विशङ्कम् ॥ ११५ ॥
ते पूर्वयाम्या परदिक्षु तस्थुः क्रमात् त्रयोऽपि प्रहतप्रमादाः ।
स धैर्यवर्मा दृढवर्मसूनुर्भयं विहायोत्तरदिश्यतिष्ठत् ॥ ११६ ॥
अथो शिवासंहतिवासितानि घोराण्यभूवन् परितोऽशिवानि ।
वेतालमालाः कलिताट्टहासं शब्दान् निचकुर्भयबीजभूतान् ॥ ११७ ॥
अत्रान्तरे वारिदघोषवादी निर्घात एकः प्रससार सारः ।
पुस्फोट तेनैव वसुन्धरेयं वियोगिवक्षःस्थलवत् प्रकामम् ॥ ११८ ॥
एकस्तदन्तर्निरगात् करालाकारान्धकारावजयी जयेनः ।
कृशोदरोऽत्युद्‌धुपितोर्ध्वकेशः कठोरबाहुद्वयदीर्घजङ्घः ॥ ११९ ॥
पिङ्गेक्षणो दृश्यनिशातपर्शुर्हुङ्कारसंपूरितखप्रदेशः ।
दधत् करे खण्डितमण्डलाग्रं महापुमान् प्रेतपतिप्रकारः ॥ १२० ॥
(युग्मम्)

सोऽप्येवमाचष्ट निरस्तशङ्को निकृष्ट ! रे भैरव ! भैरवाङ्गात् ।
त्वया किमारब्धमिदं मदेन पूजामकृत्वा मम बुद्धिहीन ! ? ॥१२१॥
क्षेत्रस्य चास्यस्य महाप्रभावः स्वामी प्रसिद्धः खलु मेघनादः ।
त्वद्दुर्नयस्याऽस्य फलं स्वशक्त्या तद् दर्शयाम्येव तवाधुनाऽहम् ॥१२२॥
इति प्रजल्पन्तमिमं स्वनादवित्रासिताम्योत्तरसाधकं तम् ।
उत्क्षिप्य कौक्षेयकमाददतकुञ्जगाद चैवं दृढवर्मसूनुः ॥ १२३ ॥
अरे ! महामूढ ! विलज्ज ! गर्जि करोषि किं शारदवार्दवत् त्वम् ? ।

दोर्दण्डशौण्डीर्यमवार्यवीर्यं यद्यस्ति तन्मे पुरतो भव द्राक् ॥१२४॥
निरर्थकं यो वचनं ब्रवीति विशिष्यते स ग्रहिलाद् न धीरैः ।
राजाऽहमस्मीति वदन् नरेन्द्रैर्न साधुवद् दण्ड्यत एव यन् सः॥१२५॥
इति ब्रुवाणः स पुरःस्थितं तं निरायुधं प्रेक्ष्य सुरं सलज्जः ।
हित्वाऽऽयुधं शूरशिरोललाम नियुद्धयुद्धाय समुद्यतोऽभूत् ॥१२६॥
कुमारदोर्दण्डनियन्त्रितोऽसौ श्रीक्षेत्रपालो विरसं रसन् सः ।
प्राह स्वयं विस्मयमादधानः कुमार! मां सात्त्विक! मुञ्च मुञ्च॥१२७॥
अहं महासत्त्व ! तवाऽस्मि सिद्धो वरं वृणीष्वेप्सितमाशयस्य ।
निशम्य तस्योक्तमिदं नृपस्य सुतस्तमित्याह स साहसाढ्यः ॥१२८॥
सिद्धोऽसि चेद् भैरव ! साधकस्य समीहितं साधय साधयाऽस्य ।
विनिर्मिते चैवमवश्यमेव भविष्यसे त्वं कृतकृत्यभावम् ॥ १२९॥
जगाद भूयोऽपि स मेघनादः सत्त्वेन ते कामितमस्य दत्तम् ।
समीहितं प्रार्थककल्पवृक्ष ! किञ्चित् परं प्रार्थय निःस्पृहोऽपि ॥१३०॥
इत्येष तस्यैव महामहेण प्रणुन्नरूपोऽभिदधे कुमारः ।
सा प्रेयसी मे वशगाऽस्तु तर्हि, विज्ञाय वित्त्याऽथ स चावदत् तम्॥१३१॥
सा कामरूपत्वमधिष्ठितस्य वशे भविष्यत्यचिरात् तवाऽपि ।
तद् मे प्रसादाद् दलितावसादाद् विचिन्तितं ते भवताद् यथेच्छम्॥१३२॥
इति प्रदायाऽस्य वरं वरेण्यं क्षेत्राऽधिनाथः स तिरोबभूव ।
प्रमोदपूर्णेन जटाधरेण राजाङ्गजोऽप्येवमभाणि पश्चात् ॥१३३॥
सत्त्वेन ते राजतनूज ! मन्त्रः सिद्धस्ततोऽजायत वाञ्छितं मे ।
अमानुषं शौर्यमतीन्द्रियार्थावभासि विज्ञानमियं परा रुक् ॥१३४॥
इतीदृशं प्रीतिपरं निरूप्य स तापसः शिष्यसमन्वितोऽगात् ।
स्वस्थानमन्योऽपि कृतप्रणामः स्वनामवित्रासितवैरिवर्गः ॥१३५॥
निद्रासुखं प्राप्य मनाग् विबुद्धः प्राभातिकं कृत्यमसौ वितत्य ।
ईशानभूमीपतिपुत्रिकायाः सौधं जगाम प्रभयाऽभिरामः ॥ १३६ ॥
पल्यङ्कपर्यङ्कतले निविष्टः समं तया स प्रियया न्यगादि ।
प्रहेलिकां मे प्रिय ! काञ्चनैकां बुध्यस्व बुद्ध्या गुरुरेव यत् त्वम् ॥१३७॥
महोत्पलानि प्रभवन्ति केषु दिवौपमां केषु जनैर्भ्रियन्ते ।
केष्वेव चैतन्यमिदं विभाति रसोत्तमाह्वात्मगु कान्त ! विद्धि॥ १३८ ॥

गोपालपुत्रा अपि सारसाक्षि ! निवेदितार्थां कलयन्ति चैताम् ।
तर्हि त्वमेकां विषमामपूर्वां पूर्णेन्दुबिम्बानन ! शंस मेऽग्रे ॥ १३९ ॥
सर्वासु रामासु मनोहरासु स्त्रीरत्नरूपं परिवर्ण्यते किम् ? ।
इदं प्रिये ! ते पुरतो मयोक्तं स्फुटं त्वया बुध्यत एव किं न ? ॥१४०॥
इतीरितां तां हृदयेश्वरेण सा राजपुत्री हृदये निधाय ।
क्षणं विचिन्त्य प्रतिवाक्यमूचे कान्तानुरूपं तव केवलं तत् ॥ १४१ ॥
तां बुद्धिवैचित्र्यमयीं विजानन्नित्यादिगोष्ठीषु समन्वभूत् सः ।
अदृश्यमाधाय वपुर्निशीथे भूयो ययौ तद्भवनं कुमारः ॥ १४२ ॥
तदाऽऽचचक्षे क्षितिपालकन्या चेटीद्वयं चैवमुपान्तवर्ति ।
हले ! त्रियामा कियती व्यतीतेति सम्यगालोच्य निवेद्यतां मे ?॥१४३॥
अभाणि ताभ्यां प्रियवादिनीभ्यां नाद्याऽपि यामद्वितयं प्रपूर्णम् ।
उवाच सा तर्हि विधीयतां द्राक् सामग्र्यहो ! तत्र च गम्यमस्ति ॥१४४॥
तेनैव चेटीद्वितयेन साऽथ विधापितस्नानविलेपभूषा ।
क्षणाद् विचक्रे च विमानमेकं समानशाला मणिचक्रशालम् ॥ १४५ ॥
तच्चेटिकाभ्यां सह सा विमानं शिश्राय विद्याधरकन्यकेव।
अदृश्यरूपोऽस्य विमानकस्य प्रदेशमेकं गुणवर्मकोऽपि ॥ १४६ ॥
पन्थानमाक्रम्य मरुत्पथस्य तडागतीरोद्गतमेककालम् ।
कौबेरदिग्भागविवर्तमानं प्रापद् वनं नन्दनसंज्ञकं तत् ॥ १४७ ॥
सैषा विमानादवतीर्य तूर्णं चेटीद्वयालङ्कृतपार्श्वभागा ।
अगादशोकद्रुमवीथिकान्तर्निविष्टविद्याधरसन्निधाने ॥ १४८ ॥
विनम्य सा भक्तिपुरःसरं तं निदेशमासाद्य पुरो निविष्टा ।
अत्रान्तरेऽन्या अपि तिस्र एयुस्तदन्तरे तत्सदृशो रमण्यः ॥ १४९ ॥
विद्याधराणामसमः समाजः क्षणान्तरे तत्र समाजगाम ।
युगादिनाथस्य जिनेश्वरस्य तटेऽस्ति तत्राऽऽयतनं महीयः ॥१५०॥
विद्याधरास्ताश्च ततः समस्ताः समागमन्नायतनं तदेव ।
चक्रुश्च भक्तिं जिननायकस्य स्नानार्चनालेपनपूर्विकां ते ॥ १५१ ॥
का सांप्रतं नृत्यमहो ! विधातेत्युदीरिते खेचरनायकेण ? ।
ईशानचन्द्रक्षितिपालकन्येत्याचख्युरन्याः क्षितिपालकन्याः ॥ १५२ ॥
क्रमागतं स्वावसरं विबुध्य ततः क्षणान् श्रीगुणवर्मकान्ता ।

गोपालपुत्रा अपि सारसाक्षि ! निवेदितार्था कलयन्ति चैताम् ।
तर्हि त्वमेकां विषमामपूर्वां पूर्णेन्दुबिम्बानन ! शंस मेऽग्रे ॥ १३९ ॥
सर्वासु रामासु मनोहरासु स्त्रीरत्नरूपं परिवर्ण्यते किम् ? ।
इदं प्रिये ! ते पुरतो मयोक्तं स्फुटं त्वया बुध्यत एव किं न ? ॥१४०॥
इतीरितां तां हृदयेश्वरेण सा राजपुत्री हृदये निधाय ।
क्षणं विचिन्त्य प्रतिवाक्यमूचे कान्तानुरूपं तव केवलं तत् ॥ १४१ ॥
तां बुद्धिवैचित्र्यमयीं विजानन्नित्यादिगोष्ठीषु समन्वभूत् सः ।
अदृश्यमाधाय वपुर्निशीथे भूयो ययौ तद्भवनं कुमारः ॥ १४२ ॥
तदाऽऽचचक्षे क्षितिपालकन्या चेटीद्वयं चैवमुपान्तवर्ति ।
हले ! त्रियामा कियती व्यतीतेति सम्यगालोच्य निवेद्यतां मे ?॥१४३॥
अभाणि ताभ्यां प्रियवादिनीभ्यां तावाऽपि यामद्वितयं प्रपूर्णम् ।
उवाच सा तर्हि विधीयतां द्राक् सामग्र्यहो ! तत्र च गम्यमस्ति ॥१४४॥
तेनैव चेटीद्वितयेन साऽथ विधापितस्नानविलेपभूषा ।
क्षणाद् विचक्रे च विमानमेकं समानशाला मणिचक्रशालम् ॥ १४५ ॥
तच्चेटिकाभ्यां सह सा विमानं शिश्राय विद्याधरकन्यकेव ।
अदृश्यरूपोऽस्य विमानकस्य प्रदेशमेकं गुणवर्मकोऽपि ॥ १४६ ॥
पन्थानमाक्रम्य मरुत्पथस्य तडागतीरोद्गतमेककालम् ।
कौबेरदिग्भागविवर्तमानं प्रापद् वनं नन्दनसंज्ञकं तत् ॥ १४७ ॥
सैषा विमानादवतीर्य तूर्णं चेटीद्वयालङ्कृतपार्श्वभागा ।
अगादशोकद्रुमवीथिकान्तर्निविष्टविद्याधरसन्निधाने ॥ १४८ ॥
विनम्य सा भक्तिपुरःसरं तं निदेशमामाद्य पुरो निविष्टा ।
अत्रान्तरेऽन्या अपि तिस्र एयुस्तदन्तरे तत्सदृशो रमण्यः ॥ १४९ ॥
विद्याधराणामसमः समाजः क्षणान्तरे तत्र समाजगाम ।
युगादिनाथस्य जिनेश्वरस्य तटेऽस्ति तत्राऽऽयतनं महीयः ॥१५०॥
विद्याधरास्ताश्च ततः समस्ताः समागमन्नायतनं तदेव ।
चक्रुश्च भक्तिं जिननायकस्य स्नानार्चनालेपनपूर्विकां ते ॥ १५१ ॥
का सांप्रतं नृत्यमहो ! विधातेत्युदीरिते खेचरनायकेण ? ।
ईशानचन्द्रक्षितिपालकन्येत्याचख्युरन्याः क्षितिपालकन्याः ॥ १५२ ॥
प्रमागतं स्वावसरं विबुध्य ततः क्षणान् श्रीगुणवर्मकान्ता ।

विधाय सज्जं चलनाख्यवासः सा रङ्गभूमिं प्रविवेश रङ्गात् ॥१५३॥
अवादयंस्तत्र च वेणुवीणातालादिकांस्ताः क्रमशोऽपि तिस्रः ।
तदा समं प्रेक्षणकं बभूव समग्रविद्याधरविस्मयाय ॥ १५४ ॥
अस्या विलासातिशयेन लास्यं प्रवर्तयन्त्याः कटिसूत्रसूत्रात् ।
एकाऽपतत् किङ्किणिका सवेगं तामग्रहीद् राजसुतस्तटस्थः ॥ १५५ ॥
तया समन्तादवलोकिताऽथ लास्यावसाने निजकिङ्किणी सा ।
विद्याधरैरप्यनुयुज्यमानैः प्रयत्नतः कापि न चाऽऽपि किन्तु ॥१५६॥
तस्मिन् समं स्वानुचरैः समग्रैर्विद्याधराणामधिपे प्रयाते ।
सहैव चेटीद्वितयेन माऽपि विमानमाश्रित्य चचाल बाला ॥ १५७ ॥
कुमारवीरोऽपि पुरावदेतं विमानभागं रभसाद् बभाज ।
स्थानं समायासिपुरात्मनस्ते सर्वेऽपि तेनैव महारयेण ॥ १५८ ॥
अलक्षितः प्रेष्यजनैः कुमारः स्वमन्दिरं प्राप्य सहेमकुम्भम् ।
पल्यङ्कमाश्रित्य सुपुष्पगन्धं शेषां त्रियामां गमयाम्बभूव ॥ १५९ ॥
अमात्यपुत्राय निजाय सख्ये यथार्थनाम्ने मतिसागराय ।
तां किङ्किणीं पाणिगतां विधाय शिक्षां ददौ राजसुतः स एवम् ॥१६०॥
ममोपनेया भवता प्रियायाः पार्श्वस्थितस्येयमनर्घ्यरत्ना ।
इतीरयित्वा गतवांस्तदीयं सौधं समं तेन ससंमदेन ॥ १६१ ॥
तया समं सारिभिरुग्रसारः प्रचक्रमे क्रीडितुमेष वीरः ।
अभाणि भर्ता विजितस्तयाऽयं संचार्यतां कोऽपि पणोऽत्र धीमन् ! १६२
विज्ञाय कौमारमतं स विज्ञस्तां किङ्किणीं मन्त्रिसुतो मुमोच ।
इमां स्वकीयामुपलक्ष्य लक्ष्यां लक्ष्यैरथाऽवादि तया सुदत्या ॥ १६३ ॥
मच्छ्रोणिसूत्रात् पतिता कुतोऽसौ प्रापि त्वया पापविनाकृतेन ?।
अथो कुमारेण जगे मृगाक्षि ! निवेद्यतामित्यपतन् क चैषा ? ॥१६४॥
पपात कुत्रेयमिति स्वतोऽहं न वेद्म्यनाभोगवशादवश्यम् ।
तया विचिन्त्येत्युदिते कुमारः पुनर्जगौ हास्यविभासितौष्ठः ॥ १६५ ॥
नैमित्तिकोऽयं मतिसागरो मे प्रिये ! वयस्यः परिपृच्छ्यतां द्राः ।
अस्या निपातास्पदमात्तलीलमयं विदा प्राप्स्यति भास्वरेण ॥ १६६ ॥
तया जगे तर्हि निवेद्यतां मे पुरस्त्वयैषा पतिता क नाम ? ।

बुद्धा कुमाराशयमाह सोऽपि बुद्धः प्रभाते कथयिष्यतेऽदः ॥ १६७ ॥
पूर्वक्रमेणाऽवनिपालपुत्रः समं स्ववध्वा दिवसेऽपि तत्र ।
विमानमास्थाय समानधामा जिनालयं प्रास्थित तं लयेन ॥ १६८ ॥
तस्यास्तदा वैणिकतां श्रयन्त्याः स्रस्तः सुवर्णाङ्गद एव तत्र ।
क्षिप्रं कुमारेण स किङ्किणीवन् प्रच्छन्नमादीयत कौशलेन ॥ १६९ ॥
विमानमारुह्य तथैव पूर्वक्रमेण ते स्थानमथाऽऽययुः स्वम् ।
प्रातः कुमारः सुहृदे समर्प्य स्वर्णाङ्गदं तद्भवनं समागात् ॥ १७० ॥
भयात् तयाऽप्रच्छ्यथ मन्त्रिपुत्रस्तत्किङ्किणीवृत्तमवृत्तपूर्वम् ।
स प्राह तत्किङ्किणिकानिपातस्थानं मया नेत्रपथेऽध्यरोपि ॥ १७१ ॥
किञ्चापरं किञ्चन ते प्रनष्टं मयाऽपि तत्स्थानमवेक्षितं च ।
अजानती सा तमपृच्छदेवं तत् किं, स च प्राह भुजाङ्गदस्ते ? ॥१७२॥
अवापि तद् येन ममापि तेन समर्पितं तर्पितकोविदेन ।
इदं निशम्याऽवनिपालकन्या स्वचेतसा चिन्तयति स्म चैवम् ॥१७३॥
ध्यानादयं तद्द्वितयप्रपातस्थानं विजानाति न तद् विचित्रम् ।
चित्रं तदेतद् मम मानसस्य जज्ञेऽपि यद् द्वैतमिदं करस्थम् ॥१७४॥
तदत्र केनापि हि कारणेन भाव्यं ध्रुवं सांप्रतमन्यथा न ।
अदृश्यताप्राप्तिमृते तु तत्र स्वयं समायाति कथं प्रियोऽपि ?॥ १७५ ॥
दिनं द्वितीयं समुपैति चात्र विसिन्ननेत्रप्रिय एष एव ।
जडाशयानामपि तद् विनेया हहा! भविष्यामि निरुत्तराऽहम् ॥१७६॥
चिरं विचिन्त्येति नरेन्द्रपुत्री प्रोचे प्रिय ! क्वास्ति स बाहुरक्षः ? ।
आदेशतस्तस्य स मन्त्रिपुत्रः समर्पयामास तमेव तस्यै ॥ १७७ ॥
अवादि भूपालसुतेन भूयः क कान्तिकान्ते ! पतितस्तवायम् ? ।
तयाऽभ्यधायि स्वयमेव चास्य पातं न जानाति किमार्यपुत्रः ? ॥१७८॥
जानामि नाहं मम धापरेण त्वद्बाहुरक्षश्च समर्पितोऽयम् ।
इतीरयन्तं तमुवाच साऽपि प्रियोत्तरेणाऽलमनुत्तरेण ॥ १७९ ॥
त्वया यदि स्वेन युगं तदाऽऽप्तं ममाङ्गदः किङ्किणिका च सन् सन् ।
अथापरेण प्रतिपादितं ते तदा ममाऽन्नावपि नास्ति शुद्धिः ॥ १८० ॥
इति प्रकाश्यैवमवाप्सुरी सा द्वेधा विवेकापगमाद् बभूव ।
अथावनीवासवनन्दनमां प्रसाद्य वाक्यैर्मधुरैस्ततोऽगात् ॥ १८१ ॥

स्नानाशनादीनि वितत्य कृत्यान्ययं तथैवेत्य पुनर्निशायाम् ।
इमां समालोकत हा ! विलक्षां प्रेष्याद्वयेनेति कथाप्रसक्ताम् ॥ १८२॥
अहं हले ! किं विदधेऽतिमन्दभाग्योदयाऽनेन विधापिता यत् ।
एतं कनीत्वे शपथं कथञ्चिद् विद्याधरेन्द्रेण दुराशयेन ॥ १८३ ॥
ममानिदेशेन कदाचनाऽपि काम्यो भवत्या न निजोऽपि भर्ता ।
भयं दधत्या मयकाऽपि तस्मादिदं वचः स्वीकृतमल्पबुद्ध्या ॥ १८४ ॥
प्राणप्रियोऽयं मम चाहमस्य प्राणप्रिया रूपगुणानुरूपा ।
अवैमि तन्नेदमहं यदस्य जय्योऽस्ति वा नैव स खेचरेन्द्रः ॥ १८५ ॥
यद्यार्यपुत्रस्य भवेत् स जय्यो मनोरथास्तद् मम पूरिताः स्युः ।
अथाऽन्यथा दैवमिदं विधत्ते तद् व्योमपुष्पायितमेव भूयात् ॥ १८६ ॥
इत्यादिकं तां पुनरुक्तयन्तीं प्रेष्याऽब्रवीत् स्वाभिमतं हितं च ।
गृहाधिदेवीव गृहेऽद्य तिष्ठ त्वं स्वामिनीहैमि विशिष्य तत्र ॥ १८७ ॥
त्वत्स्वामिनी किं न समागताऽद्येत्येवं यदि प्रक्ष्यति मां स खेटः ? ।
तदा तदग्रे विदधे पुराऽहमभ्युत्तरं ते वपुषः सरुक्त्वम् ? ॥१८८॥
प्रकुर्वती त्वेवमहं तदीयं ज्ञास्याम्यभिप्रायमपि प्रकृत्या ।
ईदृक् तु युक्तं विनिशम्य सम्यक् सा राजकन्या दिशति स्म तां च॥१८९॥
अथ क्षणात् तद्विहिते विमाने समारुरोह प्रयता भुजिष्या ।
मारोहकारी स कुमार एव तस्यैकदेशं स तथैव भेजे ॥ १९० ॥
प्रेष्यां समीक्ष्योपगतां स तत्र विद्याधरोऽपृच्छदतुच्छदर्पः ।
न स्वामिनी ते कथमागताऽद्य श्रुत्वेति सोवाच वचस्विनी तम् ?॥१९१॥
न स्वामिनी स्वामिसमीपमागाद् यदद्य तद्वर्ष्मणि पाटवं न ।
भ्रूभङ्गभीमं विदधन् क्रुधाऽऽस्यं ततो बभाषे स च खेचरेन्द्रः ॥१९२॥
भोः खेचराः ! यूयमगण्यपुण्या युगादिनाथस्य जिनेश्वरस्य ।
स्नानं विधद्ध्वं त्वहमद्य तस्या द्वेधाऽपि मान्द्यापगमं करोमि॥१९३॥
प्रेष्यां विकृष्य स्वकरेण वेण्या बभाण खेटः स रुषाऽरुणाक्षः ।
निर्वातु पूर्वं मम रोषवह्निस्तवाऽसृजा दासि ! विनाशितायाः ॥ १९४ ॥
सा धैर्यमालम्ब्य जगौ विधेहि तवोचितं यद् रुचितं च यत् ते ।
अस्मादृशां स्तोकमिदं न किं वा युष्मादृशोपासनलालसानाम् ? ॥१९५॥
स चाब्रवीत् तां महिले ! किमेतद् ब्रवीषि कालप्रतिमस्य मेऽग्रे ? ।

त्वमिष्टदेवं स्मर चैकताना शरण्यमन्यं यदि वा श्रयस्व ॥ १९६ ॥
देवस्य पादान् सततं स्मरामि युगादिनाथस्य न चापरस्य ।
अन्यं शरण्यं न समाश्रयामि मुक्त्वा कुमारं गुणवर्मसंज्ञम् ॥ १९७ ॥
इत्युद्धतां वाचमुदीरयन्तीमिमां स खड्गेन लुनाति यावत् ।
तावत् कुमारोऽयमभूत् पुरस्तात् तस्यैव कृष्टासिरतिप्रकृष्टः ॥ १९८ ॥
एवं बभाषे स च खेचरं तं दोर्दण्डकण्डूमपनेतुमिच्छुः ।
रणेन तेनैव वराक ! गेहेनर्दिन्नरे ! स्त्रीषु पराक्रमस्ते ॥ १९९ ॥
उन्मत्तबालाऽर्भकवृद्धमत्तप्रमत्तरोगार्तनिरायुधानाम् ।
वधाय धावन्ति गृहीतशस्त्रा ये केऽपि तेषां किल जीवितं धिक् ॥२००॥
तदग्रतस्त्वं मम तिष्ठ तिष्ठेत्युदीरयन्तं क्षितिपालपुत्रम् ।
क्षामीं विमुच्यैष समाजगाम पुरः स्वपाणौ निदधत् कृपाणम् ॥२०१॥
ततः सशङ्कं समवेक्षितौ तावेकत्र राशाविव जीवशुक्रौ ।
विद्याधरैरायुधसंविधानैश्चिरं रणं चक्रतुरुग्रबाहू ॥ २०२ ॥
वरिष्यते खेचरराजमेव ध्रुवं जयश्रीरिति खेचराणाम् ।
यावद् गिरः खेऽपि समुद्गमन्ति तावत्कुमारेण शिरोऽस्य लूनम्॥२०३॥
पौरोगवः सूरणकन्दकस्य यथैव खण्डद्वितयं कृपाण्या ।
निशातधारेण तथाऽसिनैव चक्रे कुमारः स च खेचरस्य ॥ २०४ ॥
कुर्वन्ति किं नाम न दुष्कराणि नराः प्रियार्थं विपर्यासपतन्नाः ? ।
रामोऽम्बुधिं किं न बबन्ध सीताकृते, महाभारतमन्यथा किम् ?॥२०५॥
परिच्छदस्तस्य कुमारकस्य तमेव भीतः शरणं प्रपेदे ।
अत्रान्तरे ताः प्रवरा रमण्यस्तिस्रोऽपि तं राजसुतं समेयुः ॥ २०६ ॥
महानुभावोत्तम ! साधु साधु त्वयाऽद्य विद्याधरपाशतोऽस्मान् ।
यद् रक्षिता इत्यधिकं सुताङ्गना भाषितास्तेन कुमारकेण ॥ २०७ ॥
यूयं सुताः कस्य कथं गृहीताः क्षुद्रेण रौद्रेण खगाधमेन ? ।
इदं निवासं यदि वद् समापि महोदरस्येव विसंस्मराय ॥ २०८ ॥
एकाऽवदत् तासु सुविस्मितासु सुताऽस्म्यहं शङ्खपुराधिपस्य ।
श्रीदुर्लभस्याधिकरत्नकुक्षिच्छायाप्रसूता दुर्लभभूमिभर्तुः ॥ २०९ ॥
स्वसेऽस्यपरा सप्तमन्त्रा स्वसेति रत्नावलीति नाम्नी कमलावती तत् ।
अनेन स्वल्पेन सुखेन सुखेनाप्तात्र स्वयं कुट्टिमतोऽपि नीता ॥ २१० ॥

दन्तै रसज्ञामपि खण्डयन्ती मुमूर्षुरेतेन दुरात्मनाऽहम् ।
इत्युद्वपाऽभाणिषि तद् विमुञ्चे त्वां चेत् करोषीदमुदाहृतं मे ॥२११॥
तत्किं मयैवं परिपृष्ट एष प्राह स्म पाणिग्रहणं भवत्या ? ।
विना निदेशं मम नैव कार्य वर्षैर्घनैरप्यतियौवनेऽपि ॥ २१२ ॥
मम प्रसादेन सदा विमानं मानप्रथं वैक्रियकं तवाऽस्तु ।
चैत्ये समागम्यमगम्यशक्तेर्युगादिदेवस्य ममान्तिकेऽत्र ॥ २१३ ॥
तदुक्तमेतत् प्रतिपद्यमाना विमोचिता तेन सुमोचिताऽहम् ।
नैपुण्यमेतेन च वेणुवाद्ये सुशिक्षिता वीक्षितसारमार ! ॥ २१४ ॥
इयन्त्यहानि प्रतिपन्ननिष्ठा कौमारधारिण्यत एव तस्थौ ।
उभे तदन्ये तदनन्तरं स्वं स्वमेवमेवावदतां तदग्रे ॥ २१५ ॥
तिस्रोऽपि तेन प्रहितास्ततस्ता निजे निजे सद्मनि संस्तुतेन ।
स्वयं समारुह्य च तद्विमानं ययौ तया चेटिकया समेतः ॥ २१६ ॥
चेटीमुखात् खेटवधं विबुध्य सेशानकन्याऽपि पतिं बभाण ।
न नाथ ! युक्तं विहितं हितं च यत्तज्जनोऽनर्थनिबन्धनं नौ ॥ २१७ ॥
अवाचि तेनेन्दुमुखि ! प्रियायाः कृते न किं वा क्रियते महद्भिः ? ।
निजं कलत्रं च परस्य वश्यं पराभवो दुःसह एष यस्मात् ॥ २१८ ॥
इत्युज्ज्वलप्रेममनोरमां तामालप्य बालां प्रबलानुरागः ।
निशीथिनीशेषमशेत सत्रा तयैव सुत्रामकलत्रभासा ॥ २१९ ॥
रतश्रमार्तौ भजतः स्म यावद् निद्रासुखस्वादमिमौ प्रहृष्टौ ।
तत्सोदरः खेचर एव तावदुत्क्षिप्य चिक्षेप कुमारमब्धौ ॥ २२० ॥
अवाप्य किञ्चित् फलकं स्वपुण्यफलानुकारं दृढवर्मजन्मा ।
असौ दिनैः सप्तभिरूर्मिनुन्नः पयोनिधेस्तीरमवाप धीरः ॥ २२१ ॥
तं प्राणवृत्तिं मधुरैः फलाद्यैर्जटाधरः कश्चन कारयित्वा ।
विलोकनानन्तरमेव पूज्यनिदेशतः स्वाश्रममानिनाय ॥ २२२ ॥
ईशानचन्द्रस्य नरेश्वरस्य कन्यां स संप्रेक्ष्य तुतोष तत्र ।
असौ नतायाऽथ स सुस्थिताय तद् वृत्तमाख्यद् गुरुरच्छवृत्तः ॥२२३॥
राजाङ्गजाऽऽकर्णय सावधानो दिनादितस्तुर्यदिने विनोदात् ।
वनं प्रयातेन मयेक्षितेयमन्तर्हितेनेति निवेदयन्ती ॥ २२४ ॥
वनान्तदेव्यो भगवत्य एता दिगीश्वरा अप्यपराश्च देव्यः ! ।

दौर्भाग्यवर्णोपचिते ललाटे कृत्वाऽञ्जलिं विज्ञपयामि युष्मान् ॥२२५॥
मत्प्रेयसा तेन कृते ममैव बाढं विमोहं गुरुदुःखजातम्।
किञ्चित् कदाचिन् किल तस्य कार्यं कुत्राऽप्युपाकार्षमहं तु नैव ॥२२६॥
दिनत्रयं नीरनिधेः स तीरे मया समालोकि विलोक्यमूर्तिः ।
ततः परं नैव विना ततस्तं न जीवितं धर्तुमहं क्षमाऽस्मि ॥ २२७ ॥
वियोगदावज्वरपीडिताऽहं तस्यैव तेनैव परित्यजामि ।
प्राणान् निजानित्यभिधाय वृक्षमारुह्य कण्ठे विततान पाशम् ॥२२८॥
एतां तथास्थां समवेक्ष्य वेगादागत्य पार्श्वे दयया परीतः ।
अभाषिषीति प्रकृतिप्रशस्ये ! मा मा कृथाः साहसमाः ! वृथा त्वम् ॥२२९॥
इतो दिनादेव दिने तृतीये भर्ता तवैवात्र समेष्यतीति ।
ज्ञानेन विज्ञाय यथार्थमस्यै न्यवेदयं वेदविचारचारुः ॥ २३० ॥
मदुक्तमेतद् विनिशम्य तस्मान् तरोः समुत्तीर्य विनम्य मेयम् ।
मदाश्रये त्यक्तमदाश्रयेऽस्थाद् मया सहागत्य दिनत्रयं सा ॥ २३१ ॥
विनिःसरन्ती पुनरत्र शक्त्या धृत्वा करेऽस्थाप्यत तापसौघैः ।
यावत् त्वमत्रागम एव भद्रादिदयेति विद्वान् स मुनिर्व्यरंसीत् ॥२३२॥
साऽपि स्ववृत्तं दयितेन पृष्टा शिष्टा यथावृत्तमभाषतैवम् ।
विद्याधरेणाऽहमिलाभृतोऽस्य समुन्नते सानुनि तेन मुक्ता ॥ २३३ ॥
अवातरं तस्य महीधरस्य शृङ्गादहं कान्त ! कथञ्चनाऽपि ।
समागमं चात्र परं भ्रमन्ती शेषं ततस्ते विदितं समस्तम् ॥ २३४ ॥
अथाप्लवन्तौ प्रवितत्य शैलकूलङ्कषावारिणि सत्तरङ्गे ।
माधुर्यधुर्यं च फलादि भुक्त्वा शेषं दिनं निन्यतुरेकचित्तौ ॥ २३५ ॥
एकत्र रम्भानिलये प्रसुप्तौ परस्पराश्लेषपरौ रजन्याम् ।
विद्याधरः सोऽप्यपहृत्य रोषाद् वारांनिधौ निक्षिपति स्म भूयः ॥२३६॥
पाथोनिधे रोधसि पूर्ववत् तौ तत्रैव भूयो मिलितौ कथञ्चित् ।
इदं सनिर्वेदमवोचताऽयं पुरः प्रियाया दृढवर्मसूनुः ॥ २३७ ॥
न भास्वता नैव कलावताऽपि न चाऽपि सूरेण बुधेन नाऽपि ।
अहो ! बलेनापि पुरा कृतं तद् विलङ्घितुं कर्म न शक्यतेऽदः ॥२३८॥
राज्यं क तत् प्राज्यमहीमहेन्द्रशिरःस्रजाऽभ्यर्चितपादपीठम् ? ।
उपर्युपर्यागतिर्पावराणि केमानि दुःखान्यपि नौ महान्ति ? ॥ २३९ ॥

दन्तै रसज्ञामपि खण्डयन्ती मुमूर्पुरेतेन दुरात्मनाऽहम् ।
इत्युद्रुपाऽभाणिपि तद् विमुञ्चे त्वां चेत् करोपीदमुदाहृतं मे ॥२११॥
तत्किं मयैवं परिपृष्ट एप प्राह स्म पाणिग्रहणं भवत्या ? ।
विना निदेशं मम नैव कार्यं वपैर्घनैरप्यतियौवनेऽपि ॥ २१२ ॥
मम प्रसादेस सदा विमानं मानप्रथं वैक्रियकं तवाऽस्तु ।
चैत्ये समागम्यमगम्यशक्तेर्युगादिदेवस्य ममान्तिकेऽत्र ॥ २१३ ॥
तदुक्तमेतत् प्रतिपद्यमाना विमोचिता तेन सुमोचिताऽहम् ।
नैपुण्यमेतेन च वेणुवाद्ये सुशिक्षिता वीक्षितसारसार ! ॥ २१४ ॥
इयन्त्यहानि प्रतिपन्ननिष्ठा कौमारधारिण्यत एव तस्थौ ।
उभे तदन्ये तदनन्तरं स्वं स्वमेवमेवावदतां तदग्रे ॥ २१५ ॥
तिस्रोऽपि तेन प्रहितास्ततस्ता निजे निजे सद्मनि संस्तुतेन ।
स्वयं समारुह्य च तद्विमानं ययौ तया चेटिकया समेतः ॥ २१६ ॥
चेटीमुखात् खेटवधं विबुध्य सैशानकन्याऽपि पतिं बभाण ।
न नाथ ! युक्तं विहितं हितं च यत्तज्जनोऽनर्थनिबन्धनं नौ ॥ २१७ ॥
अवाचि तेनेन्दुमुखि ! प्रियायाः कृते न किं वा क्रियते महद्भिः ? ।
निजं कलत्रं च परस्य वश्यं पराभवो दुःसह एप यस्मात् ॥ २१८ ॥
इत्युज्ज्वलप्रेममनोरमां तामालप्य बालां प्रबलानुरागः ।
निशीथिनीगेपमशेत सत्रा तयैव सुत्रामकलत्रभासा ॥ २१९ ॥
रतश्रमार्तौ भजतः स्म यावद् निद्रासुखस्वादमिमौ प्रहृष्टौ ।
तत्सोदरः खेचर एव तावदुत्क्षिप्य चिक्षेप कुमारमब्धौ ॥ २२० ॥
अवाप्य किञ्चित् फलकं स्वपुण्यफलानुकारं दृढवर्मजन्मा ।
असौ दिनैः सप्तभिरूर्मितुन्नः पयोनिधेस्तीरमवाप धीरः ॥ २२१ ॥
तं प्राणवृत्तिं मधुरैः फलाद्यैर्जटाधरः कश्चन कारयित्वा ।
विलोकनानन्तरमेव पूज्यनिदेशतः स्वाश्रममानिनाय ॥ २२२ ॥
ईशानचन्द्रस्य नरेश्वरस्य कन्यां स संप्रेक्ष्य तुतोप तत्र ।
असै नतायाऽथ स सुस्थिताय तद् वृत्तमाख्यद् गुरुरच्छवृत्तः ॥२२३॥
राजाङ्गजाऽऽकर्णय सावधानो दिनादितस्तुर्यदिने विनोदात् ।
वनं प्रयातेन मयेक्षितेयमन्तर्हितेनेति निवेदयन्ती ॥ २२४ ॥
वनान्तदेव्यो भगवत्य एता दिगीश्वरा अप्यपराश्च देव्यः ! ।

मा प्रेरयामास पुन पुन सा प्रजावती भर्तृवियोगदग्धा ॥ २५४ ॥
नरेन्द्रसूरभ्यधितेदृश मा भूय कथास्तत्प्रतिपादनेन ।
इति प्रणम्र स च त विनीय जिनीतविज्ञप्रवरो मुमोच ॥ २५५ ॥
तौ जम्पती तापसचक्रवर्ती मुमोच नदिष्टपुरोपकण्ठे ।
अतिष्ठता तौ कमनीयनाह्योद्याने क्षण वृक्षदिदृक्षयेव ॥ २५६ ॥
महामुनिश्रावकमध्यसस्थ त तत्र च श्रीगुणरत्नसूरिम् ।
परिस्फुरन्नीगुणरत्नराशिरत्नाकर सूरिमपश्यता तौ ॥ २५७ ॥
तौ तस्य धर्म दिशतो मुनीश पादारविन्दद्वितय निषेव्य ।
धत्त स्म धर्मकपरागलब्ध्या प्रीति परा षट्पददम्पती व ॥ २५८ ॥
ततस्तदन्ते गुणवर्मणेयमभण्यतैव दयिते ! भवत्या ।
अनित्यतोद्द्योतकर भवस्य नीत वच श्रोत्रपथ यथार्थम् ॥ २५९ ॥
चारित्रपात्रस्य तदस्य कान्ते ! धर्मोपदेष्टु सुगुरो समीपे ।
हित्वाऽधितु त्वा विषयोपसेवामादीयते सम्प्रति देवि ! दीक्षा ॥ २६० ॥
प्रत्याह सा कान्त ! तदेतदुक्त स्थाने त्वया स्थानसमानधाम्ना ।
पर महोन्मादनिदानभूतमद्याऽपि नौ यौवनमस्ति तावत् ॥ २६१ ॥
नैवोपभुक्ता विषया यथेच्छ प्राणप्रियाऽद्यापि निकाममेते ।
न लभ्यते तावदिद कथञ्चित् कीदृग् विवर्तो भविता ह्यमीषाम् ? ॥२६२॥
तज्ज्ञानपात्र परिपृच्छय कञ्चिद् गुरु यथौचित्यमिद विधेयम् ।
निशम्य चैतद् गुणवर्मणाऽपि प्रिया प्रति स्पष्टमिद न्यगादि ॥२६३॥
उन्मादक यौवनमस्ति तावदितीरित यद् न तदेव चारु ।
जितेन्द्रिया सुन्दरि ! यौवनेऽपि विलोक्यमाना बहवोऽपि सन्ति॥२६४॥
वृद्धत्वमाप्याऽजितगोचराश्च स्वमन्वय चाऽपि विगोपयन्ति ।
तत्यौवन नोन्मदतानिदानमक्षाणि सन्तोषपराङ्मुखानि ॥ २६५ ॥
सतोष एव क्रियते महद्भि श्रीनैर्विधातु च न शक्यते स ।
महाशया एव तपासि चक्रु स्वीकृत्य संतोषरसायन यत् ॥ २६६ ॥
ज्ञानी गुरु कश्चन पृच्छयते चेत्तेतद् यदुक्त न वर तदेव ।
धर्मेऽन्तरायाभिधमेव कर्म सजायते सुभ्रु ! यत कथञ्चित् ॥ २६७ ॥
इत्येवमुक्त्वाऽपि विबुध्य तस्या गीर्वाणनिषेधप्रवणाभिसन्धिम् ।
मुक्त्वा यदि शीलरत्नातमरणा सा प्रथमा माऽपि पुर विवेन ॥२६८॥

ततस्तयेशाननरेन्द्रपुत्र्याऽस्य धीरवृत्तानि परःशतानि ।
निदर्शनीकृत्य मनःस्थखेदच्छेदः क्षणेन क्रियते स्म सत्या ॥ २४० ॥
उदेति संपद् महतामवश्यं विपच्च तेषामपि नापरेषाम् ।
इत्यर्थमुद्भावयितुं तदाऽस्य सहस्रधामाऽस्तमियाय सोऽपि ॥ २४१ ॥
प्रभाकरे चास्तमिते तमस्सु समन्ततो विस्तृतिमाश्रितेषु ।
प्राचीप्रतीचीप्रमुखो बुधेन केनाऽपि नालक्षि दिशां विशेषः ॥ २४२ ॥
कलानिधेरभ्युदयो न यावत् कवेर्गुरोर्वा न च तारकस्य ।
सूरस्य यावद् न पुनः प्रकाशस्तावन् तमांसि प्रसरन्तु नाम ॥ २४३ ॥
न वर्णभेदः कचनापि यत्र कनीयसो यत्र गुरोर्न मानः ।
शब्देन यत्रास्ति विशेषबोधस्तमांसि तत्र प्रसरन्ति किं न ? ॥२४४॥
जगत् समस्तं निहतव्यवस्थं प्रसृत्वरैर्वीक्ष्य तमःप्रपञ्चैः ।
राजा ततोऽयं प्रकटीबभूव करान् वितन्वन्नतिमन्दमन्दम् ॥ २४५ ॥
सुधामयूखेऽप्युदिते हिमांशौ यच्चक्रवाकैः स वियोगतापः ।
सुदुःसहः प्राऽऽपि तदत्र हेतुं संभावयामो नियतेर्नियोगम् ॥ २४६ ॥
सुधाकरो हन्त ! करोति चेद् न ज्योत्स्नाप्रसिद्धामृतपानसत्रम् ।
चकोरडिम्भाः कथमाश्रयन्ते तत्पुष्टिमेषां न परं यदिष्टम् ? ॥ २४७ ॥
हंसी समालिङ्गति चक्रवाकं स्वकान्तबुद्ध्या सितपक्षिकान्तम् ।
चक्री पुरस्तादपि राजहंसं नवस्य राज्ञोऽभ्युदये किमन्यत् ? ॥२४८॥
विनोदगोष्ठीमनुभूय वध्वा तया समं निर्दलितप्रमीलः ।
तदा कुमारः स च यावदस्थात् तावत् स खेटः पुनरागमद् द्विट् ॥२४९॥
तेनैव साक्षेपमितीरितोऽसावरे ! प्रमीलापहतस्य मे द्विः ।
तदा त्वयैवापगतं, क गन्ता तत् सांप्रतं तिष्ठ निकृष्ट ! मेऽग्रे ? ॥२५०॥
संतर्जितस्यास्य नृपाङ्गजेन तेनैवमस्त्रं गलितं करस्थम् ।
दृष्ट्वा कुमारोऽपि निरायुधं तं पाणिस्थितं शस्त्रममुञ्चदाशु ॥ २५१ ॥
तमग्रकेशेषु विधृत्य कृष्ट्वा नरेन्द्रसूरित्यवदत् सदर्पम् ।
अरे ! त्वया संप्रति तत् स्ववीर्यं न्यासीकृतं कुत्र हतप्रताप ! ?॥२५२॥
तत् सांप्रतं याहि मयाऽसि मुक्तः पुनः प्रशस्यं न बलं छलेन ।
प्रवर्तते नैव ममैव शस्त्रं निशातमप्यस्त्रविवर्जितेऽदः ॥ २५३ ॥
तं तत्प्रियाऽभाषत कान्दिशीकं केनात्र भूयोऽसि जड ! प्रणुन्नः ? ।

सा प्रेरयामास पुन पुन सा प्रजावती भर्तृवियोगदग्धा ॥ २५४ ॥
नरेन्द्रसूरभ्यधितेदृश मा भूय कथास्तत्प्रतिपादनेन ।
इति प्रणम्र स च त विनीय विनीतविश्वप्रवरो मुमोच ॥ २५५ ॥
तौ जम्पती तापसचक्रवर्ती मुमोच नेदिष्ठपुरोपकण्ठे ।
अतिष्ठता तौ कमनीयशाद्योद्याने क्षण वृक्षदिदृक्षयैव ॥ २५६ ॥
महामुनिश्रावकमध्यसस्थ त तत्र च श्रीगुणरत्नसूरिम् ।
परिस्फुरच्छ्रीगुणरत्नराशिरत्नाकर सूरिमपश्यता तौ ॥ २५७ ॥
तौ तस्य धर्म दिशतो मुनीश पादारविन्दद्वितय निषेव्य ।
धत्त स्म धर्मैकपरागलब्ध्या प्रीतिं परा षट्पददम्पती व ॥ २५८ ॥
ततस्तदन्ते गुणवर्मणेयमभण्यतैव दयिते ! भवत्या ।
अनित्यतोद्द्योतकर भवस्य नीत वच श्रोत्रपथ यथार्थम् ॥ २५९ ॥
चारित्रपात्रस्य तदस्य कान्ते ! धर्मोपदेष्टु सुगुरो समीपे ।
हित्वाऽधिप सा विषयोपसेवामादीयते सप्रति देवि ! दीक्षा ॥ २६० ॥
प्रत्याह सा कान्त ! तदेतदुक्त स्थाने त्वया स्थानसमानधाम्ना ।
पर महोन्मादनिदानभूतमथाऽपि नौ यौवनमस्ति तावत् ॥ २६१ ॥
नैवोपभुक्ता विषया यथेच्छ प्राणप्रियाऽथापि निकाममेते ।
न लक्ष्यते तावदिद कथश्चित् कीदृग् विवर्तो भविता ह्यमीषाम्? ॥२६२॥
तज्ज्ञानपात्र परिपृच्छय कञ्चिद् गुरु यथोचितमिद विधेयम् ।
निशम्य चैतद् गुणवर्मणाऽपि प्रिया प्रति स्पष्टमिद न्यगादि ॥२६३॥
उन्मादक यौवनमस्ति तावदितीरित यद् न तदेव चारु ।
जितेन्द्रिया सुन्दरि ! यौवनेऽपि विलोक्यमाना बहवोऽपि सन्ति॥२६४॥
वृद्धत्वमाप्याऽजितगोचराश्च स्वमन्वय चाऽपि विगोपयन्ति ।
तद्यौवन नोन्मदतानिदानमक्षाणि सन्तोषपराङ्मुखानि ॥ २६५ ॥
सतोष एव क्रियते महद्भि र्हीनैर्विधातु च न शक्यते स ।
महाशया एव तपासि चक्रु स्वीकृत्य संतोषरसायन य ॥ २६६ ॥
ज्ञानी गुरु प्रश्न पृच्छयते चेत्येतद् यदुक्त न वर तदेव ।
धर्मेऽन्तरायाभिधमेव कर्म सजायते शुभ्रु ! यत कथञ्चित् ॥ २६७ ॥
इत्येवमुक्ताऽपि विबुध्य तस्या दीक्षानिषेधप्रवणाभिसन्धिम् ।
मुक्त्वा यति शीलगुणात्मरक्षा ता प्रेयसीं सोऽपि पुर विवेश ॥२६८॥

स द्यूतकृद् द्यूतजयेन रायं किञ्चित् समादाय परं प्रदाय ।
पौरोगवस्यापण एव गत्वा व्यदीधपत् वण्डकमण्डकान्नम् ॥२६९॥
निधाय तत्पत्रपुटे पवित्रे संगृह्य गत्वा विपिनान्तरे ताम् ।
अम्भोजनेत्रां लघु भोजयित्वा भुङ्क्ते स्म शेषं स्वयमेव धीरः ॥२७०॥
भुजिक्रियानन्तरमेष वृक्षतले निविष्टो निजवल्लभां ताम् ।
दृष्ट्वा मनाक् शून्यहृदं स्वचित्त इदं स दध्यौ विगलत्समाधिः॥२७१॥
किं दुःखितेयं निजबान्धवानां सस्मार किंवाऽपरमेव किञ्चित् ? ।
ततः स चैवं प्रविचिन्त्य राजाङ्गजोऽभ्युदस्थाद् गजराजशौर्यः ॥२७२॥
विलोकयामास महीन्द्रपुत्रस्तत्र स्थितस्तां चकितैणनेत्राम् ।
महीतले मर्त्ययुगं लिखन्तीं निरीक्षमाणां परितोऽपि काष्ठाः ॥२७३॥
निःश्वासधारामतिदीर्घदीर्घां विमुञ्चतीं मृत्युमिव प्रयान्तीम् ।
कपोलदेशे विधृताग्न्यपाणिं वितन्वतीं पञ्चमहुङ्कृतिं च ॥ २७४ ॥
(युग्मम्)

ईदृग्व्यवस्थां समवेक्ष्य चैतां दध्यौ स्वचित्ते नृपतेस्तनूजः ।
कन्दर्पबाणैरिव पीडितेयं किं लक्ष्यते लक्षविकारलक्ष्या ? ॥ २७५ ॥
मया समं वा विरहं किमेषा सोढुं क्षणं न क्षमते मृगाक्षी ? ।
स्नेहेऽसमाने हि विजृम्भमाणे स्वल्पो वियोगोऽपि सुदुःसहः स्यात्॥२७६॥

तन्मां वीक्ष्य यदीयमाकुलमनाः संपत्स्यते तद् ध्रुवं
तीव्रौर्वानलवद् ममैव विरहः संतापयत्येतकाम् ।
आगच्छन्तमवेक्ष्य मां यदि पुनः कर्ताऽवहित्थां स्वयं
नूनं क्वापि नरान्तरे तदियमभ्यासक्तिमालम्बते ॥ २७७ ॥
ध्यात्वैवं दृढवर्मराजतनयस्तस्यै स्वमालोकयन्
साऽपि प्रेक्ष्य तमापतन्तमकरोदाकारसंगोपनम् ।
स प्रोचे निजबान्धवाः स्मृतिपथं किं देवि ! नीतास्त्वया ?
संप्रत्यङ्ग ! निरीक्ष्यसे प्रियतमे ! प्रोद्विग्नचित्तेव यत् ॥२७८॥
दम्भारम्भपुरःसरं नृपसुतः प्रोचे तया सादरं
प्राणेशे त्वयि देव ! नन्दति चिरं किं बन्धुवर्गेण मे ? ।
एतत् तद्वचनं निशम्य स पतिः संचिन्तयामासिवान्

१ कान्दविकः । २ आकारगोपनम् ।

षण्ठस्य ध्रुवमेषिका प्रवदति स्वान्त स्थित नाऽऽत्मन ॥२७९॥
दम्पत्योरतिरागसागररसप्रोन्मग्नमानात्मनो
प्रेमाऽऽधिक्यसमन्वयेऽपि चतुता नैवौचितीमञ्चति ।
मत्वैव तदुपान्तत स च समुत्थायाऽवनीन्द्रात्मज
पश्यन् विप्जगय वन तरुचित केनाऽपि पुसोदित ॥ २८० ॥
श्रीमत्कुमार ! गुणचन्द्रकुमारसिंह
क्रीडन् वने किमधुनाऽपि स विद्यतेऽत्र ? ।
प्रत्याह त स च स कोऽनु कुमारसिंहो
भद्र ! त्वया शुभधिया परिपृच्छ्यते य ? ॥ २८१ ॥
व्याचष्ट सोऽत्र नगरे नगराजसार-
ईशानचन्द्र इति भूमिपतिर्बभूव ।
तन्नन्दन पृथुमतिर्गुणचन्द्रनामा
कामाऽऽकृतिर्विजितधामनिधि स्वधाम्ना ॥ २८२ ॥
प्रस्थाप्य कुत्रचन कर्मणि मामितोऽत्रो-
द्याने समैन् स परिमेयपदातिपार्श्व ।
क्रीडारसप्रचयसचितमानमाना
दृष्टा स्थिति क्वचन नैव कुमारकाणाम ॥ २८३ ॥
तदनु स गुणवर्मा व्याजहृद् व्याजहार
भवनमधिगतेष्ट प्राप स ध्वस्तताप ।
पुनरपि स बभाषे तस्य सा सङ्गता किं
कुसुमविशिखकान्तारूपसर्वाधिरूपा ? ॥ २८४ ॥
अवददिति कुमार केवल सङ्गता नो
अगमदमरागा तेन सा सार्धमेव ।
समभवदतिवेल भद्र ! भद्र तदेतद्
यदियमुदितभाग्या सङ्गता तेन साकम ॥ २८५ ॥
यद्दर्शने प्रथम एव तयोरतुल्य
प्रेमा स कोऽप्युदभवद् वचनातिगोऽत्र ।
जन्मान्तराभवभवत्र एव यद्वा
स्त्रीपुसयो प्रभवति प्रियताऽतिरस ॥ २८६ ॥


इत्युक्त्वा तत्र याते नरपतितनयश्चित्तवृत्त्येति दध्यौ
केचिल्लीलावतीनां प्रविलसितमहो ! वेदितुं नैव शक्ताः ।
सौदामन्याऽतिलोलं प्रविरचितमिदं कामिनीनां मनः किं ?
सन्ध्यारागेण किं वा सुरपतिधनुषा स्वित् किमेतद् विधात्रा ? ॥२८७॥
मन्त्रः कोऽपि स नास्ति साध्यविषयो नाप्यौषधं तादृशं
यन्त्रं किञ्चन नैव तन्त्रमपि तद् नैवास्ति लोकत्रये ।
वाताऽऽन्दोलितसौधकेतुवसनप्रान्ताच्चलाचञ्चलं
वामानां मन एव येन नियतं केनाऽपि तद् यन्त्र्यते ॥२८८॥
यत्प्रेमप्रतिबन्धतोऽपि सुगुरोः सङ्गो विमुक्तो मया
साऽपीदृश्यभवद् विवेकविकला हा ! वेधसश्चेष्टितम् ।
एतन्मातुलपत्तनं तदपि तन्नेदिष्ठमाकर्ण्यते
तत्रैतां प्रविमुच्य जन्म सफलं कुर्वे स्वकीयं पुरा ॥ २८९ ॥
संचिन्त्येत्यधिगम्य तत् पुरमसौ बध्वा तयाऽमा क्रमात्
तस्या मातुलमन्दिरान्तरविशद् दौवारिकाऽऽवेदितः ।
आनन्दं कलयन् स चापि विदधे संलाप्य जाम्यङ्गजा-
जामात्रोरनयोर्महेन महनं रैसौधपट्टांशुकैः ॥ २९० ॥
याभिन्यामपरेद्युरात्मदयितां सुप्तां विमुच्यैव तां
गत्वा सद्गुरुसन्निधौ शुभमना दीक्षां समादाय सः ।
चारित्रं प्रतिपाल्य चारु निरतीचारं निजायुःक्षये
संप्राप्याऽनशनं विपद्य सपदि प्रापन् पदं स्वःसदाम् ॥२९१॥
च्युत्वा ततस्त्रिदिवतोऽप्युपलभ्य जन्म
मानुष्यकं शुचिकुलान्वयशीलशालि ।
दीक्षां प्रपद्य परितप्य तपांसि नित्यं
विज्ञानमाप्य परमं पदमाप्स्यते सः ॥ २९२ ॥
इतश्च गतनिद्रया कनकवत्यभिख्याभृता
तया स न समीक्षितः पतिरधिश्रितव्याजया ।
व्यधायि परिदेवनं, स विनिशम्य यद् मातुलः
ससंभ्रममुपागतः प्रवदति स्म चैतद् वचः ॥ २९३ ॥
मा रोदीस्तनये ! गतः स भविता कुत्राऽपि कार्यान्तरे

जामाता किल तस्य दैवमपि नानिष्टं विधातुं क्षमम् ।
अग्नेरेव नरैर्विशोध्य वसुधामानाययिष्यामि तं
तत् स्वस्था भव पुण्यमाचर परं दुःखं न धार्यं त्वया ॥२९४॥
प्रोच्येति प्रहितैर्नरैः स परितो व्यालोकि नालोकितः
कुत्राऽपि प्रतिचत्वरं प्रतिपुरं संशोधयद्भिर्भृशम् ।
आगत्याऽपि निवेदितं नरपतेस्तेनाऽपि ते शिक्षिता
जामेय्याः पुरतो न केनचिदिदं वाच्यं न वाच्यं ततः॥२९५॥
(युग्मम्)

साऽप्यध्यायदयं ध्रुवं मम सकृद् दुश्चेष्टितं जज्ञिवां-
स्तेनैवाहमभूवमस्य मनसो वैराङ्गिकी निश्चितम् ।
प्राप प्रागपि सोऽपि सद्गुरुगिरा संसारवैराग्यकं
संप्रत्येष विशेषतो मम पुनर्दुर्वृत्तसंप्रेक्षणात् ॥ २९६ ॥
तद् नूनं विदुषाऽमुनोत्तममुनेरादीयते स्म व्रतं
स्वार्थं तद् वितनोम्यहं किमधुना व्यर्थैर्विकल्पैरिमैः ? ।
ध्यात्वैवं परिवञ्च्य मातुलनृपं दुष्टाऽऽशया तत्क्षणात्
गत्वा सा गुणचन्द्रमेव दयितीचक्रेऽतिचन्द्रं रुचा ॥ २९७ ॥
तदासक्तस्वान्तं स्वपतिमवलोक्य प्रियतमा-
स्तदीया विभ्राणाः प्रचुरतरखेदं च हृदये ।
मिलित्वा निःशेषाः समवधृतदुःखैकविरहा
रहोदेशेऽन्योऽन्यं प्रणिजगदुरेवन् स्फुटतरम् ॥ २९८ ॥
ज्वालाजालकरालपावकमहाकुण्डे प्रवेशो वरं
कल्लोलस्फुटनक्रचक्रविषमे पातः पयोधौ वरम् ।
क्रुद्धाऽऽशीविषभीष्मवक्त्रकुहरे क्षिप्तः करो वा वरं
दुःखं मानविनाशकारि न परं नार्याः सपत्नीभवम् ॥ २९९ ॥
यावज्जीवति चैषिका विजयते तावत् पुनः कार्मणं
तस्मिन् जीवति भर्तृमङ्गमसुखं नास्माकमस्ति ध्रुवम् ।
रूपं तेन विनाऽपि जीवितमिदं व्यर्थं विचार्येति ता-
स्तस्यै क्ष्वेडमदीदपन्नथ मृता ध्यानेन रौद्रेण सा ॥ ३०० ॥
संजज्ञे दुरितैश्चतुर्थनरके सा नारकी प्राघृत-


रुद्ध्वात्वाऽपि ततो भ्रमिष्यति भवेऽमुत्राऽपि दुःखाकुले।
मत्वैवं विषयानुपक्तमनसां दुःखं च सार्वत्रिकं
तत् त्वं श्रीकुरुचन्द्र! तान् स्ववशयन् कल्याणमालां श्रय॥३०१॥
आसीच्छ्रीगुरुगच्छमौलिमुकुटश्रीमानभद्रप्रभोः
पट्टे श्रीगुणभद्रसूरिसुगुरुश्चारित्रभाजां गुरुः।
तच्छिष्येण कृतेऽत्र षोडशजिनाधीशस्य वृत्ते महा-
काव्ये श्रीमुनिभद्रसूरिकविना सर्गोऽगमत् षोडशः॥ ३०२॥

इति श्रीशान्तिनाथचरिते षोडशः सर्गः समाप्तः॥



अर्हम्

अथ सप्तदशः सर्गः।



वाणी श्रीशान्तिनाथस्य भवतां भवताद् मुदे।
चतुर्गतिमहातापशमनाऽमृतदीर्घिका॥ १॥
कषाया ज्ञानमार्तण्डतिरोधाननवाम्बुदाः।
चत्वारः क्रोधमानाद्या दुर्गतेः सहचारिणः॥ २॥
कषायैः सह चेद् योगस्तत् तपोनियमैरलम्।
तैः समं यदि नो योगस्तत् तपोनियमैरलम्॥ ३॥
अज्ञानापहृतस्वान्तः कषायान् यो निषेवते।
इहामुत्र स दुःखी स्यादग्निशर्मा द्विजो यथा॥ ४॥
अस्तीह भरतक्षेत्रे काशीदेशप्रकाशकृत्।
शस्यैर्घैरभिरामश्रीर्ग्रामः श्रीपुण्ड्रवर्धनः॥ ५॥
यज्ञदत्ताभिधस्तत्र विप्रो यज्ञक्रियापरः।
सोमास्याऽभिधया सोमा समजायत तत्प्रिया॥ ६॥
अग्निशर्मा तयोः पुत्रः कलाकौशलपेशलः।
विद्युत्प्रभां स सत्याख्यां परिणिन्ये पितुर्गिरा॥ ७॥
यज्ञदत्तस्य तस्यास्ति धेनुश्चन्द्राऽभिधा गृहे।
कुण्डोध्नीमग्निशर्मा तां दोग्धि प्रत्यहमेव सः॥ ८॥

अपरेद्युस्तया धेन्वा किञ्चित् पीडितया स्तने ।
स्वयमेव दुहन्नंह्रिप्रहारेण स ताडितः ॥ ९ ॥
पात्री पाणिस्थिता तेन भग्ना पेयूपसंभृता ।
पातेन स च दूनश्च कोपं प्राप द्विजाधमः ॥ १० ॥
उच्चैर्लकुटमुत्पाट्य कुट्टयामास सोऽपि ताम् ।
तत्प्रहारव्यथाऽऽक्रान्ता यथा सा न्यपतत् क्षितौ ॥ ११ ॥
किमेतदिति संभ्रान्ता तद्वधूरेत्य तं जगौ ? ।
विना विशेषविज्ञानं पशूनां पशुतोच्यते ॥ १२ ॥
तत्सत्त्वमात्रसंप्राप्त्यै जघान त्वामियं प्रिय ! ।
तत्सत्त्वमात्रसंप्राप्त्यै त्वया किमियमाहता ? ॥ १३ ॥
इत्याद्यभिदधानां तां पूर्णगर्भां रुपाऽरुणः ।
स तेन लकुटेनाऽहन् सगर्भा सा यथाऽमृत ॥ १४ ॥
दुःश्रापं ददतौ मातापितरौ तेन मारितौ ।
क्रोधान्धो यदि वा मर्त्यश्चण्डालाद् न विशिष्यते ॥ १५ ॥
श्रुत्वा दुर्वृत्तमीदृक्षं नागराः सहसाऽऽगमन् ।
दृष्ट्वा च तादृशं कर्म धिक्कारमुखराननाः ॥ १६ ॥
ब्रह्मस्त्रीभ्रूणगोहत्यापातकानि चकार यत् ।
अप्रेक्ष्योऽयमवाच्योऽयं सर्वथा तेन कर्मणा ॥ १७ ॥
इत्याद्यन्योऽन्यमालापं पौरेषु विदधत्स्वपि ।
तथैव दण्डमुद्यम्य सोऽधावत् कोपकम्पनः ॥ १८ ॥
कारागारे परिक्षिप्तः स धृत्वा राजपूरुषैः ।
वेदना विविधास्तत्र विपह्याऽऽयुःक्षये मृतः ॥ १९ ॥
नरकं सप्तमं प्राप्तः स सेहे दुःसहा व्यथाः ।
समाप्याऽऽयुस्ततो जज्ञे मीनः स च महाम्बुधौ ॥ २० ॥
विपद्य कथमप्येप निरयं प्राप पञ्चमम् ।
जातो गङ्गाह्रदे मत्स्यस्ततोऽघानि स धीवरैः ॥ २१ ॥
विहगोऽभूत् ततोऽमारि पाशिकैः पाशसंयतः ।
सोऽकामनिर्जरायोगादेवं पातकमक्षिपत् ॥ २२ ॥
विप्रोऽभवत् पुनः सोऽपि कुञ्जरावर्तपत्तने ।

वैराग्याद् विषयोद्विग्नस्ततस्तापसता ल्लौ ॥ २३ ॥
अज्ञानादेप सचित्य दुस्तपानि तपास्यपि ।
आयु क्षये पुनर्मृत्वा वभूव व्यन्तरामर ॥ २४ ॥
सोऽथ च्युत्वा महानन्दसपूर्णाऽखिलनागरे ।
महानन्दपुरे श्रीमत्सोमविश्वम्भरापते ॥ २५ ॥
नन्दाकुक्षिभवो मानराजाख्यो नन्दनोऽजनि ।
धात्रीभिर्यो वहूक्तोऽपि कस्यचिद् नाऽनमच्छिर ॥ २६ ॥
(युग्मम्)
वाल्यादपि कला काऽपि भेजे मानोद्धत न तम् ।
सतापकारिण सूरमिव काव्यगुणद्विपम् ॥ २७ ॥
न देवता गुरून् नाऽपि यौवनेऽपि ननाम स ।
कुशीलताकलापेन स्तब्धेनेव विनिर्मित ॥ २८ ॥
श्रीसोमेन महीन्द्रेण तारुण्योल्लसदङ्गक ।
समग्रगुणसपन्ना कन्या स परिणायित ॥ २९ ॥
अन्येद्युर्वासमध्यस्थ तत्प्रिया तमभाषत ।
किञ्चिदाख्याहि विज्ञान कान्त ! प्रश्नोत्तरादिकम् ॥ ३० ॥
दुर्विदग्धा दधालेपाऽसर्व गर्व स्वरूपत ।
दुष्टा ममोपहासाय यदेव परिपृच्छति ॥ ३१ ॥
किं तया क्रियते वध्वा या मान मानयत्यलम् ? ।
मा भूद् रसवती साऽपि या लावण्यमयी किल ॥ ३२ ॥
विचिन्त्येदमवज्ञाय तेन विज्ञाऽपि सोज्झिता ।
स दृष्ट्याऽपीक्षते नैता सलापस्य कथैव का ? ॥ ३३ ॥
रुष्टोऽयमिति विज्ञाय वाणिन्या स तयाऽन्यदा ।
अभाणि प्रिय ! नो कश्चिद् मन्तुस्त्वयि मया कृत ॥ ३४ ॥
तदीश ! मयि दास्या किमप्रसादस्तवेदृश ? ।
प्रसन्ने भर्तरि स्त्रीणा सप्रसाद हि मानसम् ॥ ३५ ॥
एव सानुनय प्रोक्तोऽप्येप ता न यदाऽवदत् ।
तया तदा पदाब्जान्त शिरो धृत्वा स मानित ॥ ३६ ॥
पाण्डित्यदर्पसपूर्णे ! पापे ! मद्दृक्पथ त्यज ।

इत्याद्युक्त्वा विरुद्ध स सौधात् ता निरकासयत् ॥ ३७ ॥
सैव तेन पराभूता भूतार्तेव केवलम् ।
सौधाद् बहि स्थिता वार्ता सप्राप्यैवमवोचत ॥ ३८ ॥
देवा देव्यश्च शृण्वन्तु ममैता गिरमुच्चके ।
नाऽपराध विजानामि येन रुष्ट स मे प्रिय ॥ ३९ ॥
अर्धचन्द्रप्रदानेन तेन निष्कासिता गृहात् ।
न क्षमे जीवित धर्तुं विना तेन ततो म्रिये ॥ ४० ॥
अमुत्राऽपि भवे भूयाद् भर्ताऽय व प्रसादत ।
इत्युदीर्य जले झम्पा साऽदादमृत च क्षणात् ॥ ४१ ॥
तस्या अनु समायात पादपान्तरितोऽखिलम् ।
निशम्य ता न मानात् सोऽरक्षत् तस्मादपायत ॥ ४२ ॥
आस्थानमास्थितेऽन्येद्यु क्ष्मापे वार्ताप्रसङ्गत ।
अवादि सिंहसामन्तेनेदृश वचन स्वयम् ॥ ४३ ॥
राजान सन्ति राजेन्द्र ! बहवोऽपि महत्तमा ।
तथाऽपि वप्रराजस्य केऽपि लोकोत्तरा गुणा ॥ ४४ ॥
राजसिंहासनासन्न स मानी राजनन्दन ।
क्रुद्धो जगौ ममाग्रे रे ! किं वर्णयसि त शठ ! ? ॥ ४५ ॥
प्राञ्जल प्राञ्जलीभूय सोऽजल्पत् किं प्रकुप्यसि ? ।
देव ! नो मत्सरो युक्त सता साधुप्रशसने ॥ ४६ ॥
अन्येशान्त पुनर्मन्त्री सुबुद्धिस्तमथाऽभ्यधात् ।
निरूपिते स्वरूपे किं कुमार ! कुपितोऽभव ? ॥ ४७ ॥
तस्योदितमिद श्रुत्वा भूय स कुपितो भृशम् ।
मण्डलाग्र समाकृष्य मन्त्रिण हन्तुमुत्थित ॥ ४८ ॥
क्रोधदग्धविवेकोऽयममात्य मा निहन्त्विति ।
अधिक्षिप्तन्तरे राज्ञा तन्निषेधनिबद्धधी ॥ ४९ ॥
धूर्तस्य क्रूरकर्माऽय पक्ष कक्षीकरोति यत् ।
तेन राड् मे निहन्तव्य इति ध्यात्वा स त न्यहन् ॥ ५० ॥
तदालोकेन धिक्कार कुर्वाणान् मण्डलेश्वरान् ।
हन्तु धावन्नय बद्ध खड्गमाच्छिद्य तैर्बलात् ॥ ५१ ॥

रदैः स रसनां छित्त्वा मानी निधनितां गतः ।
नारको नरके षष्ठे समभूद् भूरिदुःखभृत् ॥ ५२ ॥
उद्धृत्तः स ततो जज्ञेऽञ्जनशैले महाकिरिः ।
अञ्जनाद्रिरिवाऽऽसङ्गात् श्यामश्यामवपुर्द्युतिः ॥ ५३ ॥
क्रोडीभिः स च चिक्रीड तारुण्ये काननेऽभितः ।
मुस्तास्तम्बकदम्बानां खण्डैराहारमाचरन् ॥ ५४ ॥
नृसिंहविक्रमः सिंहध्वजो नाम महीपतिः ।
तमद्रिमाप पापर्द्धयै पापव्यसनलालसः ॥ ५५ ॥
चलितः संमुखं तस्याऽभिमानेन स पोत्र्यपि ।
महासूरो रणाऽवन्यां वन्दिनेव विवर्णितः ॥ ५६ ॥
एकेन शल्यघातेन तेन व्यापादितोऽथ सः ।
मृत्वा तत्रैव संजज्ञे हस्ती शैल इवापरः ॥ ५७ ॥
करिणीभिः समं स्वैरं रममाणः स यौवने ।
समयं गमयन् प्राप दशां षष्ठीमयं द्विपः ॥ ५८ ॥
एष ग्रीष्मेऽन्यदा भीष्मे वर्धमानमहातपे ।
तृषाशुष्यद्गलोऽविक्षत् पल्वले जलपीतये ॥ ५९ ॥
मग्नो जम्बालजालान्तर्जले निर्गन्तुमक्षमः ।
पञ्चतां सप्तभिर्घस्रैः प्राप मध्यस्थभावतः ॥ ६० ॥
विपद्य भरतक्षेत्रे शालिग्रामे मनोरमे ।
नन्दनश्रेष्ठिनो भार्यासुनन्दाकुक्षिसम्भवः ॥ ६१ ॥
नन्दनः समभूद् नाम्ना मायादेव इति श्रुतः ।
मायैव दूषणं तस्य क्षारता जलधेरिव ॥ ६२ ॥

(युग्मम्)

वणिग्देवप्रसादस्य भार्यादेवमतीसुताम् ।
यौवने नन्दिनीं नाम स पित्रा परिणायितः ॥ ६३ ॥
पितर्युपरते हट्टे निषीदन्नेष नित्यशः ।
समग्रं वञ्चयामास लोकं बालाऽबलादिकम् ॥ ६४ ॥
सरलः सोमदेवोऽस्य वयस्यः समभूद् वणिक् ।
अन्यदा मायिना तेन रहस्येवमवादि सः ॥ ६५ ॥

आकस्मिकी विपद् मित्र ! प्राणिनामुपजायते ।
योगक्षेमाय तत् क्वाऽपि द्रव्यं किञ्चिद् निधीयते ॥ ६६ ॥
आपदर्थे धनं रक्षेदिति नीतावपि स्मृतम् ।
सत्यं विधीयते, येन महान्तः शास्त्रवर्त्मगाः ॥ ६७ ॥
युक्तमित्युदिते तेन ग्रामपर्यन्तमेत्य तौ ।
समन्ततः समालोक्य न्यधत्तां स्वं निजं निजम् ॥ ६८ ॥
प्रच्छन्नमन्यदैकाकी गत्वा नन्दनभूर्निशि ।
निधिद्वयं तदुत्खन्य स्वयं स्वगृहमानयत् ॥ ६९ ॥
कियत्यपि गते काले सोमस्तेनाऽभ्यधाय्यथ ।
तद् वित्तं नौ तथैवाऽस्ति किं वाऽऽत्तं केनचित् सखे ! ? ॥७०॥
इत्युपेत्य महाभाग ! तद् भाग्येन निरीक्ष्यते ।
पुण्यार्थयोर्महान्तो हि भेदं किञ्चित् प्रचक्षते ॥ ७१ ॥
प्रतिपद्य वचस्तस्य सोमः सोममुखद्युतिः ।
समं तेनैव तत्रैव गतवान् गतकैतवः ॥ ७२ ॥
रिक्तं तत् स्थानमालोक्य मायादेवो विषादवान् ।
लुठति स्म महीपीठे मुमूर्षुरिव सत्वरम् ॥ ७३ ॥
मूर्च्छामतुच्छामानर्च्छ सान्निपातिकवत् किल ।
हा ! धात्रा वञ्चितोऽस्मीति ताड्यमान इवाऽरटत् ॥ ७४ ॥
वक्षोऽपि ताडयामास मृतापत्य इवाऽधिकम् ।
मनाक् संप्राप्तचैतन्यो विललाप स बालिशः ॥ ७५ ॥
हा देव ! मयका किं तेऽपराद्धं पूर्वजन्मनि ? ।
यद् मया निहितं द्रव्यमन्येन प्राहितं त्वया ॥ ७६ ॥
मुक्त्वा सद्म वहिर्न्यासि योगक्षेमाय यद् मया ।
दैवेनाऽपहृतं तद् मे पूत्कुर्वे कस्य वा पुरः ? ॥ ७७ ॥
इत्यादि रचयन्नेष विलापं छद्मतः कुधीः ।
संबोध्य सोमदेवेन संबोध्य गृहमापितः ॥ ७८ ॥
जन्माऽऽरभ्य स विश्वेषां वञ्चकः स्वस्य वञ्चकः ।
विपद्य स्कन्दरजकनिलये रासभोऽजायत ॥ ७९ ॥
आयुः संक्षिप्य तत्राऽपि भारोद्वहनकर्मणा ।

सा शुनी समभूद् मातुः स्तन्यं लेभे च किञ्चन ॥ ८० ॥
हृडकमरुता मृत्वा शृगाली साऽभवत् ततः ।
पुना रत्नप्रभेलायां नारकः स्वायुषः क्षये ॥ ८१ ॥
तस्मादुद्वृत्य संजज्ञे नगरे गिरिवर्धने ।
वामाऽऽख्यवणिग्भार्याऽनुद्धरीतनयोऽथ सः ॥ ८२ ॥
लोभनन्दाभिधानोऽयं प्रधानो दोपसंग्रहे ।
अभूल्लोभमयो नूनं वार्धिर्वारिमयो यथा ॥ ८३ ॥
यानपात्रं समारुह्य स्वर्णद्वीपं भजामि किम् ? ।
यदि वा रोहणं यामि रत्नसन्दोहरोहणम् ? ॥ ८४ ॥
विशामि विवरे किं वा कल्यं लात्वा कुतश्चन ? ।
किं धातुवादिनः सेवे येन स्याद् मे धनोच्चयः ? ॥ ८५ ॥
तारुण्ये प्रबले येन द्रव्यं न समुपार्जितम् ।
वार्धके स कथङ्कारं सुखमाप्स्यति मन्दधीः ? ॥ ८६ ॥
दोषा गुणा विधीयन्ते पुंसां द्रव्ये सति स्फुटम् ।
यतिष्ये सर्वथा तस्माद् नव्यं द्रव्यमुपार्जितुम् ॥ ८७ ॥
इति संचिन्त्य चित्तान्तः पित्रोराकूतमात्मनः ।
सोऽशंसत् पुत्रवात्सल्यात् तौ प्रोचतुरिदं हितम् ॥ ८८ ॥
आवयोस्तनुजन्मा त्वं खङ्गिशृङ्गमिवैककः ।
अतस्त्वद्विरहं सोढुं नैव वत्स ! क्षमावहे ॥ ८९ ॥
अत्र स्थितोऽपि तद् द्रव्यं वाणिज्यैः समुपार्जय ।
कारयन् दर्शनानन्दमावर्जय मनांसि नौ ॥ ९० ॥
इत्थं ताभ्यां निषिद्धोऽप्यनिवेश्य चलितोऽथ सः ।
गम्भीरसिन्धुरोधःस्थं गम्भीरपुरमासदत् ॥ ९१ ॥
भ्रामं भ्रामं पुरीतः स सांयात्रिकगृहं गतः ।
तत्र सज्जीकृतं पोतं समालोक्य मुदं दधौ ॥ ९२ ॥
पोतं सोऽपि समारुह्य भृत्यभावमधिष्ठितः ।
गुणसागरपोतेशवणिजा सह चेलिवान् ॥ ९३ ॥
कुर्वन्त्यसंस्तुतस्याऽपि विश्वासं येऽत्रिकत्थनाः ।
विशुद्धचेतसः सन्तः प्रशस्यन्ते न ते कथम् ? ॥ ९४ ॥

सुवातप्रेरितं तत्र रत्नद्वीपं ययादयात् ।
श्रुताधिकायसंश्रुत्या तुतोष गुणसागरः ॥ ९५ ॥
उपदाऽऽलोकमात्रेण भूपतिस्तुष्टमानसः ।
शुल्कार्धं व्यमुचत् तस्य सांयात्रिकशिरोमणेः ॥ ९६ ॥
विक्रीताऽऽनीतपण्यः स प्रतिपण्यकृतग्रहः ।
वाहनं वाहनस्वामी प्रैरयत् स्वपुरं प्रति ॥ ९७ ॥
महामूल्येषु रत्नेषु परैर्दृष्टेषु कर्हिचित् ।
भविष्यति ममाऽपायो यज्जनोऽन्यार्थसस्पृहः ॥ ९८ ॥
परार्थवनिताऽऽलोके येषां न गृहयालुता ।
पुंरूपेण जगत्यां ते जिनाः किं नैव दुर्लभाः ? ॥ ९९ ॥
एवं विमृश्य पोतेशो महारत्नानि कानिचित् ।
निर्यामकजनादीनां स प्रच्छन्नमतिक्षिपत् ॥ १०० ॥
तटस्थो लोभनन्दोऽन्तर्धीयमानानि तान्यपि ।
ददर्श दर्शनीयानि तानि चाऽऽदातुमैहत ॥ १०१ ॥
पोतेशे सावधानेऽस्मिंस्तानि लातुमशक्नुवन् ।
तं मारयितुमैच्छन् स लोभः किं न करोति वा ? ॥ १०२ ॥
अन्येद्युरुत्थितं देहचिन्तया व्याकुलं निशि ।
सांयात्रिकं निचिक्षेप सोऽब्धौ छिद्रं विमार्गयन् ॥ १०३ ॥
याने याते ततो दूरं जजागार कथञ्चन ।
कोऽप्यदृष्ट्वा च पोतेशं वज्राहत इवाऽभवत् ॥ १०४ ॥
ततः स लब्धचैतन्यो बोधयित्वाऽपरानपि ।
कर्णधारकमाचख्यौ यानं स्खलय भोः ! मनाक् ॥ १०५ ॥
किमर्थमिति तेनोक्ते तैरूचे प्रेक्ष्यते प्रभुः ? ।
स प्राह कायचिन्तार्थे यदा स प्रभुरुत्थितः ॥ १०६ ॥
योजनानां शतं यानं तत्क्षणान् समुपागमन् ।
कायचिन्तोत्तरं तस्य स्वरूपं वेद न स्वयम् ॥ १०७ ॥
युष्माकमुपरोधेन तं पश्यामि तथाऽपि हि ।
इत्युक्त्वाऽस्खलयद् यानं सकर्णः कर्णधारकः ॥ १०८ ॥
स निक्षिप्याऽभितो नौकाः सांयात्रिकमलोकत ।

तथाऽपि काऽपि न प्रापि तत्कथाऽपि यथास्थिता ॥ १०९ ॥
नुन्नः पोतोऽथ तैर्भूयः शोकाऽऽवेशविसंस्थुलैः ।
क्रमेण नगरं प्राप्य तदीशाय स चाऽर्पितः ॥ ११० ॥
तेनोचितं धनं दत्त्वा लोभनन्दो विसर्जितः ।
उपात्तरत्नसंभारः पुरं प्रत्यचलद् निजम् ॥ १११ ॥
मां समुद्धतनेपथ्यं पथि दृष्ट्वैव तस्कराः ।
रत्नान्याशु ग्रहीष्यन्ति निग्रहीष्यन्ति चाऽसिना ॥ ११२ ॥
इदं संभाव्य तान्येव स्यूत्वा रत्नानि कन्थया ।
स कार्पटिकवेषेणाऽध्वनि प्रास्थित सुस्थितः ॥ ११३ ॥
गच्छतस्तस्य मार्गेऽस्ति कान्तारे चौरसैन्यकम् ।
शाखिशाखास्थितः पक्षी तस्याऽग्रे प्रोचिवानिदम् ॥ ११४ ॥
अहो ! एताः समायान्ति बहवो द्रव्यकोटयः ।
तद् गृह्णीत यथा न स्याद् दारिद्र्यं वः कदाचन ॥ ११५ ॥
निशम्येति प्रहृष्टैस्तैश्चौरैरालोकि सर्वतः ।
परं कश्चिद् न चाऽऽलोकि तादृग् द्रव्यसमाश्रयः ॥ ११६ ॥
दृष्टे सन्निहिते तस्मिन् कन्थाऽऽवृतकलेवरे ।
मलिम्लुचैर्विमुक्तेऽथ स खगः पुनरभ्यधात् ॥ ११७ ॥
एता युष्मासु पश्यत्सु ययुर्द्रविणकोटयः ।
श्रुत्वैवं चौरराजोऽपि तमानाय्य निरैक्षत ॥ ११८ ॥
यूकालक्षाश्रया लिक्षाकोट्याधारा मम प्रभो ! ।
इयं कन्थाऽस्ति नैवान्यदित्युक्ते तं मुमोच सः ॥ ११९ ॥
भूयः खगस्तदाऽऽचष्ट स्पष्टवाक् कीरवत् स तु ।
जन्मान्तरविरोधीव लोभनन्दस्य केवलम् ॥ १२० ॥
अविसंवादिवाक्यत्वाद् विहङ्गस्य स तैः पुनः ।
रुद्धः कन्थाद्यमाच्छिद्य व्यमोचि शववत् पुनः ॥ १२१ ॥
तथाकृते च तैः पक्षी मौनमालम्ब्य तस्थिवान् ।
कन्थामुत्कील्य रत्नानि चौरैराददिरे ततः ॥ १२२ ॥
लोभनन्दः पुनश्चिन्ताऽऽचान्तस्वान्त ऋते धनम् ।
गम्भीरपुरमेवाऽगात् तादृग् नान्यत्र यद् धनम् ॥ १२३ ॥

इतश्च पातितो योऽब्धौ तेन पोतपतिस्तदा ।
सोऽपि प्राग्भग्नयानस्य प्रापत् फलकमेककम् ॥ १२४ ॥
प्रेर्यमाणः स कल्लोलैर्वातोद्धूतैरितस्ततः ।
दिनानां सप्तकेनाऽऽप तदेव पुरमात्मनः ॥ १२५ ॥
सुजनैर्मुदितैस्तस्य दर्शनादेव पत्तने ।
अकार्यत महान् ऋद्ध्या वर्धापनमहोत्सवः ॥ १२६ ॥
स क्रमाल्लोभनन्दोऽपि दैवात् तद्गृहमागमत् ।
रुष्टः परिजनस्तस्य तद्वृत्तान्ताऽवबोधतः ॥ १२७ ॥
वार्ह्यबन्धेन बद्ध्वा तैः स निन्ये नृपतेः पुरः ।
दुष्टेस्मिन्निति रुष्टस्तं राजा वध्यमादिशत् ॥ १२८ ॥
कदर्थनाभिरुग्राभिर्बह्वीभिः स कदर्थितः ।
रौद्रध्यानी विपद्याऽगात् तुरीये निरये रयात् ॥ १२९ ॥
तत्रोत्कृष्टायुरासेहे विविधाः सोऽपि यातनाः ।
कषायाणां चतुर्णां हि मेलो दुःखस्य मेलकः ॥ १३० ॥
इत्थं सोऽपारसंसारप्रान्तरप्रान्त एव यन् ।
भ्रमिता त्यज्यतां तस्मात् प्रमादोऽयं तृतीयकः ॥ १३१ ॥
कुरुचन्द्र ! महीचन्द्र ! निद्रारूपश्चतुर्थकः ।
प्रमादस्त्यज्यतां यस्मादिहाऽमुत्र सुखं नहि ॥ १३२ ॥
निद्रापरवशः प्राणी वित्तबुद्धिपरिक्षयात् ।
इहाऽमुत्राऽपि दुःखानि भानुदत्त इवाऽश्नुते ॥ १३३ ॥
तथाहि सिद्धार्थपुरे राजा शत्रुञ्जयोऽजनि ।
कोकानामिव लोकानां शोकानां यो वियोगकृत् ॥ १३४ ॥
वनमालाऽभिधा तस्य महिषी भूपतेरभूत् ।
गौरीति विकले देशे या विज्ञाऽया विवर्ण्यते ॥ १३५ ॥
भानुदत्तोऽभवत् तत्र कुटुम्बी सौख्यभाजनम् ।
प्रायो लक्ष्मीसरस्वत्योः स्थितिः पुण्यात्मनां नृणाम् ॥ १३६ ॥
अर्थं विना न संमानं केऽपि कुर्वन्ति कस्यचित् ।
स चित्ते परिभाव्यैवं प्रवत्र्ये धनमर्जितुम् ॥ १३७ ॥
अयं कामुकवद् भ्राम्यन् विषयाद् विषयान्तरम् ।

सिन्धुरोधः समासाद्य रत्नार्थी तदसेवत ॥ १३८ ॥
पूजां विना फलाऽवाप्तिर्न क्वाऽपि समवेक्ष्यते ।
इति धृत्वाऽऽशये सोऽपि सिन्धोरर्चां प्रचक्रमे ॥ १३९ ॥
पुष्पप्रकरधूपाद्यैः पूजयित्वा पयोनिधिम् ।
स गर्तामखनत् तीरे गम्भीरां चित्तवृत्तिवत् ॥ १४० ॥
वेलायां विनिवृत्तायां तत्राऽऽयातः स सत्वरम् ।
वराटकान् समालोक्य विषादमधिकं दधौ ॥ १४१ ॥
लक्ष्मीनिदानमुद्योग इत्येवं कलयन्नयम् ।
विशेषाद् विदधे तत्र स्वायासमविचारयन् ॥ १४२ ॥
इत्यहर्निशमेतस्याऽऽतन्वतः सत्त्वबोधतः ।
अब्ध्यधिष्ठायकस्तुष्टो गर्ताऽन्तः क्षिप्तवान् मणिम् ॥ १४३ ॥
स वेलाऽपगमे तत्र रत्नं वीक्ष्याऽतिभासुरम् ।
हृष्टो निबध्य तद् वस्त्रस्याऽञ्चले चलितस्ततः ॥ १४४ ॥
स्वपत्तनं समागच्छन् सान्द्रद्रुमतलेऽन्यदा ।
क्वचिद् मार्गपुरोपान्ते संविवेश स सश्रमः ॥ १४५ ॥
अथाऽत्राऽगाज्जनो मत्तमातङ्गभयविह्वलः ।
तदैकेन स धावादि प्रमीलामिलितेक्षणः ॥ १४६ ॥
अरे ! पान्थ ! समुत्तिष्ठ समुत्तिष्ठ विपत्स्यसे ।
मूलादालानमुन्मूल्य मत्तेभोऽत्र समेति यत् ॥ १४७ ॥
क्रियासमभिहारेण तेनैवं भणितोऽपि सः ।
नैवोत्थितो यदा तावल्लुब्धोऽसावित्यचिन्तयत् ॥ १४८ ॥
पाषाण इव पान्थोऽयं मार्गाऽऽयासाद् न चेतति ।
तदस्य सन्निधेर्वित्तं गृह्णाम्यह्नाय निश्चितम् ॥ १४९ ॥
विचिन्त्यैवं पटीप्रान्तान् शोधयित्वाऽस्य तन्मणिम् ।
प्राप्य तुष्टः प्रणश्याऽगात् पदैर्द्रुततरैस्ततः ॥ १५० ॥
विहस्तीकृतलोकः स हस्ती तत्र न चाऽऽगमत् ।
व्यबुद्ध नागदत्तोऽपि हृतबुद्धिः क्षणान्तरे ॥ १५१ ॥
स्वोत्तरीयाञ्चलं रिक्तं दृष्ट्वा मूर्छन् पपात सः ।
वार्तैश्चैतन्यमासाद्य क्रमात् स्वं विजगौतमाम् ॥ १५२ ॥

प्रविश्य नगरे तत्र स ततस्ततविभ्रम ।
भृत्यवृत्तिमधिष्ठाय रैसहस्रमुपार्जयत् ॥ १५३ ॥
नीत्वाऽर्जितधनै स्वर्ण लात्वा गच्छन् निज पुरम् ।
ग्रामाद् वहिष्क्वचित् सुप्त सोऽमोषि परमोषिणा ॥ १५४ ॥
वैराग्य परम प्राप्त स प्राप्य सुगुरोर्नतम् ।
दृष्टिवादमतिस्पष्टमध्यगीष्ट विनाशकम् ॥ १५५ ॥
अथो गच्छाधिपत्येऽसौ गुरुभि स्थापित क्रमात् ।
रसगौरवलम्पटत्र मिष्टभुक्त्या बभाज स ॥ १५६ ॥
उल्ललास पुनर्निद्राप्रमादस्तेन तस्य स ।
संभवेद् मैथुनाऽऽसक्त्या राजयक्ष्मोदय स्फुटम् ॥ १५७ ॥
प्रतिक्रमणकालेऽपि नाय जागर्ति नित्यश ।
निद्रावशवद को वा हित जानाति तत्त्वत ? ॥ १५८ ॥
ज्ञात्वा त तादृश शिष्या अशुद्धान्नवदत्यजन् ।
विषसवासित को वा पद्म जिघ्रति शुद्धधी ? ॥ १५९ ॥
विसस्मार प्रमादेन मूढधीस्तेन तच्छ्रुतम् ।
सम्यग्दर्शनरत्न च जहे चाऽस्य नरेन्द्रवत् ॥ १६० ॥
एक एव भ्रमन्नोर्वैर्हस्यमान पदे पदे ।
स मृत्वाऽनन्तकायेषु प्रमादात् समपद्यत ॥ १६१ ॥
ईदृग् निद्राप्रमादोऽय वर्ज्यस्तुर्यस्त्वया नृप ! ।
मर्मवाक्यवदत्यन्त विषसंपृक्तभोज्यवत् ॥ १६२ ॥
स्त्रीभक्तदेशभूपाना कथास्त्याज्या विशारदै ।
प्रत्येक दूषण दृष्ट्वा विशिष्टैर्विष्टपेप्सया ॥ १६३ ॥
स्त्रीकथाप्रतिपत्ते स्याद् मनस सानुरागता ।
कज्जलस्य प्रसङ्गेन कालिमा किं न सभवेत् ? ॥ १६४ ॥
भोज्यस्य कथया पुमा भोज्ये लम्पटता भृशम् ।
सौहित्य न प्रचायेत सद् विना ना पशूपम ॥ १६५ ॥
सत्ताहेदर्ये मम देशकथा पुमा विरोधिनाम् ।
विदधाति, यतो निन्दा स्वदेशस्य सहत क ? ॥ १६६ ॥
राज्ञा कथाऽपि निर्बन्धात् क्रियमाणाऽत्यनर्थदा ।

नरेन्द्र ! माधवस्येव नरस्याऽल्पितमाधव ! ॥ १६७ ॥
तथाहि भरतार्धेऽत्र दक्षिणे श्रीपुरं पुरम् ।
अधिवासं प्रकुर्वत्या यस्याऽऽख्या पप्रथे श्रिया ॥ १६८ ॥
भूपो भुवनपालोऽत्र भुवनाऽवनविक्रमः ।
बभूव भूवधूभालचित्रनिर्माणकर्मठः ॥ १६९ ॥
तस्यासीत् प्रभवप्रेमवल्लीवनघनप्रभा ।
सुन्दरी रूपसंपत्त्या देवी भुवनसुन्दरी ॥ १७० ॥
सज्जनानन्दकृन्नन्दनन्दमित्रातनूभवः ।
तत्र माधवनामाऽभूद् वणिग् दोषनिकेतनम् ॥ १७१ ॥
अन्यदा नागरा रागात् सभामध्यमधिश्रिताः ।
उपचक्रमिरे कर्तुमन्योऽन्यं वनिताकथाः ॥ १७२ ॥
निवेदयत भोः ! कस्य जाताः क कोपवर्तने ? ।
रोचन्ते वनिता यावदित्युक्ते कोऽपि नाऽभ्यधात् ॥ १७३ ॥
माधवस्तावदाचष्ट स्मयमानमुखाम्बुजः ।
संसदन्तःस्थितः सत्यं रोचते मम केरली ॥ १७४ ॥
अहो ! केरलदेशीयस्त्रीगुणौघेन पूरिते ।
हृदये नाऽवकाशोऽस्ति परासां योषितां मम ॥ १७५ ॥
मनोभवारिणा दग्धो दृशा मानसनन्दनः ।
मन्ये केरलदेशीयस्त्रीभिरुज्जीवितो दृशा ॥ १७६ ॥
अपेक्षन्ते युवानो ये कामकेलिकुतूहलम् ।
स्त्रियं केरलदेशीयां सेवन्तां ते सुखैषिणः ॥ १७७ ॥
इदं तन्मुखतः श्रुत्वा कुमारश्चन्द्रशेखरः ।
तत्पार्श्वेऽवस्थितश्चित्ते क्षणमेवं व्यकल्पयत् ॥ १७८ ॥
किमेष मे प्रियायोगमाससाद कथञ्चन ? ।
स्त्रियं केरलदेशीयां यत् प्रशंसति सादरम् ॥ १७९ ॥
पुरेऽत्र काऽपि नान्याऽस्ति केरली मत्प्रियामृते ।
तदेनमासिना दुष्टं शीर्षच्छेद्यं करोमि किम् ? ॥ १८० ॥
अन्यदा वा हनिष्यामीत्येवं संचिन्त्य चेतसि ।
राजसूः स समुत्तस्थौ पृष्ठतोऽप्यस्य माधवः ॥ १८१ ॥

तदा माधवमभ्येत्य तत्प्रियाकिङ्करीति तम् ।
अन्वयुङ्क्त महाभाग ! मत्स्वामी विद्यतेऽत्र किम् ? ॥ १८२ ॥
प्रागासीदधुनाऽत्राऽस्ति नास्ति वेति न वेद्म्यहम् ।
इत्युक्ते तेन सा सौधं व्यावृत्त्यैव समागमत् ॥ १८३ ॥
कुमारोऽपि वदन्तं तं प्रेक्ष्य स्वप्रेष्यया समम् ।
दूरस्थः प्राग्विकल्पं तं सत्यमेवाऽभ्यमन्यत ॥ १८४ ॥
न्यहन् निशाततया छुर्य्या धावित्वा सोऽपि माधवम् ।
विवेकविकलाः प्रायः कर्म कुर्वन्ति किं न वा ? ॥ १८५ ॥
तेन घातेन दूनः स विलुलोठ विचेतनः ।
तादृग् वीरस्य घातो हि किं दुःखं विदधातु न ? ॥ १८६ ॥
पित्रा प्रक्षिप्य पल्यङ्के नीतः स व्रणशोधनैः ।
सज्जीचक्रे क्रमादेवं स्त्रीकथाऽनर्थकारणम् ॥ १८७ ॥
स्त्रीकथामवबुद्ध्यैवमनर्थस्य निबन्धनम् ।
कुरुचन्द्र ! महीपाल ! कृपणोपास्तिवत् त्यजेः ॥ १८८ ॥
अधिगोष्ठि निविष्टोऽसावन्यदा भोज्यसंकथाम् ।
कुर्वन्नित्यवदद् ह्योऽभूद् भोज्यं तस्य गृहे वरम् ॥ १८९ ॥
तटस्थ एव यत् तत्र भोज्याद्यं तदचीकरम् ।
किञ्च यो मोदकस्तत्र तन्मूल्यं भुवनेऽपि न ॥ १९० ॥
इतश्च पौरमाणिक्यश्रेष्ठिनाऽत्र महामहे ।
अभूद् भुक्तं तदन्नादि तेन चैतस्य यातना ॥ १९१ ॥
ततः पीडाऽपनोदाय समाहूतैर्भिषग्वरैः ।
स ऊचे पाचितं येन तद्भोज्यं स च पृच्छ्यताम् ॥ १९२ ॥
चिकित्स्यते यथा तस्य निदानस्थाऽनुमानतः ।
इत्याकर्ण्य वचस्तेषामिभ्यः स्वान् प्रैषयद् नरान् ॥ १९३ ॥
तज्ज्ञातुं तेऽपि गच्छन्तः प्रवृत्तिं तां च माधवम् ।
कुर्वन्तमाह्वयन् सोऽपि तत्राऽऽगन्तुं न वाञ्छति ॥ १९४ ॥
यष्टिभिस्ताडयित्वा तैः स तत्पार्श्वमनीयत ।
तेनोचे रसवत्यां रे ! तस्यां किं क्षेपितं त्वया ? ॥ १९५ ॥
तस्या भोजनमात्रेण ममाङ्गे वेदनाऽस्ति यत् ।

प्राञ्जलीभूय स प्रोचेऽपाच्यं न च किञ्चन ॥ १९६ ॥
अभापिष्ट ततः श्रेष्ठी रुष्टस्तं प्रति दुष्ट ! रे ! ।
निह्नुवानोऽभ्युपेतं स्वं दोषकारी त्वमेव मे ॥ १९७ ॥
तद्भृत्यैः पीड्यमानोऽसौ श्रेष्ठिनोऽस्य निदेशतः ।
कथञ्चिद् वीजिनाऽमोचि लगित्वा पाणिपादयोः ॥ १९८ ॥
एवं भक्तकथाऽप्येषा प्रकृत्याऽनर्थकारणम् ।
विवेकिभिस्ततो वर्ज्या मलिनस्त्रीवदन्वहम् ॥ १९९ ॥
अन्येद्युः सोऽपि वाचालश्चालयन् रसनां निजाम् ।
प्रारेभे माधवो देशकथामेव जनान्तिके ॥ २०० ॥
देशेषु मगधाभिख्यो देशो वर्णनमर्हति ।
एक एव ग्रहाधीशो ग्रहेष्विव मनीषिणाम् ॥ २०१ ॥
महिष्य इव भूपानां पुण्डरीकाणि बिभ्रति ।
यत्र वाप्यः प्रभूतानि समर्था जीवनाहृतौ ॥ २०२ ॥


अस्मिन् सरांसि कमलोपचितानि कामं
भूमीभुजामिव महाभवनानि सन्ति ।
तृष्णां निहन्तुमुदयः स बभूव येषां
क्षीराणि येषु बहवोऽपि जनाः पिबन्ति ॥ २०३ ॥
यत्र प्रपाः प्रतिपथं सुकृतोपलम्भ-
संरम्भसम्भृतजनैर्विहिता विभान्ति ।
यासां रसेन सुहिताः परितापजात-
मन्तःस्थितं निधनितां पथिका नयन्ति ॥ २०४ ॥
यत्राऽऽरामा विविधविटपिश्रेणिभिः सर्वकालं
विभ्राजन्ते विविधविटपिश्रेणयश्चापि पुष्पैः ।
पुष्पाण्यद्धा भ्रमरनिकरैरापतद्भिः समन्ताद्
झङ्कारौघैर्भ्रमरनिकरः श्रोत्रपेयाभिरामैः ॥ २०५ ॥
नानाप्रकारकलमैरुपजायमानै-
र्दूर्वाविदुप्तिविरहेऽपि महेशयोग्यैः ।
दुर्भिक्षनाम जनताभिरधीयते न
दुःस्वप्नवत् प्रमदपीवरचारुचित्तैः ॥२०६॥ (षड्भिःकुलकम्)

नृपो भुङ्क्ते तीर्थद्रविणमपि तद्यात्रिकजनैः
प्रदत्तं स्वश्रद्धाभरविवशचित्तैः सुकृतिभिः ।
स्वयं यस्मिँल्लोकद्वयभयमजानन्नविरतं
सुराष्ट्राख्यो राष्ट्रः स पुनरिह निन्द्यो मतिमताम् ॥२०७॥
श्रीमद्युगादिजिननेमिजिनाधिनाथ-
श्रीसोमनाथमुखतीर्थपरम्परायाम् ।
सत्यां जनाः सुकृतमादधते न यत्र
यात्रागतानपि तुदन्ति च चौर्यवृत्त्या ॥ २०८ ॥
(युग्मम्)

एतद् माधवभाषितं श्रुतिगतं कृत्वा सुराष्ट्रामहा-
राष्ट्रीयैर्निजदेशनिन्दनतया कोपप्रकम्पाधरैः ।
राज्ञो द्वाःस्थपदं दधद्भिरभितो यष्ट्यादिभिस्ताडितः
पित्राऽमोचि कथञ्चिदेव रुधिराक्रुष्ट्या स सञ्ज्ञीकृतः ॥२०९॥
एवं देशकथाऽप्यनर्थजननी संत्यज्यतां दूरतः
क्षोणीजम्भरिपो ! श्मशानकलशीवाऽऽतङ्कसंपादिनी ।
सर्वस्याऽपि सुखाय संभवति यत् श्लाघा प्रसन्नेन्दुवद्
दुःखस्याऽभ्युदयं तनोति विहिता निन्दा च हास्यादपि ॥२१०॥
क्ष्मापं व्यज्ञपयन् कदाचन सुधीर्श्रीसिंहदत्ताभिधः
सामन्तस्तव देव ! देशमपर्भाविद् चण्डसेनो बली ।
हा ! विश्रंसयति प्रचण्डबलयुग् दुर्गप्रविष्टः स चा-
ऽस्माकं दुर्मद इत्यवेत्य भवता युक्तं समाचर्यताम् ॥ २११ ॥
तत्कालं स च देशसीमनि ययौ सर्वाभिसारेण राड्
सोऽप्यभ्यागमदप्रमर्णबलरतां द्राक् चण्डसेनः मरुद् ।
लग्नं संग्रममन्यनप्रनुतयोरप्येककाले तयो-
र्भग्ने तेन बले नृपस्य सबलो राज्ञा विजिग्येऽथ सः ॥२१२॥
नष्टो नष्टप्रतिष्ठः कतिपयसुभटैः सार्धमेष प्रविष्टो
दुर्गे दुर्गे विशिष्टः शकुनिरिव तरोः श्येनमन्त्रा कुलाये ।
दुर्गं रुद्धा समन्तात् प्रबलबलतया चण्डसेनं च यद्वृष्या
व्यावृत्तो वीक्ष्य शून्यं स्वपुरमथ नरं कञ्चनाऽऽगृच्छदीशः ॥२१३॥

स प्रोचे नृपते ! कुतोऽपि समभूद् भीकिंवदन्तीदृशी
यच्चण्डः स च चण्डसेनचरटः क्ष्मापं पराजेष्यते ।
तल्लोकाः ! प्रपलायनं कुरुत भोः ! आकर्ण्य चैतज्जनाः
सर्वे नेशुरतो बभूव नगरं शून्यं समग्रं तव ॥ २१४ ॥
मूलोत्पत्तिं प्रवृत्तेरपि विरचयता माधवोऽज्ञायि राज्ञा
जिह्वाच्छेदेन मृत्युं स झगिति गमितो दुर्गतिं प्राप पापः ।
इत्थं राज्ञः कथेयं कथमपि विहिता दुर्जनस्येव मैत्री
कूलच्छायेव भव्या भवति न नृपते ! त्यज्यतां तत् प्रयत्नात् २१५
ईदृक्पञ्चप्रमादप्रकृतिपरिहृतेर्धर्ममेवाऽऽदधानः
साधुश्चित्तैकशुद्धया दशविधमतुलं सच्चितिक्षादिभेदात् ।
श्राद्धः सम्यक्त्वमूलं त्वधिकदशविधाऽणुव्रतादिप्रभेदं
सिद्धिं प्राप्नोति राजन्नविकलसकलप्राप्तकल्याणमालः ॥२१६॥
आसीच्छ्रीगुरुगच्छमौलिमुकुटश्रीमानभद्रप्रभोः
पट्टे श्रीगुणभद्रसूरिसुगुरुः स्याद्वादवादोद्धतः ।
तच्छिष्येण कृतेऽत्र सप्तदशकः श्रीशान्तिवृत्ते महा-
काव्ये श्रीमुनिभद्रसूरिकविना सर्गोऽगमत् प्रोज्ज्वलः ॥२१७॥

इति श्रीशान्तिनाथचरिते सप्तदशः सर्गः समाप्तः ॥



अर्हम्

अथ अष्टादशः सर्गः ।



जानन्ति यं ध्यानसमाधिमास्थिताः पराहृतान्तःकरणप्रवृत्तयः ।
विध्वस्तदुष्कर्मचया यतीश्वराः स शान्तिनाथस्तनुतां शुभानि वः ॥१॥
श्रुत्वा त्रिलोकीगुरुदेशनां मुदाऽऽप्लुतः सुधाकुण्ड इवाऽखिलैः समम् ।
नत्वाऽथ नाथं कुरुचन्द्रभूपतिर्व्यजिज्ञपच्छान्तिजिनं शुभाकरम् ॥२॥
प्राज्यं प्रभो ! राज्यमवापमीदृशं विशुद्धसंवेदन ! केन कर्मणा ? ।
पश्चाऽतिरिक्तं न समेत्युपायने कदापि वस्त्वश्वफलांशुकादिकम् ॥ ३ ॥
तद्दिसुरेवेष्टजनाय सर्वदा स्वयं न भुञ्जे स्पृहयालुरप्यहम् ।

त्वस्मै प्रयच्छामि न चाऽपि जातुचिद् बुभुत्सुरत्राऽस्मि जिनेन्द्र ! कारणम् ४
शान्तिप्रभुः प्रत्यवदद् महाद्भुतं सुपात्रदानप्रतिपत्तितः स्वयम् ।
यत् पञ्चभिः पञ्चजनैः समर्जितं निशम्यतां तत् सुकृतं धरापते !॥५॥
अत्राऽस्ति याम्ये भरतेऽमरावतीपुरीसमं कोशलदेशभूषणम् ।
क्षीराब्धिपुत्र्याः परमं निकेतनं महापुरं श्रीपुरसंज्ञया श्रुतम् ॥ ६ ॥
चत्वारि मित्राणि वणिक्कुलोद्भवान्यवात्सुरस्मिन् पुटभेदनोत्तमे ।
साम्यातिगप्रीतिपदं परस्परं क्रमेण तेषामभिधा इमाः स्मृताः ॥ ७ ॥
आद्योऽनवद्यः सुधनो महाधनः पतिर्द्वितीयो धनपूर्वकः स्मृतः ।
ततस्तृतीयो धनदो महाशयो यथार्थनामा चरमो धनेश्वरः ॥ ८ ॥
सिध्यन्ति पुंसां न मनोमनोरथाः कदाचन द्रव्यमपास्य पुष्कलम् ।
संसारसर्वस्वसुखाभिलाषिणामिति स्वचित्ते परिभाव्यते मिथः ॥ ९ ॥
द्रोणाभिधानं पुरुषं महाबलं समुद्यतं शम्बलभारवाहने ।
कृत्वा वसूपार्जनहेतवेऽचलन् समे मणिद्वीपदिदृक्षयाऽन्यदा ॥ १० ॥

(युग्मम्)

उत्तेरुरेकां गहनां महाटवीं दिनैरनेकैः पथि तेऽधिसंकथाः ।
प्रक्षीणकल्यं च बभूव शम्बलं प्रभूतमानीतमपि व्यये सति ॥ ११ ॥
कञ्चित् तदा ते प्रतिमासमाश्रितं व्यलोकयँल्लोकनतं तपोधनम् ।
पञ्चेन्द्रियाणामनुशासनं रहो विधातुमन्योऽन्यविरोधिनां स्थितम्॥१२॥
अस्मै मुनीन्द्राय शमैकमूर्तये प्रदाय किञ्चित् सफलं विदध्महे ।
जन्म स्वकं चेति विचिन्त्य ते क्षण हितं जगुर्द्रोणमिदं सचेतसः ॥१३॥
द्रोण ! त्वमस्मै परमर्षयेऽधुनाऽवशिष्टपाथेयविभागतो मनाक् ।
देहीति तैर्व्याहृत एष तोषवानमंस्त तद्वाक्यमुदारमानसः ॥ १४ ॥
तेभ्यश्चतुर्भ्योऽप्यधिकां स भावना वहन् मुनिं तं प्रतिलाभ्य तत्क्षणम् ।
कर्माऽर्जयामास भवान्तरांहसां क्षये महाभोगफलं निरर्गलम् ॥ १५ ॥
रत्नान्तरीपं क्रमतोऽधिगम्य ते सतां निषेव्यं व्यवहारमाश्रयन् ।
तत्राऽर्जयित्वा द्रविणं मनीषितं पुनर्निजं ते नगरं समागमन् ॥ १६ ॥
पञ्चाप्यनन्दन् सुकृतेन तेन ते सुपात्रदानप्रतिपत्तिजन्मना ।
किं केवलज्ञानमवाप्तमादितो महोदयाऽऽनन्दपदं ददाति न ? ॥ १७ ॥
मायाविनौ किञ्चिदुभौ वणिस्सुतौ द्वितीयतुर्यावपरौ त्वमायिनौ ।

स द्रोणकस्तेपु विशुद्धभावनाविभावितात्मा परमस्ति शस्तधीः ? ॥१८॥
द्रोणो विपद्य प्रथमं स तेष्वभून्नृपाङ्गजस्त्वं नृप ! हास्तिनापुरे ।
त्रैलोक्यलोकाशयविस्मयावहं सुपात्रदानस्य विजृम्भितं न किम् ?॥१९॥
गर्भावतीर्णे त्वयि चाऽम्बया मुखे विशन् विधुः स्वप्न उदैक्षि यत्परम् ।
तेनैव वप्ता तव नाम निर्ममे महे प्रवृद्धे कुरुचन्द्र इत्यपि ॥ २० ॥
संप्राप्य मृत्युं सुधनो वणिक्सुतः क्रमेण काम्पिल्यपुरे पुरोत्तमे ।
जज्ञे समृद्धयाढ्यवणिक्तनूभवो वसन्तदेवोऽभिधयाऽत्र विश्रुतः॥२१॥
संजातमृत्युर्धनदो निजायुषः क्षये क्रमेणाऽजनि कृत्तिकापुरे ।
श्रीकामपालः प्रतिपन्नपालनैकतानचित्तः प्रथितोऽभिधानतः ॥ २२ ॥
मायावशात् तावपि वाणिजौ मृतौ पतीशसंज्ञौ धनपूर्वकौ क्रमात् ।
पुत्र्यावभूतां वणिजोर्यथाक्रमं मदोद्धतैका मदिराऽथ केशरा ॥ २३ ॥
आद्याऽभवच्छङ्खपुरे महोत्तमे परा जयन्त्यां पुरि ते क्रमेण च ।
चत्वार एतेऽपि विशीर्णशैशवाः समासदन् यौवनमङ्गदीपनम् ॥२४॥
आपृच्छय वप्तारमसौ परेद्युर्वसन्तदेवो विभवाऽर्जनेच्छया ।
यातो जयन्त्यां पुरि तत्र चार्जयद् धनानि कुर्वन् व्यवहारमादरात्॥२५॥
सोऽन्येद्युरुद्यानमियाय नन्दनं जयत् स्वलक्ष्म्या रतिनन्दनाह्वयम् ।
चन्द्रोत्सवं द्रष्टुमदृष्टसाध्वसो यदृच्छयाऽतुच्छतयाऽष्टमीदिने ॥ २६ ॥
तत्राऽऽगतां वीक्ष्य स चापि केशरां सरागचेताः समजायत क्षणात् ।
सा तं च सातं ददतं, सुचक्षुषां भवान्तरोत्था प्रियता हि नान्यथा॥२७॥
पार्श्वस्थितं स्वस्य स वाणिजाङ्गजं प्रियङ्करं नाम मनःप्रियङ्करम् ।
इत्यन्वयुङ्क्तार्य ! मनोरमाकृतिस्त्वियं किमाख्या वत ! कस्य वा सुता?॥२८॥
सोऽप्यब्रवीद् नामत एव केशरां जयन्तिदेवस्य सुवासिनीमिमाम् ।
आनन्दिनीं देव ! निबोध नन्दनीं महेभ्यचूडामणिपञ्चनन्दिनः ॥२९॥
एतद् निशम्याऽपि वसन्तदेवको विचिन्तयामास निजेन चेतसा ।
लभ्या कथङ्कारमियं सुराङ्गनासमानसौन्दर्यगुणा मयाऽर्थिना ॥ ३० ॥
अभ्यर्थ्यमानाऽपि मया न दास्यते धनेश्वरेणाऽपि विदेशजन्मना ।
एषा पितृभ्यां न च बान्धवेन यत् किमीदृशी स्यात् प्रियता लघीयसी?३१
तत्सोदरेणैव जयन्तिना समं वितन्वतः प्रेम परं मम ध्रुवम् ।
सा सानुरागा भविनी यतो मतं मनः प्रकाशान्तरनिर्व्यपेक्षकम् ॥३२॥

एतद् विमृश्य स्वहृदा वसन्तको जयन्तिदेवेन सह प्रचक्रमे ।
सौहार्दमाधातुममुष्य मन्दिरप्रसङ्गगत्यागतिकर्मनिर्मितैः ॥ ३३ ॥
सौहार्दकल्पद्रुम एव सद्रसैस्तयोर्नियत्या नियतं प्रवर्धितः ।
भावी वसन्ते फलवान् शनैः शनैर्यदेष पूर्वं सुमितोऽथ पत्रितः ॥३४॥
सन्तं वसन्तं सुजनं निमन्त्र्य तं जयन्तिदेवः स्वगृहेऽन्यदाऽनयत् ।
औचित्यनैचित्यभृतो महाशयाः कुत्राऽपि किं नाम परिस्खलन्त्यमी?॥३५॥
तत्राऽर्चयन्तीं कुसुमैः सुमायुधं तदेकतानां समवेक्ष्य केशराम् ।
तोषं वसन्तो विभराम्बभूव यत् प्रियाऽवलोकादपरं न संमदे ॥ ३६ ॥
गृह्णन् स चाऽऽलोकि तया सरागया जयन्तिदेवस्य करात् सुमस्रजम् ।
कल्याणरूपं शकुनं तदेतदित्यभूत् तदा समद एतयोर्द्वयोः ॥ ३७ ॥
धात्रीतनूजाऽभिधया प्रियङ्करा समीपगा भावमवुद्ध सा तयोः ।
वर्ण्याः सतां किं न भवन्ति संततं परेङ्गितज्ञानफला हि बुद्धयः ?॥३८॥
श्रीमद्वसन्तं स जयन्तिरादरादहार्य्यभक्त्याऽभ्यवहार्य तं स्वयम् ।
कर्पूरताम्बूलविलेपनांशुकैरनेकधा सत्कुरुते स्म विस्मयः ॥ ३९ ॥
माधुर्यसंवादिवचा वचस्विनी प्रियङ्कराऽप्यभ्यधिताऽथ तां प्रति ।
आलि ! त्वमप्यस्य यथोचितं कुरु जयन्तिवत् ते प्रियताऽत्र युज्यते॥४०॥
औत्सुक्यमन्दाक्षमदप्रमादभीप्रसञ्जनाऽऽव्याकुलिताशयाऽपि सा ।
प्रत्याहतां प्रत्ययितां प्रियङ्करां सखि ! त्वमेवाऽस्य समाचरोचितम् ॥४१॥
स्वप्राङ्गणासन्नसमुद्गतानतप्रियङ्गुशालाद् नवमञ्जरीस्ततः ।
उच्चित्य कक्कोलफलान्यथ प्रियं प्रियङ्करैनं निजगाद सादरम् ॥ ४२ ॥
एषा ममाऽऽलिः कुसुमानि पाणिना समुन् समुच्चित्य फलानि च स्वयम् ।
त्वं मे प्रियोऽसीति समाकुला ह्रिया समर्पयत्येव मया विभिन्नया॥४३॥
पुष्पाणि कक्कोलफलानि चाऽऽददे प्रियङ्करायाः करवारिजन्मनः ।
एतत्प्रियाप्रेषितमित्ययं विदन् वहन् प्रमोदं वचसोऽप्यगोचरम्॥ ४४ ॥
दत्त्वा स तस्यै प्रमनाः स्वमुद्रिकां जगौ त्वया साध्विदमाहितं खलु ।
भूयाः पुनस्तामिति सर्वदैव मे प्रियाऽनुरूपं रचयेर्मनस्विनि ! ॥ ४५ ॥
गत्वा वरालापमसौ प्रियङ्करा तदैव तस्यै मुदिता न्यवेदयत् ।
आकर्ण्य तं साऽपि सवर्णवर्णिता मुदं मयूरीव घनध्वनिं दधौ ॥ ४६॥
स्वप्ने तृतीयप्रहरे विवाहितं निशः स्वमालोकत केशराऽन्यदा ।

कान्तेन तेनाऽऽशयमध्यवर्तिना वसन्तदेवेन समं महौजसा॥ ४७ ॥
स्वप्नान्तरुद्वाहविधिं व्यलोकयद् वसन्तदेवोऽपि तया सहात्मनः ।
श्रीपञ्चनन्दीभ्यभुवा गुणाढ्यया तथाऽपि हर्षः समभूत्तयोर्महान्॥४८॥
स्वप्नं प्रगे लब्धनिधानयुग्मवत् प्रियङ्करायाः पुरतो बभाण सा ।
तच्चित्तचौर्यं प्रति याऽधिदेवता तदग्रतो गोप्यमियं न चातुरी ॥ ४९ ॥
संपत्स्यते सर्वमिदं महाशय ! त्वया न कार्य्यः पुनरत्र संशयः ।
एतां गिरं प्राह हितः पुरोहितस्तदा तदासन्नचरोऽभि कञ्चन ॥ ५० ॥
स्वप्नेन चाऽनेन सखि ! श्रुतीरया तथोपश्रुत्याऽप्यनया रयादपि ।
भावी वसन्तस्तव जीवितेशितेत्युवाच वाचं प्रति तां प्रियङ्करा ॥५१॥
स्वप्नं वसन्ताय ततः प्रियङ्करा प्रमोदसंपूर्णमनास्तमालपत्[1] ।
स्वस्वप्नसाम्येन वसन्तदेवकः स सत्यमेवेदममन्यत स्वयम् ॥ ५२ ॥
प्रोवाच भूयोऽपि ततः प्रियङ्करा प्रियंवदा ते स्वमकल्पयत् कनी ।
संजातमेवेदमवैह्यसंशयं स्वकीयपाणिग्रहणप्रयोजनम् ॥ ५३ ॥
ऊचे वसन्तोऽपि शृणु प्रियङ्करे ! तया समं दर्शनमादधे विधिः ।
संयोगमापादयिता स एव मे, कृतं न नीचोऽपि यतो विलुम्पति॥५४॥
विश्वासरूपां कलयन्निमामयं जयन्तिजामेरपरां शरीरिणीम् ।
स्वाकूतमाविद्य विधाय सत्क्रियां विसर्जयामास सदा प्रियङ्कराम् ॥५५॥
श्रीकेशरायाः पुरतः प्रियङ्करा यथा यथाऽऽगत्य निवेदयत्यसौ ।
तस्य प्रवृत्तिं प्रणयानुबन्धिनीं, ममज्ज सा प्रेमरसाम्बुधौ तथा॥ ५६ ॥
अन्योऽन्यसंदेशनदेशनोत्कयोः प्रियङ्कराभ्यागमकाङ्क्षिणोर्मिथः ।
संवर्धमानानुपमानुरागयोः कियाननेहा युगवत् तयोर्ययौ ॥ ५७ ॥
श्रीपञ्चनन्दीभ्यनिकेतनेऽन्यदा वसन्तदेवः स्वगृहस्थितोऽशृणोत् ।
तूर्यस्वनं नागरनायिकाजनं समाह्वयन्तं रभसादिवोत्सवे ॥ ५८ ॥
श्रीकान्यकुब्जस्थसुदत्तसूनवे वरादिदत्ताय दिदेश केशराम् ।
यत्पञ्चनन्दी तत एव वाद्यते सुतूर्यमित्येत्य तदाऽऽर्ण कोऽपि ना॥५९॥
तस्याननादित्यवगम्य मूर्च्छितोऽपतद् महावातहतद्रुवच्च सः ।
प्रस्थापिता केशरया प्रियङ्करा तदा तमाश्वासयदेत्य भाषितैः ॥ ६० ॥
त्वां केशरैवं वदतीन्दुमण्डलानना कृथा मा हृदि खेदमात्मनः ।

१ अकथयत् ।

प्रक्रम्यमाण जनकेन मामक निशम्य पाणिग्रहण प्रिय ! प्रभो !॥६१॥
का नाम मच्चित्तविबोधदुर्विधौ विचेष्टमानौ पितरौ निवारयेत् ? ।
सकलपवृत्त्या मयका पतीकृतस्त्वमेव नाथाऽपरथा न बुध्यताम् ॥६२॥
चेत् पद्मबन्धु विजहाति पद्मिनी विभावरी चन्द्रमस कदाचन ।
गौरी महेश कमला त्रिविक्रम तदाऽहमन्य प्रियमाद्रिये प्रिय ! ॥६३॥
इत्यार्यपुत्रेण सदा हृदन्तरे निवेशनीय हृदयालुना त्वया ।
विज्ञास्यते मत्प्रिय एव वाऽऽयतौ मदाश्रवस्यापि न सत्यता कथम् ?॥६४॥
दैव कदाचिद् भवता सम यदि प्रमन्युरुद्वाह्यते न मा प्रिय ! ।
साचिव्यमासाद्य सदाऽऽशुशुक्षणे क्षणाद् भवन्त दयितीकरोम्यहम् ॥६५॥
एतत् समाकर्ण्य विवर्ण्यसद्गुणो वसन्तदेवोऽपि जगाद ता प्रति ।
तस्त्वप्रसद्दर्शनमेव जातुचिद् निरर्थक नैव भवेत् सदुक्तिरन् ॥ ६६ ॥
एषा प्रतिज्ञा मम च प्रियङ्करे ! निधीयता कर्णपथ त्वयाऽधुना ।
यत् केशरामेव यथा कथञ्चनाद्वहेऽन्यथा यामि यमस्य मन्दिरम् ॥६७॥
आकर्ण्य तद्वाचमितीष्टशासना प्रियङ्कराऽगादुपकेशर मुदा ।
तद्वाक्यपीयूषभरेण केशरामथापि ससिच्य चकार निवृताम् ॥ ६८ ॥
सयोगसबन्धविधित्सतोस्तयोरुपाय एवानुदिते क्वचित् परे ।
प्रात समागम्यत जन्ययात्रया जयान्तजामि परिणेतुमन्यदा ॥६९॥
श्रुत्वा वसन्तोऽपि तदात्मनो गृहाद् निरीय गत्वा क्वचनाऽपि तत्क्षणात्।
उद्यान एको विरहोपतापितस्ततान चिन्तामिति चेतसाऽऽकुल ॥७०॥
जाते विवाहेऽननुरूप ईदृश विपत्स्यते निश्चितमेव केशरा ।
सीमन्तिनीना मनसोऽसमीहित मनागपि प्राणवियोजन यत ॥७१॥
सा प्रेमकाष्ठा प्रतिपद्य तादृशीं विपद्यते यावदसौ न केशरा ।
विपद्य ता तत्प्रथम प्रदर्शये न मादृशा धृष्टचरा स्युरीदृशा ॥७२॥
एव स्वचित्तेन विचिन्त्य चतनाधनो निजप्रावरणेन शोकभाक् ।
सोऽशोकशाखस्य समुच्छ्रशाखिकातले गले पाशमसूत्रयत् स्वयम् ॥७३॥
यद्वाशम वीक्ष्य तमाशु मृत्यवे नृकुञ्जर कश्चिदुपेत्य कुञ्जत ।
आचष्ट मा साहसमातथा वृथा भवादृशामीदृशमाविगर्हितम् ॥ ७४ ॥
आदाय तीक्ष्णक्षुरिका स्वपाणिना विदार्य तस्याशु म पाशमूचिवान् ।
भद्राकृते ! युक्तमिद न भद्र ! ते न पातक ह्यात्मविघातत परम् ॥७५॥

ऊचे वसन्तोऽपि तमीदृशीं गिर ममाऽऽकूते समदमादधासि किम् ?।
पचेलिम प्रेक्ष्य तदिन्द्रवारुण को नाम माधुर्यमृत प्रमोदते ? ॥ ७६ ॥
कान्तावियोगापगमे निबन्धन वितन्वतो मृत्युमसशय मम ।
तत् कण्ठपाशस्य विसूत्रणात् त्वया किमन्तराय प्रसभ विनिर्ममे ?॥७७॥
का नाम कान्ता विरह कथ तयेति पृष्ट एतेन वसन्त एव तत् ? ।
आवेद्य तस्मै निखिल यथास्थित मनागसात गमयाम्बभूव स ॥७८॥
तद् दु समीदृग् विनिशम्य रम्यधी पुनर्नभापे पुरुषोऽप्यनिष्ठुरम् ।
त्व दु खितो यद्यपि वर्तसेतमा तथाऽपि तेऽर्हे न च जीवितोज्झनम् ७९
इष्टार्थससाधनकर्मकर्मठा न सन्त्युपाया किमु भद्र ! भूरिश ? ।
व्यापद्यसे तत् किमहो ! निरर्थक विपत्तिरेव भविता हि दुर्गतौ ॥८०॥
एतादृशीं प्राप्य दशा कथञ्चन स्वजीवित भद्र ! मयाऽपि धारितम् ।
स्वाभीष्टलाभाय कदाऽपि जीवता नरेण कल्याणमवाप्यते यत ॥८१॥
श्रीकामपालोऽभिधयाऽपि कृत्तिकापुरस्थलोकस्तुतवाणिजाग्रणी ।
श्रीकामपाल स्ववपुष्टरश्रिया न कामपालस्तरसाऽस्मि केवलम् ॥८२॥
अर्थस्य सर्वोऽपि तनोति गौरव न मानवस्येति विचिन्त्य चेतसि ।
अर्थार्जनायै विषयान्तर युवा परेद्युरागारत एव निर्ययौ ॥ ८३ ॥
देशान्तर दशत एव पर्यटन् सरोवराद् हस इवाऽपर सर ।
शङ्खोज्ज्वल शङ्खपुर पुर गत परिस्फुरन्मानसवासवासित ॥ ८४ ॥
यक्षस्तदुद्यानविभूषण पर स शङ्खपालोऽस्त्यभिधानत श्रुत ।
पुसा यदर्चाऽपि विनिर्मिता हृदा करोति कल्पद्रुमवत् समीहितम् ॥८५॥
अत्राजिप तस्य महोत्सवेऽन्यदा सम समग्रै पुरवासिभिर्जनै ।
एका कनीं तत्र सखे ! व्यलोकय रसालशालान्तरवर्तिनीमहम् ॥८६॥
शूलीति नाम्ना दयितस्य धूर्जटे प्रकोपभावेन पृथग् व्यवस्थिताम् ।
गौरीमिवैतामवलोक्य मानम मनोभुवा पञ्चशरैर्ममाऽऽहतम् ॥८७॥
श्रुत्वा सखीभ्यो मम नाम सा श्रुत प्रदर्शयन्ती प्रियतामिवान्विताम् ।
कर्पूरपूरेण सम ससमदा सखीकरणार्पयति स्म वीटकम् ॥ ८८ ॥
तथाऽऽददान स्वकरेण मानसे विचिन्तयामास मुदाऽदसीदृशम् ।
किञ्चिद् ममाऽपि प्रतिदातुमौचिती प्रतीयते मे कृपणत्वमन्यथा ॥८९॥
आदानमुन्मूल्य तदा भरन्मन समागमत् पथ्यन तत्र पारण ।

उच्छृङ्खलस्फोटितलोहशृङ्खल कृतान्तयानभ्रममादिशन्निव ॥ ९० ॥
उत्सृष्टमाधोरणधोरणीसहाप्रतिक्रियाभिर्नितमा मतङ्गजम् ।
तत्राम्रकुञ्जेऽधिगत निरीक्ष्य स परिच्छदोऽस्या सकल पलायित ॥९१॥
स्तम्बेरमे तत्र समापतत्यपि स्थितिं वितेने भयविह्वलाऽपि सा ।
आनन्दसपादनबद्धविभ्रमा सुधांशुलेखेव विधुन्तुदागमे ॥ ९२ ॥
हस्तेन हस्ती नलिनीमिवाशु ता कर्नी समाकर्षति यावदस्तभी ।
तावद् निजघ्ने मयका स पर्चके प्रपञ्चत स्थूलतमेन दारुणा ॥ ९३ ॥
रोषाञ्चित सोऽपि विहाय योषित बलाभिमानाद् वल्ते स्म मा प्रति ।
त वञ्चयित्वाऽहमपीभशिक्षया कर्नी समादाय ययावितोऽन्यत ॥९४॥
त्रैलोक्यसुभ्रूजनकामनीयक रुचा जयन्तीं विजने मुमोच ताम् ।
एकान्त एवाऽऽसितुमक्षम ततो मया सम तद्धृदय समागमत् ॥९५॥
स्तम्बेरमे जग्मुषि तत्परिच्छद समागतस्तत्र पुन समन्तत ।
बुद्धा सुबुद्धिर्मदिराऽसुदायिन मुहुर्मुहुर्मां प्रशशस समदात् ॥ ९६ ॥
निन्ये सखीभि पुनरेव तत्र सा रसालकुञ्जे सरमालसायना ।
भूय समायासिपुराशुगेरितास्तदैव तत्र द्विपशीकरा परे ॥ ९७ ॥
तस्या वयस्यास्तदनन्तर ययुर्दिशो दिश साध्वससकुलाशया ।
क्षुत्राऽपि सा क्षणमतल्लिका गतेत्यह समन्तात् सुतमा व्यलोकयम् ॥९८॥
नाऽऽलोकि कर्पूरशलाकिकेव सा पुनर्मया तापविभेदिनी दृशो ।
जीवाम्यह मित्र[1] तथाऽपि निष्ठुर कन्याशया विघ्नितजीवनिर्गम ॥९९॥
उन्मत्तरूपो मदिराऽभिधानतोऽप्यह तदादि क्षितिमण्डले भ्रमन् ।
अत्रागम सम्यगुपायवर्जितो, वयस्य[1] तन् त्व धृतिमेत्र सश्रय ॥१००॥
चिन्ताम्युपायोऽप्यनपाय एव ते सखे[1] प्रियासङ्गमसाधनेऽधुना ।
आस्वादिताऽशर्मभरोऽहमीदृश हित ब्रुवे त्वा न तु मा मृथा वृथा॥१०१॥
कल्ये विवाहा भवितेति मैकिका रतिप्रिय पूजयिताऽत्र सप्रियम् ।
कल्पोऽयमाकल्पमितीङ्गहेतुना, न शक्यत कल्पविलोपकोऽत्र यत्॥१०२॥
तत्पूर्वमेवाद्य परेखौ रितौ प्रविश्य सन्ध्यासमये समाहितौ ।
कामालय कामितकल्पपादपे निर्लीय तिष्ठाव उरुप्रविक्रमौ ॥ १०३ ॥
तत्रैव तस्या कुसुमेषुमन्दिरे प्रवेशनिष्क्रामण एव वेगत ।

---

1 पुरुषान् तु पाद ।

स्वीकृत्य वेषं तदगारमाश्रितस्तदिङ्गितैर्मोहयितास्मि तत्कुलम् ॥ १०४ ॥
तद्वेश्मसमार्गे मयका समाश्रिते भवांस्ततस्तां परिगृह्य गृध्रवत् ।
मांसस्य पेशीमिव पत्तनान्तराऽयनं समासाद्य समीहितं क्रियात्॥१०५॥
ईदृक्सुधासारवचोभिरुक्षितः प्रयाततापः स तमब्रवीदथ ।
एवं मम स्वस्ति समस्ति किन्तु ते वितर्कयामि व्यसनोग्रसङ्कटम्॥१०६॥
अभ्यर्णचर्याऽवनिदेवभार्यया क्षुतं जरत्या विनिशम्य निर्मितम् ।
तं कामपालो न्यगदत् तदा मुदा न मेऽत्र मित्र ! व्यसनं मनागपि॥१०७॥
किञ्च त्वदर्थाऽऽहितिबद्धचेतसो ध्रुवं ममाप्यभ्युदयो भविष्यति ।
किं श्रूयते नैव यशः सुखं श्रुतौ विनिर्मिमाणस्य परप्रयोजनम्?॥१०८॥
कश्चिज्जरद्ब्राह्मणकोविदस्तदा जगाविद कस्यचनाऽपि संमुखम् ।
विद्वैवमेवेति न संशयस्त्वया विधेय एवाऽत्र विधेय ईदृशे ॥ १०९ ॥
श्रुत्वा तदुक्तेः सदृशीमुपश्रुतिं वसन्तदेवः सुहृदाऽमुना समम् ।
ग्रन्थिं स्ववस्त्रे शकुनादिमं ततो निबध्य गेहं मुदितः समागमत्॥११०॥
वैकालिकाद्यं प्रविधाय संविधिं विकालवेलासमये ततो गतौ ।
मीनध्वजस्यायतने सकेतने स्मरस्य मूर्त्तेरनु तिष्ठतः स्म तौ ॥१११॥
माङ्गल्यतूर्यस्य निनादमुच्चकैर्वितत्य ताभ्यां श्रवणातिथेयताम् ।
तस्याः समायातमिलेर्वशीश्रियस्तदेकहृद्भ्यां निरचायि चेतसि ॥११२॥
मन्त्रं महादेवमनोभवोदितं स्वयं स्मरन्ती प्रिययोगकारणम् ।
द्वाराङ्गणं सा स्मरदेवसद्मनः समाससादाऽथ समीहितप्रदम् ॥११३॥
उच्चैर्विमानादथ देवतेव सा मनुष्ययानादवतीर्य वर्यरुक् ।
आदत्त पुष्पादिचयं प्रियङ्कराकरादनङ्गं भगवन्तमर्चितुम् ॥ ११४ ॥
एकैव सा मन्मथदेवमन्दिरान्तरं विवेशाऽऽलिनिषिद्धबालिका ।
कल्पोऽयमित्युज्झितसंशया ददौ स्वपाणिना तस्य कपाटसम्पुटम्॥११५॥
आनीतनैवेद्यसुमादिसंचयैरनङ्गमुद्दिश्य महीतले कनी ।
प्रक्षिप्य सार्घं विरहाऽऽतुरा ततः कृताञ्जलिर्व्याहरति स्म चेदृशम् ११६
वृन्दारकाधीश्वरमान्यशासन ! प्रवृद्धमारासुरनाथसेवित ! ।
लक्ष्मीमनोऽम्भोजविकाशभास्कर ! प्रभो ! जय त्वं रतिजीवितेश्वर!॥११७॥
पौष्पैः शरैः पञ्चभिरेव विष्टपत्रयं त्वया निर्जितमीश ! हेलया ।
प्राकाम्यमेतद्भुवनत्रयातिग ! प्रकाममालोक्यत एव तावकम् ॥११८॥


ब्रह्मेशनारायणमुख्यनिर्जरा न शासनं लङ्घयितुं क्षमास्तव ।
अन्यः प्रतापस्तव को निरूप्यते विवर्ण्यमानाद्भुतवीर्यवैभव ! ? ॥११९॥
वस्तु स्वरूपं तनया निजानते यथार्थमित्यत्र न कोऽपि संशयः ।
स्वामिन् ! मनोभूर्मम मानसं विदन्ननिष्टभर्त्रा सह मा न योजय ॥१२०॥
कामं समेषां सफलं करोषि चेति ते प्रवादः प्रथितो जगत्त्रये ।
भर्ता त्वया नव स मे प्रदीयते तदत्र भाग्यं मम किं विगीयते ? ॥१२१॥
विश्राणितो जन्मनि नात्र मे पतिर्वसन्तदेवः स वसन्तमित्र ! चेत् ।
जन्मान्तरेऽपि प्रियमेनमेव मे रतीश ! देया मृगये न चापरम् ॥१२२॥
इत्याशुदित्वा किल तस्य तोरणे निबध्य पाशं लघु यावदात्महान् ।
उद्बन्धनं कर्तुमियेष केशरा स तावदाविर्भवति स्म तत्पुरः ॥ १२३ ॥
मा साहसं तन्वि ! वितन्विति स्वयं निवेश तत्पाशमसौ व्यसूत्रयत् ।
कस्मादकस्मात् समुपागतः पतिर्ममेति चित्रं निभरान्वभूव सा॥१२४॥
ऊचे वसन्तेन सतेऽश च सा प्रिये ! प्रियस्तेऽस्मि स विप्रियोज्झितः ।
एतद् यदर्थं निरमायि साहसं त्वया किमन्यत् तव वाऽस्ति दुर्घटम् ? ॥

एतन्मित्रपवित्रमन्त्रवशतोऽत्र प्राक् प्रविश्य स्थित-
स्त्वां प्राप किल त्वज्जिहीर्षुरधुनाऽहं कामदेवाज्ञया ।
तन्नेपथ्यमशेषमस्य निजकं प्रीत्या भवत्याऽर्प्यतां
येन द्राक् परिधाय तत्तव पितुर्वेश्माऽधितिष्ठत्ययम् ॥ १२६ ॥
त्वन्नेपथ्यभृताऽमुना तव गृहे तन्वङ्गि ! चाङ्गीकृते
यास्यावो निशि नौ निरीय नगरं मौक्याप्तये स्वेप्सितम् ।
श्रुत्वैव निजवेषमार्पयदियं सा कामपालाय स
देवं काममनु स्थितः सह तया हृष्टो वसन्तोऽप्यथ ॥ १२७ ॥
पुष्पौघैः पूजयित्वा परिमलकलितैः कामदेवं प्रणाम
नीरङ्गयन्तर्हितास्य मुकुलितनयन केशराकल्पकल्प्य ।
उद्घाट्याऽरं कपाटे स्वयमपि रुचिरं कामपालो निरीय
तस्मात्या दत्तहस्तः पृथुतरमभवद् याप्ययानं नृवाह्यम् ॥१२८॥
वाहीकैर्वाह्यमानः प्रथममधिगतः पञ्चनन्दीश्वगेहे
यानादुत्तार्य वेगात् प्रथममकचरी स्वर्णवत्रामनाथम् ।
तं प्रोच केशरः ! त्वं महत्यदृश्यार्धोऽसमयोगहेतु

मन्त्र तिष्ठ स्मरन्ती, भवति हि भविना मन्त्रतो वाञ्छितार्थ ॥१२९॥
तद्वाक्यश्रवणादनन्तरमसौ तस्या गताया तदा
मन्त्र कामरतीष्टसङ्गमकर नामाऽस्मरत् सोऽप्यलम् ।
तत्कान्ता मदिराऽपि मातुलसुता श्रीकेशरायास्तदा-
ऽऽहूता शङ्खपुरादिहाऽऽगमदर पाणिग्रहस्योत्सवे ॥ १३० ॥
तस्याग्रे सा निपण्णेदमवददुदयत्कोष्णनि श्वासपूर्व
किं खेद केशरे ! त्व नियतिविनियते कार्यजाते तनोषि ? ।
आस्ते ते जीवितेश प्रियसखि ! सुकृती श्रीवसन्त कलाया-
नित्यश्चैष सखीभ्यो निजनगरगता सौख्यसपत्तिदाभ्य ॥१३१॥
मया प्रियवियोगज प्रचुरदु खमास्वादित
स्वय खलु वदामि तत् तव विधातुमाश्वासनाम् ।
विधिर्भजति वामता किल तनोत्यनिष्ट ततो
गतोऽयमनुकूलता सखि ! मनीषित दास्यति ॥ १३२ ॥
किञ्च त्व सखि ! वर्णनीयचरिता धन्याऽसि नून यया-
ऽऽलापालोकनज सुख सह मुहु स्वप्रेयसाऽऽसादितम् ।
वृत्त मेऽप्यतिदारुण पुनरिद सश्रूयता दु श्रव
स्वालीभि सममेकदाऽगममह श्रीशङ्खयक्षोत्सवे ॥ १३३ ॥
तत्राऽशोकपलाशिपल्लवचय गृह्णन्तमेकान्ततो
मूलेऽशोकमहाद्रुमस्य तरुण मूर्ता स्मर प्रैक्षिषि ।
ताम्बूल प्रहित सरागमनसा तस्मै वयस्ये ! मया
तेनाऽह करुणारसाम्बुनिधिना व्यालेभतो रक्षिता ॥ १३४ ॥
भूयो व्यालकरीन्द्रभीतिविधुरा नष्टा सखीभि सम
पश्यन्ती पुनरेव त बहुतर प्रैक्षिष्यह न क्वचित् ।
वारीमध्यगतेव तत्प्रभृति च स्तम्बेरमी विस्मृतो-
द्वेगा प्राणिमि गाढपञ्जरमिता सारीव दु खार्दिता ॥ १३५ ॥
विना स्वप्न क्वाऽपि प्रियसखि ! न पश्यामि तमह
प्रसन्ने दैवेऽस्त परमपि यशिक्षिष्यत इह ।
तनूर्त्तु दु ख शक्ति तव पुर प्रोच्यत इद
यथा दु खी दु ख श्लथयति तथा नैव हि सुखी ॥ १३६ ॥

सत् खेदमाशु विजहीहि मन प्रसाद-
सपादक सरिा समाश्रय धैर्यमेव ।
आराधितो विधिरय तव शर्मदाता
नैतादृशस्य भवतीह कृतघ्नभाव ॥ १३७ ॥
नीरङ्गीमपनीय साम्रत जगा काम स रङ्गान्विते !
य त्व काङ्क्षसि सर्वदा स च पुरा दृष्टप्रियस्तेऽस्यहम् ।
सयुक्ताऽस्त्यधुना वसन्तसुहृदा सा केशरा त्व मये-
वैतस्याऽभिमत विधेर्विदधत किं वा विलम्बो भवेत्? ॥१३८॥
प्रत्यासीदति साम्रत प्रियतमे ! वेलाऽपि वैवाहिकी
किञ्चिद् येन निरीयते झटिति मे तद् द्वारमुद्घावय ।
पाश्चात्योपवनीयपक्षकमिय त्स्याऽथ साऽदर्शयत्
तेनैव प्रययौ सम मदिरया काम स कामातुर ॥ १३९ ॥
आयातस्य पुर पुरेऽत्र मदिराप्राणेश्वर केशरा-
प्राणेशस्य समेत्य दारकलितोऽसौ प्राप कामो मुदम् ।
प्राग्जन्मप्रियतावशाद् नरपते ! तौ ढौकने पञ्चक
वस्तूना तनुतोऽनिश कलय तानग्रे निपण्णानिमान् ॥१४०॥
इष्टैरेभि सह नरपते ! जाततत्त्वावबोध
स्तत्त्व भोक्तु प्रभवसितरा सन्निधिस्थैर्निकामम् ।
नेयत्काल किमपि भवता भुक्तमेतानमत्वा-
ऽभीष्टान् प्रीतान् सुकृतकरणे निर्निदान सहायान् ॥ १४१ ॥
आकर्ण्येत्यथ पञ्च तेऽपि सहसाऽस्माप्रुर्भव प्राक्तन
स्नेमप्रेमनिमित्तसत्यभणने साक्षित्वविद्योतकम् ।
श्रीशान्ति कुरुचन्द्रभूमिपतिरप्यानम्य कल्याणव
प्राक्प्रेम्णा स्वगृहे निनाय चतुरो बन्धूनिवेन्छ्रु मुदम् ॥१४२॥
आसीच्छ्रीगुरुगच्छमौलिमुकुटश्रीमानभद्रप्रभो
पट्टे श्रीगुणभद्रसूरिसुगुरुर्विद्यानदीसागर ।
तच्छिष्येण कृते गतोऽसमरस श्रीशान्तिवृत्ते महा-
काव्ये श्रीमुनिभद्रसूरिकविना सर्गोऽयमष्टादश ॥ १४३ ॥

इति श्रीशान्तिनाथचरिते अष्टादशः सर्गः समाप्तः ॥



अर्हम्

अथ एकोनविंशः सर्गः ।

—:०:—

पृथ्व्यां यस्मिन् संप्रवृत्ते विहारं कर्तुं साग्रे योजनानां शतेऽपि ।
नेशुस्तूर्णं मारिदुर्भिक्षरोगाः स श्रीशान्तिः श्रेयसे भूयसे वः ॥ १ ॥
ग्रामीणानां नागराणामिवाऽन्तश्चित्तं हर्षं निर्विशेषं प्रयच्छन् ।
साम्योत्कर्षं संप्रपन्नस्य दूरं क्षेत्रज्ञस्याऽवस्थितेस्तस्ववृत्त्या ॥ २ ॥
विश्वारामं ताप्यमानं कषायज्वालाजिह्वज्वालजालेन कामम् ।
सिञ्चन्नुच्चैर्देशनावारिपूरैर्बिभ्रत् स्वच्छं शम्बरं वारिदो वा ॥ ३ ॥
हृत्वा विश्वव्यापि मोहान्धकारं वाग्दुस्रौघैर्बोधयन् भव्यपद्मान् ।
भिन्दन् सर्वं लोककोकस्य शोकमादित्यो वा विप्रलम्भप्रभूतम् ॥ ४ ॥
वृत्तत्वभ्राड्निर्मलच्यातपत्रीव्याजाद् मौलेरूर्ध्वमाकाशदेशे ।
प्रागाराद्धां धारयन् सुत्रिरत्नीं कार्तज्ञं वा ख्यापयन् विश्वमध्ये॥ ५ ॥
उद्दामोद्यच्छौर्यवीर्यप्रचण्डमोहात् त्रासाच्छिप्यवर्गस्य पूर्वम् ।
भग्नज्ञानाऽऽह्वानविज्ञानहेतोरूर्ध्वीकृत्योद्भावयन् स्वध्वजं वा ॥ ६ ॥
पादाब्जाधः स्वर्णपद्मानि कुर्वन् स्वप्रज्ञश्रीजागरूकप्रभाणि ।
सर्वोत्कृष्टं निःस्पृहत्वं ब्रुवाणो निर्वाणस्य प्रापणे लग्नकामः ॥ ७ ॥
अग्रे स्फूर्जद्धर्मचक्रेण सूर्यं जित्वा भाता विभ्रताऽऽरासहस्रम् ।
विश्वस्यान्ध्यं निर्विशङ्कं वितन्वद् मोहध्वान्तं निघ्नता राजमानः ॥ ८ ॥
शक्रेशानस्त्रीप्रमोदप्रमुक्तलाजाऽऽभाभ्यां सर्वदा चामराभ्याम् ।
जम्बूद्वीपान्तर्गतानुष्णरश्मिद्वैतज्योत्स्नानिर्जयं वीज्यमानः ॥ ९ ॥
गन्धर्वौघैः सुस्वरैर्गीयमानः श्रद्धाशुद्धैश्चारणैः स्तूयमानः ।
आकाशस्थैः खेचराणामधीशैः स्त्रीयस्त्रीणां दर्श्यमानोऽङ्गुलीभिः ॥१०॥
सौरे मार्गे दुन्दुभिध्वानपूर्वं धर्मस्थानं वासयन् सर्वतोऽपि ।
देशत्यागं निर्दिशंश्चापि पापव्यापाराणामेकवारं स्वतोऽपि ॥ ११ ॥
भव्यक्षेत्राभ्यन्तराले कुकर्मदावप्लुष्टे बोधसीरेण कृष्टे ।
स्वच्छोदञ्चद्भावनाऽम्भःप्रसिक्ते सम्यक्त्वाख्यं बीजमेकं वपन् प्राः ॥१२॥
प्रादक्षिण्यं साधुनानां प्रकुर्वन् दाक्षिण्यं वा रोपयंस्तन्मनःसु ।

मिथ्यादृष्टीन् कण्टकौघानिवाराद् माहात्म्येनाऽवाङ्मुखान् निर्मिमाणः ॥
नम्रीकुर्वन् वर्त्मगान् शालसङ्घान् सम्यक्त्वाढ्यान् श्रावकौघानिवाऽऽरात् ।
तत्राथाऽर्हन् श्रीसुराष्ट्राख्यराष्ट्रे स्वामी राजन् प्रातिहार्यैर्व्यहार्षीत्॥१४॥
(त्रयोदशभिः कुलकम्)

अध्वन्यानामाशु यत्रारघट्टाश्रीत्कारेण श्रोत्रमार्गं गतेन ।
खेदच्छेदं कुर्वते पूर्वमेव पश्चादापः शीतलाश्चातपेऽपि ॥ १५ ॥
प्रेमोत्कर्षं बिभ्रतोऽप्यत्यल्पे निःसामान्यं बालकालेऽपि चन्द्रे ।
पारावारात् पुत्रवात्सल्यमेतद् यस्मिँल्लोकैरीक्षितं शिक्षितं च ॥ १६ ॥
गम्भीरत्वं यत्र लोकैरुपात्तं नूनं भक्त्या सन्निधिस्थात् समुद्रात् ।
लक्ष्मीवत्त्वं चापि, किं वा महान्तो नैवाऽऽराद्धाः संप्रयच्छन्त्यतुच्छम् ? ॥
दृष्ट्वा सन्तो यत्र कूपारघट्टाश्रीत्कारस्य च्छद्मनौचित्यभाजः ।
अभ्यायातं स्वामिनः शिक्षयेव पृच्छन्त्येव स्वागतं पान्थवर्गम् ॥१८॥
पीत्वा क्षीरं लाङ्गलीनां फलानां खर्जूराणां माधवीनां च सन्तः ।
लब्ध्वाऽऽस्वादं नागवल्लीदलानां यं मूर्धानं धूनयन्तः स्तुवन्ति ॥ १९ ॥
यस्मिन्नाम्रैर्नालिकेरप्रमाणैर्माधुर्येणेवाङ्गजैः शर्करायाः ।
राजास्वादैर्विस्मयः कस्य न स्याद् दृष्ट्वाऽपूर्वं वस्तु चित्रं यतोऽत्र ? ॥२०॥
लोका दृष्ट्वा यत्र देवाधिदेवं श्रीनाभेयं चन्द्रभं चाऽपि नेमिम् ।
श्रद्धाऽऽवेशात् तीर्थयात्रासमेता मन्यन्ते स्वं जन्म सत्यं कृतार्थम् ॥२१॥
किं रत्नानां खानिरत्रास्ति यद्वत् सद्रूपाणां वाससां किं नु तद्वत् ?।
संप्राप्यन्ते तान्यहो ! वाञ्छितानि यस्मादित्यूहं व्यधुर्यत्र पान्थाः ॥२२॥
वासश्चित्रं भोजनं देवभोज्यं वाहा रम्या भानुवाहोपमानाः ।
लक्ष्मीरूपा योषितो यत्र नूनं साक्षात् पुण्यश्रीफलं दृश्यते ज्ञैः ॥२३॥
ख्यातो मारः केवलं पुष्पचापे वध्वां दारा इत्ययं शब्दयोगः ।
कृष्णे वर्णे काल एवास्ति चैते नैवाऽन्यार्थे विश्रुता यत्र शब्दाः ॥२४॥
(दशभिः कुलकम्)

अध्यारुक्षत् तीर्थकृच्छान्तिनाथः पुण्याम्भोजोद्बोधने द्वादशात्मा ।
स्वर्णस्तम्भच्छायया दृश्यमानोऽन्तःशत्रुच्छिद् तत्र शत्रुञ्जयाद्रिम् ॥२५॥
यत्रौषध्यो दीपवत् प्रज्वलन्त्यस्तम्यां नित्यं तैलसंबन्धवर्जम् ।
सीमस्थानां हृन्दि विस्मापयन्त्यो दीपाधानं पर्व संसारयन्ति ॥ २६ ॥

अम्भोदानां पङ्क्तिरालम्बनस्याऽभावाद् व्योम्नि श्रान्तिमालम्बमाना ।
अध्यासीना यस्य सानूनि नूनं भ्रान्त्युच्छेदाद् निर्वृतिं विन्दतेऽरम् ॥२७॥
धातुव्रातं शोणितं दर्शयन् स्वमेवं ब्रूतेऽभ्यागतानां पुरो यः ।
रागं मुक्त्वा स्वात्मनिष्ठं प्रभूताः सिद्धिं प्राप्ता अत्र निर्धूतमोहाः ॥२८॥
मुक्ताभ्रान्त्या शीकरान् निर्झराणां क्लृप्तान् नूनं शारदज्योत्स्नयेव ।
संगृह्णन्त्यः पाणिपद्मेन मुग्धा वार्यन्ते स्वाः खेचरैर्यत्र कान्ताः ॥२९॥
आयातेऽस्मिन् स्वामिनि श्रीनिवासे स्वेनानन्तज्ञानविभ्राजमाने ।
सौधर्मेन्द्राद्यन्विते तत्र वाल्ये शक्राऽऽक्रान्तं सोऽहसद् मेरुशैलम् ॥३०॥
(षड्भिः कुलकम्)

देवैः पूर्णे निर्मिते तत्र पूर्वरीत्याऽऽस्थानेऽशोकवृक्षाद्युपेते ।
स्वाम्यासीनो देशनावाक्सुधाभिर्विश्वं विश्वं जीवयामास शान्तिः॥३१॥
नत्वा नाथं प्राञ्जलिर्देशनान्ते विज्ञप्तिं स्वर्नाथ एतां व्यधत्त ।
स्वामिन्नद्रेरस्य मानं स्ववाचा व्याचक्ष्व त्वं मे पुरस्तात् प्रसद्य ॥ ३२ ॥
प्राक्रंस्ताऽथो शान्तिनाथः प्रवक्तुं तन्माहात्म्यं क्ष्माभृतोऽस्य प्रथीयः ।
पूर्वे कालेऽस्मिन्नयं पूर्वतीर्थे ख्यातं शक्राऽष्टापदाद्रेरपीड्यम् ॥ ३३ ॥
माद्यन्मोहभिच्छिदा पुण्डरीकसङ्काशश्रीपुण्डरीकस्य साधोः ।
तीर्थाधीशेनादिमेनाऽमरेन्द्र ! सिद्धिक्षेत्रं नन्विदं प्रत्यपादि ॥ ३४ ॥
नामान्यस्य त्रीणि पृथ्वीधरस्य प्राहुर्विज्ञास्तत्र शत्रुंजयोऽयम् ।
संसाराम्भोराशिपाते निदानप्रस्फूर्जत्कन्मुख्यशत्रुप्रणाशात् ॥ ३५ ॥
पापध्वंसाद् निर्मलत्वं ददानः प्रोक्तोऽर्हद्भिश्चिद्धनैर्निर्मलाद्रिः ।
निर्वाणाप्तेः पुण्डरीकस्य चैष ख्यातो जातः पर्वतः पुण्डरीकः ॥३६॥
भव्योत्तापोज्ञासने पुण्डरीकं संप्राप्ताऽन्वग् यन्मुनिं पुण्डरीकम् ।
अस्मिन् सिद्धिं कोटिकोटिर्मुनीनां सिद्धिक्षेत्रं कीर्त्यते तेन चैतत् ॥३७॥
वक्त्राम्भोजादादितीर्थङ्करस्य श्रुत्वैतस्याऽप्यद्भुतं स प्रभावम् ।
अत्रैत्याऽऽद्यः सार्वभौमः सुरत्नचैत्ये मूर्ती पुत्रपित्रोर्न्यधत्त ॥ ३८ ॥
एष स्पृष्टश्चाप्रिमैस्तीर्थनाथैरेकन्यूनैश्चन्द्रभागप्रमाणैः ।
स्प्रक्ष्यन्त्येनं नेमिवर्जं जिनेन्द्राः सप्ताऽन्येऽपि प्राप्तविज्ञानतत्त्वाः ॥३९॥
नूमः किञ्चोद्यस्तमत्वं तदस्य येन श्रीमन्नाभिभूमीन्द्रसूनोः ।
अध्यारुह्यैवाऽत्र लोकाममग्र्यं पौत्रैरप्यध्यायि सर्वैः करे स्वे ॥ ४० ॥

ससाराम्भोराशिमज्जज्जनाना निस्तारायाऽऽनद्धकक्ष तदेतत् ।
तीर्थ द्रष्यन्मोहराजस्य सैन्य रोद्धु शक्त शक्तितो दुर्जयस्य ॥ ४१ ॥
श्रुत्वा वाक्य तद् यथार्थ विडोजास्तीर्थाधीश भक्तिमानाननाम ।
स्वच्छन्दश्रीर्देवदेवोऽपि शान्तिर्देवच्छन्दे तत्र विश्राम्यति स्म ॥ ४२ ॥
तस्या यातेष्वेव मर्त्येषु सत्सु श्रीनाभेयस्यार्हतोऽसौ पुरस्तात् ।
सगीतस्यारम्भमाधत्त देवीरम्भामुख्योचाऽप्सरोभि सुरेन्द्र ॥ ४३ ॥
चातुर्विध्यात्प्रसिद्धे ततादिवादित्रेऽस्मिन्नाततें तत्र चित्रम् ।
भग्न चातुर्गत्यसभूतदु ख कर्तृश्रोतृद्रष्टृवर्गस्य भावात् ॥ ४४ ॥
भाद्राम्भोदोद्दामनिर्घोपजैत्रे स्फूर्जत्यस्मिन् पञ्चशब्दोत्थशब्दे ।
किं तत्स्थाना पञ्च शब्दादयोऽमी दूरीभूता गोचरा साभ्यसूया ?॥४५॥
द्रष्टा साक्षाज्जगदीशो यत्र चार्हन् सगीतस्यारम्भको यत्र शक्र ।
देवी वर्ण्या नर्तकी यत्र रम्भा तत् सगीत किं न लोकोत्तर स्यात् ?॥४६॥
रम्भा नृत्य कुर्वती तत्र सार पाणी पादौ लक्षयन्तीव रेजे ।
तीर्थाधीशस्याऽऽदिदेवस्य चाग्रे ज्ञाता यस्मादेष सामुद्रकस्य ॥ ४७ ॥
वशाख्यातिर्नान्यथा मे भवित्रीत्येव चित्ते सविमृश्यैव तत्र ।
जम्भाराते कौशल वेदयन्ती देवी काचिद् वादयामास वशम् ॥४८॥
कम्प प्राप्ता दर्दरै पादजातैर्मत्कै शैल पुण्डरीक स चेष ।
इत्थ चित्ते सविचिन्त्यैव रम्भा मन्द मन्द लीलया नृत्यति स्म ॥४९॥
वक्षोजाभ्या मामकाभ्या विशालमेतत् किञ्चित् किं सम वा समस्ति ?।
एत ज्ञातु तत्र तुम्न हृदन्तर्विन्यस्येवाऽऽवीवदत् काऽपि वीणाम् ॥ ५० ॥
गीति गीत तत्र तत् केश्चनाऽपि शक्राज्ञैर्भाविनाभव्यबोधे ।
यन पीयूष मन्यमानैरमानि देवै स्वर्गे केवल वञ्चनैव ॥ ५१ ॥
रम्भानृत्य चारु नानाऽभिनीत्या युक्त पश्यल्लोचनाना सहस्रम् ।
मेने शक्र स्व कृतार्थं तदानीमेश्वर्य वाऽऽलोकयन् स्वस्य भक्तिम् ॥५२॥
प्राशसि स्व निर्निमेपक्षणत्व सपश्यद्भिर्नृत्यमेकाग्रचित्ते ।
गीर्वाणाना मण्डलैस्तत्र किञ्च विज्ञाभावोऽयोधि जन्मान्तरेऽपि ॥५३॥
रम्भानृत्यालोकहृष्टै सुरेन्द्रैर्दत्त किञ्चिद् दानशौण्डैर्न चापि ।
ईदृग्भावाद् नृत्यकर्तु फलानि यस्माद् दातु देवदेव समर्थ ॥ ५४ ॥
रम्भानृत्येऽस्वर्गगन्धर्वगीते तीर्थेशाग्र दत्तचित्तेषु तेषु ।

किं ध्यानस्थाश्चित्रिताः स्तम्भिताः स्विदित्यभ्यूहं तत्र कश्चिन्न चक्रे?॥५५॥
देवैस्तत्राऽवादि पूर्वं मृदङ्गो यद् रम्भायां नर्तनाभ्युद्यतायाम् ।
नृत्यारम्भेऽभ्युत्सवे चाऽपि तेन पूर्वं जज्ञे तस्य लोके प्रवृत्तिः ॥५६॥
स्वर्गस्थानां देवतासंहतीनां भोगाऽऽसक्त्यावस्थितौ वञ्चितानाम् ।
आह्वानायेवात्र भाङ्कारनादैर्भेरी देवैस्तत्क्षणं वाद्यते स्म ॥ ५७ ॥
ईदृक् चित्रं तत्र संगीतमासीत् स्वाराद्चक्षुर्वृत्तिसंस्तम्भहेतुः ।
भास्वान् द्रष्टुं यद् ध्रुवं द्वादशात्मभावं श्रित्वा पूर्वशैलं बभाज ॥५८॥
देवैः सार्धं देवतानामधीशः प्रातर्नत्वा सोऽग्रिमं षोडशं च ।
तीर्थाधीशं साधयन्तं विहारं सौधर्माख्यं स्वं विमानं प्रपेदे ॥ ५९ ॥
शान्तेरेकत्रिंशदासन् सहस्राण्याज्ञासाराः साधवस्ते द्विरुक्ताः ।
आरभ्याऽऽजि यैः समं पञ्चबाणस्त्रस्तो भग्नस्त्यक्तकोदण्डकाण्डः ॥६०॥
तावन्माना एव साध्व्योऽपि शान्तेः किन्तु न्यूनास्ताश्चतुर्भिः शतैश्च ।
न्यूनत्वं वा युक्तमेतन्मुनिभ्यः साध्वीनामप्युग्रचारित्रवत्त्वे ॥ ६१ ॥
आसन् शान्तेरर्हतोऽष्टौ शतानि प्रख्यातान्येव श्रुतज्ञानभाजाम् ।
सीमज्ञानां त्रीण्यभूवन् सहस्राण्येकाधिक्यात् स्वान्तपर्यायिणां च ॥६२॥

चत्वारि केवलविदामभवन् सहस्रा-
ण्युत्कर्षतः समधिकानि शतत्रयेण ।
उद्दामवैक्रियविभूतिभृतां मुनीनां
षष्टिः शतानि विमलप्रतिपत्तिभाजाम् ॥ ६३ ॥
अष्टौ शतानि गुणितानि विभोस्त्रयेण
सद्वादिनां परपराजयदीक्षितानाम् ।
लक्षत्रयी दशसहस्रविनाकृताऽभून्
श्राद्धव्रजस्य जिनधर्मपरायणस्य ॥ ६४ ॥

चत्वारि लक्षाणि विभोरुपासिका न्यूनाः सहस्रैः परमेव सप्तभिः ।
पादाम्बुजैः पावयतो धरां शरल्लक्षायुषस्यैष परः परिच्छदः ॥ ६५ ॥

अष्टोनं तुर्यभागं विगमितवृजिनं स्वायुषः संविहृत्य
ज्ञात्वा निर्वाणकालं नवशतयतिभिः सार्धमुत्सृष्टरागैः ।
नाथे संमेतभूभृच्छिरसमुपगते मुक्तसर्वाशने च
मत्यामन्नायनीशाः प्रविदितकथया शोकतुम्रा इवेयुः ॥ ६६ ॥

आयुस्तीर्थेश्वराणामपि भजतितमां नैव यत्र स्थिरत्वं
तद्योग्यं नः कथं स्यादिति कुलिशभृतां प्राचलन्नासनानि ?।
मत्वा तत्कम्पहेतुं सहचरितविदा सर्व एवाऽत्र तूर्णं
संमेताभिख्यशैले सह विबुधगणैरागमद् देवराजः ॥ ६७ ॥
सेवन्तेऽपि जघन्यतः प्रभुमिमं यत्कोटिसंख्याः सुरा
वैचित्र्येण च निर्निमेषनयना रात्रिंदिवं मानवाः ।
तन्नैसर्गिकदुर्विभेदरसतः संसर्गसर्गक्रमा-
ज्जज्ञे स्वाम्यपि निर्निमेषनयनो नम्रेषु तेषु क्षणात् ॥ ६८ ॥
मासप्रान्ते स्थितिमधिगते शीतभानौ भरण्यां
ज्येष्ठे मासे त्र्यधिदशतिथौ श्यामले पक्ष एव ।
स श्रीशान्तिप्रभुरतिभवो निर्वृतिश्रीप्रियत्वं
नित्यानन्दोदयसहचरोद्भासि सौख्यं बभाज ॥ ६९ ॥
रुद्ध्वा वाक्चित्तयोगौ प्रभुरपि नियतं बादरौ बादरेण
योगेनाङ्गेन सूक्ष्मावरुणदथ तकौ मङ्क्षु सूक्ष्मेण तेन ।
ध्यात्वा सूक्ष्मक्रियाऽऽख्यं दलिततनुवपुर्योगमन्यं तृतीयं
शुक्लध्यानं तुरीयं स्म भजति तदनूत्सन्नसर्वक्रियं सः ॥ ७० ॥
पञ्चह्रस्वस्वरोक्तिक्षणमितिकलिते पूरितेऽस्मिंस्तदानीं
प्रक्षीणाशेषकर्मा नवशतयतिभिः सार्धमुच्छिन्नमोहैः ।
सिद्धानन्तावतुष्कः प्रकृतिसरलताशालिना वर्त्मना च
निर्लेपालाबुवत् स प्रभुरगमदयं लोकनीराग्रभागम् ॥ ७१ ॥
यन्मानुष्यकजन्मसु प्रतिभवं तुच्छं मया भङ्गुरं
किञ्चित् सौख्यमुदारसारमनसा दत्तं जनेभ्योऽधिकम् ।
तेनैवेदमभङ्गुरं गुरुतरं सारं समासादितं
मत्वैवं प्रददौ तदा प्रभुरयं तन्नारकेभ्योऽपि शम् ॥ ७२ ॥
याते षोडशधर्मचक्रिणि महानन्दाभिधाने पुरे
शोकावेशविसंस्थुलोऽपि मघवा तुष्टाव चेत्थं प्रभुम् ।
संसाराम्बुनिधौ पतन्तमुदयद्दुःखौघनक्राऽऽकुले
तीर्थाधीश्वर ! तारयिष्यति जनं को वा भवन्तं विना ? ॥७३॥
पापोलूककुलैकविप्रियविधौ बद्धोद्यमे सर्वदा

निर्वाणामरभूधरेण पिहिते देवे जगच्चक्षुपि ।
मिथ्यात्वोद्धतपङ्कशोषकरणे त्वय्येव नाथे हहा !
लोको लोचनवर्जितः कथमयं भावी भवारण्यगः ? ॥ ७४ ॥
पुत्राभावनरेन्द्रमानविगमव्याधिप्रभेदोदय-
दारिद्र्यानलहेतिसंहतिशतैर्दंदह्यमानं विभो ! ।
संतोषामृतकूपवर्जितमिमं तृष्णासमुल्लासकं
कस्त्वां जीवनदं विना शमयिता संसारकान्तारकम् ? ॥ ७५ ॥
रात्रिश्चन्द्रमसं विनोदवसितं दीपं विना भास्वरं
कासारः कमलं विना ननु दिनं प्रद्योतनं तं विना ।
भूपालोऽपि नयं विना जिनपते ! ज्ञानं विवेकं विना
यद्वद् नैव विभाति देव ! भुवनं तद्वद् भवन्तं विना ॥ ७६ ॥
इत्थं नाथं स्तुवंस्तं स्वयमपि विलपन् स्वं समालम्ब्य शक्रो
मज्जन्त दुःखवार्धौ विधृतकृतनिजाख्यांश्च संक्रन्दनांस्तान् ।
संबोध्यैवाभियोग्यैर्द्रुतमपि विबुधैर्देवदारूणि देवो-
द्यानादानाय्य वृत्तां स्म रचयति चितां प्राग्दिशि श्रीजिनस्य॥७७॥
अपाच्यामिक्ष्वाकन्वयभवमुनीनां विरचिता
चिता गीर्वाणैस्तैर्झगिति चतुरस्राऽथ चतुरैः ।
परेषां वारुण्यां ककुभि च महानन्दलयिनां
प्रभूणामादेशाद् विदधति न किं किङ्करजनाः ? ॥ ७८ ॥
संस्नाप्य क्षीरवार्धेर्विमलतरजलैश्चन्दनैः संविलिप्य
वासोभिर्देवदूष्यैरमृतकरकरप्रोज्ज्वलैः संविभूष्य ।
देवैरभ्यर्च्य पुष्पैः स्वयमपि मघवा स्वामिदेहं तथैव
कृत्वाऽन्याङ्गानि चान्ये सपदि दिविषदो याप्ययानेष्वमांस्ते॥७९॥
उद्दधार शिबिकां शतक्रतुः स्वामिनः स्वशिरसा विषादभाक् ।
द्वे तु ये च शिविके पृथक् पृथक् ते सहस्रममराः समुद्दधुः ॥ ८० ॥
पौलोम्यादिकदेवतासु ददतीपूच्चैःस्वरं रासकान्
गन्धर्वप्रकरे पुरः कलरवं संगीतकं कुर्वति ।
धामोद्यन्दनमालिकाः सरभसं तन्वत्सु देवेष्वलं
रङ्गं केषुचिदुत्सृजत्सु मनसः कार्श्मीरपङ्कच्छलात् ॥ ८१ ॥

स्वाम्यमेऽगुरुजं वहत्सु वहलं धूपं पुनः केषुचिद्
गन्धाढ्या अपि केषुचित् सुमनसो मालाः प्रवर्षत्सु च ।
विश्राणेषु विभोरुपर्युपरि च च्छत्रोच्चयं केषुचित्
शेषाः केषुचिदाच्छिनत्सु परतो निःशेषदोषच्छिदे ॥ ८२ ॥
प्रेक्षणस्य समवेक्षणक्षणस्थैर्यमेव दधतः पदे पदे ।
निन्युराशु शिबिकात्रयं चितासन्निधौ सुरपतिः सुराश्च ते ॥८३॥
(त्रिभिर्विशेषकम्)

प्राचीपतिर्न्यधित शान्तिजिनस्य देहं
प्राच्यां समारचितवृत्तमहाचितायाम् ।
अन्ये सुराश्च चतुरस्रचिताद्वयेऽपि
देहान् न्यधुर्मुनिगणस्य परस्य खेदान् ॥ ८४ ॥
वह्निं वह्निकुमारका द्रुततरं तत्राऽमराश्चिक्षिपु-
र्वातं वातकुमारकास्तदपरे कर्पूरधूपानपि ।
उत्पन्ना खलु धूमधोरणिरियं ताभ्यश्चिताभ्यस्त्रिधा
कालुष्यं भुवनत्रयस्य ददतीवाऽभाञ्जिनेन्द्रव्यये ॥ ८५ ॥
वह्नावुच्छ्रयतां समीयुषि मरुत्संपातमात्रादपि
ज्वालानां त्रितयं विनिःसृतमभान् ताभ्यश्चिताभ्यस्ततः ।
भेदं वेदयितुं कथञ्चिदिव सन् तीर्थद्धरान्यात्मनां
त्रित्वं केवलवेदनं गतमिदं लोकत्रयालोकने ॥ ८६ ॥
मेदोधामविवर्जधातुषु शिखिप्लुष्टेषु दुग्धाम्बुभि-
र्देवैर्मेघकुमारकैरतिजवाद् विध्यापितायां चितौ ।
ऊर्ध्वामादित दक्षिणां सुरपतिर्दंष्ट्रामघम्नाश तां
पातालाधिपतिर्जिनस्य चमरो दोषप्रमोपाद्दरः ॥ ८७ ॥
ईशानाधिपतिर्बलिश्च मघवा वामे च दंष्ट्रे तथा-
ऽप्याहिष्टां क्रमतः परे च रदनानाखण्डलाश्चाभितः ।
अर्थान्यादिषताऽमरा नृपतयो भूतिं च रम्यं नरा
रत्नस्तूपमतिष्ठिपन्निति चितिस्थानेऽथ देवेश्वराः ॥ ८८ ॥
वर्षाणां त्रिंश पञ्चविंशतिरभून् कौमारकाले प्रभो-
राज्ये चक्रिपदे व्रते च सकले त्वेवं पुनर्मण्डलम् ।

आसीद् धर्मजिनस्य मुक्तिसमयान् शान्तिप्रभोर्निर्वृतिः
पादन्यूनकपल्यहीनजलधिष्वीतेषु तेषु त्रिषु ॥ ८९ ॥
रत्नस्तूपे लिखित्वेत्यनुपमसुषमासुप्रशस्तां प्रशस्तिं
श्रीशान्तेर्देवराजप्रमुखसुरवरा मङ्क्षु नन्दीश्वरेऽपि ।
ते गत्वाऽष्टाह्निकाया महिमपरमहं संविधायाऽस्तशोकाः
स्वं स्वं स्थानं प्रतीयुः प्रमदसमुदयाऽऽपूर्णचित्ता विमानैः॥९०॥
दुष्कर्माणि निहत्य तीव्रतपसा ज्ञानं विनाशोज्झितं
लब्ध्वा भूवलये विहृत्य सुचिरं भव्यप्रबोधोद्यतः ।
तीर्थे कोटिशिलाख्ययाऽत्र विदिते संप्राप्तसंन्यासको
निर्वाणाभरणीबभूव गणभृच्चक्रायुधोऽपि क्रमात् ॥ ९१ ॥
राज्यं भुक्तवतोऽपि यस्य समभूत् सा चक्रिलक्ष्मीर्वशे
भोगानां विमुखः सुदुर्जयतमं मोहं न्यहन् यः स्फुटम् ।
वित्तिश्रीसहचारिणीं च रमते यः सिद्धिसीमन्तिनीं
कल्याणं स ददातु वः प्रतिदिनं श्रीशान्तिनाथः प्रभुः ॥ ९२ ॥
आसीच्छ्रीगुरुगच्छमौलिमुकुटश्रीमानभद्रप्रभोः
पट्टे श्रीगुणभद्रसूरिसुगुरुर्विज्ञानभाजां गुरुः ।
तच्छिष्येण कृतेऽत्र सर्ग उचितश्रीशान्तिवृत्ते महा-
काव्ये श्रीमुनिभद्रसूरिकविनाऽप्येकोनविंशोऽगमत् ॥ ९३ ॥

इति श्रीमुनिभद्रसूरिकृते श्रीशान्तिनाथचरिते महाकाव्ये
एकोनविंशः सर्गः समाप्तः ॥



प्रशस्तिः ।

कल्याणात्मा सुरगिरिरिवाऽऽक्रान्तलक्षप्रमाणः
श्रीत्युत्कर्षाद् विविधविबुधाधीश्वरैः स्तूयमानः ।
कल्पान्तेऽप्यप्रतिहतिमयं निश्चलत्वं दधानः
सिद्धाकाङ्क्षः स जयति चिरं श्रीबृहद्गच्छगच्छः ॥ १ ॥
भव्याम्भोजविबोधनेन विदितः श्वेताम्बरोद्द्योतकः
सर्वाशाप्रतिरोधकोग्रतमसां प्रध्वंससंपादकः ।
तत्र श्रीमुनिचन्द्रसूरिरभवद् भास्वानिवोद्यद्विभः
सन्मार्गं प्रकटीचकार भगवान् यो जीवमैत्रीं श्रयन् ॥ २ ॥
तत्पट्टाचलपूर्वपर्वतशिरःशृङ्गारतिग्मद्युतिः
स्फूर्जत्कौमुदचन्द्रधामनिहतिप्रख्यातकीर्तिव्रजः ।
तापव्यापदपाकृतिप्रमुदितैरासेव्यमानो भृशं
सच्चक्रैः सततं चिरं स जयति श्रीदेवसूरिप्रभुः ॥ ३ ॥
पट्टे तस्य बभूवुरद्भुतमतिप्रागल्भ्यविभ्राजिनः
श्रीभद्रेश्वरसूरयः शमरसात् कूपारलीलाभृतः ।
लक्ष्मीर्यत्पदवासिनी समभवत् पीयूषबन्धोर्गिरः
प्रीत्येवाऽपरथा कथं द्वयमिदं विन्दन्ति तद्वन्दिनः ? ॥ ४ ॥
सूरिः श्रीविजयेन्दुसूरिरभवत् तत्पट्टनिष्क्रमो
मिथ्यात्वद्विपगानभञ्जनविधौ पञ्चाननस्याग्रजः ।
यं मीमांसकनास्तिकप्रभृतयो मानोन्नता वादिनः
श्रुत्वा सत्पथवर्तिनं जडतयैवाऽऽलम्बिताः कापथम् ॥ ५ ॥
तत्पट्टे प्रथिमानमाप गणभृत् श्रीमानभद्रप्रभु-
श्चित्रं चित्रशिखण्डिजस्य कुरुते यद्बुद्धिरालोकिता ।
चार्वाकं सुकृतानुमापकतया न्यक्कुर्वती सर्वतः
कर्माद्वैतनिदर्शनेन च तथा द्वैतप्रवादं हठात् ॥ ६ ॥

तस्य श्रीगुणभद्रसूरिसुगुरुः पट्टावतंसोऽभवद्
य: श्रीशाहिमुहंमदस्य पुरतः क्ष्मापालचूडामणेः ।
श्लोकव्याकृतिरञ्जितस्य ददतः सौवर्णटङ्कायुतं
ग्राह्यं नैव तपस्विनामिति वदंश्चारित्रमस्थापयत् ॥ ७ ॥
केचिद् व्याकरणे भवन्ति निपुणाः केचित् पुनश्छन्दसि
प्रायः केचन नाटकेषु नितरां तर्केषु केचित् पुनः ।
साहित्ये कतिचित् प्रसन्नमतयोऽलङ्कारपारङ्गमा-
श्च तुर्ये गुणभद्रसूरिसुगुरोः शास्त्रेषु सर्वेष्वपि ॥ ८ ॥
तच्छिष्यो मुनिभद्रसूरिरजनि स्याद्वादिसंमाननः
श्रीपेरोजमहीमहेन्द्रसदसि प्राप्तप्रतिष्ठोदयः ।
तेनेदं निरमायि मन्दमतिना श्रीशान्तिवृत्तं नवं
तत्तज्जन्मसहस्रसंचितमहादुष्कर्मविच्छित्तये ॥ ९ ॥
पूज्यश्रीमुनिदेवसूरिरचितश्रीशान्तितीर्थेश्वर-
प्रख्याताद्भुतकाव्यदर्शनतया काव्यं मयेदं कृतम् ।
उत्सूत्र यदि भावि किञ्चिदपि तद् नाऽऽदेयमेतत् सतां
स्याद् नूनं न च निर्वृतिं रचयतीत्यालोच्य बुद्धयाऽधिकम् ॥१०॥
श्रीमान् हर्षपुरीयगच्छजलधिप्रोल्लासशीतद्युति-
र्वाणीभूषणराजशेखरगुरुः सौजन्यसंवासभूः ।
श्रीशान्तेश्चरितं व्यशोधयदिदं दुष्कर्ममर्मापहं
प्राज्ञैस्त्वैरपि शोध्यमेतदसमं कृत्वा प्रसादं मयि ॥ ११ ॥
अर्हत्पादपयोजसेवनविधौ यो वर्तते हंसवद्
नित्य सद्गुरुभक्त्यगाधसरसीक्रीडोऽच्छपक्षद्वय ।
नीरक्षीरविवेकवत् प्रमनुते योऽधर्मधर्मान्तरं
स श्रीशान्तिजिनेन्द्रकाव्यभणने संरम्भमुद्भावयेत् ॥ १२ ॥
ये दोषान् प्रतिप दयन्ति सुधियः श्रीकालिदासोक्तिषु
श्रीमद्भारविमाघपण्डितमहाकाव्यद्वयेऽप्यन्वहम् ।
श्रीहर्षामृतसूक्तिनैषधमहाकाव्येऽपि ते केवल
यावद्वृत्तविवर्णनेन भगवच्छान्तेश्चरित्रे गुणान् ॥ १३ ॥
मिथ्यात्वाञ्चितकाव्यपञ्चकमिदं व्याचक्षते सूरयो

यद्वन् प्राथमकल्पिकाय सततं व्युत्पत्तिसंप्राप्तये ।
तद्वच्छान्तिजिनाधिनाथचरितं सम्यक्त्वसंवासना-
वासावासितमानसा यदि ततः किं स्याद् नवा वाञ्छितम्?॥१४॥
अनुष्टुब्मानेन प्रविरचितवर्णैकगणनं
प्रवित्त ग्रन्थाग्रं सकलमपि काव्ये जिनपतेः ।
शतानि द्वाषष्टिं बुधसमुदयाः ! संमदभृतः !
परं द्वासप्तत्या समधिकतमानि स्वयमिदम् ॥ १५ ॥
प्रोक्तो लोकत्रितयगुरुभिर्द्वेषरागैकबीज-
व्यामोहस्य क्षयविरचनात् प्राप्तविज्ञानतत्त्वैः ।
यावद्धर्मो जगति जयति श्रीमतः शान्तिनाथ-
स्यैतत् तावच्चरितमनिशं वाच्यमानं सुधीभिः ॥ १६ ॥
अन्तरिक्षरजनीहृदीश्वरमहाव्रतशशिसंख्यवत्सरे ।
वैक्रमे शुचितपोजयातिथौ शान्तिनाथचरितं व्यरच्यत ॥ १७ ॥

॥ इति श्रीशान्तिनाथचरित्रं समाप्तम् ॥

